# THE YOGA UPANISHADS

WITH THE COMMENTARY OF

## SRI UPANISHAD-BRAHMA-YOGIN

EDITED BY

PANDIT A. MAHADEVA SASTRI, B.A

DIRECTOR, ADYAR LIBRARY, ADYAR, MADRAS

PUBLISHED FOR THE ADYAR LIBRARY

(THEOSOPHICAL SOCIETY)

1920

अष्टोत्तरशतोपनिषत्सु

# योग-उपनिषदः

श्री उपनिषद्ब्रह्मयोगिविरचितव्याख्यायुताः

अडयार्-पुस्तकालयाध्यक्षेण

**अ. महादेवशास्त्रिणा**

संपादिताः

अडयार्-पुस्तकालयार्थं

प्रकटीकृताश्च

ॐ नमो
ब्रह्मादिभ्यो
ब्रह्मविद्यासंप्रदायकर्तृभ्यो
वंशऋषिभ्यो
नमो गुरुभ्यः

**DEDICATED TO**
**Brahma and the Rishis,**
**The Great Teachers**
**Who handed down Brahmavidya**
**through Generations**

## PREFACE

It will be remembered that Dr. F. O. Schrader, my predecessor in office, soon after taking charge of the Library in 1905, projected a scheme for the publication of the texts of the Minor Upanishads comprised in the collection of the well known One-Hundred-and-Eight Upanishads and brought out in 1912 the first volume of the Minor Upanishads, containing all those Upanishads which treat of Saṃnyāsa. After another interval of eight years I have the pleasure of issuing the second volume in the series comprising the Upanishads which treat of Yoga. This long interval in the publication of the first and the second volumes is due to several causes, not the least of which is the outbreak of war and the immediate removal of Dr. Schrader to the camp of war-prisoners. The interval though regrettable in many ways has proved beneficial in one respect. Since I took charge of the Library in 1916, I have been able to collect more materials and have also had the fortune of coming by a commentary of a single author on all the 108 Upanishads. This commentary by Sri Upanishad-Brahma-Yogin of a Kanchi Advaita Mutt, which is as clear and full as necessary, given side by side with the

text of the Upanishads will be valued more by the reader than the editor's own notes or those compiled by him from extraneous works, such as were appended at the end of the first volume by Dr. Schrader. The plan of giving the commentary along with the text has rendered it desirable to give in the body of the text that reading which is endorsed by the commentary and to note at foot only those variants which are found in the MSS. of the southern recension, reserving all other critical notes to the volumes of translations which will follow.

The materials available for a critical edition of the 108 Upanishads have been described in full by Dr. Schrader in the first volume, and it only remains for me to say that more MSS. have been since collected under each head. The MSS. on which the edition of the Upanishads contained in the present volume is based are the following:

अ — Adyar Library IX K 7—Devanāgari MS. containing Minor Upanishads with Appayadîkshita's commentary.

अ १. — Adyar Library XXXIV B 2—A Grantha MS. of 108 Upanishads.

क. — A Grantha MS. of 108 Upanishads lent by Mr. V. Kachchapesvara Iyer, B.A., B.L., of Vellore.

उ, उ १.— Adyar Library XXXVI E 1 and XXXIV I 6—Two copies of 108 Upanishads with Śrī Upanishad-Brahmendra-Yogin's

commentary in Devanāgari and Grantha characters respectively.

Except for any unforeseen cause, there will be no occasion for delay in the publication of the succeeding volumes of the text and the commentary according to the present plan. One volume at least of the size of the present one may be issued every year. I can, however, make no promise at present as to when the first volume of the English translation of these Upanishads will appear.

ADYAR .
*August, 1920* A. MAHADEVA SASTRI

# विषयसूचिका

## अद्वयतारकोपनिषत्


| | |
|---|---|
| तारकयोगाधिकारः | १ |
| योगोपायतत्फलम् | २ |
| तारकस्वरूपम् | २ |
| लक्ष्यत्रयानुसन्धानविधिः | ३ |
| अन्तर्लक्ष्यलक्षणम् | ३ |
| बहिर्लक्ष्यलक्षणम् | ४ |
| मध्यलक्ष्यलक्षणम् | ४ |
| द्विविधं तारकम् | ६ |
| तारकयोगसिद्धिः | ६ |
| मूर्तामूर्तभेदेन द्विविधं अनुसन्धेयम् | ६ |
| तारकयोगस्वरूपम् | ७ |
| शाम्भवीमुद्रा | ७ |
| अन्तर्लक्ष्यविकल्पाः | ८ |
| आचार्यलक्षणम् | ९ |
| ग्रन्थाभ्यासफलम् | ९ |


## अमृतनादोपनिषत्


| | |
|---|---|
| श्रवणाद्युपायः | ११ |
| प्रणवोपासना | १२ |

| | |
|---|---|
| प्रत्याहारलक्षणम् | १४ |
| षडंगयोगः | १४ |
| प्राणायामादिफलम् | १४ |
| त्रिविधप्राणायामः | १५ |
| प्राणायामलक्षणम् | १५ |
| रेचकलक्षणम् | १६ |
| पूरकलक्षणम् | १६ |
| कुम्भकलक्षणम् | १६ |
| धारणालक्षणम् | १७ |
| तर्कलक्षणम् | १७ |
| समाधिलक्षणम् | १८ |
| समाधिसिद्ध्युपायः | १८ |
| योगस्य नित्यकर्तव्यता | २० |
| स्वप्राप्तिद्वाराणि | २० |
| भयादीनां त्यागः | २१ |
| अभ्यासफलम् | २२ |
| योगचिन्त्यम् | २२ |
| चिन्तनाप्रकारः | २३ |
| श्वासप्रमाणम् | २३ |
| प्राणादीनां स्थानानि | २४ |
| तेषां वर्णभेदाः | २४ |
| परमफलम् | २४ |


## अमृतबिन्दूपनिषत्


| | |
|---|---|
| मन एव बन्धमोक्षयोः कारणम् | २६ |
| मनोनिरोधो मोक्षोपायः | २७ |

ब्रह्मज्ञानेन ब्रह्मभावप्राप्तिः . . . २८
सविशेषब्रह्मानुसन्धानेन निर्विशेषब्रह्माधिगमः . . २८
आत्मन एकत्वम् . . . . ३०
आत्मनो जन्मनाशराहित्यम् . . . ३१
निरुपाधिकात्मदर्शनम् . . . . ३१
शब्दब्रह्मध्यानेन परब्रह्माधिगमः . . . ३२
सर्वभूतप्रत्यगात्मन एकत्वम् . . . ३३
तत्साक्षात्कारसाधनं ध्यानम् . . . ३४

## क्षुरिकोपनिषत्

योगाधिकारः . . . . ३७
आसनप्राणायामौ . . . . ३७
प्रत्याहारः . . . . . ३८
धारणाध्यानसमाधयः . . . . ४०
योगसाधनं तदधिकारी च. . . . ४३
सामाधिफलम् . . . . ४४

## तेजोबिन्दूपनिषत्

### प्रथमोऽध्यायः

निर्विशेषतेजोबिन्दुस्वरूपम् . . . ४५
निर्विशेषब्रह्मावगतिसाधनानि . . . ४६
परवस्तुन एव सविशेषत्वादिभावाः . . . ४८
परब्रह्मावगतिसाधनं पञ्चदशाङ्गयोगः . . ५१
पञ्चदशाङ्गानां लक्षणानि . . . ५१
योगाभ्यासेन ब्रह्मभावनम् . . . ५५
समाधिविघ्नशमनम् . . . . ५५
समाधिना शुद्धब्रह्मपदप्राप्तिः . . . ५६

द्वितीयोऽध्यायः

सर्वस्य अखण्डैकरसत्वम् . . . ९८
सर्वस्य चिन्मात्रत्वभावना . . . ६०
विद्याफलम् . . . . . ६३

तृतीयोऽध्यायः

आत्मनः सच्चिदानन्दब्रह्मत्वानुभवः . . . ६४
आत्मनि सर्वप्रविभक्तरूपाभावानुभवः . . ७०
स्वेतरस्य सर्वस्य असत्त्वानुभवः . . . ७१
अहंब्रह्मास्मीत्यात्ममन्त्राभ्यासः . . . ७२

चतुर्थोऽध्यायः

जीवन्मुक्तिः—प्रत्यगभिन्नब्रह्मभावापत्तिः . . ७४
विदेहमुक्तिः—निष्प्रतियोगिकस्वमात्रब्रह्ममात्रावस्थानम् . ७८
स्वात्मनिष्ठाविधिः . . . . ८९

पञ्चमोऽध्यायः

स्वात्मयाथात्म्यम् . . . . ८६
अनात्मनः सर्वस्य मिथ्यात्वम् . . . ८८
अहंवस्तुनः परमात्मत्वम् . . . ९४
अविद्यातत्कार्यप्रपञ्चस्य निष्प्रतियोगिकाभावरूपत्वम् . ९६
सङ्कल्पादिरूपं मन एव सर्वानर्थहेतुः . . . ९८

षष्ठोऽध्यायः

सर्वस्य सच्चिदानन्दत्वम् . . . . १००
सर्वस्य ब्रह्मत्वम् . . . . १०१
ब्रह्मणः निष्प्रतियोगिकस्वमात्रत्वम् . . . १०५

स्वातिरिक्तप्रपञ्चस्यासत्त्वम् . . . १०८
अहंब्रह्मेति भावनाविधिः . . . . ११२
शास्त्रसंप्रदायविधिः . . . . ११५

## त्रिशिखिब्राह्मणोपनिषत्

आत्मब्रह्मविषये प्रश्नाः . . . . ११६
सर्वस्य शिवत्वम् . . . . ११७
ब्रह्मणः अखिलजगदुत्पत्तिः . . . ११७
एकस्य पिण्डस्य बहुधा विभागः . . . ११८
आकाशादीनामंशभेदाः . . . . ११८
तेषां विषयभेदाः . . . . ११९
सूक्ष्मभूतमात्राः . . . . ११९
आध्यात्मिकादिविभागः . . . . ११९
ज्ञातृव्यापाराभिव्यक्तिः . . . . १२०
ब्रह्मणः सकाशात् पञ्चीकरणान्ता सृष्टिः . . १२१
चराचरात्मकविश्वसृष्टिः . . . . १२२
अवस्थाचतुष्टयम् . . . . १२३
दक्षिणोत्तरायणगतिः . . . . १२५
सद्योमुक्तिप्रापकं ज्ञानम् . . . . १२६
ज्ञानोपायभूतो योगः . . . . १२७
कर्मज्ञानयोगौ . . . . १२७
निर्विशेषब्रह्मज्ञानोपायः अष्टांगयोगः . . . १२८
दशविधयमनियमाः . . . . १२९
हठयोगरीत्या आसनानि . . . . १२९
नाडीशुद्धिपूर्वकप्राणायामविधिः . . . १३२

अग्निमण्डलस्वरूपम् . . . . १३२
नाभिस्थानम . . . . १३३
नाडीचक्रे जीवभ्रमणम् . . . . १३३
कुण्डलिनीस्थानं तद्व्यापारश्च . . . १३४
देहमध्यस्थनाडीकन्दस्वरूपम् . . . १३४
नाडीचरा वायवः . . . . १३६
नाडीज्ञानपुरस्सरा नाडीशुद्धिः . . . १३८
योगाभ्यासस्थलं तद्विधिश्च . . . १३८
चिन्मुद्रासहितकेवलकुंभकम् . . . १३८
सहितप्राणायामः . . . . १३९
नाडीशोधकप्राणायामः . . . . १३९
प्राणायामफलम् . . . . १४०
प्राणधारणात् रोगनाशः . . . . १४१
षण्मुखीमुद्रया मनोजयः . . . . १४२
प्राणगतिः . . . . . १४२
प्राणगतिज्ञानेन योगावाप्तिः . . . १४३
मर्मस्थानेषु प्राणस्य प्रत्याहारः . . . १४४
धारणाप्रकारः . . . . १४५
देहावयवेषु पञ्चभूतधारणम् . . . १४५
पृथिव्यादिषु अनिरुद्धादिध्यानं तत्फलं च . . १४६
परमात्मध्यानं तत्फलं च . . . . १४७
तुरीयातीतं वासुदेवचैतन्यम् . . . १४७
सगुणध्यानम् . . . . १४८
निर्गुणध्यानम् . . . . १४९
सविशेषज्ञानस्यापि मुक्तिहेतुत्वम् . . . १४९

# दर्शनोपनिषत्

**प्रथमखण्डः०**


जीवन्मुक्तिसाधनं अष्टांगयोगः . . . १९२
अष्टांगोद्देशः . . . . १९३
दशविधयमः . . . . १९३
अहिंसा . . . . . १९३
सत्यम् . . . . . १९३
अस्तेयम् . . . . . १९४
ब्रह्मचर्यम् . . . . . १९४
दया . . . . . १९४
आर्जवम् . . . . . १९४
क्षमा . . . . . १९५
धृतिः . . . . . १९५
मिताहारः . . . . . १९५
शौचम् . . . . . १९५
ब्रह्मात्मवेदनविधिः . . . . १९६


**द्वितीयखण्डः**


दशविधनियमः . . . . १९६
तपः . . . . . १९६
सन्तोषः . . . . . १९७
आस्तिक्यम् . . . . १९७
दानम् . . . . . १९७
ईश्वरपूजनम् . . . . १९७
सिद्धान्तश्रवणम् . . . . १९७
ह्रीः . . . . . १९८

मतिः . . . . . १९८
जपः . . . . . १९८

तृतीयखण्डः

आसनानि नव . . . . . १९९
स्वस्तिकम् . . . . . १९९
गोमुखम् . . . . . १९९
पद्मम् . . . . . १९९
वीरासनम् . . . . . १९०
सिंहासनम् . . . . . १९०
भद्रासनम् . . . . . १९०
मुक्तासनम् . . . . . १९०
मयूरासनम् . . . . . १९१
सुखासनम् . . . . . १९१
आसनजयफलम् . . . . . १९१

चतुर्थखण्डः

देहप्रमाणम् . . . . . १९१
नाडीपरिगणनम् . . . . . १९२
कुण्डल्याः स्थानं स्वरूपं च . . . १९३
नाडीस्थानानि . . . . . १९३
नाडीषु वायुसञ्चारः . . . . १९४
वायुव्यापाराः . . . . . १९५
नाडीदेवताः . . . . . १९६
नाडीषु चन्द्रसूर्यसंचारः . . . . १९६
नाडीषु संवत्सरात्मकप्राणसूर्यसंचारः . . . १९६
अन्तस्तीर्थप्राशस्त्यम् . . . . १९७

आत्मनि शिवदृष्टिः . . . . १६९
ब्रह्मदर्शनेन ब्रह्मभावः . . . . १६९

पञ्चमखण्डः

नाडीशोधनम् . . . . १७०
नाडीशुद्धिचिह्नानि . . . . १७२
स्वात्मशुद्धिः . . . . . १७२

षष्ठखण्डः

प्राणायामलक्षणम् . . . . १७२
पूरकादिलक्षणम् . . . . १७४
प्राणायामसिद्धयः . . . . १७४
रोगनिवर्तकप्राणायामभेदाः . . . १७५
षण्मुखीमुद्राऽभ्यासेन वायुजयः . . . १७६
वायुजयचिह्नानि . . . . १७८
वायुजयेन रोगपापविनाशवैराग्यपूर्विका ज्ञानोत्पत्तिः . १७८

सप्तमखण्डः

प्रत्याहारलक्षणं तद्भेदाश्च . . . . १७९
प्रत्याहारफलम् . . . . १८०
वायुधारणात्मकप्रत्याहारः . . . १८०
वेदान्तसंमतप्रत्याहारः . . . . १८०

अष्टमखण्डः

पञ्चभूतेषु धारणा . . . . १८१
आत्मनि धारणा . . . . १८२

नवमखण्डः

सविशेषब्रह्मध्यानम् . . . . १८२
निर्विशेषब्रह्मध्यानम् . . . . १८३
ध्यानफलम् . . . . . १८३

दशमखण्डः

समाधिस्वरूपम् . . . . १८३
ब्रह्ममात्रावशेषः . . . . १८४
उपसंहारः . . . . . १८५

## ध्यानबिन्दूपनिषत्

ब्रह्मध्यानयोगमहिमा . . . . १८६
ब्रह्मणः सूक्ष्मत्वं सर्वव्यापकत्वं च . . . १८७
प्रणवस्वरूपम . . . . १८९
प्रणवध्यानविधिः . . . . १९०
प्राणायामपूर्वकं प्रणवध्यानम् . . . १९१
प्रकारान्तरेण प्रणवध्यानम् . . . १९२
सविशेषब्रह्मध्यानम् . . . . १९२
त्रिमूर्तिध्यानम् . . . . १९३
हृदये ध्यानं तत्फलं च . . . . १९४
ब्रह्मायतने प्राणविलापनम . . . १९५
षडंगयोगः . . . . १९६
आसनचतुष्टयम् . . . . १९६
योनिस्थानम् . . . . १९७
मूलाधारादिचतुश्चक्रस्वरूपम् . . . १९८
नाडीचक्रम . . . . . १९८

प्राणादिदशवायवः . . . . १९९
जीवस्य प्राणापानवशत्वम् . . . २००
योगकाले प्राणापानैक्यम् . . . २००
अजपाहंसविद्या . . . . २००
कुण्डलिनीबोधनेन मोक्षद्वारविभेदनम् . . . २०१
ब्रह्मचर्यादिना कुण्डलिनीबोधः . . . २०२
बन्धत्रयम् . . . . . २०३
खेचरीमुद्राऽभ्यासः . . . . २०४
खेचर्यभ्यासेन वज्रोळिसिद्धिः . . . २०४
द्विविधविन्द्वैक्यबोधतो जीवन्मुक्तत्वम् . . . २०५
महामुद्राऽभ्यासः . . . . २०६
हृदये आत्मसाक्षात्कारः . . . . २०७
नादानुसन्धानतः आत्मदर्शनम् . . . २१०

## नादबिन्दूपनिषत्

वैराजप्रणवस्वरूपम् . . . . २१४
वैराजविद्याफलम् . . . . २१५
प्रणवस्य प्रधानमात्राचतुष्टयस्वरूपम् . . . २१६
प्रणवस्य व्यष्टिसमष्ट्यात्मकद्वादशमात्राभेदविवरणम् . २१७
उपासकानां तत्तन्मात्राकालोत्क्रमणफलम् . . २१७
निर्विशेषब्रह्मस्वरूपं, तज्ज्ञानफलं च . . . २१८
ज्ञानिनः प्रारब्धकर्मभावाभावविचारः . . . २१९
तुरीयतुरीयाधिगमोपायभूतं नादानुसन्धानम् . . २२१
नादस्य मनोनियमनसामर्थ्यम् . . . २२३
उपेयनादस्वरूपम् . . . . २२४
नादारूढयोगिनां विदेहमुक्तिलाभः . . . २२५

# पाशुपतब्रह्मोपनिषत्

## पूर्वकाण्डः


जगन्नियन्तृविषयाः सप्तप्रश्नाः . . . २२७
सप्तप्रश्नानामुत्तराणि . . . . २२८
सृष्टियज्ञे कर्त्रादिनिरूपणम् . . . २३
नादानुसन्धानयज्ञः . . . . २३
परमात्मनो हंसत्वनिरूपणम् . . . २३
यज्ञसूत्रब्रह्मसूत्रयोः साम्यम् . . . २३१
ब्रह्मयज्ञो ब्राह्मणाधिकारिकः . . . २३२
प्रणवहंसस्य ब्रह्मयज्ञत्वम् . . . . २३२
ब्रह्मसन्ध्याक्रियारूपो मनोयागः . . . २३३
हंसप्रणवाभेदानुसन्धानं अन्तर्यागः . . . २३३
षण्णवतिहंससूत्राणि . . . . २३५
हंसात्मविद्यैव मुक्तिः . . . . २३६
बाह्यापेक्षया आन्तरयागस्य श्रेष्ठत्वम् . . . २३७
ज्ञानयज्ञरूपोऽश्वमेधः . . . . २३८
तारकहंसज्योतिः . . . . २३८


## उत्तरकाण्डः


अखण्डवृत्त्या ब्रह्मसम्पत्तिः . . . २३९
परमात्मनि जगदाविर्भावो मायिकः . . . २४०
हंसार्कप्रणवध्यानविधिः . . . . २४१
परचित एव करणप्रेरकत्वम् . . . २४२
आत्मान्यस्य मायाकल्पितत्वम् . . . २४३
वस्तुतः स्वात्मनि मायाऽसम्भवः . . . २४३
आत्मज्ञानिनः ब्रह्मात्मत्वम् . . . २४४

सत्यादिपरविद्यासाधनम् . . . . २४५
स्वज्ञस्य क्वचिद्भ्रमनाभावः . . . . २४६
ब्रह्मज्ञानिनः अभक्ष्याभावः . . . २४६
ज्ञानिनः स्वसर्वात्मत्वदर्शनम् . . . २४७

## ब्रह्मविद्योपनिषत्

ब्रह्मविद्यारहस्यार्थप्रणवब्रह्मसूचनम् . . . २४९
प्रणवमात्राचतुष्टयप्रपञ्चनम् . . . २५०
सुषुम्नायोगेन नाडीसूर्ययोः भेदनम् . . . २५१
प्रणवनादलयेन मोक्षप्राप्तिः . . . २५१
जीवस्वरूपनिरूपणम् . . . . २५२
बन्धमोक्षकारणनिरूपणम् . . . २५२
हंसविद्ययैव परमेश्वरप्राप्तिः . . . २५४
हंसविद्यागुरुभक्तिविधिः . . . . २५५
आत्मनःश्रुत्याचार्यैकगम्यत्वम् . . . २५५
सकलनिष्कलदेवताविवेकः . . . २५६
योगस्य परमगोप्यत्वं उत्तमाधिकारिण एव दातव्यत्वं च . २५८
केवलशास्त्रज्ञानवतोऽपि पापपुण्यलेपाभावः . . २५९
त्रिविधा आचार्याः . . . . २५९
प्रणवहंसानुसन्धानात्मकं प्रत्यक्षयजनम् . . २६०
हंसयोगलब्धज्ञानात् सायुज्यप्राप्तिः . . . २६१
हंसोपलब्धिस्थानम् . . . . २६२
हंसमन्त्रानुस्मरणपूर्वकसमाध्यभ्यासः . . . २६२
हंसस्यासननिरूपणम् . . . . २६३
हंसयोगाभ्यासक्रमः . . . . २६३
हंसयोगिनाऽनुसन्धेयं आत्मस्वरूपम् . . . २६७

## मण्डलब्राह्मणोपनिषत्


**प्रथमे ब्राह्मणे प्रथमः खण्डः**

आत्मतत्त्वजिज्ञासा . . . . २७३
सूक्ष्माष्टांगयोगप्रतिज्ञा . . . . २७३
चतुर्विधयमः . . . . २७४
नवविधयमनियमः . . . . २७४
आसनादिषडंगविवरणम् . . . . २७५
सूक्ष्मयोगाष्टांगज्ञानफलम् . . . . २७५

**प्रथमे ब्राह्मणे द्वितीयः खण्डः**

देहपञ्चदोषनिरसनम् . . . . २७६
तारकावलोकनं तत्फलं च . . . २७६
लक्ष्यत्रयावलोकनेन तारकप्राप्तिः . . . २७७
अन्तर्लक्ष्यदर्शनम् . . . . २७७
बहिर्लक्ष्यदर्शनम् . . . . २७८
मध्यलक्ष्यदर्शनम् . . . . २७८

**प्रथमे ब्राह्मणे तृतीयः खण्डः**

तारकामनस्कभेदेन द्विविधो योगः . . . २७९
मनोयोगविधिः . . . . २८०
पूर्वतारकम् . . . . . २८०
उत्तरतारकम् . . . . . २८०
उत्तरतारकस्य शाम्भवीपर्यवसानम् . . . २८०
अन्तर्लक्ष्यलक्षणम् . . . . २८१

**प्रथमे ब्राह्मणे चतुर्थः खण्डः**

अन्तर्लक्ष्ये वादिविप्रतिपत्तिः . . . २८१

सर्वलक्ष्यानुस्यूतात्मदर्शनविधिः . . . २८२
आत्मनिष्ठस्य ब्रह्मभावप्राप्तिः . . . २८२

द्वितीये ब्राह्मणे प्रथमः खण्डः

सर्वाधारज्योतिरात्मनः अन्तर्लक्ष्यत्वम् . . २८३
ज्योतिरात्मज्ञानफलम् . . . . २८३
शाम्भव्या तदधिगमः . . . . २८४
पूर्णमादृष्टिविधिः . . . . २८४
पूर्णमादृष्टेः शाम्भवीपर्यवसानम् . . . २८५
मुद्रासिद्धिः तच्चिह्नानि च . . . . २८५

द्वितीये ब्राह्मणे द्वितीयः खण्डः

प्रणवस्वरूपप्रत्यक्प्रकाशानुभवः, तच्चिह्नानि च . . २८६
षण्मुख्या प्रणवाधिगमः . . . . २८६
प्रणवविदः कर्मलेपाभावः . . . २८६
उन्मन्यवस्थाद्वारा अमनस्कसिद्धिः . . . २८७
अमनस्कपूजाप्रकारः . . . . २८७

द्वितीये ब्राह्मणे तृतीयः खण्डः

ब्रह्मानुसन्धानेन कैवल्यप्राप्तिः . . . २८८
ब्रह्मवित्स्वरूपम् . . . . २८९
सुषुप्तिसमाध्योः भेदः . . . . २८९
ब्रह्मविदो ब्रह्मभावः . . . . २८९
सङ्कल्पत्यागपूर्वकपरमात्मध्यानेन मुक्तिसिद्धिः . . २९०

द्वितीये ब्राह्मणे चतुर्थः खण्डः

जाग्रदादिपञ्चावस्थाः . . . . २९०
प्रवृत्तिसङ्कल्पः . . . . २९०

निवृत्तिसङ्कल्पः . . . . २९१
संसारतरणमार्गः . . . . २९१
मनसो बन्धमोक्षहेतुत्वनिरूपणम् . . . २९२

द्वितीये ब्राह्मणे पञ्चमः खण्डः

निर्विकल्पकसमाध्यभ्यासेन ब्रह्मविद्वरत्वप्राप्तिः . . २९३
अपरिच्छिन्नानन्दरूपब्रह्मावाप्तिः . . . २९३

तृतीये ब्राह्मणे प्रथमः खण्डः

शाम्भवीमुद्राऽन्वितं अमनस्कम . . . २९४
परमात्मप्रत्ययलक्ष्यदर्शनेन अमनस्कप्राप्तिः . . २९४
ततः संसारनिवृत्तिः . . . . २९५
तारकमार्गेण करणविलयद्वारा मनोनाशः . . २९५

तृतीये ब्राह्मणे द्वितीयः खण्डः

उन्मनीप्राप्त्या योगिनो ब्रह्मात्मभवनम . . २९६

चतुर्थं ब्राह्मणम्

व्योमपञ्चकज्ञानं तत्फलं च . . . २९७
राजयोगसर्वस्वक्रोडीकरणम . . . २९८

पञ्चमं ब्राह्मणम्

परमात्मनि मनोलयाभ्यासविधिः . . . २९८
अमनस्काभ्यासेन ब्रह्मावस्थानसिद्धिः . . . २९९
अमनस्कसिद्धस्य महिमा . . . . ३००

## महावाक्योपनिषत


अपरोक्षानुभवोपदेशाधिकारी . . . ३०१
विद्याऽविद्ययोः स्वरूपं कार्यं च . . . ३०२
हंसविद्याऽभ्यासेन परमात्माविर्भावः . . . ३०३
तत्त्वज्ञानवृत्तिस्वरूपम् . . . . ३०४
प्रणवहंसज्योतिर्ध्यानम् . . . . ३०५
हंसज्योतिर्विद्याफलम् . . . . ३०६


## योगकुण्डल्युपनिषत

### थमोऽध्यायः


वायुजयोपायत्रयम् . . . . ३०७
मिताहारः . . . . . ३०८
पद्मवज्रासने . . . . . ३०८
शक्तिचालनं तत्साधनद्वयं च . . . ३०८
सरस्वतीचालनम् . . . . ३०९
प्राणायामभेदाः . . . . ३१०
सूर्यकुंभकः . . . . . ३१०
उज्जायीकुंभकः . . . . ३११
शीतलीकुंभकः . . . . ३११
भस्त्रकुंभकः . . . . . ३१२
बन्धत्रयविधिः . . . . ३१२
मूलबन्धः . . . . . ३१३
उड्डियाणबन्धः . . . . ३१३
जालन्धरबन्धः . . . . ३१४
अभ्यासकुंभकसङ्ख्यानियमः . . . ३१४

योगाभ्यासविघ्नाः तत्त्यागश्च . . . ३१४
योगाभ्यासेन कुण्डलिनीबोधः . . ८. ३१५
ग्रन्थित्रयभेदेन कुण्डलिन्याः सहस्रारगमनम् . . ३१६
प्राणादिविलयः विलीनानां बहिःप्रसरश्च . . ३१७
समाधौ सर्वस्य चिन्मात्रत्वानुभवः . . . ३१८
समाधियोगः . . . . . ३२०

**द्वितीयोऽध्यायः**

खेचरीविद्या . . . . . ३२१
खेचरीमन्त्रराजोद्धारः . . . . ३२४
मन्त्रजपात् खेचरीसिद्धिः . . . ३२४
खेचर्यभ्यासक्रमः . . . . ३२५

**तृतीयोऽध्यायः**

मेळनमन्त्रः . . . . . ३२८
अमावास्याप्रतिपत्पूर्णिमाभेदेन दृष्टिभेदः . . ३२९
पूर्णिमादृष्टिविधिः . . . . ३२९
प्राणाभ्यासात् विराड्रूपापत्तिः . . . ३३१
अभ्यासयोगेन विना न स्वात्मप्रकाशः . . ३३२
गुरूपदेशात् ब्रह्मज्ञानम् . . . . ३३२
वाग्वृत्त्यधिष्ठानं ब्रह्म . . . . ३३३
विश्वादिप्रपञ्चाधिष्ठानं ब्रह्म . . . ३३३
निष्प्रतियोगिकं ब्रह्म . . . . ३३४
ब्रह्मसिद्ध्युपायभूतं ध्यानम् . . . ३३४
जीवन्मुक्तिविदेहमुक्ती . . . . ३३५

## योगचूडामण्युपनिषत्


योगाङ्गपटूकम् . . . ३३७
योगसिद्धये आवश्यकं देहतत्त्वज्ञानम् . . . ३३८
मूलाधारादिचक्राणि . . . . ३३८
योनिस्थाने परमज्योतिर्दर्शनम . . . ३३८
स्वाधिष्ठानादिचक्रलक्षणम् . . . ३३९
नाडीमहाचक्रम् . . . . ३४०
नाडीस्थानानि . . . . ३४१
नाडीसञ्चारिवायवः तद्व्यापाराश्च . . . ३४१
प्राणचलनाचलनाभ्यां जीवचलनाचलने . . ३४२
अजपागायत्र्या अनुसन्धानम् . . . ३४३
कुण्डलिन्या मोक्षद्वारभेदनम् . . . ३४३
बन्धत्रयम् . . . . . ३४५
खेचरीमुद्रा . . . . . ३४६
वज्रोळ्यादियोगिलक्षणम् . . . . ३४७
महामुद्रा . . . . . ३४९
प्रणवजपः . . . . . ३५०
प्रणवार्थरूपं ब्रह्म . . . . ३५०
प्रणवावयवानां प्रत्येकमर्थः . . . ३५२
तुरीयोङ्काराग्रविद्योतब्रह्म . . . ३५३
प्रणवार्थतुरीयहंसः . . . . ३५४
केवलात्मप्रकाशकप्रणवजपः . . . ३५५
प्रणवानुष्ठायिनोऽपि प्राणजय आवश्यकः . . ३५५
नाडीशुद्धितः प्राणायामसिद्धिः . . . ३५६
प्राणायामलक्षणम् . . . . ३५७
नाडीशोधनम् . . . . ३५७

मात्रानियमपूर्वकः प्राणायामः . . . ३५७
योगांगानां प्रत्येकं फलं तत्तारतम्यं च . . ३५९
षण्मुखीमुद्राऽभ्यासेन नादाभिव्यक्तिः . . . ३६०
प्राणाभ्यासः सर्वरोगनिरासकः . . . ३६१
प्राणाभ्यासे इन्द्रियप्रत्याहार आवश्यकः . . ३६१

## योगतत्त्वोपनिषत्

अष्टांगयोगजिज्ञासा . . . . ३६३
योगतत्त्वस्य दुर्लभत्वम् . . . . ३६४
परस्यैव जीवत्वम . . . . ३६५
प्राकृतगुणवियुक्तस्य जीवस्य परमात्मत्वम् . . ३६६
ज्ञानयोगयोः युगपदभ्यासः . . . ३६६
ज्ञानस्वरूपम् . . . . ३६६
मन्त्रयोगादिः चतुर्विधो योगः . . . ३६७
आरम्भादयो योगावस्थाः . . . ३६७
मन्त्रयोगलक्षणम् . . . . ३६८
लययोगलक्षणम . . . . ३६८
हठयोगांगानि . . . . ३६८
यमनियमासनेषु प्रधानांगानि . . . ३६९
योगाभ्यासविघ्नत्यागः . . . . ३६९
प्राणायामोचितमठासनयोः स्वरूपम् . . . ३७०
प्राणायामारम्भप्रकारः . . . . ३७०
मात्रानियमपूर्वकः प्राणायामः . . . ३७१
आन्तराळिकफलं नाडीशुद्धिः तच्चिह्नानि च . . ३७१
योगाभ्यासकाले आहारादिनियमः . . . ३७२
केवलकुम्भकसिद्धिः . . . . ३७२
प्रस्वेदादिसिद्धयः . . . . ३७३

योगप्रतिबन्धनाशाय प्रणवजपः—आत्मावस्था . . ३७४
घटावस्था . . . . . ३७५
प्रत्याहारलक्षणम् . . . . ३७५
धारणास्वरूपम् . . . . ३७५
धारणासिद्धयः तद्गोपनविधिश्च . . . ३७६
परिचयावस्था . . . . ३७७
पञ्चभूतमण्डलेषु पञ्चब्रह्मधारणानि . . . ३७८
सगुणध्यानम् . . . . ३८०
निर्गुणध्यानतः समाधिसिद्धिः . . . ३८०
सिद्धयोगस्य स्वेच्छया देहत्यागात्यागौ . . ३८१
महाबन्धलक्षणम् . . . . ३८२
महावेधलक्षणम् . . . . ३८२
खेचरीस्वरूपम् . . . . ३८३
बन्धत्रयस्वरूपं तत्फलं च . . . ३८३
विपरीतकरणीलक्षणं तत्फलं च . . . ३८४
वज्रोळीस्वरूपम् . . . . ३८४
अमरोळीस्वरूपम् . . . . ३८५
राजयोगनिष्पत्तिः . . . . ३८५
वैराग्यहेतुनिरूपणम् . . . . ३८६
हृत्पद्मे प्रणवोपासनम् . . . . ३८७
सर्वकरणव्यापारोपरतिः आत्मावगत्युपायः . . ३८८

## योगशिखोपनिषत्

प्रथमोऽध्यायः

मुक्तिमार्गजिज्ञासा . . . . ३९०
मुक्तिमार्गस्य दुर्लभत्वम् . . . . ३९१

ब्रह्म केवलशास्त्रागम्यम् . . . . ३९१
ब्रह्मणो जीवभावः . . . . ३९२
कामादिदोषविमुक्तजीवस्य शिवत्वम् . . . ३९२
ज्ञानयोगाभ्यां दोषविनाशः . . . ३९३
ज्ञानस्वरूपं तत्फलं च . . . . ३९४
आभासज्ञान्यज्ञानिनोरविशेषः . . . ३९५
आभासज्ञानिनो योगेन विना न मोक्षसिद्धिः . . ३९६
आभासज्ञानिनां दुःखानिवृत्तिः . . . ३९७
अहम्भाव एव सर्वानर्थमूलम् . . . ३९८
योगसिद्धस्य ईश्वरत्वं जीवन्मुक्तत्वं च . . ३९९
आभासज्ञानिनां विडम्बनम् . . . ४००
तेषां सिद्धसंगत्या कृतकृत्यत्वम् . . . ४०१
ज्ञानयोगयोः मिथः कार्यकारणत्वम् . . . ४०१
योग एव परमो मोक्षमार्गः . . . ४०१
योगसंस्कृतमनस्येव आत्मज्ञानोत्पत्तिः . . ४०२
योगाभ्यास एव प्रथमकृत्यम् . . . ४०३
योगशिक्षोपदेशः . . . . ४०४
योगाभ्यासात् परमपदसाक्षात्कारः . . . ४०५
ध्यानाशक्तस्य पुण्यलोकप्राप्तिः . . . ४०६
लब्धयोगस्य स्वात्मबोधः . . . . ४०६
योगाभ्यासार्थं जितप्राणगुरूपसदनम् . . . ४०७
सरस्वतीचालनम् . . . . ४०७
कुण्डलीचालनेन ग्रन्थित्रयभेदः . . . ४०७
कुम्भकचतुष्टयाभ्यासविधिः . . . ४०८
सूर्यकुम्भकलक्षणम् . . . . ४०९

उज्जायीकुम्भकलक्षणम् . . . . ४०९
शीतलीकुम्भकलक्षणम् . . . . ४१०
भस्त्रिकाकुम्भकलक्षणम् . . . . ४१०
बन्धत्रयविधिः . . . . ४१०
मूलबन्धः . . . . ४११
उड्डियाणबन्धः . . . . ४११
जालन्धरबन्धः . . . . ४१२
कुण्डल्या ग्रन्थित्रयविभेदनेन निर्विकल्पकप्राप्तिः . . ४१२
सुषुम्नायाः मोक्षमार्गत्वं कालभोक्तृत्वं च . . ४१३
सुषुम्नायोगेन ब्रह्मज्ञानसिद्धिः . . . ४१४
योगाभ्यासेन स्वरूपावस्थितिसिद्धिक्रमः . . ४१५
मन्त्रादियोगचतुष्टयात्मको महायोगः . . . ४१६
मन्त्रयोगः . . . . ४१६
हठयोगः . . . . ४१६
लययोगः . . . . ४१७
राजयोगः . . . . ४१७
योगसामान्यस्वरूपं योगेन मुक्तिप्राप्तिश्च . . ४१७
असिद्धयोगस्य मृतस्य उत्तरजन्मनि सिद्धिप्रकारः . . ४१८
अभ्यासयोगादेव मुक्तिः . . . . ४१८
योगिनः सर्वैश्वर्यजीवन्मुक्त्यादिसिद्धिलाभः . . ४१९
कृत्रिमाकृत्रिमसिद्धीनां गोपनविधिः . . . ४२०
योगसिद्धजीवन्मुक्तयोः सूचकम् . . . ४२१
देहे सत्यपि ज्ञानिनो विदेहमुक्तिलाभः . . ४२२
पिण्डाण्डस्य शिवालयत्ववर्णनम् . . . ४२४
आधारषट्कपीठचतुष्टययोः विवरणम् . . . ४२५

द्वितीयोऽध्यायः


योगज्ञानाधिकारी . . . . ४२६
प्रणवाख्यमूलमन्त्रमहिमा . . . . ४२७
मूलमन्त्रत्वनिर्वचनम् . . . . ४२८
नादलिंगत्वनिर्वचनम् . . . . ४२८
सूत्रत्वनिर्वचनम् . . . . ४२८
प्रणवस्य बिन्दुपीठत्वम् . . . . ४२९
निर्विशेषप्रणवब्रह्मावगत्युपायः . . . ४२९
स्थूलसूक्ष्मबीजरूपैः त्रिविधं ब्रह्म . . . ४३०
शुद्धतत्त्वस्य आत्ममन्त्राभ्यामैकवेद्यत्वम् . . ४३०
परतत्त्वाभिव्यक्तिचिह्नानि . . . . ४३०
नादानुसन्धानमहिमा . . . . ४३१
गुरुभगवद्भक्तेरेव परतत्त्वज्ञानसम्भवः . . . ४३१


तृतीयोऽध्यायः


नादब्रह्मणः परापश्यन्त्यादिरूपचतुष्टयम . . ४३२
वैखरीस्वरूपविवरणम् . . . . ४३३
वैखरीसाक्षात्कारात् वाक्सिद्धिः . . . ४३४
परमाक्षरस्वरूपम् . . . . ४३४
शब्दब्रह्मभक्तिभावनाभ्यां परब्रह्माधिगमः . . ४३६


चतुर्थोऽध्यायः


जीवस्य अमरत्वम् . . . . ४३७
सर्वप्रपञ्चस्य ब्रह्मत्वम् . . . . ४३७
ब्रह्मातिरिक्तदर्शनात् अनर्थप्राप्तिः . . . ४३८
व्यावहारिकप्रपञ्चस्य मिथ्यात्वम् . . . ४३९

स्वातिरिक्तप्रपञ्चस्य अत्यन्तासम्भवः . . . ४४०
अज्ञानकृतः आत्मनि देहाद्यारोपः . . . ४४०

पञ्चमोऽध्यायः

देहस्य विष्णवालयत्वम् . . . . ४४१
आधारषट्कपीठचतुष्टययोः विवरणम् . . . ४४२
नाडीचक्रस्वरूपम् . . . . ४४३
बिन्दुग्निसोमात्मकं ब्रह्मशरीरत्रयम् . . . ४४४
पञ्चाग्निभावना, तत्फलं च . . . ४४५
कुण्डलिनीप्रबोधनम् . . . . ४४६
खेचरीमुद्राऽभ्यासः, तत्फलं च . . . ४४६
सहस्रारे नारायणभावनातः कैवल्यसिद्धिः . . ४४७
यथोक्तभावनायुक्तस्य तत्तत्सिद्ध्युपायाः . . ४४७
गुरुपूजाविधिः . . . . ४४८
योगशिखामहिमा . . . . ४४९
सिद्धिषु उपेक्षाविधिः . . . . ४४९

षष्ठोऽध्यायः

कुण्डलिनीशक्तेः उपासनाविधिः . . . ४५०
सुषुम्नास्वरूपम् . . . . ४५०
सुषुम्नायाः सर्वाधारत्वम् . . . . ४५१
पराशक्तेः उद्बोधनम् . . . . ४५२
परमात्मध्यानम् . . . . ४५३
आधारब्रह्मणि प्राणादिविलयान्मुक्तिः . . . ४५३
चक्रेषु ब्रह्मादिमूर्तिध्यानेन ब्रह्मरन्ध्रप्रवेशः . . ४५५
ब्रह्मरन्ध्रविलीनकरणस्य मुक्तिः . . . ४५६
सुषुम्नायोगमहिमा . . . . ४५६

चिच्छक्तिर्जीवयोः स्थानविवेकः . . . ४५७
वायुवशस्य जीवस्य हंसमन्त्रजपप्रकारः . . ४५८
कुण्डल्यवस्थाभेदतो बन्धमुक्तिव्यवस्था . . ४५९
प्रणवस्य सर्वाधारत्वम् . . . . ४५९
चित्तचलनाचलनाभ्यां बन्धमुक्ती . . . ४५९
चित्तस्य स्वात्मानतिरिक्तत्वानुसन्धानेन ब्रह्मसाक्षात्कारः . ४६०
प्राणचित्तयोरविनाभावः . . . . ४६१
नादानुसन्धानं मनोलयहेतुः . . . ४६२
मनोयुक्तप्राणाभ्यासविधिः . . . ४६२
गुरूपदेशपूर्वकं अभ्यासं विना न ज्ञानोदयः . . ४६३

## वराहोपनिषत्

**प्रथमाध्यायः**

तत्त्वसंख्याविकल्पाः . . . . ४६४
चतुर्विंशतितत्त्वानि . . . . ४६५
षट्त्रिंशत्तत्त्वानि . . . . ४६६
षण्णवतितत्त्वानि . . . . ४६६
तत्त्वातीतभगवद्भक्तेरेव मुक्तिः . . . ४६७
तत्त्वज्ञानफलम् . . . . ४६७

**द्वितीयाध्यायः**

साधनचतुष्टयसम्पत्तिः . . . . ४६८
ब्रह्मात्मज्ञान्येव कृतकृत्यः . . . . ४६९
आत्मनः सुखरूपत्वम् . . . . ४६९
आत्मनः स्वयंप्रकाशत्वम् . . . ४७०
आत्मनः मायातत्कार्यविलक्षणत्वम् . . . ४७०

ब्रह्मात्मज्ञानिनः ब्रह्मभावः . . . ४७१
आत्मज्ञानिनः कर्मबन्धाभावः . . . ४७१
अज्ञानिज्ञानिनोः दर्शनस्थितिवैलक्षण्यम् . . ४७२
आत्मनि वस्तुतो बन्धमुक्त्यभावः . . . ४७३
बन्धनिवृत्तये ब्रह्मात्मानुसन्धानम् . . . ४७४
ब्रह्मप्राप्तिसाधनभूतस्योपवासस्य निर्वचनम् . . ४७५
जीवन्मुक्तिसाधनं अपरोक्षज्ञानम् . . . ४७६
बाह्यान्तश्चिन्त्यात्यागविधिः . . . ४७६
भगवच्चिन्तनमेव सर्वचिन्त्यागोपायः . . ४७६
सर्वकल्पनातीतं ब्रह्मैव चिन्तनीयम् . . . ४७७
प्रत्यगभिन्नब्रह्म सर्वावस्थाऽतीतम् . . . ४७९
निर्विशेषब्रह्मज्ञानेन ब्रह्मभावः . . . ४७९
जगद्विलापनपुरस्सरं ब्रह्मैकत्वचिन्तनम् . . ४८०
प्रत्यगभिन्नब्रह्मविषयको विद्वदनुभवः . . ४८०
समाधिसाधनं नादानुसन्धानम् . . . ४८३

**तृतीयाध्यायः**

अद्वितीयपरमात्मानुभवः . . . ४८९
चिन्मात्रभावापत्तिसाधनमौनविधिः . . . ४८६
भगवतः सच्चिदानन्दत्वम् . . . ४८७
भगवद्भक्तिरेव मोक्षसाधनम् . . . ४८७
ईश्वरस्य सर्वसमत्वम् . . . ४८८
चित्तमेव संसारकारणम् . . . ४८९
अनात्मनि रागाद्यनुभवो विद्वल्लक्षणम् . . ४९०

**चतुर्थाध्यायः—१. ब्राह्मणम्**

सप्तभूमिकासु जीवन्मुक्तिभूमिकाचतुष्टयम् . . ४९१
प्रणवविकृत्यकारादेः चातुर्विध्यम् . . . ४९२

अकाग्स्थूलादीनां अध्यक्षाः . . . ४९२
प्रणवावयवशः भूमिकाभेदाः . . ९ ४९३
चतुर्विधाः जीवन्मुक्ताः . . . . ४९३

**चतुर्थाध्यायः—२. मन्त्रः**

सप्तभूमिकानिर्देशः . . . . ४९४
सप्तभूमिकाविवरणम् . . . . ४९४
सप्तभूमिकासु बुद्ध्यवस्थाभेदनिरूपणम् . . ४९९
केवलब्रह्मात्मभावनाविधिः . . . ४९६
जीवन्मुक्तलक्षणम् . . . . ४९६
भूमब्रह्मनिष्ठाविधिः . . . . ४९८
विहंगमपिपीलिकामार्गविवेकः . . . ४९८
ब्रह्मविद्दृष्टिप्रसग्म्य पावनत्वम् . . . ५००

**पञ्चमाध्यायः**

योगेच्छोः देहज्ञानं आवश्यकम् . . . ५०१
श्वाससंख्या . . . . . ५०२
देहक्षयनिवाग्णाय भूतधाग्णविधिः . . . ५०२
भूतधारणाय उड्याणबन्धाभ्यासः . . . ५०२
लयमन्त्रहठाख्यास्त्रयो योगाः . . . ५०३
योगाष्टांगानि . . . . . ५०३
यमनियमभेदाः . . . . . ५०४
एकादशासनानि . . . . ५०४
चक्रासनलक्षणम् . . . . ५०४
प्राणायामः . . . . . ५०५
देहतदवयवमानानि . . . . ५०५

नाडीचक्रम् . . . . . ९०५
तुरीयदर्शनाभ्यासविधिः . . . . ९०६
कालवञ्चनोपायभूतो योगः . . . ९०७
कायदार्ढ्यबलादिसाधनभूताः योगाः . . . ९०७
देहच्छायाज्ञानविधिः . . . . ९०८
चतुष्पथबन्धोपायः सम्पुटयोगः . . . ९०९
सम्पुटाभ्यासेन ब्रह्मज्ञानप्राप्तिक्रमः . . . ९१०
शिवशक्तिस्थाननिरूपणम् . . . ९१०
ब्रह्मानुसन्धानसहितप्राणायामः . . . ९११
वेधकयोगाभ्यासक्रमः . . . . ९१२
विघ्नशान्तये प्रणवजपः . . . . ९१४
आरम्भादियोगभूमिकाचतुष्टयम् . . . ९१५
एतद्विद्यापठनवेदनयोः फलम् . . . ९१६

## शाण्डिल्योपनिषत्

### प्रथमाध्याये प्रथमः खण्डः

योगाष्टांगनिर्देशः . . . . ९१८
दशविधयमनिरूपणम् . . . . ९१९
दशविधनियमनिरूपणम् . . . . ९२०

### प्रथमाध्याये द्वितीयः खण्डः

अष्टविधासननिरूपणम् . . . . ९२१
आसनजयफलम् . . . . ९२२

### प्रथमाध्याये तृतीयः खण्डः

नाडीसंख्यादिजिज्ञासा . . . . ९२३
शरीरप्राणप्रमाणम . . . . ९२३

कुम्भकविधिः . . . . ५२३
मनुष्यादीनां अग्निस्थानम् . . . ५२३
मनुष्यादिदेहमध्यलक्षणम् . . . ५२४
नाभिचक्रे जीवभ्रमणम् . . . . ५२४
कुण्डलिनीस्वरूपचेष्टाः . . . . ५२४
चतुर्दशनाड्यः . . . . ५२५
सुषुम्नानाडी . . . . . ५२५
सुषुम्नां परितः इतरनाडीस्थानानि . . . ५२५
प्राणादिदशवायुस्थानचेष्टाः . . . ५२६
नाडीशोधनविधिः . . . . ५२७

**प्रथमाध्याये चतुर्थः खण्डः**

योगाधिकारियोगमठयोः लक्षणम् . . . ५२८
प्राणायामारम्भप्रकारः . . . . ५२८
नाडीशोधनप्राणाभ्यामकालावधिः . . . ५२९
नाडीशुद्धिचिह्नानि . . . . ५२९

**प्रथमाध्याये पञ्चमः खण्डः**

प्रणवात्मकप्राणायामः . . . . ५२९
प्रणववर्णध्यानप्रकारः . . . . ५३०
प्राणाभ्यासप्रकारः . . . . ५३०

**प्रथमाध्याये षष्ठः खण्डः**

सुषुम्नामलशोधनार्थप्राणायामः . . . ५३१
अहरहःकर्तव्यप्राणायामसंख्या . . . ५३१
अभ्यासोचितसिद्धिभेदः . . . . ५३१
अभ्यासकाले आहारनियमः . . . ५३२

अभ्यासे सावधानताविधिः . . . . ९३२
नाड्डीशुद्धितो मनोन्मन्यवस्थाप्राप्तिः . . . . ९३२
बन्धत्रयस्य कर्तव्यता . . . . ९३३
प्राणापानयोगफलम् . . . . ९३३
कपालशोधनोपायः . . . . ९३३
उज्जायीप्राणायामः . . . . ९३४
सीत्कारप्राणायामः . . . . ९३४
शीतलप्राणायामः . . . . ९३४
उपायोपेयकुम्भकद्वयम् . . . . ९३४
कुम्भकाभ्यासफलम् . . . . ९३५
वैष्णवीमुद्राप्राप्तिः . . . . ९३५
खेचरीप्राप्त्या ब्रह्मदर्शनम् . . . . ९३५
खेचर्या उन्मनीभावापत्तिः . . . ९३६
कालापरिच्छिन्नब्रह्मप्राप्तिसाधनम् . . . ९३७
मनोविलापनेन कैवल्यप्राप्तिः . . . ९३८
योगज्ञानाभ्यां मनोलयः . . . . ९३९
मनोलयात् प्राणस्पन्दनिरोधः . . . ९३९
प्राणस्पन्दनिरोधात् मनस्स्पन्दनिरोधः . . ९४०
प्राणस्पन्दनिरोधविविधोपायाः . . . ९४०
कुम्भकेन सुषुम्नाभेदनद्वारा परमपदगमनम् . . ९४२
मनोयुक्तप्राणस्य सुषुम्नाप्रवेशनविधिः . . ९४२
खेचरीमुद्राप्राप्तिः . . . . ९४३
बाह्यखेचरीसिद्ध्युपायः . . . . ९४४
अभ्यासकाले प्राणजयोपायः . . . ९४४
स्वात्मापरोक्षसिद्ध्युपायः . . . . ९४५
सर्वरोगविनिर्मोकसाधनं धारणाविशेषः . . ९४५

नासाग्रादिषु संयमेन विविधसिद्धयः . . . ९४९

प्रथमाध्याये सप्तमः खण्डः

पञ्चविधप्रत्याहारः . . . . ४८

प्रथमाध्याये अष्टमः खण्डः

पञ्चविधा धारणाः . . . . ९४८

प्रथमाध्याये नवमः खण्डः

द्विविधं ध्यानम् . . . . ९४९

प्रथमाध्याये दशमः खण्डः

समाधिस्वरूपम् . . . . ९४९

द्वितीयोऽध्यायः

निर्विशेषब्रह्मस्वरूपम् . . . . ९५०
ब्रह्मणः अनिर्देश्यत्वम् . . . . ९५०
ब्रह्मणः अवाङ्मानसगोचरत्वम् . . . ९५१
सर्वस्य परमात्मत्वम् . . . . ९५१
गुरूपदेशतः सर्वात्मत्वज्ञानप्राप्तिः . . . ९५२

तृतीयाध्याये प्रथमः खण्डः

ब्रह्मणो वस्तुतः निष्प्रतियोगिकस्वमात्रत्वम् . . ९५२
ब्रह्मणो रूपत्रयम् . . . . ९५३
निष्कलं ब्रह्म . . . . . ९५३
सकलं ब्रह्म . . . . . ९५४
सकलनिष्कलं ब्रह्म . . . . ९५४

तृतीयाध्याये द्वितीयः खण्डः

सन्मात्रस्य परब्रह्मत्वनिर्वचनम् . . . ५५६
सन्मात्रस्य आत्मत्वनिर्वचनम् . . . ५५६
सन्मात्रस्य महेश्वरत्वनिर्वचनम् . . . ५५६
सन्मात्रस्य दत्तात्रेयत्वनिर्वचनम् . . . ५५६
निरुक्तिवेदनफलम् . . . . ५५७

## हंसोपनिषत्

ब्रह्मविद्यासाधनहंसविद्याया अतिगुह्यत्वम् . . ५५९
हंसविद्याऽधिकारिस्वरूपम् . . . ५६१
हंसस्वरूपं तज्ज्ञानफलं च . . . ५६१
हंसज्ञानोपायो योगः . . . . ५६२
हृत्पद्मे हंसभावनया तुर्यात्मदर्शनम् . . . ५६३
अजपाहंसमन्त्रजपप्रकारः . . . ५६५
सगुणहंसध्यानेन परमात्मदर्शनम् . . . ५६६
अजपाजपेन दशनादानुभवः . . . ५६७
केवलदशमनादाभ्यासविधिः . . . ५६८
तत्तन्नादानुभवफलम् . . . . ५६८
मनोलयात् ब्रह्मात्मत्वप्रकाशः . . . ५६९

## ADDENDUM

PREFACE, pp. ৬–৮ : Add to the list the following :

অ ২. — Adyar Library XXXIII C 22—A Grantha MS. of 108 Upanishads.

মু. — The printed edition of 108 Upanishads published by Tukaram Javaji, Bombay, 1913, based on a South Indian MS.

# अद्वयतारकोपनिषत्

पूर्णमदः—इति शान्तिः

तारकयोगाधिकारः

अथातोऽद्वयतारकोपनिषदं व्याख्याम्यामो यतये जितेन्द्रियाय शमादिषड्गुणपूर्णाय ॥ १ ॥

उपनिषद्ब्रह्मयोगिविरचितं विवरणम्

ॐ श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः

द्वैतासम्भवविज्ञानसंसिद्धाद्वयतारकम् ।
तारकब्रह्मेति गीतं वन्दे श्रीरामवैभवम् ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं अद्वयतारकोपनिषत् राजयोगसर्वस्वं कटयन्ती ब्रह्ममात्रपर्यवसन्ना दृश्यते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । त्र यथोक्ताधिकार्युद्देशेन श्रुतयः तारकयोगमुपदिशन्तीत्याह—अथेति ॥ थ कर्मोपासनाकाण्डद्वयनिरूपणानन्तरं यतः तेन पुरुषार्थासिद्धिः अतः

तदर्थं यत्र स्वातिरेकेण द्वयं न विद्यते तत् अद्वयं ब्रह्म तन्मात्रबोधिनी विद्या **तारकोपनिषत्** तां श्रुतयो वयं **व्याख्यास्यामः**। कस्मा अधिकारिण इत्यत आह—**यतय इति**। स्वाश्रमानुष्ठानपूर्वकं देशिकमुखतो वेदान्तश्रवणं ततो युक्तिभिः श्रुत्यविरुद्धाभिः मननं च कृत्वा निदिध्यासनाय यतत इति यतिः। अजितेन्द्रियस्य यतित्वं कुत इत्यत आह—**जितेन्द्रियायेति**। जितेन्द्रियस्य यतित्वोपपत्तेः। अरिषड्वर्गाक्रान्तस्य जितेन्द्रियता कुत इत्यत आह—**शमादिषड्गुणपूर्णायेति**। शमादिषड्गुणसम्पत्तेः अरिषड्वर्गोपरतिपूर्वकत्वात्। एवं साधनवते श्रुतयः तारकयोगमुपदिशन्तीत्यर्थः ॥ १ ॥

### योगोपायतत्फलम्

**चित्स्वरूपोऽहमिति सदा भावयन् सम्यङ्निमीलिताक्षः किंचिदुन्मीलिताक्षो वाऽन्तर्दृष्ट्या भ्रूदहरादुपरि सच्चिदानन्दतेजःकूट-रूपं परं ब्रह्मावलोकयन् तद्रूपो भवति ॥ २ ॥**

एवं निदिध्यासनोपायतत्फलमाह—**चिदिति** ॥ योगी स्वान्तः चिद्रूपोऽस्मीति **भावयन्** अर्धोन्मीलितलोचनः भ्रूमध्यादौ सच्चिदानन्दमात्रं ब्रह्माहमस्मीत्यालोकयन् **तद्रूपः** तारकरूपो भवति ॥ २ ॥

### तारकस्वरूपम्

**गर्भजन्मजरामरणसंसारमहद्भयात् संतारयति तस्मात्तारक-मिति। जीवेश्वरौ मायिकाविति विज्ञाय सर्वविशेषं नेति नेतीति विहाय यदवशिष्यते तदद्वयं ब्रह्म ॥ ३ ॥**

किं तारकमित्यत आह—**गर्भेति** ॥ "ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत् सदा यतिः।" इति श्रुतिसिद्धज्योतिर्लिङ्गस्य प्रत्यग्रूपत्वेन

ाज्ञविकल्पितगर्भवासादिसंसारतारकत्वात् तारकं प्रत्यगात्मेत्यर्थः । जीवेशभेदे ति प्रत्यगभिन्नब्रह्मभावः कुत इत्याशङ्क्य तयोर्भेदस्य मायिकत्वेन मिथ्यात्वात ो यच्छिष्यते तदेव ब्रह्मेत्याह—जीवेति ॥ ३ ॥

लक्ष्यत्रयानुसन्धानविधिः

तत्सिद्धचै लक्ष्यत्रयानुसंधानं कर्तव्यम् ॥ ४ ॥

तदधिगमोपायः कथमित्यत आह तत्सिद्धया इति ॥ ४ ॥

अन्तर्लक्ष्यलक्षणम्

देहमध्ये ब्रह्मनाडी सुषुम्ना सूर्यरूपिणी पूर्णचन्द्राभा वर्तते । सा तु मूलाधारादारभ्य ब्रह्मरन्ध्रगामिनी भवति । तन्मध्ये तटित्कोटिसमानकान्त्या मृणालसूत्रवत् सूक्ष्माङ्गी कुण्डलिनीति प्रसिद्धाऽस्ति । तां दृष्ट्वा मनसैव नरः सर्वपापविनाशद्वारा मुक्तो भवति । फालोर्ध्वगललाटविशेषमण्डले निरन्तरं तेजस्तारकयोग-विस्फुरणेन पश्यति चेत् सिद्धो भवति । तर्जन्यग्रोन्मीलितकर्ण-रन्ध्रद्वये तत्र फूत्कारशब्दो जायते । तत्र स्थिते मनसि चक्षुर्मध्यगतनीलज्योतिस्स्थलं विलोक्य अन्तर्दृष्ट्या निरतिशयसुखं प्राप्नोति । एवं हृदये पश्यति । एवमन्तर्लक्ष्यलक्षणं मुमुक्षुभिरुपास्यम् ॥ ५ ॥

अन्तर्बाह्यमध्यभेदेन लक्ष्यं त्रिविधम् । तत्र अन्तर्लक्ष्यलक्षणं तदभ्यासफलं चाह—देहेति ॥ यदा कुण्डलिनी प्राणदृष्टिमनोभिभिः

मूलाधारत्रिकोणाग्रालङ्कारसुषुम्नाऽधोवक्त्रं विभिद्य तन्मध्ये प्रविशति तदा बाह्यान्तःप्रपञ्चविस्मरणपूर्वकं मुन्यन्तःकरणं निर्विकल्पब्रह्मपदं भजति। मुनिः निर्विकल्पज्ञानात् विकल्पात् मुक्तो भवतीत्यर्थः। तत्सिद्ध्युपायः कः इत्यत आह—फालेति। तद्गतसुखानुभवोपायं वदन् अन्तर्लक्ष्यं उपसंहरति—तर्जनीति। सुखं प्राप्नोति, न केवलं कर्णरन्ध्रद्वये, एवं हृदये ॥ ५ ॥

### बहिर्लक्ष्यलक्षणम्

अथ बहिर्लक्ष्यलक्षणम्। नासिकाग्रे चतुर्भिः षड्भिरष्टभिः दशभिः द्वादशभिः क्रमात् अङ्गुलान्ते नीलद्युतिश्यामत्वसदृग्रक्तभङ्गीस्फुरत्पीतवर्णद्वयोपेतं व्योम यदि पश्यति स तु योगी भवति। चलदृष्ट्या व्योमभागवीक्षितुः पुरुषस्य दृष्टयग्रे ज्योतिर्मयूखा वर्तन्ते। तद्दर्शनेन योगी भवति। तप्तकाञ्चनसंकाशज्योतिर्मयूखा अपाङ्गान्ते भूमौ वा पश्यति तद्दृष्टिः स्थिरा भवति। शीर्षोपरि द्वादशाङ्गुलसमीक्षितुः अमृतत्वं भवति। यत्र कुत्र स्थितस्य शिरसि व्योमज्योतिर्दृष्टं चेत् स तु योगी भवति ॥ ६ ॥

बहिर्लक्ष्यलक्षणमाह—अथेति ॥ योगी भवति इत्यादिकृत्स्नोपनिषत् प्रायशो मण्डलब्राह्मणोपनिषद्व्याख्यानेन व्याख्यातं स्यादिति मन्तव्यम् ॥ ६ ॥

### मध्यलक्ष्यलक्षणम्

अथ मध्यलक्ष्यलक्षणं प्रातश्चित्रादिवर्णाखण्डसूर्यचक्रवत् वह्निज्वालावलीवत् तद्विहीनान्तरिक्षवत् पश्यति। तदाकाराकारितया

अवतिष्ठति । तद्भ्रूयोदर्शनेन गुणरहिताकाशं भवति । विस्फुरत्तारकाकारदीप्यमानगाढतमोपमं परमाकाशं भवति । कालानलसमद्योतमानं महाकाशं भवति । सर्वोत्कृष्टपरमद्युतिप्रद्योतमानं तत्त्वाकाशं भवति । कोटिसूर्यप्रकाशवैभवसंकाशं सूर्याकाशं भवति । एवं बाह्याभ्यन्तरस्थव्योमपञ्चकं तारकलक्ष्यम् । तद्दर्शी विमुक्तफलस्तादृग्व्योमसमानो भवति । तस्मात् तारक एव लक्ष्यं अमनस्कफलप्रदं भवति ॥ ७ ॥

अन्तर्बाह्यलक्ष्यस्वरूपमुक्त्वा मध्यलक्ष्यस्वरूपमाह—अथेति ॥ तद्दर्शी विमुक्तस्वाज्ञानतत्कार्यफलः । यस्मादेवं तस्मात् ॥ ७ ॥

## द्विविधं तारकम्

तत्तारकं द्विविधं पूर्वार्धं तारकं उत्तरार्धं अमनस्कं चेति । तदेष श्लोको भवति—

तद्योगं च द्विधा विद्धि पूर्वोत्तरविधानतः ।
पूर्वं तु तारकं विद्यात् अमनस्कं तदुत्तरमिति ॥ ८ ॥

## तारकयोगसिद्धिः

अक्ष्यन्तस्तारयोः चन्द्रसूर्यप्रतिफलनं भवति । तारकाभ्यां सूर्यचन्द्रमण्डलदर्शनं ब्रह्माण्डमिव पिण्डाण्डशिरोमध्यस्थाकाशे रवीन्दुमण्डलद्वितयमस्तीति निश्चित्य तारकाभ्यां तद्दर्शनम् ।

अत्राप्युभयैक्यदृष्ट्या मनोयुक्तं ध्यायेत्, तद्योगाभावे इन्द्रियप्रवृत्ते-रनवकाशात्। तस्मात् अन्तर्दृष्ट्या तारक एवानुसंधेय ॥ ९ ॥

ब्रह्माण्डवत् पिण्डाण्डेऽपि रवीन्दू विद्येते इति निश्चित्य तारकाभ्यां तदैक्यदर्शनतः तारकयोगसिद्धिः भवेदित्याह—अक्षीति ॥ अयोगी यथा ब्रह्माण्डस्थचन्द्रसूर्यौ मनस्सहकृततारकाभ्यां पश्यति तथा योगी स्वमस्तका-काशविभातरवीन्दुद्वयं मनस्सहकृततताराभ्यां अवलोकयेदित्यर्थः। रूपदर्शनस्य चक्षुरधीनत्वात् किं मनसेत्यत आह—तदिति। मनसि अन्यत्र व्यापृते रूपादि-ग्रहणशक्तिः चक्षुरादेः नास्तीत्यत्र "अन्यत्रमना अभूवं नादर्शम्, अन्यत्रमना अभूवं नाश्रौषं" इत्यादिश्रुतेः। यस्मादेवं तस्मात् ॥ ९ ॥

मूर्तामूर्तभेदेन द्विविधमनुसन्धेयम्

तत्तारकं द्विविधं, मूर्तितारकं अमूर्तितारकं चेति। यत् इन्द्रियान्तं तत् मूर्तिमत्। यत् भ्रूयुगातीतं तत् अमूर्तिमत्। सर्वत्र अन्तःपदार्थविवेचने मनोयुक्ताभ्याम इष्यते। तारकाभ्यां तदूर्ध्व-स्थसत्त्वदर्शनात् मनोयुक्तेन अन्तरीक्षणेन सच्चिदानन्दस्वरूपं ब्रह्मैव। तस्मात् शुक्लतेजोमयं ब्रह्मेति सिद्धम्। तद्ब्रह्म मनःसहकारिचक्षुषा अन्तर्दृष्ट्या वेद्यं भवति। एवं अमूर्तितारकमपि। मनोयुक्तेन चक्षुषैव दहरादिकं वेद्यं भवति, रूपग्रहणप्रयोजनस्य मनश्चक्षुरधीनत्वात् बाह्यवदान्तरेऽपि आत्ममनश्चक्षुःसंयोगेनैव रूपग्रहणकार्योदयात्। तस्मात् मनोयुक्ता अन्तर्दृष्टिः तारकप्रकाशाय भवति ॥ १० ॥

यदनुसन्धेयं तत् कतिविधं इत्यत्र **तत्तारकं** ॥ बाह्यपदार्थविवेचनवत् न्तःपदार्थविवेचनमपि मनश्चक्षुरधीनमित्याह—**सर्वेत्रेति** । **तदूर्ध्वस्थसत्व-**ानात् भ्रूमध्योर्ध्वविलसितोत्तरतारकलक्ष्यदर्शनात् । केनैतद्दर्शनीयमित्यत्र **ोयुक्तेनेति** । **ब्रह्मैव** उत्तरतारकलक्ष्यमित्यनुसन्धेयम् । यस्मादेवं **तस्मात्** । मध्यादिस्थलविलसितशुक्लतेजसो मनःकल्पितत्वेऽपि ब्रह्मणः सर्वव्यापकत्वेन ापि विद्यमानत्वात् तदेव ब्रह्मेति अभिमतिद्रढिम्ना लीने तत्र मनसि कल्पक-पेक्षकल्पनावैरळ्ये निर्विकल्पकं ब्रह्मैव अवशिष्यते इत्यर्थः । **यत्तेजो मनः-**लेपतं **तद्ब्रह्म** । यस्मादेवं **तस्मात्** ॥ १० ॥

तारकयागस्वरूपम्

भ्रूयुगमध्यबिले दृष्टिं तद्द्वारा ऊर्ध्वस्थिततेज आविर्भूतं तारकयोगो भवति । तेन सह मनोयुक्तं तारकं सुसंयोज्य प्रयत्नेन भ्रूयुग्मं सावधानतया किंचिदूर्ध्वमुत्क्षेपयेत् । इति पूर्वतारकयोगः । उत्तरं तु अमूर्तिमत् अमनस्कमित्युच्यते । तालुमूलोर्ध्वभागे महान् ज्योतिर्मयूखो वर्तते । तत् योगिभिर्ध्येयम् । तस्मात् अणिमादि-सिद्धिर्भवति ॥ ११ ॥

कोऽयं तारकयोग इत्यत्र **भ्रूयुगमध्यबिले** तत्रत्याज्ञाचक्रे दृष्टियुग्मं नवेश्य । **सावधानतया** विलोकयन् । **ध्येयम्** तज्ज्योतिः **ब्रह्मेति** योगि-श्चिन्त्यमित्यर्थः । ततः किं भवतीत्यत्र **तस्मादिति** ॥ ११ ॥

शाम्भवीमुद्रा

अन्तर्बाह्यलक्ष्ये दृष्टौ निमेषोन्मेषवर्जितायां सत्यां शांभवी मुद्रा भवति । तन्मुद्रारूढज्ञानिनिवासात् भूमिः पवित्रा भवति ।

**तद्दृष्ट्या सर्वे लोकाः पवित्रा भवन्ति । तादृशपरमयोगिपूजा यस्य लभ्यते सोऽपि मुक्तो भवति ॥ १२ ॥**

यत् योगिभिः ध्येयमुक्तं पर्यवसाने तदेव शांभवी मुद्रा भवतीत्याह **अन्तरिति ॥ मुद्रा भवति** इत्यत्र

अन्तर्लक्ष्यं बहिर्दृष्टिः निमेषोन्मेषवर्जिता ।
एषा सा शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ॥

इति श्रुतेः । तन्मुद्रारूढयोगिनं स्तौति—**तदिति । पवित्रा भवति** इत्यत्र "स्वपादन्यासमात्रेण पावयन् वसुधातलं" इति स्वरूपदर्शनोक्तेः । **पवित्रा भवन्ति**—

खेचरा भूचराः सर्वे ब्रह्मविद्दृष्टिगोचराः ।
सद्य एव विमुच्यन्ते कोटिजन्मार्जितैरघैः ॥

इति श्रुतेः ॥ १२ ॥

अन्तर्लक्ष्यविकल्पाः

**अन्तर्लक्ष्यज्वलज्ज्योतिःस्वरूपं भवति । परमगुरूपदेशेन सहस्रारज्वलज्ज्योतिर्वा बुद्धिगुहानिहितचिज्ज्योतिर्वा षोडशान्तस्थ-तुरीयचैतन्यं वा अन्तर्लक्ष्यं भवति । तद्दर्शनं सदाचार्यमूलम् ॥१३॥**

अन्तर्लक्ष्यं विकल्प्य निर्धारयति—**परमेति ॥** उक्तविकल्पानां एकार्थपर्यवसायित्वात् तद्दर्शनमूलं किमित्यत्र—**तद्दर्शनमिति ॥ १३ ॥**

### आचार्यलक्षणम्

आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः ।
योगज्ञो योगनिष्ठश्च सदा योगात्मकः शुचिः ॥ १४ ॥
गुरुभक्तिसमायुक्तः पुरुषज्ञो विशेषतः ।
एवंलक्षणसंपन्नो गुरुरित्यभिधीयते ॥ १५ ॥
गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निरोधकः ।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ॥ १६ ॥
गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परायणम् ॥ १७ ॥
गुरुरेव परा काष्ठा गुरुरेव परं धनम् ।
यस्मात्तदुपदेष्टाऽसौ तस्माद्गुरुतरो गुरुरिति ॥ १८ ॥

आचार्यलक्षणमुक्त्वा गुरुशब्दार्थमाह—गुशब्दस्त्विति ॥ १४–१८ ॥

### ग्रन्थाभ्यासफलम्

यः सकृदुच्चारयति तस्य संसारमोचनं भवति । सर्वजन्मकृतं पापं तत्क्षणादेव नश्यति । सर्वान् कामानवाप्नोति । सर्वपुरुषार्थसिद्धिर्भवति । य एवं वेदेत्युपनिषत् ॥ १९ ॥

ग्रन्थतदर्थपठनानुसन्धानफलमाह—य इति ॥ कामाकामधियां पठनफलं सर्वकामाप्तिः परमपुरुषार्थाप्तिश्च । इत्युपनिषच्छब्दः अद्वयतारकोपनिषत्समाप्त्यर्थः ॥ १९ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
अद्वयोपनिषद्व्याख्या लिखितेश्वरगोचरा ।
अद्वयोपनिषद्व्याख्याग्रन्थोऽशीतिरितीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रिपञ्चाशत्सङ्ख्यापूरकं अद्वयतारकोपनिषद्विवरणं सम्पूर्णम्

ॐ श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्रार्पणमस्तु ॥

ॐ

# अमृतनादोपनिषत्

सह नाववतु—इति शान्तिः

श्रवणाद्युपायः

शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ।
परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥ १ ॥

विवरणम्

ॐ श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः

अमृतनादोपनिषत्प्रतिपाद्यं पराक्षरम् ।
त्रैपदानन्दसाम्राज्यं हृदि मे भातु संततम् ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं अमृतनादोपनिषत् । कठवल्ल्यादिसमं उपोद्घातादिकम् । षडङ्गयोगप्रकाशनात्मिकोपनिषदोऽल्पग्रन्थतो विवरणमारभ्यते । आदौ तावत्—विशुद्धचित्तानां श्रवणाद्युपायादेव पुरुषार्थसिद्धिः, मलिनचित्तानां ब्रह्मोपासनाविशिष्टषडङ्गयोगाभ्यासद्वारकज्ञानेन

पुरुषार्थसिद्धिः अस्यामुपनिषदि प्रतिपाद्यते । तत्रादौ मुख्याधिकारिणां श्रवणाद्युपायमाह—शास्त्राणीति । मुमुक्षून् प्रति सूर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति अनुशासनं कुर्वन्तीति शास्त्राणि ईशाद्यष्टोत्तरशतोपनिषत्संज्ञकानि श्रुतार्थधारणासमर्थो मेधावी ब्रह्मविद्वरिष्ठदेशिकमुखात् यथावत् अधीत्य यावत् संशयादिपञ्चदोषनिवृत्तिः पुनः पुनः तावत् अभ्यस्य श्रवणमननिदिध्यासनानि नैरन्तर्येण कृत्वा तत्सञ्जातसम्यज्ज्ञानेन स्वातिरिक्ताविद्यापदतत्कार्यजातं यत्र पर्यवस्यति अपह्नवं भजति तत् परमं तन्मात्रतया उपबृंहणात् ब्रह्म निष्प्रतियोगिकस्वमात्रमिति विज्ञाय तज्ज्ञानसमकालं विद्वान् तद्भावमेत्य तन्मात्रतयाऽवशिष्यते । यतः शास्त्राभ्यासः एवं प्रभाववान् अतो ब्रह्मभावापत्त्यनन्तरमपि शास्त्राभ्यास एव अप्रमादेन कर्तव्य इत्यत आह—उल्कावदिति । यथा उल्काप्रकाशतो द्रव्यमालोक्य उल्कां परित्यजति तथा ब्रह्मभावापत्त्यनन्तरं तत्साधनानि तानि शास्त्राणि तत्प्रभवज्ञानं चापि अथोत्सृजेत् इत्यत्र

उल्काहस्तो यथा कश्चिद् द्रव्यमालोक्य तां त्यजेत् ।
ज्ञानेन ज्ञेयमालोक्य पश्चात् ज्ञानं परित्यजेत् ॥ इति,
आत्मानमात्मना साक्षात् ब्रह्म बुद्ध्वा सुनिश्चलम्
देहजात्यादिसंबन्धान् वर्णाश्रमसमन्वितान् ॥
वेदशास्त्रपुराणानि पदपांसुमिव त्यजेत् ॥ इति च श्रुतेः ॥ १ ॥

प्रणवोपासना

ओंकाररथमारुह्य विष्णुं कृत्वाऽथ सारथिम् ।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ॥ २ ॥
तावद्रथेन गन्तव्यं यावद्रथपथि [1]स्थितः ।
स्थात्वा रथपथिस्थानं रथमुत्सृज्य गच्छति ॥ ३

[1] स्थितिः । स्थि—क.

**मात्रालिङ्गपदं त्यक्त्वा शब्दव्यञ्जनवर्जितम् ।**
**अस्वरेण मकारेण पदं सूक्ष्मं हि गच्छति ॥ ४ ॥**

प्रथममन्त्रेणोत्तमाधिकारिणां कृतार्थतामभिधाय मध्यममन्दाधिकारिणां तत्पदारोहाय प्रणववाच्यार्थोपासनां षडङ्गयोगं चाह—**ओङ्कारेति** । रथस्थानीयमोङ्कारं **आरुह्य** कांस्यघण्टानिनादवत् प्रणवोच्चारणपूर्वकं तदर्थानुसन्धानं कृत्वा रथ**सारथिं** बुद्धितत्त्वं **विष्णुं** व्यापकं प्रणवार्थेश्वराकाराकारितं कृत्वा । "बुद्धिं तु सारथिं विद्धि" इति श्रुतेः । ब्रह्मैव लोको ब्रह्मलोकः निर्विशेषपरमात्मा तद्रूपतया पद्यत इति ब्रह्मलोकपदं स्वमात्रतया अन्वेष्टुमिच्छतीति **ब्रह्मलोकपदान्वेषी** तदुपायत्वेन **रुद्राराधनतत्परो** भवेत् स्वातिरिक्तत्वेन परागभावमापन्नस्वाविद्यापदतत्कार्यभूतरुजं द्रावयतीति रुद्रः प्रत्यगात्मा तदाराधनं व्यष्टिसमष्ट्यन्तःकरणवृत्तिसहस्रभावाभावप्रकाशकप्रत्यगस्मीत्यनुसन्धानं तदेकनिष्ठत्वं तत्परत्वमित्यर्थः । आदौ ओङ्कारार्थेश्वरानुचिन्तनं, तदाकाराकारितान्तःकरणं प्रसन्नं सत् निर्विशेषब्रह्ममात्रावस्थितिं ईहते, तदुपायत्वेन प्रत्यगनुसन्धानं, ततः प्रत्यक्परागभावसापेक्षप्रत्यग्भावं विहाय निष्प्रतियोगिकब्रह्ममात्रतया अवशिष्यत इति भावः ॥ २ ॥ ब्रह्मभावापत्तावपि सदा प्रणवानुसन्धानं कर्तव्यमित्यत आह—**तावदिति** । **यावद्रथपथि** प्रणवानुसन्धानवर्त्मनि **स्थितस्तिष्ठति तावद्रथेन गन्तव्यं** ओङ्कारोच्चारणपूर्वकं अर्थानुसन्धानं कर्तव्यम् । एवं **रथपथिस्थानं** रथपथेन यत् गन्तव्यस्थानं निर्विशेषं ब्रह्म तत्र तन्मात्रावशेषतया **स्थात्वा** स्थित्वा ततः रथेन गन्तव्यप्रदेशस्य प्राप्तत्वात् ओङ्कार**रथमुत्सृज्य** तत्प्राप्यतुर्यतुर्यस्थानं **गच्छति** तुर्यतुर्यो भवतीत्यर्थः ॥ ३ ॥ तुर्यतुर्याधिगमोपायमाह—**मात्रेति** । सर्वव्यवहारहेत्वकारादयः स्वराः शब्दाः, ककारादीनि व्यञ्जनानि, तैः वर्जितं शब्दव्यञ्जनात्मकप्रपञ्चाशद्वर्णव्यवहार्यप्रपञ्चकलनाविरळं यत् **मात्रालिङ्गपदं** अकारादिमात्रातदध्यक्षविश्वविराडोत्रादिरूपं **त्यक्त्वा** स्वातिरेकेण किञ्चिन्नास्तीति निश्चित्य अथ **अस्वरेण** मकारेण मकारार्थेश्वरभावेन निरावृतक्रियाज्ञानेच्छाशक्तिसम्पत्त्या यत् **सूक्ष्मं हि**

पदं विराजते तत् सूक्ष्मपदं ब्रह्म स्वमात्रमिति गच्छति मात्रालिङ्गशब्दव्यञ्जन-कलनापह्नवसिद्धब्रह्ममात्रतया मुनिः अवशिष्यत इत्यर्थः ॥ ४ ॥

प्रत्याहारलक्षणम्

शब्दादिविषयान् पञ्च मनश्चैवातिचञ्चलम् ।
चिन्तयेदात्मनो रश्मीन् प्रत्याहारः स उच्यते ॥ ५ ॥

मन्दाधिकारिचित्तशुद्धिहेतुषडङ्गयोगमुपदिशति । तत्र प्रत्याहार-स्वरूपमाह—शब्दादीति । "यद्यच्छृणोति कर्णाभ्यां तत्तदात्मेति भावयेत्" इत्यादिश्रुत्यनुरोधेन श्रोत्रादिग्राह्यपञ्चशब्दादिविषयान् स्वात्मनो रश्मीन् स्वात्मविकल्पितत्वेन स्वरूपभूतान् । मनश्चेति चशब्दतः सविषयान्तः-करणचतुष्टयं गृह्यते । तत्तु अतिचञ्चलं क्षणविकारित्वात् । तदप्यात्मनो रूपं चिन्तयेत् स्वात्मातिरिक्तविषयतः प्रत्याहरेदिति योऽर्थोऽभिहितः सः प्रत्याहारः उच्यते ॥ ५ ॥

षडङ्गयोगः

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥ ६ ॥

योगषडङ्गानि गणयति—प्रत्याहार इति । स्पष्टोऽर्थः ॥ ६ ॥

प्राणायामादिफलम्

यथा पर्वतधातूनां [1]दह्यन्ते धमता मलाः ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणधारणात् ॥ ७ ॥

[1] दह्यते धमता मलम्—अ.

प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् ।
किल्बिषं हि क्षयं [1]नीत्वा रुचिरं चैव चिन्तयेत् ॥ ८ ॥

प्राणायामादिफलप्रदर्शनपूर्वकं प्राणायामादिप्रकारमाह—यथेति ॥ यथा धमता धमनाभिवर्धितवह्निना पर्वतधातूनां मलाः मलानि दह्यन्ते तथा प्राणधारणात् दशेन्द्रियकृताः दोषा दह्यन्ते ॥ ७ ॥ यत एवं अतः प्राणायामैः लिङ्गदेहाश्रयदोषान् दहेत् । तथा धारणाभिश्च अन्तःकरणगतकिल्बिषं दहेत् । एवं अन्तःकरणजकिल्बिषं अशुद्धिं क्षयं नीत्वा रुचिरं किल्बिषक्षयाधिकरणं चैव हीतिशब्दात् सर्ववृत्तिकुम्भकं मनःप्राणवृत्तिस्तम्भनं चिन्तयेत् ॥ ८ ॥

त्रिविधप्राणायामः

रुचिरं रेचकं चैव वायोराकर्षणं तथा ।
प्राणायामास्त्रयः प्रोक्ता रेचपूरककुम्भकाः ॥ ९ ॥

त्रिविधप्राणायाममाह—रुचिरमिति । कुम्भकरेचकपूरकभेदेन प्राणायामाः त्रयः प्रोक्ताः । अत्र रुचिरशब्दः कुम्भकवाची, रेचकपूरकसहपठितत्वात् ॥ ९ ॥

प्राणायामलक्षणम्

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ १० ॥

प्राणायामस्वरूपमाह—सव्याहृतिमिति । कुम्भकावस्थायां "ॐ भूः" इत्यादिप्रणवसम्पुटितसप्तव्याहृतिभिः "परोरजसेसावदोम्" इति शिरसा च

[1] तीर्त्वा—अ १.

सह गायत्रीं त्रिः पठेत् त्रिवारं मनसा उच्चरेदिति योऽर्थोऽभिहितः स प्राणायामः उच्यते ॥ १० ॥

रचकलक्षणम्

उत्क्षिप्य वायुमा[1]काशे शून्यं कृत्वा निरात्मकम् ।
शून्यभावे नियुञ्जीयाद्रेचकस्येति लक्षणम् ॥ ११ ॥

रेचकलक्षणमाह—उत्क्षिप्येति । बाह्याकाशे वायुमुत्क्षिप्य तैलधारावत् मन्दंमन्दं विरेच्य अन्तः निरात्मकं वायुं शून्यं कृत्वा शून्यभावे नियुञ्जीयात् इति यत्तत् रेचकस्य लक्षणम् ॥ ११ ॥

पूरकलक्षणम्

[2]वक्त्रेणोत्पलनाळेन तोयमाकर्षयेन्नरः ।
एवं वायुर्ग्रहीतव्यः पूरकस्येति लक्षणम् ॥ १२ ॥

पूरकलक्षणमाह—वक्त्रेणेति । यथा नरो वक्त्रेण वक्त्रस्थोत्पलनाळेन वा तोयं आकर्षयेत् एवमिडया पिङ्गळया शीतल्या वा वायुः ग्रहीतव्यः इति यत्तत् पूरकस्य लक्षणम् ॥ १२ ॥

कुम्भकलक्षणम्

[3]नोच्छ्वसेन्न च [4]निश्वासेत् नैव गात्राणि चालयेत् ।
एवं भावं नियुञ्जीयात् कुम्भकस्येति लक्षणम् ॥ १३ ॥

[1] काशं—क, अ १, अ २. शे इत्येतत् शं इति शोधितं—अ.
[2] वक्त्रे—क. [3] नोच्छ्वासे—अ २. [4] निश्वसे—अ १.

अन्धवत् पश्य रूपाणि शब्दं बधिरवच्छृणु ।
काष्ठवत् पश्य वै देहं [1]प्रशान्तस्येति लक्षणम् ॥ १४ ॥

कुम्भकलक्षणमाह—**नोछ्वसेदिति** । सिद्धाद्यासनमास्थाय निश्चलगात्रो योगी रेचकपूरकव्यापारमकृत्वा एवं वायुस्तम्भनभावं नियुञ्ज्यादिति यत्तत् कुम्भकलक्षणम् ॥ १३ ॥ कुम्भकवेळायां अन्धबधिरवत् रूपशब्दादिव्याप्तिविरळो भूयादिति प्रशान्तलक्षणमाह—**अन्धवदिति** । अन्धबधिरग्रहणं शिष्टेन्द्रियवैकल्योपलक्षणार्थं, यथा अन्धादिः रूपादिग्रहणं न करोति तथा अविकलेन्द्रियोऽपि । रूपादीन् अन्धादिवत् पश्य स्वदेहं काष्ठवत् पश्येति यत्तत् प्रशान्तस्य लक्षणम् । योगी सर्वेन्द्रियव्याप्तिविरळो भवेदित्यर्थः ॥१४॥

धारणालक्षणम्

मनः संकल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान् ।
धारयित्वा तथाऽऽत्मानं धारणा परिकीर्तिता ॥ १५ ॥

धारणालक्षणमाह—**मन इति** । बुद्धिमान् योगी सङ्कल्पात्मकं मनः तद्वृत्तिजातं **सङ्क्षिप्य** अथ निस्सङ्कल्पकं **ध्यात्वा आत्मनि** निर्विकल्पके प्रत्यग्भावपरिणते मनसि तथाविधं परमात्मानं **धारयित्वा** या प्रत्यक्परैक्यस्थितिः सेयं **धारणेति परिकीर्तिता** ॥ १५ ॥

तर्कलक्षणम्

आगमस्याविरोधेन ऊहनं तर्क उच्यते ।

तर्कलक्षणमाह—**आगमस्येति** । श्रुत्यनुगृहीतोहनमेव तर्क इत्यभिधीयते ॥

[1] प्रशान्तस्यैव—अ २.

समाधिलक्षणम्

समं मन्येत [1]यं लब्ध्वा स समाधिः प्रकीर्तितः ॥ १६[1]॥

समाधिलक्षणमाह—सममिति । ब्रह्माहं, अहमेव ब्रह्म इति यं परमात्मानं मत्वा स्वविकल्पितप्रपञ्चजातं समं आत्मानमेव मन्येत स समाधिरिति श्रुतिभिः परिकीर्तितः ॥ १६ ॥

समाधिसिद्ध्युपायः

भूमौ दर्भासने रम्ये सर्वदोषविवर्जिते ।
कृत्वा मनोमयीं रक्षां जप्त्वा वै रथमण्डले ॥ १७ ॥
पद्मकं स्वस्तिकं वाऽपि भद्रासनमथापि वा ।
बद्ध्वा योगासनं सम्यक् उत्तराभिमुखः स्थितः ॥ १८ ॥
नासिकापुटमङ्गुल्या पिधायैकेन मारुतम् ।
आकृष्य धारयेदग्निं शब्दमेव विचिन्तयेत् ॥ १९ ॥
ओमित्येकाक्षरं ब्रह्म ओमित्येतन्न [2]रेचयेत् ।
दिव्यमन्त्रेण बहुधा कुर्या[3]न्मलविमुक्तये ॥ २० ॥
पश्चात् ध्यायीत पूर्वोक्तक्रमशो मन्त्रविद् बुधः ।
स्थूलादिस्थूलसूक्ष्मं च नाभेरूर्ध्वमुपक्रमः ॥ २१ ॥

[1] यल्लब्ध्वा समाधिः परिकीर्तितः—उ १. [2] रोचयेत्—अ, अ १.
[3] दमलमुक्तये—अ. दामलमुक्तये—उ, उ १, अ १, अ २. 'दात्ममलच्युतिं' इति शोधितं—क.

तिर्यगूर्ध्वमधोदृष्टिं विहाय च महामतिः ।
स्थिरस्थायी विनिष्कम्पः सदा योगं समभ्यसेत् ॥ २२ ॥
तालमात्राविनिष्कम्पो धारणायोजनं तथा ।
द्वादशमात्रो योगस्तु कालतो नियमः स्मृतः ॥ २३ ॥
अघोषमव्यञ्जनमस्वरं च अतालुकण्ठोष्ठमनासिकं च [1]यत् ।
अरेफजातमुभयोष्मवर्जितं यदक्षरं न क्षरते कथंचित् ॥ २४ ॥

एतादृशसमाधिसिद्ध्युपायमाह—**भूमाविति** । विशुद्धभूमौ—दर्भासनग्रहणं चेलाजिनोपलक्षणार्थं—कुशाजिनचेलमृद्वासने सर्वदोषरहिते तत्संस्कारार्थं भूशुद्धिभूतशुद्ध्यादिमनोमयीं **रक्षां कृत्वा** तदासनमुपस्पृश्य **रथमण्डले** प्रणवव्याहृतिसौम्याष्टाक्षरे यथाशक्ति **जप्त्वा** ॥ १७ ॥ ततस्तदासने यथाविध्युपविश्य अथ पद्मस्वस्तिकभद्र्योगासनेष्वन्यतमासनमास्थाय **सम्यक्** उत्तराभिमुखतया आसीनः सन् ॥ १८ ॥ **नासिकापुटं एकेन** साङ्गुलीकरेण **पिधाय मारुतमाकृष्य** मूलाधारत्रिकोणे **अग्निं धारयेत्**, धारयन् **शब्दं ओङ्कारमेव विचिन्तयेत्** ॥ १९ ॥ किं तत् । **ओमित्येकाक्षरमिति** । ओङ्कारानुसन्धानविच्छित्तिं न कुर्यात् । स्वान्तःकरणस्थमलविमुक्तये **बहुधेति** ॥ २० ॥ एवं **मन्त्रविदिति** । ध्यानक्रमनियम उच्यते—**स्थूलादीति** । स्वाविद्यापदस्थूलाद्यंशारोपापवादाधिकरणविराट्सूत्रबीजतुर्यरूपेण तत्प्रविभक्तस्थूलं सूक्ष्मं चाधिष्ठाय । चशब्दात् बीजतुर्यांशमप्यधिष्ठायेति द्योत्यते । विराडादयो भवन्ति (?) स्वनाभेरूर्ध्वं विद्यमानहृदयादिषु विराडादिध्यानस्य **उपक्रमः** कर्तव्यः ॥ २१ ॥ विराडादिध्यानोपक्रमानन्तरं **महामतिः** योगी स्वध्येयस्वरूपातिरिक्ततिर्यगूर्ध्वमधोदृष्टिं **विहाय** । चशब्दात्तदेकनिष्ठो भूत्वेति द्योत्यते । पूर्वोक्तपद्मासने **स्थिरस्थायी** भूत्वा स्वाभिलषितलक्ष्यानुसन्धानतो **विनिष्कम्पः** लक्ष्यैकतानचित्तः सन् **सदा** विराडादिरहमस्मीत्यनुसन्धानरूपं

[1] 'यत्' इत्येतत् लुप्तं—अ.

**योगं समभ्यसेत्** ॥ २२ ॥ कुम्भकमात्रानियमस्तु हटशाम्भवादि-**ताळमात्राविनिष्कम्पः** कालः अष्टमात्रात्मकः सप्तमात्रात्मको वा यथा लोके प्रथितः **तथा** कुम्भके श्वासधारणायोजनं कार्यम् । तथा सम्पूर्णकुम्भके **कालतो द्वादशमात्रात्मको योगस्तु** नियमेन स्मृतः । अत्रत्यद्वादशमात्राकालस्तु सहजो-च्छ्वासनिश्वासकालमानेन षण्णवतिमात्रात्मकः स्मृतः । एतावत्कालकुम्भके स्वरूपं ध्यायतः तदक्षरसाक्षात्कारो भवतीत्यर्थः ॥ २३ ॥ किं तदक्षरं घोषादि-वर्णात्मकं ? इत्यत आह—**अघोषमिति** । हशो घोषाः तद्रहितं **अघोषं व्यञ्जनं** ककारादिः तद्रहितं **अव्यञ्जनं** तथाऽकारादिस्वरविरळं **अस्वरं च** यत्तालुकण्ठोष्ठनासिकास्थाने अभिव्यज्यते तद्रहितं **अरेफजातं** अन्तःस्थ-कलनाविरळं शषसहाद्युभयोष्मवर्जितं **कथंचिदपि यन्न क्षरते तदेवाक्षरं** योगिप्रत्यक्षमुपलभ्यत इत्यर्थः ॥ २४ ॥

योगस्य नित्यकर्तव्यता

**येनासौ** [1]**पश्यते मार्गं प्राणस्तेनाभिगच्छति ।**
**अतस्तमभ्यसेन्नित्यं यन्मार्गगमनाय वै** ॥ २५ ॥

यतः स्वप्राप्य[ति]मार्गदर्शनहेतुः योगः अतस्तमेव सदा अभ्यसेदित्याह —**येनेति** ॥ **असौ** योगी **येन** योगेन स्वप्राप्यमार्गं **पश्यते** पश्यति **प्राणस्तु** दृङ्नोग्निभिः सह **तेन** एव मार्गेण **अभिगच्छति** । यत एवं **अतः यत्** पदप्रापकमार्गगमनायैव तमेव योगमप्रमादेन **अभ्यसेत्** ॥ २५ ॥

सप्त स्वप्राप्तिद्वाराणि

**हृद्द्वारं वायुद्वारं च मूर्धद्वारमथापरम् ।**
**मोक्षद्वारं बिलं चैव सुषिरं मण्डलं विदुः** ॥ २६ ॥

[1] गच्छते-क, अ २.

स्वप्राप्य[प्ति]द्वाराणि कतिविधानीत्यत आह—**हृद्वारमिति** ॥ **हृद्वारं** विराट्प्रापकं, विराजो हृदयाश्रितब्रह्माण्डोपाधिकत्वात् । **वायुद्वारं** सूत्रप्रापकं, वायोः सूत्ररूपत्वात्, "वायुर्वै गौतम तत्सूत्रं" इति श्रुतेः । **मूर्धद्वारं** बीजेश्वरप्रापकं, "तयोर्ध्वमायन्नमृतत्वमेति" इति श्रुतेः । **अथापरं** किमित्युक्ते **मोक्षद्वारं** अर्धमात्रात्मकं प्रत्यगभिन्नब्रह्मप्रापकं, तदवगतेरर्धमात्राद्वारकत्वात् । मोक्षद्वारं त्रिधा भिद्यते । तत् कथं? अर्धमात्रास्थूलांशात्मकं **बिलं**, तस्य तुर्यवैराजप्रापकत्वात् । अर्धमात्रासूक्ष्मांशात्मकं **सुषिरं**, तुर्यसूत्रप्रापकत्वात् । अर्धमात्राबीजांशात्मकं **मण्डलं**, तुर्यबीजप्रापकत्वात् । **च**शब्दात् परेति विख्यातकैवल्यद्वारमस्तीति द्योत्यते, तस्य निष्प्रतियोगिकब्रह्ममात्रगमकत्वात् । एवं सप्तधा स्वात्मप्तिद्वाराणि सन्तीति ब्रह्मविद्वरीयांसो **विदुः** जानन्तीत्यर्थः ॥ २६ ॥

भयादीनां त्यागः

**भयं क्रोधमथालस्यम् अतिस्वप्नातिजागरम् ।**
**अत्याहारमनाहारं नित्यं योगी विवर्जयेत् ॥ २७ ॥**

भयक्रोधादिविघ्नबाहुळ्ये सति कथमेवं सिद्धिः स्यादित्याशङ्क्य भयादित्यागतः तत्सिद्धिः स्यादित्यत आह—**भयमिति** ॥ निर्भयादिदर्शनेन भयादिवृत्तित्यागयोगो भवतीत्यत्र

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥

इति स्मृतेः ॥ २७ ॥

### अभ्यासफलम्

अनेन विधिना सम्यङ् नित्यमभ्यस्यते क्रमात् ।
स्वयमुत्पद्यते ज्ञानं त्रिभिर्मासैर्न संशयः ॥ २८ ॥
चतुर्भिः पश्यते देवान् पञ्चभिर्वि[1]ततः क्रमः ।
इच्छयाऽऽप्नोति कैवल्यं षष्ठे मासि न संशयः ॥ २९ ॥

एवमभ्यासं कुर्वतः अवान्तरफलं मुख्यफलं चाह—**अनेनेति** ॥ "भूमौ दर्भासने रम्ये" इति यदुक्तं अनेन विधिना अभ्यासं कुर्वतः **त्रिभिः मासैः** स्वयमेव उपदेशमन्तरा ब्रह्मज्ञानं उत्पद्यते ॥ २८ ॥ मासचतुष्टयाभ्यासात् इन्द्रादिदेवान् पश्यते पश्यति । मासपञ्चकाभ्यासतो **विततः क्रमो** विराडादिः दृश्यते । षण्मासाभ्यासतो यद्[दि]च्छया **कैवल्यं** आप्नोतीत्यत्र **न हि संशयः** अस्तीत्यर्थः ॥ २९ ॥

### योगचिन्त्यम्

पार्थिवः पञ्चमात्रस्तु चतुर्मात्रस्तु वारुणः ।
आग्नेयस्तु त्रिमात्रोऽसौ वायव्यस्तु द्विमात्रकः ॥ ३० ॥
एकमात्रस्तथाऽऽकाशो ह्यमात्रं तु विचिन्तयेत् ।

योगेन यच्चिन्त्यं तदाह **पार्थिव इति** ॥ ३० ॥ पार्थिवाद्याकाशान्तं एकैकगुणापकर्षतः सूक्ष्मत्वं प्रत्यक्त्वं व्यापकत्वम् । इत्थं मात्राविशिष्टभूतभौतिकजातापह्नवसिद्धं **अमात्रं** ब्रह्म निष्प्रतियोगिस्वयमात्रमिति **विचिन्तयेदित्यर्थः** ॥

[1] ततक्रमः—अ.

चिन्तनाप्रकारः

•संधिं कृत्वा तु मनसा चिन्तयेदात्मनाऽऽत्मनि ॥ ३१ ॥

[1]त्रिंशत्सार्धाङ्गुलः प्राणो यत्र प्राणैः प्रतिष्ठितः ।

एष प्राण इति ख्यातो बाह्यप्राणस्य गोचरः ॥ ३२ ॥

तच्चिन्तनाप्रकारमाह सन्धिमिति ॥ ३१ ॥ अर्धाङ्गुलाधिकत्रिंशदङ्गुलगतिः प्राणो यत्र हृदयाकाशे वागादिभिः प्राणैः सह प्रतिष्ठितः योऽयं बाह्यप्राणस्य आधिदैविकस्य गोचरो विषयो भवति एष एव आध्यात्मिकप्राण इति विख्यातो भवति । स यत्र हृदयाकाशे प्रत्यग्भास्ये स्वोपजीव्यकरणग्रामेण सह विलीयते तद्विलयाधिकरणं प्रत्यगभिन्नं ब्रह्म तस्मिन् ब्रह्मात्मनि ब्रह्माकारपरिणतमनसा तद्भासकप्रत्यगात्मना सन्धिमैक्यं कृत्वा प्रत्यक्परभेदसापेक्षतदैक्यगतसविशेषांशापह्नवसिद्धं ब्रह्म स्वमात्रमिति विचिन्तयेत् ॥ ३२ ॥

श्वासप्रमाणम्

अशीतिश्च शतं चैव सहस्राणि त्रयोदश ।

[2]लक्षश्चैकोननिश्वास अहोरात्रप्रमाणतः ॥ ३३ ॥

अहोरात्रनिर्वर्त्यश्वासप्रमाणमाह—अशीतिश्चेति ॥ द्व्यशीत्यधिकशतोत्तरसहस्रलक्षसङ्ख्याविशिष्टनिश्वासादिः अहोरात्रप्रमाणतो गण्यते । श्रुत्यन्तरे तु षट्सङ्ख्याहोरात्रयोः एकविंशतिसहस्राणि षट्छतान्यधिकानि भवन्तीत्याम्नातम् । प्रकारद्वयप्रविभातसङ्ख्याभेदस्तु बाल्यादिशरीरतारतम्यतः उपपद्यते । सुखं तिष्ठतो दृढगात्रस्य श्वासगतिः स्तिमिता विभाति, एतद्विपरीतस्य विपरीतं भवतीति उभयमपि सङ्गच्छते, नहि विरोधोऽस्तीत्यर्थः ॥ ३३ ॥

[1] त्रिंशत्यार्धा-क. त्रिंशत्वार्धाङ्गुलः-अ, उ. त्रिंशत्सार्धाङ्गुलः-इति तु पाठः व्याख्यानुसारीति धृतः [2] लक्षश्चैकोवि-अ १. लक्षश्चैकोवि-क, अ २.

प्राणादीनां स्थानानि

**प्राण आद्यो हृदि स्थाने अपानस्तु पुनर्गुदे ।**
**समानो नाभिदेशे तु उदानः कण्ठमाश्रितः ॥ ३४ ॥**
**व्यानः सर्वेषु चाङ्गेषु व्याप्य तिष्ठति सर्वदा ।**

एवं श्वासकृत्प्राणादिस्थानान्याह—**प्राण इति ॥ ३४ ॥**

तेषां वर्णभेदाः

**अथ वर्णास्तु पञ्चानां प्राणादीनामनुक्रमात् ॥ ३५ ॥**
**रक्तवर्णो मणिप्रख्यः प्राणवायुः प्रकीर्तितः ।**
**अपानस्तस्य मध्ये तु इन्द्रकोपसमप्रभः ॥ ३६ ॥**
**समानस्तु द्वयोर्मध्ये गोक्षीरधवलप्रभः ।**
**आपाण्डर उदानश्च व्यानो [1]ह्यर्चिसमप्रभः ॥ ३७ ॥**

प्राणाद्याकृतिवर्णभेदमाह **अथेति ॥ ३५-३७ ॥**

परमफलम्

**यस्येदं मण्डलं भित्त्वा मारुतो याति मूर्धनि ।**
**यत्र यत्र म्रियेद्वाऽपि न स भूयोऽभिजायते ।**
**न स भूयोऽभिजायत इत्युपनिषत् ॥ ३८ ॥**

षडङ्गयोगाभ्यासपरमफलं प्रकटयन् उपसंहरति—**यस्येति ॥ यस्य** मुमुक्षोः योगिनो **मारुतः** प्राणादिः **इदं** स्वाधिष्ठेयहृदयादि **मण्डलं अभ्यासबलेन**

[1]सम-अ.

भित्त्वा मूर्धनि सहस्रारे विद्यमानं तुर्यं तुर्यतुर्यं वा स्वमात्रमित्येति सोऽयं तादृशपरिपक्वयोगी "तीर्थे श्वपचगृहे वा" इत्यादिश्रुत्यनुरोधेन यत्र क्व जीवन् तिष्ठेत् म्रियेद्वाऽपि सोऽयं नहि भूयोऽभिजायते ब्रह्मवेदनकाल काले ब्रह्मैव भवतीत्यर्थः । आवृत्तिः आदरार्था । इत्युपनिषत्समाप्त्यर्थः अमृतनादोपनिषत्समाप्त्यर्थः ॥ ३८ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं नादोपनिषदः स्फुटम् ।
प्रकृतोपनिषद्व्याख्याग्रन्थः षष्ट्युत्तरं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकविंशतिसङ्ख्यापूरकं
अमृतनादोपनिषद्विवरणं सम्पूर्णम्

# अमृतबिन्दूपनिषत्

सह नाववतु—इति शान्तिः

मन एव बन्धमोक्षयोः कारणम्

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥ १ ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥ २ ॥

अमृतबिन्दूपनिषद्वेद्यं यत् [1] परमामृतम् ।
तदेव हि त्रिपाद्रामचन्द्राख्यं नः परा गतिः ॥

अथ खलु कृष्णयजुर्वेदप्रविभक्तेयं अमृतबिन्दूपनिषत् । तस्या उपोद्घातादिसङ्गतिः कठवल्ल्यादिसमा । इयं आख्यायिकां विना अवान्तररूपेण प्रवृत्ता । अल्पग्रन्थतोऽस्या विवरणमारभ्यते ॥ मन इति ॥ स्वातिरिक्ताविद्यापदतत्कार्यापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्राज्ञदृष्टिः यत् स्वातिरिक्तमस्तीति मननं करोति तदेव मनो मायातत्त्वम् । हिशब्देन त्रिगुणात्मकमनसो निष्प्रतियोगिकाभावरूपत्वं द्योत्यते । स्वाज्ञदृष्टिसत्यवद्विकल्पितमनो द्विविधमिति

[1] परमाक्षरं—उ, अ १.

शास्त्रतः प्रोक्तम् । किंरूपेण द्विविधमित्यत्र तत्सत्वांशः शुद्धं च तद्रजस्तमोंशः अशुद्धमेव च । पदद्वयं श्रुतिरेव व्याकरोति अशुद्धमिति । कामसङ्कल्पविशिष्टं अशुद्धं अविद्यांशत्वात्, कामसामान्यविवर्जितं शुद्धं विद्यांशत्वात् ॥ १ ॥ बन्धमोक्षहेतुः मन एवेत्याह—मन एवेति । सङ्कल्पादिवृत्तिमन्मनो बन्धहेतुः निःसङ्कल्पं मनो मुक्तिहेतुः इत्यर्थः ॥ २ ॥

मनोनिरोधो मोक्षोपायः

यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते ।
अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ॥ ३ ॥
निरस्तविषयासङ्गं संनिरुद्धं मनो हृदि ।
यदा यात्यात्मनोऽभावं तदा तत्परमं पदम् ॥ ४ ॥
तावदेव निरोद्धव्यं यावद्धृदि गतं क्षयम् ।
एतज्ज्ञानं च ध्यानं च शेषो न्यायश्च विस्तरः ॥ ५ ॥

यतो निर्विषयमनसो मुक्तिहेतुत्वं अतो मुमुक्षुणा मनो निर्विषयं कार्यमित्याह—यत इति ॥ ३ ॥ अमनीभाव एव मोक्ष इत्याह—निरस्तेति । यस्य मनसो ब्रह्मध्यानतो विषयासङ्गो निरस्तः तत् निरस्तविषयासङ्गं मनो हृदि संनिरुद्धं सत् यदा यस्मिन् काले आत्मनः स्वस्य अभावं अमनीभावं याति तदा तस्मिन् काले यत् सर्वोपह्नवसिद्धपदं तत् परमं पदं निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते ॥ ४ ॥ मनस्तत्कार्योपह्नवसिद्धं ब्रह्मेति यत् तदेव ज्ञानमिति सर्ववेदान्तपरमतात्पर्यमित्याह—तावदिति । यावद्धृदि कामादिवृत्तिमन्मनः क्षयं गतं तावदेव मनो निरोद्धव्यम् । यत् मनस्तत्कार्योपह्नवसिद्धं ब्रह्मस्वमात्रमिति जानाति तत् एतत् निर्विशेषज्ञानं ध्यानं च । शब्दद्वयतः निष्प्रतियोगिकस्वमात्रतया ब्रह्म ज्ञातुं ध्यातुं

शक्यते इति द्योत्यते । स्वातिरेकेण ज्ञातुं ध्यातुं किमन्यदस्ति, ब्रह्ममात्रस्यैव निष्प्रतियोगिकत्वात् । तदतिरेकेण शेषो न्यायश्च विस्तरः वाचारम्भण-मात्रत्वात, "वाचारम्भणं विकारो नामधेयम्" इति श्रुतेः ॥ ५ ॥

ब्रह्मज्ञानेन ब्रह्मभावप्राप्तिः

नैव चिन्त्यं न चाचिन्त्यं न चिन्त्यं चिन्त्यमेव च ।
पक्षपातविनिर्मुक्तं ब्रह्म संपद्यते [1]तदा ॥ ६ ॥

ब्रह्मयाथात्म्यविदः तद्भावापत्तिमाह—नैवेति । स्वातिरेकेण एतत् नैव चिन्त्यं स्वमात्रत्वात् । स्वमात्रतया नचाचिन्त्यं, सविशेषतया न चिन्त्यं, स्वयमेवेति चिन्त्यमेव तत् । नैव चिन्त्यमित्यादिपक्षे पततीति पक्षपातं तद्विनिर्मुक्तं ब्रह्म स्वमात्रमिति यदा वेद तदा वेदनसमकालं ब्रह्म सम्पद्यते ब्रह्मैव भवतीत्यर्थः ॥ ६ ॥

सविशेषब्रह्मानुसन्धानेन निर्विशेषब्रह्माधिगमः

स्वरेण संधयेद्योगमस्वरं भावयेत्परम् ।
अस्वरेणानुभावेन [2]नाभावो भाव इष्यते ॥ ७ ॥
तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम् ।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवम् ॥ ८ ॥
निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम् ।
अप्रमेयमनादिं च यत् ज्ञात्वा मुच्यते बुधः ॥ ९ ॥

[1] ध्रुवं—क, अ २. [2] नभावो-क, अ १, अ २.

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न [1]मुमुक्षुर्न वै मुक्तः इत्येषा परमार्थता ॥ १० ॥

सविशेषब्रह्मोपासनया निर्विशेषब्रह्माधिगमः स्यादित्याह—**स्वरेणेति** । ओङ्कारस्वरेण आदावपरब्रह्मयोगं सन्धयेत् सविशेषेश्वरोऽस्मीत्यनुसन्धानं कुर्यात् । सविशेषब्रह्मप्रसादात् परं अस्वरं निर्विशेषं ब्रह्म भावयेत् । अस्वरेण निर्विशेषब्रह्मणा अनुभावेन अनुभवेन अस्वरं परं ब्रह्मैव भावयेदिति पूर्वेणान्वयः । स्वराभावोऽस्वर इति चेन्न, अस्वरस्य निर्विशेषब्रह्मतया भावरूपत्वात् । न हि भावः कदाऽप्यभाव इष्यते ॥ ७ ॥ यस्मादेवं तस्मात् यदेव अस्वरं तदेव प्राणादिनामान्तषोडशकला-वैलक्षण्येन उपबृंहणात् निष्कलं ब्रह्म स्वविकल्पितविकल्पासम्भवात् निर्विकल्पं स्वाञ्जनार्हस्वातिरिक्तवैरळ्यात निरञ्जनं यत् तत् ब्रह्माहमिति ज्ञात्वा तज्ज्ञानसमकालं ध्रुवं निर्विशेषं ब्रह्म सम्पद्यते ॥ ८ ॥ उक्तार्थमेव भङ्ग्यन्तरेणाह—**निर्विकल्पमिति** । जाग्रज्जाग्रदाद्यविकल्पानुञ्जैकरसान्तचतु-ष्पञ्चदशविकल्पाः यत्र स्वावशेषतया पर्यवस्यन्ति तत् निर्विकल्पम् । निर्वि-कल्पस्य सूक्ष्मत्वेनान्तवत्त्वं स्यादित्यत आह—**अनन्तं चेति** । त्रिविधपरि-च्छेदवैरळ्यात् "देशतः कालतो वस्तुतः परिच्छेदरहित ब्रह्म" इति श्रुतेः । चशब्दो निष्प्रतियोगिकानन्त्यद्योतकः । उक्तार्थे को हेतुः, दृष्टान्तो वा कः, इत्यत आह—**हेतुदृष्टान्तवर्जितमिति** । स्वसिद्धौ स्वातिरिक्तहेत्वभावात् स्वस्य निष्प्रतियोगिकत्वेन दृष्टान्तासम्भवाच्च । यतः एवं अतः तत् अप्रमेयं वेदान्तेतरप्रमाणासहत्वात् । अप्रमेयत्वेऽपि तदादिमत् स्यात् इत्यत आह —**अनादिं चेति** । निष्प्रतियोगिकसन्मात्रस्य उत्पत्त्यादेरसम्भवात् । च-शब्दतः स्वातिरिक्तस्याप्यजत्वं द्योत्यते, "पश्यतेहापि सन्मात्रमसदन्यत्" "ब्रह्ममात्रमसन्नहि" इति श्रुतेः । यत् एवं ज्ञात्वा बुधो विद्वान् ज्ञानसमकालं स्वातिरिक्तास्तित्वभ्रमतो मुच्यते तत् स्वमात्रमवशिष्यते इत्यर्थः ॥ ९ ॥

[1] मुमुक्षान—अ २.

उत्पत्तिप्रलयबन्धमोक्षादिव्यवस्थादर्शनात् कथं स्वमात्रसिद्धिरित्याशङ्क्य अस्याः स्वाविद्याविकल्पितत्वेन कारणतुल्यत्वात् निष्प्रतियोगिकस्वमात्रसिद्धिः निरङ्कुशा इत्याह—**न निरोध** इति। **निरोधः** प्रलयः, **उत्पत्तिः** जातिः, **बद्धः** संसारी, **मोक्षसाधकः** प्रमाता, स्वाज्ञानतत्कार्यात मोक्तुमिच्छुः **मुमुक्षुः**, संछिन्नसंसृतिपाशो **मुक्तः** इत्यादिकल्पना यतः स्वातिरिक्तास्तिताप्रभवा अतः स्वातिरिक्तसामान्यस्य शशविषाणवदवस्तुत्वेनाविद्यकत्वात् स्वातिरिक्तोत्पत्तिप्रलयादिः निष्प्रतियोगिकाभावरूपः इत्यत्र मायाविद्याज्ञानविश्वाभावान्तःकरणादयः ब्रह्मातिरिक्तपर्यायाः अत्यन्ताभावरूपिणः इति परमाक्षरोक्तेः निरोधादि न स्वमात्रे अस्ति **इत्येषैव परमार्थता**। अतो निष्प्रतियोगिकब्रह्ममात्रसिद्धिः निरङ्कुशेत्यर्थः ॥ १० ॥

### आत्मनः एकत्वम्

**एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु।**
**स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते ॥ ११ ॥**
**एक एव हि भूतात्मा भूते भूते व्यवस्थितः।**
**एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ १२ ॥**

अवस्थाभेदानुरोधेन तदध्यक्षभेदः स्यादित्यत आह—**एक इति**। चतुश्चतुर्धाभिन्नजाग्रत्स्वप्नसुषुप्तिषु विश्वविश्वाद्यनुङ्गैकरसाविकल्पान्तभेदेन यो विभागः सोऽयं **आत्मा एक एव** इति **मन्तव्यः**, घटशरावाद्यनुगतव्योमैकत्ववत् जाग्रज्जाग्रदाद्यवस्थानुगतविश्वविश्वादिचित एकत्वात्। एवं चतुश्चतुर्धाभिन्न**स्थानत्रयव्यतीतस्य** तुर्यावस्थाऽऽरूढस्य विश्वविश्वादिरूपेण **पुनर्जन्म न विद्यते** तथा जन्महेतुस्वाज्ञानवैरळ्यात् ॥ ११ ॥ कथं पुनरात्मनः एकत्वमित्यत्र सदृष्टान्तमेकत्वमाह—**एक इति**। पञ्चभूतभौतिकव्यवस्थित **आत्मा एक एव हि** स्वज्ञादिदृश्यनुरोधेन नभोजलबिम्बप्रतिबिम्बभावमापन्नचन्द्रवत् शिवजीवभेदेन **एकधा बहुधेव दृश्यते**, वस्तुत आत्मन एकत्वात् ॥ १२ ॥

आत्मनो जन्ममनाशराहित्यम्

घटसंवृतमाकाशं नीयमाने घटे यथा ।
घटो [1]लीयेत नाकाशः तद्वज्जीवो नभोपमः ॥ १३ ॥
घटवद्विविधाकारं भिद्यमानं पुनः पुनः ।
तद्भेदे च न जानाति स जानाति च नित्यशः ॥ १४ ॥

सर्वोपाध्यवच्छिन्नात्मनः तत्सत्त्वासत्त्वाभ्यां स्थितिनाशौ स्यातामित्यत आह—घटेति । **घटसंवृतं** घटावच्छिन्नाकाशं अन्येन घटे **नीयमाने यथा** घटावच्छिन्नाकाशं नीतमिव भाति न वस्तुतः आकाशस्याचलत्वात्, यदा **घटो लीयेत न** हि तदवच्छिन्नाकाशो लीनो भवति तथा **तद्वत् नभोपमो जीवः** स्वोपाधिचलननाशाभ्यां जीवो न चलति न नश्यति चेत्यर्थः "जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते" इति श्रुतेः ॥ १३ ॥ स्वोपाधिसत्त्वासत्त्वाभ्यां आत्मा दृश्यते न दृश्यते इति यो जानाति स एव आत्मयाथात्म्यं जानातीत्याह—**घटवदिति** । यथा घटादिः **विविधाकारः** तद्वत् तदवच्छिन्नाकाशमपि **पुनः पुनः** उद्भूतघटादिरूपं विविधाकारमिव दृश्यते । तद्घटादीनां भेदे ध्वंसे लोकस्तदवच्छिन्नाकाशभेदं यथा न जानाति अखण्डाकाशमेव पश्यति, तद्याथात्म्यज्ञस्तु घटाद्युपाधिसत्त्वासत्त्वाभ्यां **नित्यशोऽखण्डाकाशमेव जानाति** ॥ १४ ॥

निरुपाधिकात्मदर्शनम्

शब्दमायावृतो नैव [2]तमसा याति पुष्करे ।
भिन्ने तमसि चैकत्व[3]मेक एवानुपश्यति ॥ १५ ॥

[1] नीयेत—अ, अ २. [2] तमसो—क, अ, अ १, अ २. [3] मेकमेवा—क.

तथा स्वाज्ञदृष्टिरुपाध्यनुकारिनानात्मभेदं पश्यति उपाध्यपाये तद्भेदं न पश्यति । परमार्थमतिस्तूपाधिसत्त्वासत्त्वाभ्यां निरुपाधिकमात्मानमेकमेवानुपश्यतीत्याह—**शब्देति** । शब्दार्थप्रपञ्चहेतुभूता **शब्दमाया**, यद्वा अर्थशून्यतया शब्दमात्ररूपिणी वाचारम्भणात्मिका अघटितघटनापटीयसी माया, तयाऽऽवृतो जन्तुः **तमसा** अन्धकारेण आवृतजन्तुवत् **पुष्करे** परमपावने स्वात्मनि **नैव याति** । प्रदीपादिना अन्धकारभेदवत् स्वज्ञानेन स्वाज्ञानतमसि **भिन्ने**, चकारात् तद्वासनायां नष्टायां, प्रत्यक्परचितोः **एकत्वं एक एवानुपश्यति** । यद्वा—स्वाज्ञस्तु **शब्दमायावृतः** सन् **पुष्करे तमसाऽऽवृतजन्तुवत्** सर्वभूतप्रत्यग्ब्रह्मैक्यज्ञानं **नैव याति** । स्वज्ञस्तु स्वाज्ञानतमसि **भिन्ने** पुष्करे परमात्मनि सर्वभूतप्रत्यगेकत्वमनुपश्यति । परमार्थदृष्टिस्तु प्रत्यक्परविभागैक्यासहब्रह्मतत्त्वं निष्प्रतियोगिकस्वमात्रमिति पश्यति ॥ १५ ॥

शब्दब्रह्मध्यानेन परब्रह्माधिगमः

**शब्दाक्षरं परं ब्रह्म तस्मिन्क्षीणे यदक्षरम् ।**
**तद्विद्वानक्षरं ध्यायेद्यदीच्छेच्छान्तिमात्मनः ॥ १६ ॥**
**द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत् ।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ १७ ॥**
**ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ।**
**पलालमिव धान्यार्थी त्यजेद् ग्रन्थमशेषतः ॥ १८ ॥**

निर्विशेषब्रह्ममात्रावगत्युपायमाह—**शब्देति** । निर्विशेषब्रह्मास्त्युपायत्वेन यत् प्रसिद्धं **शब्दाक्षरं** ॐ इत्येतदक्षरं **परं ब्रह्मालम्बनं** तदर्थज्ञानतः **तस्मिन्** सावयवे शब्दाक्षरे **क्षीणे** विलयं प्रपन्ने सति **यत्** शब्दाक्षरविलयाधिकरणं **अक्षरं** न क्षरति तदेतत् आधेयाधारात्मकक्षराक्षरगतहेयांशापह्नवसिद्धं परमाक्षरं **यदि विद्वानात्मनः** स्वातिरिक्ताक्षराक्षरप्रपञ्चशान्तिं **इच्छेत्** तदा **तदक्षरं**

अहमस्मीति ध्यायेत् ॥ १६ ॥ शब्दब्रह्मयाथात्म्यज्ञानतः शब्दप्रपञ्च-निरसनपूर्वकं तदर्थब्रह्माधिगमो भवतीत्याह—द्वे इति । शब्दब्रह्म परब्रह्मेति यत् ब्रह्म द्विविधं तच्छब्दपरब्रह्मगोचरे द्वे विद्ये वेदितव्ये सगुण-निर्गुणब्रह्मयाथात्म्ये ज्ञातव्ये । तु शब्दोऽवधारणार्थः । तयोरुपायोपेयात्मक-त्वात् तत्रोपायभूते शब्दब्रह्मणि सविशेषब्रह्मणि निष्णातो मुनिः—प्रणववाच्यब्रह्मानुसन्धानतः निर्विशेषब्रह्मज्ञानमुदेति—तज्ज्ञानोदयसमकालं स्वातिरिक्तसर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति परं ब्रह्माधिगच्छति तन्मात्रतया विद्वानवशिष्यते इत्यर्थः ॥ १७ ॥ ब्रह्माधिगमेऽपि तद्धेतुग्रन्थाभ्यासः कर्तव्य इत्यत आह—ग्रन्थमिति । साधनचतुष्टयसम्पन्नो विद्वान् यावत् ब्रह्ममात्रज्ञानं नोदेति तावत् तज्ज्ञानविज्ञानतत्परः सन् सर्ववेदान्तग्रन्थजातमभ्यस्य संशयादिपञ्चदोषशान्यन्तं गुरुमुखात् श्रवणं कृत्वा अथ मननिदिध्यासनप्रभवसम्यज्ज्ञानं यदि जायते तदा धान्यार्थी पलालमिव ग्रन्थजातमशेषतः त्यजेत्, प्रयोजनाभावात् । नहि सरित्पारं प्रविष्टस्य नौकापेक्षाऽस्ति, तथेत्यर्थः ॥ १८ ॥

### सर्वभूतप्रत्यगात्मनः एकत्वम्

गवामनेकवर्णानां क्षीरस्याप्येकवर्णता ।
क्षीरवत्पश्यते ज्ञानं लिङ्गिनस्तु गवां यथा ॥ १९ ॥
घृतमिव पयसि निगूढं भूते भूते च वसति विज्ञानम् ।
[1]सततं मनसि मन्थयितव्यं मनोमन्थानभूतेन ॥ २० ॥

नानाऽन्तःकरणावच्छिन्नप्रतीचो नानात्वं स्यादित्यत आह—गवामिति । नानावर्णविशिष्टगोक्षीरं यथा एकरूपं तथा नानालिङ्गयनुगतप्रत्यज्ज्ञानमेकरूपम्।

[1] अत्र उत्तरार्धं मूलकारानुसारेण धृतम्. तत्र "मनसि" इत्येतस्य लोपो युज्येत. "मनसा मन्थानभूतेन" इति मु. पाठः

तुशब्दोऽवधारणार्थः ॥ १९ ॥ एवं सर्वभूतप्रतीचः एकत्वं किं न भातीत्यत आह—**घृतमिवेति** । यथा **पयसि निगूढं** घृतं मथनादिना आविर्भवति तथा भूते **भूते** सर्वभूतान्तःकरणे तद्वृत्तिभावाभावप्रकाशकमपि **विज्ञानं प्रत्यक्तत्त्वं** स्वाज्ञदृष्टिनिगूढतया **वसति** । चशब्दो निस्संशयार्थः । प्रत्यगभिमुखीभूते **मनसि मन्थानभूतेन** प्रत्यग्भावमापन्नेन मनसा **मन्थयितव्यम्** । एवं सन्ततमननात् पराक्सापेक्षप्रत्यक्परविभागैक्यगतहेयांशापह्नवसिद्धं ब्रह्ममात्रं निष्प्रतियोगिकतया आविर्भवतीत्यर्थः ॥ २० ॥

तत्साक्षात्कारसाधनं ध्यानम्

ज्ञाननेत्रं समाधाय चोद्धरेद्वह्निवत् परम् ।
निष्कलं निश्चलं शान्तं तद् ब्रह्माहमिति स्मृतम् ॥ २१ ॥
सर्वभूताधिवासं यद्भूतेषु च वसत्यपि ।
सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवः ॥ २२ ॥

तदस्म्यहं वासुदेव इत्युपनिषत् ॥

सर्वभूतनिगूढं ब्रह्म कथं साक्षात्कर्तुं शक्यमित्यत आह—**ज्ञानेति** । सर्वापह्नवसिद्धब्रह्ममात्रगोचरज्ञानमेव नेत्रं **ज्ञाननेत्रमन्तःकरणे समाधाय** विन्यस्य —चशब्दात् ज्ञानेतरसाधनासिद्धत्वं द्योत्यते—दार्वोः मथनाविर्भूतवह्निवत् निष्प्रतियोगिकं **परं** ब्रह्म **उद्धरेत्** । प्राणादिकलासु सत्सु कथं निष्प्रतियोगिकता इत्यत आह—**निष्कलमिति** । ब्रह्ममात्रसिद्धेः प्राणादिनामान्तषोडशकलापह्नवपूर्वकत्वात् । पूर्णत्वात् **निश्चलं** स्वातिरिक्तशान्तं यदवशिष्यते **तत् निष्कलमित्यादि**पदत्रयविशिष्टं **ब्रह्मेति स्मृतं**, ब्रह्म स्वमात्रमिति पर्यवसन्नमित्यर्थः ॥ २१ ॥ निष्प्रतियोगिकब्रह्ममात्रस्य अर्धमात्राभागत्रयावष्टम्भतः सार्वात्म्यं वस्तुतः स्वमात्रसिद्धिं प्रकटयन् उपसंहरति—**सर्वेति** । यत् सर्वभूतानामधिवासः स्थानं अधिष्ठानत्वात्, यदन्तर्याम्यात्मनाऽपि **भूतेषु च वसति, यत् सर्वानुग्राहकत्वेन**

कूटस्थचिन्मात्रतया अवशिष्यते **तदस्म्यहं वासुदेवः** तत्परवासुदेवाख्यं **ब्रह्मास्मि**। यः स्वातिरिक्ताधिवसनाद्वासुः सचासौ अधिष्ठेयसापेक्षाधिष्ठानगतहेयांशापह्नव-सिद्धनिष्प्रतियोगिकब्रह्ममात्रतया दीव्यत इति देवः परमात्मा स्वमात्रमवशिष्यत इति फलितोऽर्थः। आवृत्तिरादरार्था। **इत्युपनिषच्छब्दः** प्रकृतोपनिषत्स-माप्त्यर्थः॥ २२॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणं बिन्दूपनिषदः स्फुटम्।
प्रकृतोपनिषद्व्याख्याग्रन्थस्त्रिशाधिकं शतम्।

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे विंशतिसङ्ख्यापूरकं
अमृतबिन्दूपनिषद्विवरणं सम्पूर्णम्

# क्षुरिकोपनिषत्

सह नाववतु—इति शान्तिः

योगाधिकारः

क्षुरिकां संप्रवक्ष्यामि धारणां योगसिद्धये ।
यां प्राप्य न पुनर्जन्म योगयुक्तस्य जायते ॥ १ ॥
वेदतत्त्वार्थविहितं यथोक्तं हि स्वयम्भुवा ।

कैवल्यनाडिकान्तस्थपराभूमि[1]वरासनम् ।
क्षुरिकोपनिषद्योगभासुरं राममाश्रये ॥

इह खलु कृष्णयजुर्वेदान्तर्गतेयं क्षुरिकोपनिषत् ज्ञानप्रतिबन्धकनिरसनयोगशास्त्ररूपिणी प्रवृत्ता । तस्याः उपोद्घातादि कठवल्लीवदूह्यम् । उक्तलक्षणलक्षितायाः अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । श्रुतिरेव यथोक्ताधिकारिण उद्दिश्य स्वच्छन्दं प्रवृत्तेति यत्तद्विद्यास्तुत्यर्थम् । केयं श्रुतिरित्यत आह—**क्षुरिकामिति** ॥ ये यथोक्तयोगसाधनसम्पन्नाः तान् प्रति स्वाज्ञानहृदयग्रन्थिच्छेदनपटीं **क्षुरिकामिव** शास्त्ररूपां **धारणां** ब्रह्मातिरिक्तं न किञ्चिदस्तीति भावनालक्षणां **सम्यक् प्रवक्ष्यामि** । किमर्थं ? ब्रह्ममात्रानुसन्धानं

[1] निवासिनं-इति पाठान्तरम् .

**योगः तत्सिद्धये** तदवगतय इत्यर्थः । **यां** उक्तलक्षणलक्षितां धारणां **प्राप्य योगयुक्तस्य** मुनेः **न पुनर्जन्म जायते** जनिमृतिकलना न हि भवति तामेव संप्रवक्ष्यामीति पूर्वेणाऽन्वयः ॥ १ ॥ किं तद्योगलक्षणं, केनोक्तं, किं तत्साधनजातं, इत्यत आह—वेदेति । स्वयमेव भवतीति स्वयंभूः तेन **स्वयंभुवा** ब्रह्मणा परमेश्वरेण योगशिखाऽऽदौ ब्रह्माणं प्रति **यथोक्तं** तत् वेदतत्त्वार्थविहितं सर्ववेदान्तसम्मतमित्यर्थः ॥

### आसनप्राणायामौ

**निःशब्दं देशमास्थाय तत्रासनमवस्थितः ॥ २ ॥**
**कूर्मोऽङ्गानीव संहृत्य मनो हृदि निरुध्य च ।**
**मात्राद्वादशयोगेन प्रणवेन शनैःशनैः ॥ ३ ॥**
**पूरयेत् सर्वमात्मानं सर्वद्वारं निरुध्य च ।**
**उरोमुखकटिग्रीवं किंचिद्धृदयमुन्नतम् ॥ ४ ॥**
**प्राणान् संधारयेत् तस्मिन् नासाभ्यन्तरचारिणः ।**
**भूत्वा तत्रायतप्राणः शनैरुच्छ्वासमुच्छ्वसेत् ॥ ५ ॥**

तथाविधयोगसिद्धये साधनान्युपदिशति—**निःशब्दमिति** ॥ यो निर्विकल्पकयोगार्थी सोऽयं जनसंबाधराहित्यात् **निःशब्दं देशमास्थाय तत्र** रहस्यप्रदेशे सिद्धपद्माद्यासनं **अवस्थितः** सन् ॥ २ ॥ श्रोत्रादीनीन्द्रियाणि **कूर्मोऽङ्गानीव संहृत्य** स्वहृदि **मनो निरुध्य** । चशब्दात् प्राणेन्द्रियद्वारसङ्कल्पविरळं मनः कृत्वेति द्योत्यते ।

जानू प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
अङ्गुलीस्फोटनं कुर्यात् सा मात्रा परिकीर्तिता ॥

इति श्रुतिसिद्धकालरूपमात्राद्वादशयोगेन चतुर्मात्रप्रणवेन **शनैःशनैः** ॥ ३ ॥ **सर्वमात्मानं** स्वशरीरं वायुना **पूरयेत** । वायुनिर्गमनद्वारेषु सत्सु कथं वायुधारणा स्यादित्यत्र अपानादि**सर्वद्वारं निरुध्य** । **च**शब्दात् पूरितं वायुं अष्टचत्वारिंशन्मात्राकालं कुम्भयेदिति द्योत्यते । एवं धारणां कृत्वा यथावत् रेचयेत इत्याह—**उर** इति । सिद्धाद्यासनस्थितो योगी उरश्च मुखं च कटिश्च ग्रीवा च **उरोमुखकटिग्रीवमिति** । प्राण्यङ्गत्वात एकवद्भावः । **हृदयं** च **किंचित्** उन्नतं विधाय ॥ ४ ॥ एवं यथोक्तकालं **आयतप्राणो भूत्वा शनैःशनैः** उच्छ्वासं उच्छ्वसेत चतुर्विंशतिमात्राकालं पूरितं वायुं रेचयेत् । इडया वायुमापूर्य कुम्भयित्वा पिङ्गाळ्या विरेच्य पुनः पिङ्गळ्याऽऽपूर्य कुम्भयित्वा इडया विरेचयेत । एवं प्रतिदिनं चतुष्कालं अशीति-प्राणायामं कुर्यात इति भावः ॥ ५ ॥

प्रत्याहारः

स्थिरमात्मदृढं कृत्वा अङ्गुष्ठेन समाहितः ।
द्वे गुल्फे तु प्रकुर्वीत जङ्घे चैव त्रयस्त्रयः ॥ ६ ॥
द्वे जानुनी तथोरू द्वे गुदे शिश्नं त्रयस्त्रयः ।
पायोरायतनं तत्र नाभिदेशे समाश्रयेत् ॥ ७ ॥
तत्र नाडी सुषुम्ना तु नाडिभिर्दशभिर्वृता ।
तत्र रक्ता च पीता च कृष्णा ताम्रा विलोहिता ॥ ८ ॥
अतिसूक्ष्मा च तन्वी च [1]शुक्लां नाडीं समाश्रयेत् ।
तत्र सञ्चारयेत् प्राणान् ऊर्णनाभीव तन्तुना ॥ ९ ॥

[1] शुक्ला नाडी-अ.

ततो रक्तोत्पलाभासं हृदयायतनं महत् ।
हरं पुण्डरीकं तत् वेदान्तेषु निगद्यते ॥ १० ॥
तद्भित्त्वा [1]कण्ठमायाति तन्नाडीं पूरयेदिति ।

आसनप्राणायामलक्षणमुक्त्वा प्रत्याहारलक्षणमाह—**स्थिरमिति** । एवं प्राणाभ्यासपाटवात योगी सिद्धं पद्मासनं वा आस्थाय समाहितेन्द्रियो भूत्वा कनिष्ठिकानामिकाभ्यां सहाङ्गुष्ठेन नासिकापुटं निरुध्य हृदये **स्थिरं** यथा भवति तथा **स्वात्ममनःप्राणं** दृढं कृत्वा केवलकुम्भकमास्थाय । अथ द्वे **गुल्फे** वर्तेते तत्र वायुं समागोप्य धारणां **कुर्वीत** । तुशब्दतः पादाङ्गुलीष्वपि वायुमागोपयेदिति द्योत्यते । ततो **जङ्घे** जङ्घाप्रदेशे **चैव** । **त्रयस्त्रय** इत्यावृत्तिः आदरार्था । पादाङ्गुलीगुल्फजङ्घेषु त्रयस्त्रय इति द्वितीयार्थे प्रथमा—त्रिसङ्ख्याकान् दृष्टिमनःप्राणान् क्रमेण आरोप्य ततस्ततः प्रत्याहरेत् ॥ ६ ॥ **तथा** द्वे **जानुनी ऊरू** द्वे **गुदे शिश्ने** च **त्रयस्त्रयो** दृष्टिमनःप्राणान् प्रत्याहरेत् । जानूरुमूलाधारस्वाधिष्ठानेषु तत्र तत्र कुम्भित्वा प्रत्याहृत्य अथ **पायोः** मूलाधारादेः यदायतनं आश्रयः **तत्र नाभिदेशे** मणिपूरके दृष्टिमनःप्राणान् समागोप्य तज्जयपर्यन्तं **समाश्रयेत्** ॥ ७ ॥ **तत्र** मणिपूरकाश्रयनाडीकन्दे इडापिङ्गळादिनाडीभिः **दशभिः वृता** सती **सुषुम्ना** नाम काचन **ब्रह्मनाडी** वर्तते । **तत्रैव** नाडीकन्दे **रक्ता**, चशब्दात् **कपिशा**, **पीता** चशब्दात् पिशङ्गा, **कृष्णा**, **ताम्रा**, **विलोहिता** । पाण्डरादिवर्णविशिष्टा इडा-पिङ्गळा-गान्धारा-वरुणेत्यादिदशनाडीततिः ॥ ८ ॥ **सूक्ष्मा च तन्वी च** । चशब्दद्वयतः द्वासप्ततिसहस्रसङ्ख्याः प्रधाननाड्यः सन्तीति द्योत्यते । सर्वासु नाडीषु या प्रधानभूता शुक्लवर्णोज्ज्वला तां **शुक्लां सुषुम्नानाडीं समाश्रयेत्** । तत्र दृङ्मनःप्राणान् प्रत्याहरेत् इत्याह—**तत्रेति** । यथा **ऊर्णनाभिः तन्तुना** सञ्चरति तथा **तत्र** सुषुम्नायां दृगादीन् संक्रमेत् इत्यर्थः ॥ ९ ॥ **ततः** सुषुम्नामार्गात् **रक्तोत्पलाभासं हृदयायतनं** नाड्यपेक्षया

[1] कर्ण-अ.

महत्। "दहरं पुण्डरीकं वेश्म" इत्यादिवेदान्तेषु यत् दहरं पुण्डरीकं निगद्यते तत्र सुषुम्नानाळार्पितहृदये दृगादीन् त्रीनपि प्रत्याहरेत्॥ ॥ १० ॥ ततः तत् हृदयपङ्कजं भित्त्वा दृगादिः कण्ठं तद्गतविशुद्धिचक्रं याति। तत्र प्रत्याहृत्य, ततो भ्रूमध्यं आज्ञाचक्रं ततः सहस्रारचक्रं च पूरयेत् प्रत्याहरेत्। इतिशब्दः प्रत्याहारसमाप्त्यर्थः ॥

धारणाध्यानसमाधयः

मनसस्तु परं गुह्यं [1]सुतीक्ष्णं बुद्धिनिर्मलम् ॥ ११ ॥
पादस्योपरि यन्मर्म तद्रूपं नाम चिन्तयेत्।
मनोधारेण तीक्ष्णेन योगमाश्रित्य नित्यशः ॥ १२ ॥
इन्द्रवज्रमिति प्रोक्तं मर्मजङ्घानुकृन्तनम्।
तद्ध्यानबलयोगेन धारणाभिर्निकृन्तयेत् ॥ १३ ॥
ऊर्वोर्मध्ये तु संस्थाप्य मर्मप्राणविमोचनम्।
चतुरभ्यस्य योगेन छिन्देदनभिशङ्कितः ॥ १४ ॥
ततः कण्ठान्तरे योगी [2]समूहेन्नाडिसञ्चये।
एकोत्तरं नाडिशतं तासां मध्ये परा स्थिरा ॥ १५ ॥
सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी।
इडा तिष्ठति वामेन पिङ्गळा दक्षिणेन तु ॥ १६ ॥
तयोर्मध्ये परं स्थानं यस्तं वेद स वेदवित्।
द्वासप्ततिसहस्राणि प्रतिनाडीषु तैतिलम् ॥ १७ ॥

[1] सुतीर्ण-अ. [2] समूहे ना-क, अ.

छिद्यते ध्यानयोगेन सुषुम्नैका न छिद्यते ।
[1]योगनिर्मलसारेण क्षुरेणानलवर्चसा ॥ १८ ॥
छिन्देन्नाडीशतं धीरः प्रभवादिह जन्मनि ।
[2]जातीपुष्पसमं योगी यदा पश्यति तैतिलम् ॥ १९ ॥
एवं शुभाशुभैर्भावैः सा नाडीनां विभावयेत् ।
तद्भाविताः प्रपद्यन्ते पुनर्जन्मविवर्जिताः ॥ २० ॥

ततो धारणाध्यानसमाधिलक्षणमाह—**मनस** इति ॥ **मनसः** अन्तःकरणवृत्तिसहस्रात् **परम्** । तुशब्दो मनस्तत्कार्यस्य वस्तुतोऽसम्भवार्थः । **गुह्यं**, अनधिकारिणो गोपनीयत्वात् । **सुतीक्ष्णं**, स्वाज्ञानतत्कार्यतन्तुच्छेदनसुतीक्ष्णस्वज्ञानशस्त्रवत्वात् । **बुद्धिनिर्मलं**, निर्मलबुद्धिवेद्यत्वात् ॥ ११ ॥ विश्वविराडोत्रादिपादजातस्य **उपरि** यन्मर्म विश्वाद्यसम्भवप्रबोधसिद्धसीम **तद्रूपं नाम** तदस्मीति **चिन्तयेत्** धारयेत् । एवं ब्रह्मधारणं स्वाज्ञानग्रन्थिच्छेदकं स्यादित्याह—**मन** इति ॥ एवं **नित्यशः** सदा **तीक्ष्णेन मनोधारेण** ब्रह्मातिरिक्तं न किञ्चिदस्तीति मनोधारणारूपशस्त्रेण, स्वाज्ञानं भ्रमं छिन्देत् इत्यन्वयः ॥ १२ ॥ यत् स्वाज्ञानपर्वतभेदने **इन्द्रवज्रमिति प्रोक्तं** स्वातिरिक्तमर्माद्यवयवकृन्तनं तथाविधयोगं सुषुम्नाभेदनलक्षणं आश्रित्य **तद्ब्रह्माहमस्मीति ध्यानबलयोगेन** तद्विशिष्टपदाङ्गुष्ठादिसहस्रारान्त**धारणाभिः** स्वातिरिक्तं भ्रमं **निकृन्तयेत्** ॥ १३ ॥ यदि पुनः स्वातिरिक्तभ्रम उदेति तदा स्वाविद्यापदस्य **ऊर्वोः** व्यष्टिसमष्ट्योः तदारोपापवादाधारविश्वविराट्तत्तुर्ययोः यत् मध्यं अविकल्पं तस्मिन् **मध्ये** दृङ्मनःप्राणान् **संस्थाप्य** धारणां कृत्वा । तुशब्दः अवधारणार्थः । यथोक्तयोगेन स्थूलादिचतुरंशाढ्यस्वाविद्यापदतत्कार्यं **मर्म** । तदारोपापवादाधारः **प्राणो** विश्वविराडोत्रादिः **तन्मोचनं चतुरभ्यस्य** मर्मप्राणस्थूलादिचतुरंशापवादं कृत्वा तदपवादाधिकरणं

[1] योगे नि-अ. [2] जातिपुष्पमयं-क,

ब्रह्मास्मीति धारणाबलेन अनभिशङ्कितः सन् योगी योगान्तरायं छिन्देत् ॥१४॥ ततः किं इत्यत आह—तत इति ॥ यतः नाडीसञ्चयशुद्धिं विना योगसिद्धिः न भवति ततः कारणात् योगी स्वकण्ठान्तरे विलसन्नाडीसञ्चये प्राणवायुं सम्यक् ऊहेत्, केवलकुम्भकोपायतो नाडीसञ्चयशुद्धिं कुर्यात्। प्रधाननाड्यः काः इत्यत आह—एकेति ॥ स्वदेहमध्ये एकोत्तरं इडादिप्रधाननाडीशतं विद्यते। तासां मध्ये स्थिरा सुषुम्ना नाडी परा सर्वोत्कृष्टा ॥ १५ ॥ सेयं सुषुम्ना तु परे ब्रह्मणि लीना, ब्रह्मसूत्रत्वात्। विरजा, रजस्तमोविकार-वैरळ्यात्। ब्रह्मरूपिणी, ब्रह्मलोकासिहेतुत्वात्। सुषुम्नाज्ञानफलमाह—इडेति ॥ सुषुम्नाया वामभागेन, सप्तम्यर्थे तृतीया, सुषुम्नावामदक्षिणपार्श्वयोः इडा पिङ्गळा च तिष्ठति ॥ १६ ॥ तयोर्मध्ये सुषुम्नायां परमुत्कृष्टं ब्रह्मस्थानं वर्तते। तं तत्रत्यपरमात्मानं प्रत्यगभेदेन यो वेद स मुनिः वेदार्थब्रह्मवित् भवति। यथोक्तध्यानयोगेन सुषुम्नेतरनाडीषु प्राणगतिः छिद्यते, सुषुम्नाप्राणगतिस्तु न छिद्यत इत्याह—द्वासप्ततीति ॥ प्रधाननाड्यस्तु द्वासप्ततिसहस्राणि भवन्ति। तत्र सुषुम्नानाड्यन्तर्गतकैवल्यनाडिकान्तःस्थनिष्प्रतियोगिकचिन्मात्रध्यानयोगेन प्रतिनाडीषु प्राणवायोस्तैतिलं गतागतलक्षणं ॥ १७ ॥ छिद्यते विच्छिद्यते। तदानीं सुषुम्ना एका सुषुम्नामध्यगकैवल्यनाडिकायां दृङ्मनःप्राणवृत्तिः न छिद्यते आब्रह्मकल्पं न नश्यति, न बहिः निर्गच्छति, कल्पान्ते विरूपविलयं भजति। अत एव कैवल्यनाडीप्रविष्टदृग्वायुमनोवृत्तिमन्मुनिकळेबरं आब्रह्मकल्पं तिष्ठतीत्यत्र भगवद्वचनं मानम्।

मत्तत्त्ववेत्तुः करणाळिरादौ कैवल्यनाड्यन्तरचित्खमेत्य।
आब्रह्मकल्पं विलयं भजन् सन् कायेन कैवल्यमवाप्य तिष्ठेत् ॥

इति ॥ यतः एवं अतो धीरो योगी योगः तत्त्वज्ञानं तथाविधयोग एव निर्मलसारः सूक्ष्मधारारूपः तेन योगनिर्मलसारेण क्षुरेण अनलवर्चसा ॥ १८ ॥ इह अस्मिन्नेव जन्मनि प्रभवात् ब्रह्मातिरिक्तं न किंचिदस्तीति भावनाबलात् नाडीशतं तद्गतप्राणप्रचरान् छिन्देत् कैवल्यनाड्यामेव

दृङ्मनःप्राणप्रचारं कुर्यात् इति भावः । कैवल्यतदितरनाडीवायुप्रचारा-प्रचारतो योगी कृतकृत्यो भवतीत्याह—जातीति ॥ यथोक्तसाधनसम्पन्नो योगी जातीपुष्पपरिमळाविनाभाववत् यदा कैवल्यनाड्यां दृङ्मनःप्राणतैतिलं स्थैर्यं पश्यति तदा विदेहमुक्तो भवति, "गमनं तैतिलं स्थैर्यं" इति कोशात् ॥ १९ ॥ एवं यदा सुषुम्नान्तःस्थकैवल्यनाडीतरनाडीनां या दृङ्मनःप्राणगतिः सेयं स्वर्गनरकगमनागमनलक्षणैः शुभाशुभैः भावैः युक्तेति विभावयेत् । अपुनर्भवगतिप्रदा इयं सुषुम्ना नाडी, कैवल्यगतिप्रदा इयं सुषुम्नाऽन्तर्गतकैवल्यनाडी, तदितररमादिनाडीततिः शुभफल-स्वर्गादिप्रापिका, अरमादिनाडीततिः अशुभफलनरकादिप्रापिका, तदितरनाड्यस्तु नानाविचित्ररोगादिगतिप्रापिका इत्यत्र "रमा पुण्येन पुण्यं लोकं नयति अरमा पापेन पापं इच्छ्या यत् स्मरति तदभिसम्पद्यते अपुनर्भवायाकोशं भिनत्ति" इत्यादि, "मृत्युर्वै परे देव एकीभवति" इत्यादि श्रुतेः । यतः इतरनाडीवायु-प्रचारः शुभाशुभहेतुः अतो योगाभ्यासेन तद्गतिनिरोधं कृत्वा सुषुम्नादिनाड्यामेव वायुप्रचारं भावयेत् । एवं भावनाफलमाह—तदिति ॥ एवं सुषुम्नादौ प्राणमारोप्य तद्ब्रह्माहमस्मीति धिया भाविता एवं भावनया ते पुनर्जन्मविव-र्जिताः सन्तः तदेव ब्रह्म प्रपद्यन्ते ॥ २० ॥

योगसाधनं तदधिकारी च

तपोविजितचित्तस्तु निःशब्दं देशमास्थितः ।
निःसङ्गः साङ्गयोगज्ञो निरपेक्षः शनैःशनैः ॥ २१ ॥

तद्योगसाधनं अधिकारिणं च निरूपयति—तप इति ॥ स्वाश्रमाचारसह-कृतयोगाभ्यासतपसा विजितचित्तस्तु योगी निर्विकल्पकसमाध्यर्थं जनसम्बाधराहित्यात् निःशब्दं देशमास्थितः स्वान्तर्बहिःकलनानिःसङ्गः साङ्गयोगज्ञः अष्टाङ्गयोगतत्त्ववित् स्वातिरिक्तनिरपेक्षः सन् शनैःशनैः विकल्पजातं हित्वा निर्विकल्पकसमाधिनिष्ठो भवेत् इति वाक्यशेषः ॥ २१ ॥

## समाधिफलम्

पाशान् छित्त्वा यथा हंसो निर्विशङ्कं खमुत्पतेत् ।
[1]छिन्नपाशस्तथा जीवः संसारं तरते सदा ॥ २२ ॥
यथा निर्वाणकाले तु दीपो दग्ध्वा लयं व्रजेत् ।
तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत् ॥ २३ ॥
प्राणायामसुतीक्ष्णेन मात्राधारेणयोगवित् ।
वैराग्योपल[2]घृष्टेन छित्त्वा तन्तुं न बध्यते ॥ २४ ॥
इत्युपनिषत् ॥

सदृष्टान्तं समाधिफलमाह—**पाशानिति** ॥ **यथा हंसः** स्वतुण्डेन स्वपाद-बन्धनमानससरोरुहकमलपाशान **छित्त्वा निर्विशङ्कं** यथा भवति तथा **खमुत्पतेत् तथा** योगी **जीवः सदा** योगाभ्यासतीक्ष्णखड्गेन सञ्छिन्नसंसृतिपाशः सन् **संसारं तरते** ॥ २२ ॥ किं च—**यथा दीपो निर्वाणकाले** स्वाश्रयवर्त्त्यादिकं **दग्ध्वा** स्वयोनौ **लयं** शान्तिं **व्रजेत् तथा** योगी स्वावारकब्रह्ममात्रावरण-**सर्वकर्मजालं दग्ध्वा** स्वातिरिक्तलयमपह्नवं **व्रजेत्** ॥ २३ ॥ उक्तोपनिषद-र्थमुपसंहरति—**प्राणेति** ॥ यथोक्तयोगवित् मुनिः **प्राणायामादिसाधन-सुतीक्ष्णेन** सम्यक्तीव्रतरवैराग्योपलघृष्टेन अर्धमात्राधारेण स्वज्ञानशस्त्रेण स्वाज्ञानतन्तुं **छित्त्वा न** पुनः **बध्यते** स्वाज्ञानेन । स्वज्ञानेन तन्तुच्छेदन समकालं योगी स्वमात्रं अवशिष्यते । **इतिशब्दो** निःसंशयार्थः । **उपनिषच्छब्दः** प्रकृतोपनिषत्परिसमाप्त्यर्थः ॥ २४ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं क्षुरिकायाः स्फुटं लघु ॥
क्षुरिकोपनिषद्व्याख्या विंशत्यधिशतं स्मृता ॥

इति श्रीमदीशावास्योत्तरशतोपनिषच्छास्त्रविवरणे एकविंशत्सङ्ख्यापूरकं
क्षुरिकोपनिषद्विवरणं सम्पूर्णम्

[1] छिन्नवंश—क. [2] कृष्टेन—अ.

# तेजोबिन्दूपनिषत्

सह नाववतु—इति शान्तिः

## प्रथमोऽध्यायः

निर्विशेषतेजोबिन्दुस्वरूपम्

तेजोबिन्दुपरं ध्यानं विश्वात्मह्रदि संस्थितम् ।
[1]अणुवं शांभवं शान्तं स्थूलसूक्ष्मपरं च यत् ॥ १ ॥
दुःखाढ्यं च दुराराध्यं दुष्प्रेक्ष्यं मुक्तमव्ययम् ।
दुर्लभं तत्स्वयं ध्यानं मुनीनां च मनीषिणाम् ॥ २ ॥

यन्नाचिन्मात्रकलना यात्यपह्नवमञ्जसा ।
तच्चिन्मात्रमखण्डैकरसं ब्रह्म भवाम्यहम् ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं तेजोबिन्दूपनिषत् स्वातिरिक्तखण्डाचिन्मात्रापह्नवसिद्धाखण्डानन्दचिन्मात्ररूपावस्थानलक्षणविकळेबरकैवल्यार्थबोधिनी विजृम्भते । अस्या उपोद्घातादिकं कठवल्ल्यादिसमम् । अस्या ब्रह्ममात्रानुभवप्रकाशिकायाः तेजोबिन्दूपनिषदः स्वल्पग्रन्थतो विवरणमारभ्यते ।

[1] आणवं—अ.

वक्ष्यमाणशिवस्कन्दऋभुनिदाघप्रश्नप्रतिवचनाख्यायिका तु विद्यास्तुत्यर्था । अत्रादौ तावत् प्रथमाध्याये प्रश्नप्रतिवचनकलनां विना श्रुतिः स्वयमेव यथोक्ताधिकारिभ्यः पञ्चदशाङ्गयोगसाधनसिद्धं निर्विशेषब्रह्मतत्त्वमुपदिशति —तेजोबिन्दुरिति । ये स्वात्मयाथात्म्यमननेच्छवो मुनयः तेषां मुनीनां निर्विशेषब्रह्मध्याने येषां मनीषा विद्यते तेषां मनीषिणां च स्वातिरिक्ताविद्यापदतत्कार्यध्वान्तापह्नवसिद्धं निष्प्रतियोगिकस्वमात्रतेजोबिन्दुस्वरूपं तत्परं तद्विषयकं ध्यानं वक्ष्यामीति शेषः । ध्येयं कीदृशं इत्यत आह—विश्वेति । स्वाज्ञैः स्वातिरेकेणास्तीति विश्वसनीयं विश्वं स्वाविद्यापदतत्कार्यजातमेव यस्यात्मा शरीरं सोऽयं विश्वात्मा विराट्, तस्य हृत्कमले तद्वृत्तिसहस्रावभासकतया स्थितम् । निराधारं अविद्यापदं कथं तिष्ठेत् इत्यत आह—अणिवति । अणुं अविद्यापदसर्वस्वं आदिकूर्मादिरूपेण अन्तर्यामिरूपेण सर्वाधिष्ठानरूपेण वा वहतीति अणुवं । स्वापेक्षया अस्य परिच्छिन्नत्वात् अणुत्वम् । शं अस्मात् भवतीति शम्भुः प्रत्यक्, तद्विषयकसुखस्य तदधीनत्वात् । तद्याथात्म्यं निर्विशेषं ब्रह्म शाम्भवम् । वस्तुतः विश्वविराडादिकलनाशान्तम् । स्वाज्ञदृष्ट्या स्थूलसूक्ष्मादिप्रपञ्चकलनाप्रसक्तौ यत्तदारोपापवादाधिकरणं तत् स्थूलसूक्ष्मादिप्रपञ्चात् परं विलक्षणमित्यर्थः । चशब्दात्तुर्यभागादपि वैलक्षण्यं द्योत्यते ॥ १ ॥ तस्य स्वाज्ञदृष्टिग्रहणाराधनाशक्यतया दुःखाढ्यं दुराराध्यं दुष्प्रेक्ष्यं च । स्वज्ञदृष्ट्या तत्सर्वकलनामुक्तं, अत एव अव्ययं व्ययहेतुस्वातिरिक्तभ्रमासम्भवात् । श्रुत्याचार्यप्रसादं विना तत्स्वरूपं तद्विषयकध्यानं वा स्वयं स्वतो दुर्लभं, श्रुत्याचार्यप्रसादतः तदवगन्तुं सुलभमेवेत्यर्थः ॥ २ ॥

### निर्विशेषब्रह्मावगतिसाधनानि

यताहारो जितक्रोधो जितसङ्गो जितेन्द्रियः ।
निर्द्वन्द्वो निरहंकारो निराशीरपरिग्रहः ॥ ३ ॥

अगम्यागम[1]कर्तारो गम्यागमन[2]मानसाः ।
मुखे त्रीणि च [3]विन्दन्ति त्रिधामा हंस उच्यते ॥ ४ ॥
परं गुह्यतमं विद्धि ह्यस्त[4]तन्द्री निराश्रयः ।
सोमरूपकला सूक्ष्मा विष्णोस्तत्परमं पदम् ॥ ५ ॥

उत्तमाधिकारिणां तदवगतिः भवत्येव । मन्दमध्यमानां तदवगतिः कथमित्यत्र साधनान्युपदिशति—यतेति । हे स्वाज्ञलोक यदि त्वं मदुपदेशप्रभवस्वज्ञानतः स्वपदं प्राप्तुमीहसे तदा मदुक्तसाधनसम्पन्नो भूत्वा **विष्णोस्तत् परमं पदं** यास्यसीत्यन्वयः ।

आहारस्य च भागौ द्वौ तृतीयमुदकस्य च ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥

इति येनाहारो यतो नियतः स त्वमादौ **यताहारो** भव, "आहारशुद्धौ सत्वशुद्धिः" इत्यादि श्रुतेः । कामालाभजः क्रोधो येन जितः स त्वं **जितक्रोधो** भव । स्वविकल्पितेन्द्रियेन्द्रियार्थेषु सङ्गो येन जितः स त्वं **जितसङ्गो** जितेन्द्रियवर्गो भव । शीतोष्णादिद्वन्द्वो यस्मान्निर्गतः स त्वं **निर्द्वन्द्वो** भव । शरीरत्रये अहङ्कारो यस्मान्निर्गतः स त्वं **निरहङ्कारो** भव । स्वातिरिक्तविषयभोगानशितुमिच्छा आशीः यस्मान्निर्गता स त्वं **निराशीः** भव । प्राणमात्रधारणानुकूलपरिग्रहेतरपरिग्रहो येनागृहीतः स त्वं **अपरिग्रहो** भव ॥ ३ ॥ स्वज्ञैकदेशिनो यत्पदं विन्दन्ति तत्पदमादावुपास्स्वेत्याह—**अगम्येति** । केवलस्वाज्ञ[ज्ञा]गम्ये स्वाविद्यापदारोपाधिकरणे विश्वविराडोत्रादौ तद्भावाभावितधिया अगमनं कुर्वन्तीति **अगम्यागमकर्तारः**, स्वाज्ञदृष्टिगम्ये स्वाविद्यापदतत्कार्ये येषां मानसं गमनं न भजति ते हि **गम्यागमनमानसाः**

[1] कर्ता यो—अ.
[2] मानसः—अ, अ १.
[3] विन्देत—अ.
[4] तन्द्रो—मु.

शबळब्रह्मशरणाः स्वज्ञैकदेशिनः । "नेत्रस्थं जागरितं विद्यात्" "दक्षिणाक्षिमुखे विश्वः" इति श्रुतिसिद्धे मुखे जाग्रज्जाग्रदादौ व्यष्टिसमष्टितदुभयैक्याधिकरणतया विश्वविश्वादिविराड्विराडाद्योत्रात्रादिभेदेन त्रीणि त्रीणि रूपाणि, चशब्दात् तत्तत्तुर्यरूपाण्यपि, स्वाभेदेन विन्दन्ति जानन्ति । एवं त्रीणि धामानि यस्य सोऽयं त्रिधामा हंस उच्यते । स्वज्ञानतः स्वभजत्स्वात्मानं हन्तीति हंसः परमेश्वर इत्यर्थः ॥ ४ ॥ तमेतं हंसं सोऽहमित्युपास्य तत्प्रसादतो हि अस्ता तन्द्रीं जामिता यस्य सः त्वं अस्ततन्द्री सन् स्वात्मेतराश्रयाभावात् निराश्रयो भूत्वा यन्मयेन्यते तत्सर्वापवादाधिकरणतया जाग्रज्जाग्रदादिकलनायाः परं अनधिकारिणे अवक्तव्यत्वात् गुह्यतमं ब्रह्म अधिष्ठेयसापेक्षाधिष्ठानताऽपाये निःप्रतियोगिकस्वमात्रमिति विद्धि जानीहि । किं तदित्युत आह—सोमेति । उमया स्वविद्यया सहितमुनिसम्यज्ज्ञानविदिता कला चिन्मात्ररूपिणी सोमरूपकला निर्विशेषतया सूक्ष्मा, सैव, स्वाज्ञदृष्टिविकल्पितव्याप्यप्रसक्तौ, व्यापकभावमापन्नस्य विष्णोः सम्यज्ज्ञदृष्ट्या व्याप्यव्यापकताऽपह्नवसिद्धं यत् तत् परमं निःप्रतियोगिकनिरतिशयं तन्मात्रतया पद्यत इति पदं स्वमात्रमवशिष्यत इत्यर्थः ॥ ५ ॥

परवस्तुन एव सविशेषत्वादिभावाः

त्रिवक्त्रं [1]त्रिगुणं स्थानं त्रिधातुं रूपवर्जितम् ।
निश्चलं निर्विकल्पं च निराकारं निराश्रयम् ॥ ६ ॥
उपाधिरहितं स्थानं वाङ्मनोऽतीतगोचरम् ।
स्वभावं भावसंग्राह्यमसंघा[2]तं पदाच्युतम् ॥ ७ ॥

[1] त्रिगुणस्था—अ.

[2] तपदा—उ. तं च यदच्युतं—अ. तं पदाच्चयुतं—क, अ २. तं पदच्युतं—अ १.

अनानानन्दनातीतं [1]दुष्प्रेक्ष्यं मुक्तमव्ययम् ।
अचिन्त्यमेवंविनिर्मुक्तं शाश्वतं ध्रुव[2]मच्युतम् ॥ ८ ॥
तद्ब्रह्मणस्तदध्यात्मं तद्विष्णोस्तत्परायणम् ।
अचिन्त्यं चिन्मयात्मानं यद्व्योम परमं स्थितम् ॥ ९ ॥
अशून्यं शून्यभावं तु शून्यातीतं हृदि स्थितम् ।
न ध्यानं च न च ध्येाता न ध्येयो ध्येय एव च ॥ १० ॥
सर्वं च न परं शून्यं न परं [3]न परात्परम् ।
अचिन्त्यमप्रबुद्धं च न सत्यं न [4]परं विदुः ॥ ११ ॥
मुनीनां संप्रयुक्तं च न देवा न परं विदुः ।
लोभं मोहं भयं दर्पं कामं क्रोधं च किल्बिषम् ॥ १२ ॥
शीतोष्णे क्षुत्पिपासे च संकल्पक[5]विकल्पकम् ।
न ब्रह्मकुलदर्पं च न [6]मुक्ति[7]ग्रन्थिसंचयम् ॥ १३ ॥
न भयं न सुखं दुःखं तथा मानावमानयोः ।
एतद्भावविनिर्मुक्तं तद्ब्रह्म ब्रह्म तत्परम् ॥ १४ ॥

तदेव स्वाज्ञादिदृष्ट्या सविशेषतां तत्प्रतियोगिकनिर्विशेषतां, परमार्थदृष्ट्या निष्प्रतियोगिकनिर्विकल्पतां च भजतीव भातीत्याह—त्रिवक्त्रमिति । विश्वतैजसप्राज्ञभेदेन त्रिवक्त्रं, विराट्सूत्रादिभेदेन त्रिगुणं, स्थानं मुक्तप्राप्यत्वात्, ओत्रनुज्ञात्रनुज्ञाभेदेन ब्रह्मविष्ण्वीशभेदेन वा त्रिधातुं, वस्तुत उक्तत्रिवक्त्रादि[8]स्वरूपविवर्जितं, चलविकल्पाकृत्या-

[1] दुष्प्राप्यं पूर्णमद्वयं—अ.
[2] मक्रियः—अ.
[3] नापरात्—क, अ १, अ २.
[4] परे—अ.
[5] विकल्पकौ—अ.
[6] मुनि—अ, अ १.
[7] ग्रन्थ—उ.
[8] वर्ज्यस्व—उ १.

**श्रयवैरळ्यात्** **निश्चलं** **निर्विकल्पं** **च** **निराकारं** **निराश्रयम्** ॥ ६ ॥ **उपाधिरहितं** निरुपाधिकत्वात् । **स्थानं** उक्तार्थं । **वाङ्मनोतीततुर्यतया** **गोचरं** । स्वयमेव भवतीति **स्वभावं** । भावरूपेणैव सम्यग्ग्राह्यं सन्मात्रत्वात् । **असङ्गतं** करणग्रामबाह्यत्वात् । स्वस्वभावादच्युतम् ॥ ७ ॥ नानानन्दनो जीवः स न भवतीति **अनानानन्दनः** साक्षी तद्भावादप्यतीतं । **दुष्प्रेक्ष्यं** **मुक्तमव्ययं** इति पदत्रयं व्याख्यातम् । सदा अव्ययतया **चिन्त्यं** । चिन्तितस्य सविशेषप्रसक्तौ **एवंविनिर्मुक्तं**, केनाप्यचिन्त्यत्वात् । अशाश्वतविश्वाभावात् **शाश्वतं** । अध्रुवमायापायात् **ध्रुवं** । सर्वप्रकारेणापि च्युत्यभावात् **अच्युतम्** ॥ ८ ॥ यदेवंभूतं **तद्ब्रह्मणः** स्वरूपम् । **तत्** प्रत्यग्रूपेण सर्वात्मानं विराजमधिकृत्य भवतीति **अध्यात्मम्** । तदेव **विष्णोः** स्वरूपमपि । तदेव **तत्परायणं** मुक्तप्राप्यनारायणत्वात् । निर्विशेषात्मना **अचिन्त्यम्** । अन्तःकरणाभावात् **चिन्मयात्मानं** इति, विभक्तिलिङ्गव्यत्ययः छान्दसः, चिन्मयात्मकम् । **यद्व्योम** चिदाकाशत्वात् । **परमं** व्याख्यातम् । **स्थितं** सत्तामात्रत्वात् ॥ ९ ॥ अत एव **अशून्यम्** । पूर्णत्वात् स्वातिरिक्तशून्यभावम् । तुशब्दोऽवधारणार्थः । शून्यभावमापन्नस्वातिरिक्तादप्यतीतं निष्प्रतियोगिकत्वात् । प्रत्यगादिरूपेण **हृदि** **स्थितम्** । तस्य प्रत्यक्त्वे त्रिपुटी स्यादित्यत आह—**नेति** । स्वातिरेकेण **न** **ध्यानं** **च** **नच** **ध्याता** **न** **ध्येयः** । स्वावशेषतया **ध्येय** **एव** **च** ॥ १० ॥ स्वातिरेकेण यदि सर्वं प्रसक्तं तदा **न** **च** **सर्वं** अस्ति । यदि स्यात् तदा **स्वस्मात्** **परं** **शून्यम्** । अत एव **न** **परं** अस्ति । सापेक्षपरात् **परं** अपि स्वयं न भवति । स्वातिरेकेण चिन्तितुं बोद्धुं द्रष्टुं अशक्यतया मुनयः **अचिन्त्यमप्रबुद्धं** **च** **न** **सत्यं** **न** **परं** **विदुः** ॥ ११ ॥ यत्परं अतिरिक्तं **नेति** **मुनीनां**—तृतीयार्थे षष्ठी—मुनिभिः यत् **सम्प्रयुक्तं** अवधृतं तत्र **देवाः** सूक्ष्मबुद्धयोऽपि ततः **परं** अस्तीति **न** **विदुः** । लोभमित्यादौ लिङ्गव्यत्ययो द्रष्टव्यः । नहि तत्र लोभमोहाद्यन्तःकरणवृत्तयः शीतोष्णादिद्वन्द्वं क्षुत्पिपासादिषड्ऊर्मयः सङ्कल्पविकल्पादिमानसवृत्तयः ब्रह्मादिकुलप्रसूतोऽस्मीति दर्पश्च बन्धमोक्षादिग्रन्थिसञ्चयश्च मानावमानवृत्तयो वा विद्यन्ते । यत् **एतत्**

सर्वभावविनिर्मुक्तं स्वातिरिक्तसामान्यापह्नवसिद्धं तत् ब्रह्म। ब्रह्म तत्परं स्वमात्रमवशिष्यते इत्यर्थः ॥ १२-१४ ॥

परब्रह्मावगातसाधन पञ्चदशाङ्गयोगः

यमो हि नियमस्त्यागो मौनं देशश्च कालतः ।
आसनं मूलबन्धश्च देहसाम्यं च दृक्स्थितिः ॥ १५ ॥
प्राणसंयमनं चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात् ॥ १६ ॥

यद्येवं ब्रह्म निष्प्रतियोगिकं तदा तदवगत्युपायवैरळ्यमाशङ्क्य यदि ते तदवगतीच्छा विद्यते तदा तदवगतिसाधनतया पञ्चदशाङ्गयोग उच्यते—यमो हीति । इत्थं पञ्चदशयोगाङ्गानि सूत्रितानि ॥ १५-१६ ॥

पञ्चदशाङ्गानां लक्षणानि

सर्वं ब्रह्मेति वै ज्ञानादिन्द्रियग्रामसंयमः ।
यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ १७ ॥
सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ।
नियमो हि परानन्दो नियमात्क्रियते बुधैः ॥ १८ ॥
त्यागः प्रपञ्चरूपस्य सच्चिदात्मावलोकनात् ।
त्यागो हि महतां पूज्यः सद्यो मोक्षप्रदायकः ॥ १९ ॥
यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह ।
यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा जडैः ॥ २० ॥

वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते ।
प्रपञ्चो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥ २१ ॥
इति वा तद्भवेन्मौनं सर्वं सहजसंज्ञितम् ।
गिरा मौनं तु बालानामयुक्तं ब्रह्मवादिनाम् ॥ २२ ॥
आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते ।
येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ २३ ॥
कल्पना सर्वभूतानां ब्रह्मादीनां निमेषतः ।
कालशब्देन निर्दिष्टं ह्यखण्डानन्दमद्वयम् ॥ २४ ॥
सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम् ।
आसनं तद्विजानीयादन्यत्सुखविनाशनम् ॥ २५ ॥
सिद्धये सर्वभूतादि विश्वाधिष्ठानमद्वयम् ।
[1]तस्मिन्सिद्धिं गताः सिद्धास्तत्सिद्धासनमुच्यते ॥ २६ ॥
यन्मूलं सर्वलोकानां यन्मूलं चित्तबन्धनम् ।
मूलबन्धः सदा सेव्यो योग्योऽसौ [2]राजयोगिनाम् ॥ २७ ॥
अङ्गानां समता विद्यात्समे ब्रह्मणि [3]लीयते ।
नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥ २८ ॥
दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् ।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥ २९ ॥

[1] यस्मिन्—क, अ २.
[2] ब्रह्मवादिनाम्—अ, अ १, अ २.
[3] नीयते—अ.

द्रष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत् ।
दृष्टिस्तत्रैव कर्तव्या न नासाग्रावलोकिनी ॥ ३० ॥

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ।
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥ ३१ ॥

निषेधनं प्रपञ्चस्य रेचकाख्यः समीरितः ।
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरुच्यते ॥ ३२ ॥

ततस्तद्वृत्तिनैश्चल्यं कुम्भकं प्राणसंयमः ।
[1]अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनम् ॥ ३३ ॥

विषयेष्वात्मतां दृष्ट्वा मनसश्चित्त[2]रञ्जकम् ।
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुहुर्मुहुः ॥ ३४ ॥

यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ।
[3]मनसा धारणं चैव धारणा सा परा मता ॥ ३५ ॥

ब्रह्मैवास्मीति [4]सद्वृत्त्या निरालम्बतया स्थितिः ।
ध्यानशब्देन विख्यातः परमानन्ददायकः ॥ ३६ ॥

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक्समाधिरभिधीयते ॥ ३७ ॥

सूत्रीभूतपञ्चदशाङ्गानि यथाक्रमं श्रुतिरेव व्याचष्टे। तत्र यमशब्दार्थमाह—सर्वमिति । करणग्रामे ब्रह्मभाव एव यम इत्यर्थः ॥ १७ ॥ नियमशब्दार्थमाह—

[1] अध—अ १. [2] रञ्जनम्—अ, अ १. [3] मनसो—अ.
[4] सद्वृत्त्या—(क) आदिसर्वकोशेषु. सद्व्रत्या—अयं पाठः (उ१) कोश एव.

**सजातीयेति** । अखण्डचिन्मात्रादिवृत्तिः सजातीया, घटपटादिवृत्तिःविजातीया ॥ १८ ॥ त्यागशब्दं व्याकरोति—**त्याग इति** । सच्चिदानन्ददृष्टिः अनृतादिप्रपञ्चं प्रसतीत्यर्थः ॥ १९ ॥ मौनशब्दार्थं प्रकटयति—**यस्मादिति** । पक्षान्तरम्—**वाच्च इति** । प्रथमपक्षे जडैः वागादिकरणैः स्वस्वव्यापृत्युपरमणं मौनमित्युक्तम् । द्वितीयपक्षे तु स्वातिरिक्तयोः निष्प्रतियोगिकभावाभावरूपतया निर्वक्तुमशक्यत्वात् । प्रथमपर्यायगदितमौनं तु बालानां न हि ब्रह्मविदामस्ति ॥ २०-२२ ॥ देशशब्दार्थं व्याकरोति—**आदाविति** । तादृशदेशो ब्रह्मैवेत्यर्थः ॥ २३ ॥ कालशब्दार्थमाह—**कल्पनेति** । यदज्ञाननिमेषविकल्पितं निखिलं तदधिकरणं ब्रह्म कालशब्दवाच्यम् ॥ २४ ॥ आसनशब्दार्थं विशदीकरोति—**सुखेनेति** । ध्यानानुकूलं सुखासनं सिद्धसिद्धिदं ब्रह्म सिद्धासनं, नह्युक्तलक्षणमित्यर्थः ॥ २५-२६ ॥ मूलबन्धस्वरूपं व्यक्तीकरोति—**यदिति** । सर्वकारणं ब्रह्मैव मूलबन्धः, नत्वाकुञ्चनादिः । अयं **राजयोगिनां** योग्यो न हठयोगिनामित्यर्थः ॥ २७ ॥ देहसाम्यशब्दार्थमाह—**अङ्गानामिति** । स्थूलादिदेहानां **समब्रह्मणि** विलयभावः **समता** नहि स्तम्भवत् ऋजुतेत्यर्थः ॥ २८ ॥ दृष्टिस्वरूपमाह—**दृष्टिमिति** । स्वाज्ञदृष्टिः स्वातिरिक्तं जगत् पश्यति । सर्वाधिकरणदृष्टिः स्वज्ञः परमार्थदृष्टिः ब्रह्ममात्रवित् । तेन दृश्यादित्रिपुट्यपह्नवसिद्धे ब्रह्मणि स्वमात्रदृष्टिः कार्येत्यर्थः ॥ २९–३० ॥ रेचकपूरककुम्भकसहितविद्वत्प्राणायामस्वरूपमाचष्टे—**चित्तादीति** । सर्वं ब्रह्मेति भावनं प्राणायामः । स्वातिरिक्तं जगत् नेत्यनुसन्धानं **रेचकवृत्तिः** । तदेवास्मीति पूरकवृत्तिः । तद्वृत्तिस्थैर्यं कुम्भकवृत्तिः । स्वज्ञानामेवम् । स्वाज्ञानां घ्राणपीडनमेव फलमित्यर्थः ॥ ३१–३३ ॥ प्रत्याहारस्वरूपमाह—**विषयेष्विति** । विषयसामान्यब्रह्मदृष्टिः प्रत्याहारः ॥ ३४ ॥ धारणास्वरूपमाह—**यत्रेति** । मनःप्रचाराधिकरणं ब्रह्मेत्यर्थः ॥ ३५ ॥ ध्यानलक्षणमाह—**ब्रह्मेति** । निरालम्बब्रह्मभावनं ध्यानम् ॥ ३६ ॥ समाधिस्वरूपमाह—**निर्विकारेति** । अखण्डाकारवृत्तिः सविकल्पः, तद्वृत्त्यस्मरणं निर्विकल्पसमाधिरित्यर्थः ॥ ३७ ॥

### योगाभ्यासेन ब्रह्मभवनम्

[0]इमं चाकृत्रिमानन्दं तावत्साधु समभ्यसेत् ।
[1]लक्ष्ये यावत्क्षणात्पुंसः प्रत्यक्त्वं संभवेत्स्वयम् ॥ ३८ ॥
ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् ।
तत्स्वरूपं [2]भवेत्तस्या विषयो [3]मनसो गिराम् ॥ ३९ ॥

मुमुक्षुः इममेव पञ्चदशावयवयोगं यावद्ब्रह्ममात्रतया स्थितिः तावदभ्यसेत्, ततो ब्रह्मैव भवतीत्याह—इममिति ॥ ३८–३९ ॥

### समाधिविघ्नशमनम्

समाधौ क्रियमाणे तु विघ्नान्यायान्ति वै बलात् ।
अनुसंधानराहित्यमालस्यं भोगलालसम् ॥ ४० ॥
लयस्तमश्च विक्षेपस्तेजः स्वेदश्च शून्यता ।
एवं हि विघ्नबाहुल्यं त्याज्यं ब्रह्मविशारदैः ॥ ४१ ॥
भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता ।
ब्रह्मवृत्त्या हि पूर्णत्वं तया पूर्णत्वमभ्यसेत् ॥ ४२ ॥

अनुसन्धानराहित्यादिसमाधिविघ्ने सति कथं निर्विकल्पकसमाधिरुदेति इत्याशङ्क्य तद्विघ्नशान्तितः पूर्णाखण्डसमाधिरुदेतीत्याह—समाधाविति । समाध्यभ्यासयुक्तस्य कादाचित्कप्रसक्ताननुसन्धानादिशून्यवृत्त्यन्तविघ्नसमूहे प्रातिस्विकेन युगपद्वा अभ्युदिते अनुसन्धानाद्युपायतः तद्विघ्नसमूहं निर्मूल्य अथ ब्रह्मैवाहमस्मि इत्यखण्डाकारवृत्त्या स्वपूर्णभावमभ्यसेदित्यर्थः ॥ ४०-४२ ॥

[1] लक्ष्यो—क, अ १, अ २. [2] भवेत्तस्य—अ, अ १.
[3] मनसा—क, अ १, उ १. मनसां—अ, अ २.

समाधिना शुद्धब्रह्मपदप्राप्तिः

ये हि वृत्तिं विहायैनां ब्रह्माख्यां पावनीं पराम् ।
वृथैव ते तु जीवन्ति पशुभिश्च समा नराः ॥ ४३ ॥
ये तु वृत्तिं विजानन्ति ज्ञात्वा वै वर्धयन्ति ये ।
ते वै सत्पुरुषा धन्या वन्द्यास्ते भुवनत्रये ॥ ४४ ॥
येषां वृत्तिः समा वृद्धा परिपक्वा च सा पुनः ।
ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः ॥ ४५ ॥
कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः ।
तेऽप्यज्ञानतया नूनं पुनरायान्ति यान्ति च ॥ ४६ ॥
निमिषार्धं न तिष्ठन्ति वृत्तिं [1]ज्ञानमयीं विना ।
यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः ॥ ४७ ॥
कारणं यस्य वै कार्यं कारणं तस्य जायते ।
कारणं तत्त्वतो नश्येत्कार्याभावे विचारतः ॥ ४८ ॥
अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् ।
उदेति शुद्धचित्तानां वृत्तिज्ञानमतः परम् ॥ ४९ ॥
भावितं तीव्र[2]योगेन [3]यद्वस्तु निश्चयात्मकम् ।
दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयेत् ॥ ५० ॥
विद्वान्नित्यं सुखे तिष्ठेद्विया चिद्रसपूर्णया ॥ ५१ ॥ इति ॥

[1] ब्रह्ममयीं—क, अ, अ १, अ २.
[2] वेगेन—(क) आदिकोशेषु.
[3] वस्तु यन्नि—अ.

ब्रह्माकारवृत्तिविरळान् दूषयति—ये हीति ॥ ४३ ॥ अखण्डाकारवृत्तिमन्त एव ब्रह्मपदं यान्ति, तद्विपरीताः संसारं भजन्ति। यत एवं अतः श्रीशुकसनकादिवत् ब्रह्मपदेच्छुभिः समाधिरेव अभ्यसनीय इत्याह—येत्विति ॥ ४४–४७ ॥ अखण्डाकारवृत्तेः अभ्यासजन्यत्वात् कारणं अभ्यासः, कार्यं अखण्डाकारवृत्तिः, तस्याः कृतकत्वेनाध्रुवत्वात् तया ध्रुवब्रह्मापत्तिः कथमित्याशङ्क्य यावदेवं विचारो नोदेति तावदेवमभ्यस्य ततः "कार्यं चेत् कारणं किञ्चित् कार्याभावे न कारणम्" इति सापेक्षश्रुतियुक्तितः कार्यकारणकलनां अपह्नवं कृत्वा अथ तदपह्नवसिद्धं शुद्धचैतन्यं स्वावशेषतया विजृम्भते इत्याह—कारणमिति। यस्य एवंवादिनः अभ्यासाख्यं कारणमेव कार्यं भवति तस्य कारणमेव जायते। कार्यस्य कृतकत्वोक्त्या कार्याभावे कार्यं चेदिति सापेक्षश्रुतियुक्तितः कारणमेव नश्येत्। अभ्यासाखण्डाकारवृत्त्युपलक्षितस्वाविद्यापदतत्कार्यतदारोपाधिकरणयोः अपह्नवतां गतयोः कार्यकारणकलनाविगळं ब्रह्म स्वमात्रमवशिष्यते इति भावः ॥ ४८ ॥ ततः किं इत्यत आह—अथेति। अथ कार्यकारणत्वविभ्रमनिरसनानन्तरं यद्वै वाचामगोचरं करणग्रामासम्भवप्रबोधसिद्धं तदेव वस्तु यत् स्वाज्ञदशायां अशुद्धनानारूपेण भातं स्वज्ञदशायां स्वप्रकृतिमवलम्ब्येव शुद्धं भवेत्। वस्तुतस्तु स्वाज्ञादिदृष्टिमोहे सत्यसति विशुद्धं वस्तु स्वमात्रमवशिष्यते। यदि ब्रह्म स्वमात्रं तदवगतिः कथमित्यत्र सत्कर्मानुष्ठानतो विशुद्धचित्तानां ततः परं वेदान्तश्रवणादिसञ्जाताखण्डाकारवृत्तिज्ञानमुदेति ॥ ४९ ॥ तज्ज्ञानं तीव्रयोगेन अखण्डनिर्विकल्पसमाधिना तत्त्वज्ञाने भावितं सत् यद्वस्तु निश्चयात्मकं तदेव भवति। यस्मादेवं तस्मात् विद्वान्—स्वाज्ञदशायां स्वाविद्यापदतत्कार्यजातं दृश्यं भवति—सम्यज्ज्ञानबलात् तत् अदृश्यतां अभावरूपतां नीत्वा ब्रह्माकारेण चिन्तयेत् ॥ ५० ॥ एवं धिया चिद्रसपूर्णया दृश्यं ब्रह्माकारेण चिन्तित्वा सुखे नित्यानन्दे ब्रह्मणि स्वावशेषतया तिष्ठेत् ॥ ५१ ॥ इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥

इति प्रथमोऽध्यायः

# द्वितीयोऽध्यायः

## सर्वस्य अखण्डैकरसत्वम्

अथ ह कुमारः शिवं पप्रच्छाखण्डैकरसचिन्मात्रस्वरूपमनुब्रूहीति। स होवाच परमशिवः।

अखण्डैकरसं दृश्यमखण्डैकरसं जगत्।
अखण्डैकरसं भावमखण्डैक[1]रसः स्वयम्॥ १॥

अखण्डैकरसो मन्त्र अखण्डैकरसा क्रिया।
अखण्डैकरसं ज्ञानमखण्डैकरसं जलम्॥ २॥

अखण्डैकरसा भूमिरखण्डैकरसं वियत्।
अखण्डैकरसं शास्त्रमखण्डैकरसा त्रयी॥ ३॥

अखण्डैकरसं ब्रह्म चाखण्डैकरसं [2]वृतम्।
अखण्डैकरसो जीव अखण्डैकरसो ह्यजः॥ ४॥

अखण्डैकरसो ब्रह्मा अखण्डैकरसो हरिः।
अखण्डैकरसो रुद्र अखण्डैकरसोऽस्म्यहम्॥ ५॥

अखण्डैकरसो ह्यात्मा अखण्डैकरसो गुरुः।
अखण्डैकरसं लक्ष्यमखण्डैकरसं महः॥ ६॥

अखण्डैकरसो देह अखण्डैकरसं मनः।
अखण्डैकरसं चित्तमखण्डैकरसं सुखम्॥ ७॥

[1] रसं—अ, अ १, अ २, क. [2] व्रतं—अ १.

अखण्डैकरसा विद्या अखण्डैकरसोऽव्ययः ।
अखण्डैकरसं नित्यमखण्डैकरसं [1]परम् ॥ ८ ॥
अखण्डैकरसं किंचिदखण्डैकरसं [2]वरम् ।
अखण्डैकरसादन्यन्नास्ति नास्ति षडानन ॥ ९ ॥
अखण्डैकरसान्नास्ति अखण्डैकरसान्न हि ।
अखण्डैकरसात्किंचिदखण्डैकरसादहम् ॥ १० ॥
अखण्डैकरसं स्थूलं सूक्ष्मं चाखण्डरूपकम् ।
अखण्डैकरसं वेद्यमखण्डैकरसो भवान् ॥ ११ ॥
अखण्डैकरसं गुह्यमखण्डैकरसादिकम् ।
अखण्डैकरसो ज्ञाता अखण्डैकरसा स्थितिः ॥ १२ ॥
अखण्डैकरसा माता अखण्डैकरसः पिता ।
अखण्डैकरसो भ्राता अखण्डैकरसः पतिः ॥ १३ ॥
अखण्डैकरसं सूत्रमखण्डैकरसो विराट् ।
अखण्डैकरसं गात्रमखण्डैकरसं शिरः ॥ १४ ॥
अखण्डैकरसं चान्तरखण्डैकरसं बहिः ।
अखण्डैकरसं पूर्णमखण्डैकरसामृतम् ॥ १५ ॥
अखण्डैकरसं गोत्रमखण्डैकरसं गृहम् ।
अखण्डैकरसं गोप्यमखण्डैकरसः शशी ॥ १६ ॥

[1] पदं—अ १. [2] परं—क, अ २.

**अखण्डैकरसास्तारा अखण्डैकरसो रविः ।**
**अखण्डैकरसं क्षेत्रमखण्डैकरसा क्षमा ॥ १७ ॥**
**अखण्डैकरसः शान्त अखण्डैकरसो गुणः ।**
**अखण्डैकरसः साक्षी अखण्डैकरसः सुहृत् ॥ १८ ॥**
**अखण्डैकरसो बन्धुरखण्डैकरसः सखा ।**
**अखण्डैकरसो राजा अखण्डैकरसं पुरम् ॥ १९ ॥**
**अखण्डैकरसं राज्यमखण्डैकरसाः प्रजाः ।**
**अखण्डैकरसं तारमखण्डैकरसो जपः ॥ २० ॥**
**अखण्डैकरसं ध्यानमखण्डैकरसं पदम् ।**
**अखण्डैकरसं ग्राह्यमखण्डैकरसं महत् ॥ २१ ॥**
**अखण्डैकरसं ज्योतिरखण्डैकरसं धनम् ।**
**अखण्डैकरसं भोज्यमखण्डैकरसं हविः ॥ २२ ॥**
**अखण्डैकरसो होम अखण्डैकरसो जयः ।**
**अखण्डैकरसः स्वर्गः अखण्डैकरसः स्वयम् ॥ २३ ॥**

स्वाज्ञविकल्पितस्वाविद्यापदतत्कार्यं यद्यत् दृश्यते यद्यत् श्रूयते यद्यत् स्मर्यते तत्तत खण्डं अचिन्मात्रं लक्ष्यते । तदतिरेकेण किं अखण्डैकरसं किं वा चिन्मात्रं विद्यते इति तदियत्ताबुभुत्सुः कुमारः स्कन्दः जानन्नपि लोकानुग्रहार्थं **अखण्डैकरसचिन्मात्रमनुब्रूहीति** सर्वज्ञं शिवं **पप्रच्छ** । यः **तेनैवं पृष्टः परमशिवः स होवाचेत्याह**—अथेति ॥ किं तत् ? **अखण्डैकरसं दृश्यमित्यादि** ॥१–४१॥

सर्वस्य चिन्मात्रत्वभावना

**अखण्डैकरसं सर्वं चिन्मात्रमिति भावयेत् ।**
**चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ॥ २४ ॥**

भववर्जितचिन्मात्रं सर्वं चिन्मात्रमेव हि ।
इदं च सर्वं चिन्मात्रमयं [1]चिन्मात्रमेव हि ॥ २५ ॥
आत्मभावं च चिन्मात्रमखण्डैकरसं विदुः ।
सर्वलोकं च चिन्मात्रं त्वत्ता मत्ता च चिन्मयम् ॥ २६ ॥
आकाशो भूर्जलं वायुरग्निर्ब्रह्मा हरिः शिवः ।
यत्किंचिद्यन्न किंचिच्च सर्वं चिन्मात्रमेव हि ॥ २७ ॥
अखण्डैकरसं सर्वं यद्यच्चिन्मात्रमेव हि ।
भूतं भव्यं भविष्यच्च सर्वं चिन्मात्रमेव हि ॥ २८ ॥
द्रव्यं कालं च चिन्मात्रं ज्ञानं ज्ञेयं चिदेव हि ।
ज्ञाता चिन्मात्ररूपश्च सर्वं चिन्मयमेव हि ॥ २९ ॥
संभाषणं च चिन्मात्रं यद्यच्चिन्मात्रमेव हि ।
असच्च सच्च चिन्मात्रमाद्यन्तं चिन्मयं सदा ॥ ३० ॥
आदिरन्तश्च चिन्मात्रं गुरुशिष्यादि चिन्मयम् ।
दृग्दृश्यं यदि चिन्मात्रमस्ति चेच्चिन्मयं सदा ॥ ३१ ॥
सर्वाश्चर्यं च चिन्मात्रं देहश्चिन्मात्रमेव हि ।
लिङ्गं च कारणं चैव चिन्मात्रान्न हि विद्यते ॥ ३२ ॥
अहं त्वं चैव चिन्मात्रं मूर्तामूर्तादि चिन्मयम् ।
पुण्यं पापं च चिन्मात्रं जीवश्चिन्मात्रविग्रहः ॥ ३३ ॥
चिन्मात्रान्नास्ति संकल्पश्चिन्मात्रान्नास्ति वेदनम् ।
चिन्मात्रान्नास्ति मन्त्रादि चिन्मात्रान्नास्ति देवता ॥ ३४ ॥

[1] चिन्मय—अ १, अ २.

चिन्मात्रान्नास्ति दिक्पालाश्चिन्मात्राद्यावहारिकम् ।
चिन्मात्रात्परमं ब्रह्म चिन्मात्रान्नास्ति कोऽपि हि ॥ ३५ ॥
चिन्मात्रान्नास्ति माया च चिन्मात्रान्नास्ति पूजनम् ।
चिन्मात्रान्नास्ति मन्तव्यं चिन्मात्रान्नास्ति सत्यकम् ॥ ३६ ॥
चिन्मात्रान्नास्ति कोशादि चिन्मात्रान्नास्ति वै वसु ।
चिन्मात्रान्नास्ति मौनं च चिन्मात्रान्नास्त्यमौनकम् ॥ ३७ ॥
चिन्मात्रान्नास्ति वैराग्यं सर्वं चिन्मात्रमेव हि ।
यच्च यावच्च चिन्मात्रं यच्च यावच्च दृश्यते ॥ ३८ ॥
यच्च यावच्च दूरस्थं सर्वं चिन्मात्रमेव हि ।
यच्च यावच्च भूतादि यच्च यावच्च लक्ष्यते ॥ ३९ ॥
यच्च यावच्च वेदान्ताः सर्वं चिन्मात्रमेव हि ।
चिन्मात्रान्नास्ति गमनं चिन्मात्रान्नास्ति मोक्षकम् ॥ ४० ॥
चिन्मात्रान्नास्ति लक्ष्यं च सर्वं चिन्मात्रमेव हि ।
अखण्डैकरसं ब्रह्म चिन्मात्रान्न हि विद्यते ॥ ४१ ॥
शास्त्रे मयि त्वयीशे च ह्यखण्डैकरसो भवान् ।

स्वातिरिक्तखण्डाविद्यापदतत्कार्यरसजातापह्नवसिद्धं ब्रह्म स्वाज्ञादिदृष्टिमोहे सत्यसति निष्प्रतियोगिकाखण्डैकरसचिन्मात्रतया सदा अवशिष्यते इत्यत्र नहि संशयोऽस्ति । तदेव स्वाज्ञदृष्टेः अचिद्रूपदृश्यजगद्भावादिखण्डरूपेण स्वाध्यस्तवैधर्म्यं सत्यं विभाति । तथैवं स्वाज्ञसमर्पितवैधर्म्यं केवलशास्त्रजन्य-ज्ञानिनो व्यावहारिक प्रतिभाति, विज्ञानिनां तु प्रातिभासिकं, सम्यज्ज्ञानिनां

शून्यं, तत्त्वज्ञानां तु स्वाज्ञसमर्पितदृश्यजगद्भावादिखण्डवैधर्म्यजातं निष्प्रतियोगिकाखण्डैकरसचिन्मात्रमेव विभाति । स्वाज्ञादिदृष्टिदृष्टवैधर्म्यजातं स्वाज्ञादिदृष्टेरेव, नहि तद्वस्तुस्पर्शी भवितुमर्हति, वस्तुनो निष्प्रतियोगिकस्वमात्रत्वादित्यत्र "पश्यतेहापि सन्मात्रम्—असदन्यत्", "ब्रह्ममात्रमसन्नहि",

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥ इत्यादि ।
अक्षरार्पितवैधर्म्यं सत्यं भात्यज्ञसन्ततेः ।
ज्ञविज्ञसम्यज्ज्ञतत्त्वज्ञैर्वैधर्म्यं यथाक्रमम् ॥
ज्ञेयं भवेत् दृश्यमिथ्याशून्यचिन्मात्रभेदतः ।
तत्तद्दृष्टिविपर्यासः तत्तद्दृष्टेर्नचात्मनः ॥

इत्यादि श्रुतेः, परमाक्षरोक्तेश्च । अखण्डैकरसचिन्मात्रात् न किञ्चिदस्तीति फलितोऽर्थः । "अखण्डैकरसं भावं" इत्याद्यस्मिन्नध्याये वक्ष्यमाणाध्यायेषु च "कालभेदं" इत्यादि च लिङ्गव्यत्ययः छान्दसः । शिष्टं स्पष्टम् ॥

विद्याफलम्

इत्येकरूपकतया यो वा जानात्यहं त्विति ॥ ४२ ॥
सकृज्ज्ञानेन मुक्तिः स्यात्सम्यज्ज्ञाने स्वयं गुरुः ॥ ४३ ॥

इति ॥

विद्याफलमुपसंहरति—इतीति । "अखण्डैकरसं दृश्यं" इत्यारभ्य "अखण्डैकरसं ब्रह्म चिन्मात्रान्नहि विद्यते । शास्त्रे मयीशे त्वयि च योऽखण्डैकरसः" परमात्मा विद्यते स एव "भवान्" नेतरः इत्यन्तं एकरूपकतया यः कोपि वा अखण्डैकरसचिन्मात्रमहमेवेति जानाति सोऽयमेवं विद्वान् सम्यज्ज्ञाने—तृतीयार्थे सप्तमी—सम्यज्ज्ञानेन गुरुः ब्रह्मविद्वरीयान्

वरिष्ठो वा भूत्वा अवतिष्ठते । पुनस्तस्यैव सकृद्विभातनिष्प्रतियोगिकब्रह्ममात्र-ज्ञानेन विकळेबरमुक्तिः स्यात् । इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥ ४२-४३ ॥

इति द्वितीयोऽध्यायः

# तृतीयोऽध्यायः

आत्मनः सच्चिदानन्दब्रह्मत्वानुभवः

कुमारः पितरमात्मानुभवमनुब्रूहीति पप्रच्छ । स होवाच भगवान् परमशिवः ।

परंब्रह्मस्वरूपोऽहं परमानन्दमस्म्यहम् ।
केवलं ज्ञानरूपोऽहं केवलं परमोऽस्म्यहम् ॥ १ ॥
केवलं शान्तरूपोऽहं केवलं चिन्मयोऽस्म्यहम् ।
केवलं नित्यरूपोऽहं केवलं शाश्वतोऽस्म्यहम् ॥ २ ॥
केवलं सत्त्वरूपोऽहमहं त्यक्त्वाऽहमस्म्यहम् ।
सर्वहीनस्वरूपोऽहं चिदाकाशमयोऽस्म्यहम् ॥ ३ ॥
केवलं तुर्यरूपोऽस्मि तुर्यातीतोऽस्मि केवलः ।
सदा चैतन्यरूपोऽस्मि चिदानन्दमयोऽस्म्यहम् ॥ ४ ॥
केवलाकाररूपोऽस्मि शुद्धरूपोऽस्म्यहं सदा ।
केवलं ज्ञानरूपोऽस्मि केवलं प्रियमस्म्यहम् ॥ ५ ॥

निर्विकल्पस्वरूपोऽस्मि निरीहोऽस्मि निरामयः ।
सदाऽसङ्गस्वरूपोऽस्मि निर्विकारोऽहमव्ययः ॥ ६ ॥
सदैकरसरूपोऽस्मि सदा चिन्मात्रविग्रहः ।
अपरिच्छिन्नरूपोऽस्मि ह्यनन्तानन्दरूपवान् ॥ ७ ॥
सत्परानन्दरूपोऽस्मि चित्परानन्दमस्म्यहम् ।
अन्तरान्तररूपोऽहमवाङ्मनसगोचरः ॥ ८ ॥
आत्मानन्दस्वरूपोऽहं सत्यानन्दोऽस्म्यहं सदा ।
आत्मारामस्वरूपोऽस्मि ह्यहमात्मा सदाशिवः ॥ ९ ॥
आत्मप्रकाशरूपोऽस्मि ह्यात्मज्योतीरसोऽस्म्यहम् ।
आदिमध्यान्तहीनोऽस्मि ह्याकाशसदृशोऽस्म्यहम् ॥ १० ॥
नित्यशुद्धचिदानन्दसत्तामात्रोऽहमव्ययः ।
नित्यबुद्धविशुद्धैकसच्चिदानन्दमस्म्यहम् ॥ ११ ॥
नित्यशेषस्वरूपोऽस्मि सर्वातीतोऽस्म्यहं सदा ।
रूपातीतस्वरूपोऽस्मि परमाकाशविग्रहः ॥ १२ ॥
भूमानन्दस्वरूपोऽस्मि भाषाहीनोऽस्म्यहं सदा ।
सर्वाधिष्ठानरूपोऽस्मि सर्वदा चिद्घनोऽस्म्यहम् ॥ १३ ॥
देहभावविहीनोऽस्मि चिन्ताहीनोऽस्मि सर्वदा ।
चित्तवृत्तिविहीनोऽहं चिदात्मैकरसोऽस्म्यहम् ॥ १४ ॥
सर्वदृश्यविहीनोऽहं दृग्रूपोऽस्म्यहमेव हि ।
सर्वदा पूर्णरूपोऽस्मि नित्यतृप्तोऽस्म्यहं सदा ॥ १५ ॥

अहं ब्रह्मैव सर्वं स्यादहं चैतन्यमेव हि ।
अहमेवाहमेवास्मि भूमाकारस्वरूपवान् ॥ १६ ॥
अहमेव महानात्मा ह्यहमेव परात्परः ।
अहमन्यवदाभामि ह्यहमेव शरीरवत् ॥ १७ ॥
अहं शिष्यवदाभामि ह्यहं लोकत्रयाश्रयः ।
अहं कालत्रयातीत अहं वेदैरुपासितः ॥ १८ ॥
अहं शास्त्रेण निर्णीत अहं चित्ते व्यवस्थितः ।
मत्त्यक्तं नास्ति किंचिद्वा मत्त्यक्तं पृथिवी तु वा ॥ १९ ॥
मयाऽतिरिक्तं यद्यद्वा तत्तन्नास्तीति निश्चिनु ।
अहं ब्रह्मास्मि सिद्धोऽस्मि नित्यशुद्धोऽस्म्यहं सदा ॥ २० ॥
निर्गुणः केवलात्माऽस्मि निराकारोऽस्म्यहं सदा ।
केवलं ब्रह्ममात्रोऽस्मि ह्यजरोऽस्म्यमरोऽस्म्यहम् ॥ २१ ॥
स्वयमेव स्वयं भामि स्वयमेव सदात्मकः ।
स्वयमेवात्मनि स्वस्थः स्वयमेव परा गतिः ॥ २२ ॥
स्वयमेव स्वयं भुङ्क्ते स्वयमेव स्वयं रमे ।
स्वयमेव स्वयंज्योतिः स्वयमेव स्वयं महः ॥ २३ ॥
स्वस्यात्मनि स्वयं रंस्ये स्वात्मन्येव विलोकये ।
स्वात्मन्येव सुखासीनः स्वात्ममात्रावशेषकः ॥ २४ ॥
स्वचैतन्ये स्वयं स्थास्ये स्वात्मराज्ये सुखे रमे ।
स्वात्मसिंहासने स्थित्वा स्वात्मनोऽन्यन्न चिन्तये ॥ २५ ॥

चिद्रूपमात्रं ब्रह्मैव सच्चिदानन्दमद्वयम् ।
आनन्दघन एवाहमहं ब्रह्मास्मि केवलम् ॥ २६ ॥
सर्वदा सर्वशून्योऽहं [1]सर्वात्मानन्दवानहम् ।
नित्यानन्दस्वरूपोऽहमात्माकाशोऽस्मि [2]सर्वदा ॥ २७ ॥
अहमेव हृदाकाशे चिदादित्यस्वरूपवान् ।
आत्मनाऽऽत्मनि तृप्तोऽस्मि ह्यरूपोऽस्म्यहमव्ययः ॥ २८ ॥
एकसंख्याविमुक्तोऽस्मि नित्यमुक्तस्वरूपवान् ।
आकाशादपि सूक्ष्मोऽहमाद्यन्ताभाववानहम् ॥ २९ ॥
सर्वप्रकाशरूपोऽस्मि परावरसुखोऽस्म्यहम् ।
सत्तामात्रस्वरूपोऽहं शुद्धमोक्षस्वरूपवान् ॥ ३० ॥
सत्यानन्दस्वरूपोऽहं ज्ञानानन्दघनोऽस्म्यहम् ।
विज्ञानमात्ररूपोऽहं सच्चिदानन्दलक्षणः ॥ ३१ ॥
ब्रह्ममात्रमिदं सर्वं ब्रह्मणोऽन्यन्न किंचन ।
तदेवाहं सदानन्दं ब्रह्मैवाहं सनातनम् ॥ ३२ ॥
त्वमित्येतत्तदित्येतन्मत्तोऽन्यन्नास्ति किंचन ।
चिच्चैतन्यस्वरूपोऽहमहमेव परः शिवः ॥ ३३ ॥
अतिभावस्वरूपोऽहमहमेव सुखात्मकः ।
साक्ष्यवस्तुविहीनत्वात्साक्षित्वं नास्ति मे सदा ॥ ३४ ॥
केवलं ब्रह्ममात्रत्वादहमात्मा सनातनः ।
अहमेवादिशेषोऽहमहंशेषोऽहमेव हि ॥ ३५ ॥

[1] सदात्मा—अ, अ १. [2] नित्यशः—अ, अ १, क.

नामरूपविमुक्तोऽहमहमानन्दविग्रहः ।
इन्द्रियाभावरूपोऽहं सर्वभावस्वरूपकः ॥ ३६ ॥
बन्धमुक्तिविहीनोऽहं शाश्वतानन्दविग्रहः ।
आदिचैतन्य[1]रूपोऽहमखण्डैकरसोऽस्म्यहम् ॥ ३७ ॥
वाङ्मनोऽगोचरश्चाहं सर्वत्र सुखवानहम् ।
सर्वत्र पूर्णरूपोऽहं भूमानन्दमयोऽस्म्यहम् ॥ ३८ ॥
सर्वत्र तृप्तिरूपोऽहं परामृतरसोऽस्म्यहम् ।
एकमेवाद्वितीयं सद्ब्रह्मैवाहं न संशयः ॥ ३९ ॥
सर्वशून्यस्वरूपोऽहं [2]सकलागमगोचरः ।
मुक्तोऽहं मोक्षरूपोऽहं निर्वाणसुखरूपवान् ॥ ४० ॥
सत्यविज्ञानमात्रोऽहं सन्मात्रानन्दवानहम् ।
तुरीयातीतरूपोऽहं निर्विकल्पस्वरूपवान् ॥ ४१ ॥
सर्वदा ह्यजरूपोऽहं [3]नीरागोऽस्मि निरञ्जनः ।
अहं शुद्धोऽस्मि बुद्धोऽस्मि नित्योऽस्मि प्रमुरस्म्यहम् ॥ ४२ ॥
ओङ्कारार्थस्वरूपोऽस्मि निष्कलङ्कमयोऽस्म्यहम् ।

एवं स्वपितृमुखतः कुमारः अखण्डैकरसचिन्मात्रेयत्तां श्रुत्वा तत्र स्वानुभवं पृच्छतीत्याह—कुमार इति। तत्प्रश्नमङ्गीकृत्य अखण्डैकरसचिन्मात्रानुभवं स्वाज्ञविकल्पितात् सर्वस्मात् परं विलक्षणं यत् सम्यक् बृंहयति विजृम्भते तत् **परंब्रह्म** तत्स्वरूपोऽहम् । **परमानन्दमिति** लिङ्गाव्यत्ययः,

[1] मात्रो—क, अ, अ १, अ २
[2] सकलामर—क, अ २.
[3] निरागो—क, अ १, अ २, उ १.

परमानन्दोऽस्म्यहमित्यर्थः । किंच—केवलमित्यादि । प्रत्यक्प्रकाशत्वात् ज्ञानरूपः । सर्वोत्कृष्टत्वात् परमः ॥ १ ॥ क्रूरस्वातिरिक्ताभावात् शान्तः । अनित्यापायात् नित्यः । चिरन्तनत्वात् शाश्वतः ॥ २ ॥ ईश्वरत्वात् सत्स्वरूपः । पराक्सापेक्षप्रत्यगहम्भावं त्यक्त्वा शिष्टाहम्भावोऽस्मि । सर्वं ब्रह्मेत्यत्र सर्वापह्नवसिद्धब्रह्ममात्रमस्मि । चिदाकाशमयः चिदाकाशस्वरूपः ॥ ३ ॥ तुर्यः प्रत्यक् । तदतीतः परः । अशेषविशेषाभावात् केवलः ॥ ४–५ ॥ विकल्पासहत्वात् निर्विकल्पः । अन्तःकरणाभावात् निरीहः । भवरोगहानात् निरामयः । उपाधिसत्त्वेऽपि असङ्गः । विकाराभावात् निर्विकारः । स्वतः परतो वा व्ययाभावात् अव्ययः ॥ ६ ॥ अपरिच्छिन्नः त्रिविधपरिच्छेदाभावात् । अनन्तानन्दः अपरिमितानन्दरूपत्वात् ॥ ७ ॥ सच्चित्परानन्दरूपः सच्चित्परमानन्दरूपत्वात । सर्वान्तरः प्रत्यक् तस्मादप्यन्तरः परः प्रत्यगभिन्नब्रह्मरूपत्वात । वाङ्मानसादिकरणग्रामागोचरः ॥ ८ ॥ सत्यात्मानन्दरूपः । प्रत्यगादिरूपेण सर्वात्मसु रमत इति आत्मारामः ॥ ९ ॥ स्वोत्पत्तिस्थितिलयाभावात् आदिमध्यान्तहीनः । निरवयवत्वात् आकाशसदृशः ॥ १० ॥ सत्तासामान्यत्वात् सत्तामात्रः ॥ ११ ॥ सर्वावशेषरूपत्वात् नित्यशेषः ॥ १२ ॥ अपरिच्छिन्नानन्दत्वात् भूमानन्दः । वागादिकरणाभावात् भाषाहीनः ॥ १३–१४ ॥ दृश्यासम्भवतो दृङ्मात्रः ॥ १५–१६ ॥ स्वाज्ञदृष्टेः अहमन्यवत् गुरुशिष्यवत् भातोऽस्मि । वेदशास्त्रैः उपास्यो निर्णीतोऽस्मि ॥ १७–१८ ॥ शिष्टं स्पष्टम् ॥ मया अव्याप्तं मदतिरिक्तं वा नास्तीति जानीहीत्याह—मत्त्यक्तमिति ॥ १९ ॥ किञ्च—अहमिति ॥ २० ॥ केवलं ब्रह्ममात्रोऽस्मि निष्प्रतियोगिकत्वात् ॥ २१ ॥ यतः स्वयमेवेदं सर्वं अतः स्वस्मादन्यत् न चिन्तये इत्याह—स्वयमेवेति ॥ २२ ॥ "भुङ्क्ते" इत्यत्र पुरुषव्यत्ययः, भुञ्जे इत्यर्थः ॥ २३–२५ ॥ यच्चिद्रूपमात्रं तदेवाहमस्मीत्याह—चिदिति ॥ २६ ॥ सर्वशून्योऽहं [1]सर्वदा सर्वासम्भवात् ॥ २७ ॥

[1] सर्वथा—उ १.

**अहमेव चिदादित्यस्वरूपवान्** सर्वप्राणिहृदतकामादिवृत्तिसहस्रभासकचित्सूर्यत्वात् ॥ २८ ॥ **एकसङ्ख्याविमुक्तः** असङ्ख्येयत्वात् । **आद्यन्ताभाववान्** सम्भूतिप्रलयाभावात् ॥ २९ ॥ **परावरसुखः** प्रत्यगभिन्नब्रह्मानन्दत्वात् । **शुद्धमोक्षस्वरूपवान्** स्वस्य स्वातिरिक्तभ्रममोक्षसिद्धत्वात् ॥ ३०–३१ ॥ यतः अन्यत् न विद्यते तदेवाहमित्याह—**ब्रह्ममात्रमिति** ॥ ३२ ॥ त्वंतदित्यादिशब्दवाच्यं मदतिरिक्तं नास्तीत्याह—**त्वमिति** ॥ ३३ ॥ **अतिभावस्वरूपः** सर्वभावातीतत्वात् । **साक्षित्वं**—साक्ष्यसापेक्षसाक्षितायाः सविशेषत्वात् तद्विरळोऽस्मीत्यर्थः ॥ ३४ ॥ **आदिशेषः** धरणीधरत्वात् । **अहंशेष** इति स्वमात्रत्वमवशिष्टत्वात् ॥ ३५–३८ ॥ **एकमेवाद्वितीयं** सजातीयविजातीयस्वगतभेदवैरळ्यात् ॥ ३९ ॥ **सकलागमगोचरः** वेदान्तवेद्यत्वात् । स्वाविद्याद्वयतो मुक्तः । **निर्वाणसुखरूपवान्** विदेहकैवल्यानन्दत्वात् ॥ ४०–४१ ॥ बुद्धः विशुद्धबोधरूपत्वात ॥ ४२ ॥ **ओङ्कारार्थस्वरूपः** तुर्यतुर्यत्वात् ॥

आत्मनि सर्वप्रविभक्तरूपाभावानुभवः

चिदाकारस्वरूपोऽस्मि नाहमस्मि न सोऽस्म्यहम् ॥ ४३ ॥
न हि किंचित्स्वरूपोऽस्मि निर्व्यापारस्वरूपवान् ।
निरंशोऽस्मि निराभासो न मनो नेन्द्रियोऽस्म्यहम् ॥ ४४ ॥
न बुद्धिर्न विकल्पोऽहं न देहादित्रयोऽस्म्यहम् ।
न जाग्रत्स्वप्नरूपोऽहं न सुषुप्तिस्वरूपवान् ॥ ४५ ॥
न तापत्रयरूपोऽहं नेषणात्रयवानहम् ।
श्रवणं नास्ति मे सिद्धेर्मननं च चिदात्मनि ॥ ४६ ॥
सजातीयं न मे किंचिद्विजातीयं न मे क्वचित् ।
स्वगतं च न मे किंचिन्न मे भेदत्रयं क्वचित् ॥ ४७ ॥

अहंशब्दबोध्यं स्थूलदेहादिप्रत्यगन्तं, तच्छब्दबोध्यं विराडादितुर्यान्तं, तदुभयविलक्षणत्वात् **नाहमस्मि न सोऽस्म्यहम्** ॥ ४३ ॥ स्वातिरेकेण **किञ्चित्स्वरूपः** । अखण्डार्थत्वात् **निरंशः** । देहत्रयविलक्षणत्वात् **न मन इत्यादि** ॥ ४४–४९ ॥ स्वस्य स्वतःसिद्धत्वेन न हि श्रवणादिसाधनाकाङ्क्षा अस्तीत्याह—**श्रवणमित्यादि** ॥ चशब्दो निदिध्यासनसमुच्चयार्थः ॥ ४६ ॥ न हि सजातीयादिभेदत्रयमस्तीत्याह—**सजातीयमिति** ॥ ४७ ॥

स्वेतरस्य सर्वस्य असत्त्वानुभवः

असत्यं हि मनोरूपमसत्यं बुद्धिरूपकम् ।
अहंकारमसद्धीति नित्योऽहं शाश्वतो ह्यजः ॥ ४८ ॥
देहत्रयमसद्विद्धि कालत्रयमसत्सदा ।
गुणत्रयमसद्विद्धि ह्यहं सत्यात्मकः शुचिः ॥ ४९ ॥
श्रुतं सर्वमसद्विद्धि वेदं सर्वमसत्सदा ।
शास्त्रं सर्वमसद्विद्धि ह्यहं सत्यं चिदात्मकः ॥ ५० ॥
मूर्तित्रयमसद्विद्धि सर्वभूतमसत्सदा ।
सर्वतत्त्वमसद्विद्धि ह्यहं भूमा सदाशिवः ॥ ५१ ॥
गुरुशिष्यमसद्विद्धि गुरोर्मन्त्रमसत्ततः ।
यद्दृश्यं तदसद्विद्धि न मां विद्धि तथाविधम् ॥ ५२ ॥
यच्चिन्त्यं तदसद्विद्धि यच्च्याव्यं तदसत्सदा ।
यद्धितं तदसद्विद्धि न मां विद्धि तथाविधम् ॥ ५३ ॥
सर्वान्प्राणीनसद्विद्धि सर्वान्भोगानसत्त्विति ।
दृष्टं श्रुतमसद्विद्धि [1]ओतं प्रोतमसन्मयम् ॥ ५४ ॥

[1] ओतं—उ, उ १.

कार्याकार्यमसद्विद्धि नष्टं प्राप्तमसन्मयम् ।
दुःखादुःखमसद्विद्धि सर्वासर्वमसन्मयम् ॥ ९५ ॥
पूर्णापूर्णमसद्विद्धि धर्माधर्ममसन्मयम् ।
लाभालाभावसद्विद्धि जयाजयमसन्मयम् ॥ ९६ ॥
शब्दं सर्वमसद्विद्धि स्पर्शं सर्वमसत्सदा ।
रूपं सर्वमसद्विद्धि रसं सर्वमसन्मयम् ॥ ९७ ॥
गन्धं सर्वमसद्विद्धि सर्वाज्ञानमसन्मयम् ।
असदेव सदा सर्वमसदेव भवोद्भवम् ॥ ९८ ॥
असदेव गुणं सर्वं सन्मात्रमहमेव हि ।

स्वातिरिक्तसामान्यं शशविषाणवदत्यन्ताभावरूपतया असदेव । अहं तु तदपह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रभावरूपोऽस्मीत्याह—असत्यं हीति ॥ ४८–९८ ॥

अहंब्रह्मास्मीत्यात्ममन्त्राभ्यासः

स्वात्ममन्त्रं सदा पश्येत्स्वात्ममन्त्रं सदाभ्यसेत् ॥ ९९ ॥
अहं ब्रह्मास्मिमन्त्रोऽयं दृश्यपापं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयमन्यमन्त्रं विनाशयेत् ॥ ६० ॥
अहं ब्रह्मास्मि मन्त्रोऽयं देहदोषं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं जन्मपापं विनाशयेत् ॥ ६१ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं मृत्युपाशं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं द्वैतदुःखं विनाशयेत् ॥ ६२ ॥

अहं ब्रह्मास्मि मन्त्रोऽयं भेदबुद्धिं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं चिन्तादुःखं विनाशयेत् ॥ ६३ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं बुद्धिव्याधिं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं चित्तबन्धं विनाशयेत् ॥ ६४ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वव्याधीन्विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वशोकं विनाशयेत् ॥ ६५ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं कामादीन्नाशयेत्क्षणात् ।
अहं ब्रह्मास्मि मन्त्रोऽयं [1]क्रोधवृत्तिं विनाशयेत् ॥ ६६ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं चित्तवृत्तिं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं संकल्पादीन्विनाशयेत् ॥ ६७ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं कोटिदोषं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वतन्त्रं विनाशयेत् ॥ ६८ ॥
अहं ब्रह्मास्मि मन्त्रोऽयमात्माज्ञानं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयमात्मलोकजयप्रदः ॥ ६९ ॥
अहं ब्रह्मास्मि मन्त्रोऽयमप्रतर्क्यसुखप्रदः ।
अहं ब्रह्मास्मि मन्त्रोऽयमजडत्वं प्रयच्छति ॥ ७० ॥
अहं ब्रह्मास्मि मन्त्रोऽयमनात्मासुरमर्दनः ।
अहं ब्रह्मास्मि वज्रोऽयमनात्माख्यगिरीन्हरेत् ॥ ७१ ॥
अहं ब्रह्मास्मि चक्रोऽयमनात्मं[2]त्वासुरान्हरेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वोस्तान्मोक्षयिष्यति ॥ ७२ ॥

[1] क्रोधशक्तिं—अ, अ १, अ २, क. [2] स्त्यासुरान्—क, अ २.

अहं ब्रह्मास्मि मन्त्रोऽयं ज्ञानानन्दं प्रयच्छति ।
सप्तकोटिमहामन्त्रं जन्म[1]कोटिशतप्रदम् ॥ ७३ ॥
सर्वमन्त्रान्समुत्सृज्य एतन्मन्त्रं [2]समभ्यसेत् ।
सद्यो मोक्षमवाप्नोति नास्ति संदेहमण्वपि ॥ ७४ ॥

इति ॥

स्वात्ममन्त्राभ्यासस्य ब्रह्मात्यन्तरायनिरसनद्वारा निष्प्रतियोगिकब्रह्ममात्र-पदप्रापकत्वात् यत एवं अतः बन्धमोक्षभ्रममुमुक्षुः इममेव अहं ब्रह्मास्मीति मन्त्रं सदा अभ्यसेदित्याह—स्वात्ममन्त्रमिति । स्पष्टोऽयमर्थः ॥ ५९–७४ ॥ इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥

इति तृतीयोऽध्यायः

# चतुर्थोऽध्यायः

जीवन्मुक्तिः—प्रत्यगभिन्नब्रह्मभावापत्तिः

कुमारः परमेश्वरं पप्रच्छ जीवन्मुक्तविदेहमुक्तयोः स्थिति-मनुब्रूहीति । स होवाच परः शिवः ।

चिदात्माऽहं परात्माऽहं निर्गुणोऽहं परात्परः ।
आत्ममात्रेण यस्तिष्ठेत्स जीवन्मुक्त उच्यते ॥ १ ॥
देहत्रयातिरिक्तोऽहं शुद्धचैतन्यमस्म्यहम् ।
ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते ॥ २ ॥

[1] कोश—क, अ २, [2] सदाभ्य—क, अ २,

आनन्दघनरूपोऽस्मि परानन्दघनोऽस्म्यहम् ।
यस्य देहादिकं नास्ति यस्य ब्रह्मेति निश्चयः ।
परमानन्दपूर्णो यः स जीवन्मुक्त उच्यते ॥ ३ ॥
यस्य किंचिदहं नास्ति चिन्मात्रेणावतिष्ठते ।
चैतन्यमात्रो यस्यान्तश्चिन्मात्रैकस्वरूपवान् ॥ ४ ॥
सर्वत्र पूर्णरूपात्मा सर्वत्रात्मावशेषकः ।
आनन्दरतिरव्यक्तः परिपूर्णश्चिदात्मकः ॥ ५ ॥
शुद्धचैतन्यरूपात्मा सर्वसङ्गविवर्जितः ।
नित्यानन्दः प्रसन्नात्मा ह्यन्यचिन्ताविवर्जितः ॥ ६ ॥
किंचिदस्तित्वहीनो यः स जीवन्मुक्त उच्यते ।
न मे चित्तं न मे बुद्धिर्नाहंकारो न चेन्द्रियम् ॥ ७ ॥
न मे देहः कदाचिद्वा न मे प्राणादयः क्वचित् ।
न मे माया न मे कामो न मे क्रोधः परोऽस्म्यहम् ॥ ८ ॥
न मे किंचिदिदं वापि न मे किंचित्क्वचिज्जगत् ।
न मे दोषो न मे लिङ्गं न मे चक्षुर्न मे मनः ॥ ९ ॥
न मे श्रोत्रं न मे नासा न मे जिह्वा न मे करः ।
न मे जाग्रन्न मे स्वप्नं न मे कारणमण्वपि ॥ १० ॥
न मे तुरीयमिति यः स जीवन्मुक्त उच्यते ।
इदं सर्वं न मे किंचिदयं सर्वं न मे क्वचित् ॥ ११ ॥

न मे [1]कालो न मे देशो न मे वस्तु न मे मतिः ।
न मे स्नानं न मे संध्या न मे दैवं न मे स्थलम् ॥ १२ ॥
न मे तीर्थं न मे सेवा न मे ज्ञानं न मे पदम् ।
न मे बन्धं न मे जन्म न मे वाक्यं न मे रविः ॥ १३ ॥
न मे पुण्यं न मे पापं न मे कार्यं न मे शुभम् ।
न मे जीव इति स्वात्मा न मे किंचिज्जगत्त्रयम् ॥ १४ ॥
न मे मोक्षो न मे द्वैतं न मे वेदो न मे विधिः ।
न मेऽन्तिकं न मे दूरं न मे बोधो न मे [2]रहः ॥ १५ ॥
न मे गुरुर्न मे शिष्यो न मे हीनो न चाधिकः ।
न मे ब्रह्मा न मे विष्णुर्न मे रुद्रो न चन्द्रमाः ॥ १६ ॥
न मे पृथ्वी न मे तोयं न मे वायुर्न मे वियत् ।
न मे वह्निर्न मे गोत्रं न मे लक्ष्यं न मे भवः ॥ १७ ॥
न मे ध्याता न मे ध्येयं न मे ध्यानं न मे मनुः ।
न मे शीतं न मे चोष्णं न मे तृष्णा न मे क्षुधा ॥ १८ ॥
न मे मित्रं न मे शत्रुर्न मे मोहो न मे जयः ।
न मे पूर्वं न मे पश्चान्न मे चोर्ध्वं न मे दिशः ॥ १९ ॥
न मे वक्तव्यमल्पं वा न मे श्रोतव्यमण्वपि ।
न मे मन्तव्यमीषद्वा न मे ध्यातव्यमण्वपि ॥ २० ॥
न मे भोक्तव्यमीषद्वा न मे स्मर्तव्यमण्वपि ।
न मे भोगो न मे [3]रागो न मे यागो न मे लयः ॥ २१ ॥

[1] लोका—उ. लोको—उ १. [2] रविः—उ, उ १. [3] रोगो— उ १.

न मे मौर्ख्यं न मे शान्तं न मे बन्धं न मे प्रियम् ।
न मे मोदः प्रमोदो वा न मे स्थूलं न मे [1]कृशम् ॥ २२ ॥
न मे दीर्घं न मे ह्रस्वं न मे वृद्धिर्न मे क्षयम् ।
अध्यारोपापवादौ वा न मे चैकं न मे बहु ॥ २३ ॥
न मे आन्ध्यं न मे मान्द्यं न मे [2]पट्विदमण्वपि ।
न मे मांसं न मे रक्तं न मे मेदो न मे ह्यसृक् ॥ २४ ॥
न मे मज्जा न मेऽस्थिर्वा न मे त्वग्धातुसप्तकम् ।
न मे शुक्लं न मे रक्तं न मे नीलं न मे पृथक् ॥ २५ ॥
न मे तापो न मे लोभो मुख्यं गौणं न मे क्वचित् ।
न मे भ्रान्तिर्न मे स्थैर्यं न मे गुह्यं न मे कुलम् ॥ २६ ॥
न मे त्याज्यं न मे ग्राह्यं न मे हास्यं न मे नयः ।
न मे व्रतं न मे ग्लानिर्न मे शोष्यं न मे सुखम् ॥ २७ ॥
न मे ज्ञाता न मे ज्ञानं न मे ज्ञेयं न मे स्वयम् ।
न मे तुभ्यं न मे मह्यं न मे त्वं च न मे त्वहम् ॥ २८ ॥
न मे जरा न मे बाल्यं न मे यौवनमण्वपि ।
अहं ब्रह्मास्म्यहं ब्रह्मास्म्यहं ब्रह्मेति निश्चयः ॥ २९ ॥
चिदहं चिदहं चेति स जीवन्मुक्त उच्यते ।
ब्रह्मैवाहं चिदेवाहं परो वाहं न संशयः ॥ ३० ॥
स्वयमेव स्वयं हंसः स्वयमेव स्वयं स्थितः ।
स्वयमेव स्वयं पश्येत्स्वात्मराज्ये सुखे वसेत् ॥ ३१ ॥

[1] त्वहं—उ, उ १. [2] पट्वीद—क, उ. पद्मद—अ.

स्वात्मानन्दं स्वयं भोक्ष्येत्स जीवन्मुक्त उच्यते ।
स्वयमेवैकवीरोऽग्रे स्वयमेव प्रभुः स्मृतः ।
स्वस्वरूपे स्वयं स्वप्स्ये स जीवन्मुक्त उच्यते ॥ ३२ ॥

कुमारः स्वपितुः परमेश्वरस्य मुखतः अखण्डैकरसचिन्मात्रज्ञानं तदनुभवं च यथावदवगम्य तदान्तराळिकमुख्यफलरूपजीवन्मुक्तिविदेहमुक्तिस्वरूपमवगन्तुं शिवं पृच्छतीत्याह—कुमार इति ॥ तदङ्गीकृत्य क्रमेण जीवन्मुक्तविदेहमुक्तलक्षणं स होवाच । तत्र जीवन्मुक्तलक्षणमुच्यते—चिदात्मेति । परागभावग्रासप्रत्यग्भावस्थितिः जीवन्मुक्तिः प्रत्यगभिन्नब्रह्मभावापत्तिर्वेति वक्ष्यमाणजीवन्मुक्तिपर्यायसमुदायार्थः ॥ १–४ ॥ आनन्दात्मन्येव रतिः यस्य सोऽयं आनन्दरतिः ॥ ५ ॥ अन्यचिन्ताविवर्जितः स्वान्यस्य मृग्यत्वात् ॥ ६–९ ॥ देहत्रयवैलक्षण्यवदवस्थाचतुष्टयवैलक्षण्यमाह—न मे जाग्रदिति ॥ १०–१४ ॥ न मे विधिः न निषेधोऽपीत्यर्थः ॥ १५–३१ ॥ स्वयमेव प्रभुः ईश्वरत्वात् । "चिदात्माऽहं परात्माऽहं" इत्येतावता ग्रन्थेन ब्रह्मविदादिचतुर्भेदभिन्नजीवन्मुक्तलक्षणमभिहितम् । प्रायशः इयं तेजोबिन्दूपनिषत् विध्यादिविदेहमुक्त्यन्तमहावाक्यरत्नावलीप्रभालोचने प्रसक्तानुप्रसक्त्या व्याख्याता नेह पुनः पदशो व्याख्यायते ग्रन्थविस्तरभयादिति ॥ ३२ ॥

विदेहमुक्तिः—निष्प्रतियोगिकस्वमात्रब्रह्ममात्रावस्थानम्

ब्रह्मभूतः प्रशान्तात्मा ब्रह्मानन्दमयः सुखी ।
[1]स्वच्छरूपो महामौनी वैदेही मुक्त एव सः ॥ ३३ ॥
सर्वात्मा समरूपात्मा शुद्धात्मा त्वह[2]मुत्थितः ।
एकवर्जित एकात्मा सर्वात्मा स्वात्ममात्रकः ॥ ३४ ॥

[1] स्वस्व—अ, अ १. [2] मुज्झि—अ, अ १, अ २, क.

अजात्मा चामृतात्माऽहं स्वयमात्माऽहमव्ययः ।
लक्ष्यात्मा ललितात्माऽहं तूष्णीमात्मस्वभाववान् ॥ ३५ ॥
आनन्दात्मा प्रियो ह्यात्मा मोक्षात्मा बन्धवर्जितः ।
ब्रह्मैवाहं चिदेवाहमेवं वापि न चिन्त्यते ॥ ३६ ॥
चिन्मात्रेणैव यस्तिष्ठेद्वैदेही मुक्त एव सः ॥ ३७ ॥
निश्चयं च परित्यज्य अहं ब्रह्मेति निश्चयम् ।
आनन्दभरितस्वान्तो वैदेही मुक्त एव सः ॥ ३८ ॥
[1]सर्वमस्तीति नास्तीति निश्चयं त्यज्य तिष्ठति ।
अहं ब्रह्मास्मि नास्मीति सच्चिदानन्दमात्रकः ॥ ३९ ॥
किंचित्कचित्कदाचिच्च आत्मानं न स्पृशत्यसौ ।
तूष्णीमेवं स्थितस्तूष्णीं तूष्णीं सत्यं न किंचन ॥ ४० ॥
परमात्मा गुणातीतः सर्वात्मा भूतभावनः ।
कालभेदं वस्तुभेदं देशभेदं स्वभेदकम् ॥ ४१ ॥
किंचिद्भेदं न तस्यास्ति किंचिद्वाऽपि न विद्यते ।
अहं त्वं तदिदं सोऽयं कालात्मा कालहीनकः ॥ ४२ ॥
शून्यात्मा सूक्ष्मरूपात्मा विश्वात्मा विश्वहीनकः ।
देवात्मा देवहीनात्मा मेयात्मा मेयवर्जितः ॥ ४३ ॥
सर्वत्र जडहीनात्मा सर्वेषामन्तरात्मकः ।
सर्वसंकल्पहीनात्मा चिन्मात्रोऽस्मीति सर्वदा ॥ ४४ ॥

[1] सर्वमस्मीति नास्मीति-

केवलः परमात्माऽहं केवलो ज्ञानविग्रहः ।
सत्तामात्रस्वरूपात्मा नान्यत्किंचिज्जगद्भयम् ॥ ४५ ॥
जीवेश्वरेति वाक् क्वेति वेद[1]शास्त्राः क्वहं त्विति ।
इदं चैतन्यमेवेति अहं चैतन्यमित्यपि ॥ ४६ ॥
इति निश्चयशून्यो यो वैदेही मुक्त एव सः ।
चैतन्यमात्रसंसिद्धस्वात्मारामः सुखासनः ॥ ४७ ॥
अपरिच्छिन्नरूपात्मा अणुस्थूलादिवर्जितः ।
तुर्यतुर्यः परानन्दो वैदेही मुक्त एव सः ॥ ४८ ॥
नामरूपविहीनात्मा परसंवित्सुखात्मकः ।
तुरीयातीतरूपात्मा शुभाशुभविवर्जितः ॥ ४९ ॥
योगात्मा योगयुक्तात्मा बन्धमुक्तिविवर्जितः ।
गुणागुणविहीनात्मा देशकालादिवर्जितः ॥ ५० ॥
साक्ष्यसाक्षित्वहीनात्मा किंचित्किंचिन्न किंचन ।
यस्य प्रपञ्चमानं न ब्रह्माकारमपीह न ॥ ५१ ॥
स्वस्वरूपे स्वयंज्योतिः स्वस्वरूपे स्वयंरतिः ।
वाचामगोचरानन्दो वाङ्मनोऽगोचरः स्वयम् ॥ ५२ ॥
अतीतातीतभावो यो वैदेही मुक्त एव सः ।
चित्तवृत्तेरतीतो यश्चित्तवृत्त्यवभासकः ॥ ५३ ॥
सर्ववृत्तिविहीनात्मा वैदेही मुक्त एव सः ।
तस्मिन्काले [2]विदेहीति देहस्मरणवर्जितः ॥ ५४ ॥

[1] वेदशास्त्राण्यहं—अ. [2] विदेहोति—अ १, अ २, क, उ १. विदेहोस्ति

ईषन्मात्रं स्मृतं चेद्यस्तदा सर्वसमन्वितः ।
अरैरदृष्टबाह्यात्मा परमानन्दचिद्धनः ॥ ५५ ॥
परैरदृष्टबाह्यात्मा सर्ववेदान्तगोचरः ।
ब्रह्मामृतरसास्वादो ब्रह्मामृतरसायनः ॥ ५६ ॥
ब्रह्मामृतरसासक्तो ब्रह्मामृतरसः स्वयम् ।
ब्रह्मामृतरसे मग्नो ब्रह्मानन्दशिवार्चनः ॥ ५७ ॥
[1]ब्रह्मामृतरसे तृप्तो ब्रह्मानन्दानुभावकः ।
ब्रह्मानन्दशिवानन्दो ब्रह्मानन्दरस[2]प्रभः ॥ ५८ ॥
ब्रह्मानन्दपरं ज्योतिर्ब्रह्मानन्दनिरन्तरः ।
ब्रह्मानन्दरसास्वादो ब्रह्मानन्दकुटुम्बकः ॥ ५९ ॥
ब्रह्मानन्दरसारूढो ब्रह्मानन्दैकचिद्धनः ।
ब्रह्मानन्दरसोद्वाहो ब्रह्मानन्दरसंभरः ॥ ६० ॥
ब्रह्मानन्दजनैर्युक्तो ब्रह्मानन्दात्मनि स्थितः ।
आत्मरूपमिदं सर्वमात्मनोऽन्यन्न किंचन ॥ ६१ ॥
सर्वमात्माऽहमात्माऽस्मि परमात्मा परात्मकः ।
नित्यानन्दस्वरूपात्मा वैदेही मुक्त एव सः ॥ ६२ ॥
पूर्णरूपो महानात्मा प्रीतात्मा शाश्वतात्मकः ।
सर्वान्तर्यामिरूपात्मा निर्मलात्मा निरात्मकः ॥ ६३ ॥
निर्विकारस्वरूपात्मा शुद्धात्मा शान्तरूपकः ।
शान्ताशान्तस्वरूपात्मा नैकात्मत्वविवर्जितः ॥ ६४ ॥

[1] ब्रह्मानन्द—उ, उ १. [2] प्रदः—अ, अ १.

जीवात्मपरमात्मेति चिन्तासर्वस्ववर्जितः ।
मुक्तामुक्तस्वरूपात्मा मुक्तामुक्तविवर्जितः ॥ ६५ ॥

बन्धमोक्षस्वरूपात्मा बन्धमोक्षविवर्जितः ।
द्वैताद्वैतस्वरूपात्मा द्वैताद्वैतविवर्जितः ॥ ६६ ॥

सर्वासर्वस्वरूपात्मा सर्वासर्वविवर्जितः ।
[1]मोदप्रमोदरूपात्मा [2]मोदादिविनिवर्जितः ॥ ६७ ॥

सर्वसंकल्पहीनात्मा वैदेही मुक्त एव सः ।
निष्कलात्मा निर्मलात्मा बुद्धात्मा पुरुषात्मकः ॥ ६८ ॥

आनन्दादिविहीनात्मा अमृतात्मामृतात्मकः ।
कालत्रयस्वरूपात्मा कालत्रयविवर्जितः ॥ ६९ ॥

अखिलात्मा ह्यमेयात्मा मानात्मा मानवर्जितः ।
नित्यप्रत्यक्षरूपात्मा नित्यप्रत्यक्ष[3]निर्णितः ॥ ७० ॥

अन्यहीनस्वभावात्मा अन्यहीनस्वयंप्रभः ।
विद्याऽविद्यादिमेयात्मा विद्याऽविद्यादिवर्जितः ॥ ७१ ॥

नित्यानित्यविहीनात्मा इहामुत्रविवर्जितः ।
शमादिषट्कशून्यात्मा मुमुक्षुत्वादिवर्जितः ॥ ७२ ॥

स्थूलदेहविहीनात्मा सूक्ष्मदेहविवर्जितः ।
कारणादिविहीनात्मा [4]तुरीयादिविवर्जितः ॥ ७३ ॥

[1] मोदः—अ १, अ २, उ.
[2] मोदामोदवि—क.
[3] निर्णीतः—उ १.
[4] तुर्यातुर्यादिव—उ १.

अन्नकोशविहीनात्मा प्राणकोशविवर्जितः ।
मनःकोशविहीनात्मा विज्ञानादिविवर्जितः ॥ ७४ ॥
आनन्दकोशहीनात्मा पञ्चकोशविवर्जितः ।
निर्विकल्पस्वरूपात्मा सविकल्पविवर्जितः ॥ ७५ ॥
दृश्यानुविद्धहीनात्मा शब्दविद्धविवर्जितः ।
सदा समाधिशून्यात्मा आदिमध्यान्तवर्जितः ॥ ७६ ॥
प्रज्ञानवाक्यहीनात्मा अहंब्रह्मास्मिवर्जितः ।
तत्त्वमस्यादिहीनात्मा अयमात्मेत्यभावकः ॥ ७७ ॥
ओंकारवाच्यहीनात्मा सर्ववाच्यविवर्जितः ।
अवस्थात्रयहीनात्मा अक्षरात्मा चिदात्मकः ॥ ७८ ॥
आत्मज्ञेयादिहीनात्मा यत्किंचिदिदमात्मकः ।
भानाभानविहीनात्मा वैदेही मुक्त एव सः ॥ ७९ ॥

स्वातिरिक्ताविद्यापदतत्कार्यजातकलनापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति तन्मात्रावस्थानं विदेहमुक्तलक्षणम् । तदिह प्रपञ्च्यते—**ब्रह्मभूत** इत्यादिना । **ब्रह्मभूतः** ब्रह्ममात्रतया अवस्थितत्वात् । **प्रशान्तात्मा** प्रशान्तदेहत्रयाभिमतित्वात् । **ब्रह्मानन्दमयः** आनन्दस्वरूपः निष्प्रतियोगिकभूमानन्दमात्र इत्यर्थः । **स्वच्छरूपः** पूर्णबोधस्वरूपत्वात् । **महामौनी** स्वमात्रतया तूष्णीमवस्थितत्वात् । देहत्रयोपलक्षितस्वाविद्यापदतत्कार्यजाते आत्मात्मीयाभिमतिमूलभूता विगताश्च ते देहाश्च विदेहाः, विदेहा एव वैदेहाः, ते अस्य सन्तीति **वैदेही** । तद्रूपेण व्यपदिष्टस्य बद्धत्वं स्यादित्यत आह—**मुक्त** इति । स्वातिरिक्तं यत्र मुक्तं अपह्नवतां गतं सोऽयं वैदेही **मुक्त एवेत्यत्र**—

यस्मिन् व्यष्टिसमष्ट्याख्यस्थूलदेहादिवासना ।
विरूपविलयं याति स विदेहो महामुनिः ॥ ६
सर्वापह्नवसंसिद्धब्रह्ममात्रं स एव हि ।
अकल्पविद्वरिष्ठोऽयमिति सर्वत्र गीयते ॥

इति स्मृतिः मानम् । एवमेव विदेहमुक्तिश्रुतयो बोद्धव्याः ॥ ३३ ॥ किंच—**सर्वात्मेति** । **स्वात्ममात्रकः** निष्प्रतियोगिकैकरूपत्वात् ॥ ३४ ॥ **लक्ष्यात्मा** स्वावशेषतया लक्षितत्वात । **ललितात्मा** केवलनिर्विशेषत्वात् । **तूष्णीमात्मस्वभाववान्** महामौनफलरूपत्वात् ॥ ३५ ॥ **न चिन्त्यते** तथाविधचिन्तायाः अपि विद्यावृत्तित्वेन अपह्नोतव्यत्वात ॥ ३६ ॥ स्वातिरिक्तमस्तीति, चशब्दात् नास्तीति, **निश्चयं च** इति ॥ ३७–३९ ॥ यत्र स्वाज्ञजातं संसरति तत्र ज्ञानी विज्ञानी वा सङ्गोदासीनतया प्रत्यगभिन्नब्रह्मगोचराखण्डाकारवृत्तिपरवशो भूत्वा एवं तूष्णीमास्ते । यद्येवं अखण्डाकारवृत्तिमपि असहमानो योगी सम्यज्ज्ञानी निर्विकल्पकसमाधिपरवशो भूत्वा क्वचित्कालं तूष्णीं स्थितो भवति । **तूष्णीं सत्यं न किञ्चन** इत्यत्र—"सरूपविलयसिद्धनिर्विकल्पसमाधितः कादाचित्कव्युत्थानमप्यसहमानः तत्त्वज्ञानी सुषुम्नानाडयन्तर्गतैकवल्यनाडिकोज्ज्वलचिदाकाशे स्वान्तर्बहिर्भावित-स्वाविद्याद्वयतत्कार्यविकल्पजातापह्नवसिद्धनिष्प्रतियोगिकनिर्विकल्पब्रह्ममात्रतया तू-ष्णींस्वभावेनावशिष्यते इति यत् तदेव सत्यं सन्मात्रावस्थानलक्षणविदेहैकवल्यं तत्र न किञ्चन स्वातिरिक्तमस्ति नास्तीति विभ्रमोऽस्ति ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति मद्व्यतिरिक्तमणुमात्रं न विद्यते सन्मात्रमसदन्यत्" इत्यादि श्रुतेः ॥ ४०–४१ ॥ भेद इति वक्तव्ये भेदमिति विभक्तिव्यत्ययः ॥ ४२–४५ ॥ जीवेश्वराविति वक्तव्ये **जीवेश्वरेति** सम्बुद्धिः, वेदशास्त्राणीति वक्तव्ये **वेदशास्त्रा**: इति लिङ्गव्यत्ययः ॥ ४६–४७ ॥ **तुर्यतुर्यः** अविकल्पाविकल्परूपत्वात्

॥ ४८–४९ ॥ **गुणागुणविहीनात्मा** त्रिगुणवत्तत्सापेक्षनिर्गुणस्यापि सविशेषत्वात् । मिथः सापेक्षसगुणनिर्गुणताविरहनिष्प्रतियोगिकनिर्गुणात्माऽयमित्यर्थः ॥ ५० ॥ साक्ष्यसाक्षिनिरूपितसविशेषजातं **किञ्चित् किञ्चिदपि न किञ्चन** ॥ ५१–६० ॥ विदेहमुक्तेः पुरा यद्यदन्नादिकं आस्वादितं यद्यदुद्वाहादिकुटुम्बभरणशिवपूजादि कृतं तत्तत् सर्वं इदानीं ब्रह्मानन्द एव भवति, विदेहमुक्तस्य स्वातिरिक्तकलनातत्प्रवृत्तिनिवृत्तिव्यापृत्यपह्नवसिद्धत्वात् । विदेहमुक्तातिरेकेण न किञ्चिदस्तीत्याह—**आत्मरूपमिति** ॥ ६१-६२ ॥ **निरात्मकः** ईश्वरसाक्षिचिन्मात्रत्वात् ॥ ६३–६६ ॥ **सर्वासर्वविवर्जितः** सापेक्षबन्धमोक्षद्वैताद्वैतादेः सविशेषत्वात् निष्प्रतियोगिकाद्वैतात्माऽयमित्यर्थः ॥ ६७–६९ ॥ **नित्यप्रत्यक्षनिर्णितः** स्वाज्ञादिभिः स्वस्वदृष्ट्यनुरोधेन निर्णीत इत्यर्थः ॥ ७०–७३ ॥ चतुर्महावाक्यवाच्यलक्ष्यता स्यादित्यत आह— **प्रज्ञानेति** ॥ ७७–८१ ॥

स्वात्मनिष्ठाविधिः

आत्मानमेव वीक्षस्व आत्मानं बोधय स्वकम् ।
स्वमात्मानं स्वयं भुङ्क्ष्व स्वस्थो भव षडानन ॥ ८० ॥
स्वमात्मनि स्वयं तृप्तः स्वमात्मानं स्वयं चर ।
आत्मानमेव मोदस्व वैदेही मुक्तिको भव ॥ ८१ ॥

**इत्युपनिषत्** ॥

**इत्युपनिषच्छब्दः** कुमारशिवाख्यायिकासमाप्त्यर्थः ॥ ८२ ॥

इति चतुर्थोऽध्यायः

# पञ्चमोऽध्यायः

## स्वात्मयाथात्म्यम्

निदाघो नाम वै मुनिः पप्रच्छ ऋभुं भगवन्तमात्मा-
नात्मविवेकमनुब्रूहीति । स होवाच भगवान् ऋभुः ।

सर्ववाचोऽवधिर्ब्रह्म सर्वचिन्तावधिर्गुरुः ।
सर्वकारणकार्यात्मा कार्यकारणवर्जितः ॥ १ ॥
सर्वसंकल्परहितः [1]सर्वनादमयः शिवः ।
सर्ववर्जितचिन्मात्रः सर्वानन्दमयः परः ॥ २ ॥
सर्वतेजःप्रकाशात्मा नादानन्दमयात्मकः ।
सर्वानुभवनिर्मुक्तः सर्वध्यानविवर्जितः ॥ ३ ॥
सर्वनादकलातीत एष आत्माऽहमव्ययः ।
आत्मानात्मविवेकादिभेदाभेदविवर्जितः ॥ ४ ॥
शान्ताशान्तादिहीनात्मा [2]नादान्तर्ज्योतिरूपकः ।
महावाक्यार्थतो दूरो ब्रह्मास्मीत्यतिदूरतः ॥ ५ ॥
तच्छब्दवर्ज्यस्त्वंशब्दहीनो वाक्यार्थवर्जितः ।
क्षराक्षरविहीनो यो [3]नादान्तर्ज्योतिरेव सः ॥ ६ ॥
अखण्डैकरसो वाऽहमानन्दोऽस्मीति वर्जितः ।
सर्वातीतस्वभावात्मा [4]नादान्तर्ज्योतिरेव सः ॥ ७ ॥

[1] सर्वानन्द—क, अ २, उ १.
[2] नादान्तज्यो—अ, अ २.
[3] नादान्तज्यो—अ.
[4] नादान्तज्यो—अ, अ २.

आत्मेति [1]शब्दहीनो य आत्मशब्दार्थवर्जितः ।
सच्चिदानन्दहीनो य एषैवात्मा सनातनः ॥ ८ ॥
स निर्देष्टुमशक्यो यो वेदवाक्यैरगम्यगः ।
यस्य किंचिद्बहिर्नास्ति किंचिदन्तः कियन्न च ॥ ९ ॥
यस्य लिङ्गं प्रपञ्चं वा ब्रह्मैवात्मा न संशयः ।
नास्ति यस्य शरीरं वा जीवो वा भूतभौतिकः ॥ १० ॥
नामरूपादिकं नास्ति भोज्यं वा भोगभुक् च वा ।
सद्वाऽसद्वा स्थितिर्वाऽपि यस्य नास्ति क्षराक्षरम् ॥ ११ ॥
गुणं वा विगुणं वाऽपि स म आत्मा न संशयः ।
यस्य वाच्यं वाचकं वा श्रावणं मननं च वा ॥ १२ ॥
गुरुशिष्यादिभेदं वा देवलोकाः सुरासुराः ।
यत्र धर्ममधर्मं वा शुद्धं वाऽशुद्धमण्वपि ॥ १३ ॥
यत्र कालमकालं वा निश्चयः संशयो न हि ।
यत्र मन्त्रममन्त्रं वा विद्याऽविद्ये न विद्यते ॥ १४ ॥
द्रष्टृदर्शनदृश्यं वा ईषन्मात्रं [2]कलात्मकम् ।

कुमारेण साकं ऋभुर्नाम ब्रह्ममानसपुत्रः सोऽपि शिवमुखतः अखण्डैकरसचिन्मात्रज्ञानतदनुभवतदान्तगळिकमुख्यफलात्मकजीवन्मुक्तिविदेहमुक्त्योः इयत्तामवगम्य कृतकृत्यवदं गतः खलु । तं कदाचित् निदाघो नाम मुनिः समस्तवेदशास्त्रपुराणेतिहासादिषु आत्मानात्मानौ स्त इति श्रूयते तयोः इयत्ताजिज्ञासया पृष्टवानित्याह श्रुतिः—निदाघ इति । तत्प्रश्नमङ्गीकृत्य

[1] शब्दरूपो—क.
[2] कलामृतं—अ २, क.

**स होवाच** । किं तत् इत्यत्र **सर्ववाच्** इति । **सर्ववाचोऽवधिः** अशब्दत्वात् । **सर्वचिन्तावधिः** प्रतीचश्चिन्तादिवृत्तिप्रासत्वात् । **त्वाज्ञादिदृष्ट्या सर्वकारणकार्यात्मा** ॥ १ ॥ **सर्वनादमयः** नादतज्ज्ञवेदशास्त्रसिद्धान्तार्थत्वात् । **स्वाज्ञसमर्पितसर्ववर्जितचिन्मात्रः** ॥ २ ॥ स्वानुभूतिध्यानादिविषयस्य सविशेषता स्यादित्यत आह—**सर्वेति** ॥ ३–४ ॥ तत्त्वंपदवाक्यार्थं आत्मेत्यत आह—**महावाक्येति** ॥ ५ ॥ **क्षराक्षरविहीनः** क्षराक्षरकलनाविरळपरमाक्षरत्वात् ॥ ६–८ ॥ परमात्मनो व्याविद्धनानापदवाक्यार्थत्वेन महावाक्यात्मसच्चिदानन्दशब्दतद्वाच्यार्थवर्जितत्वात् **स निर्देष्टुमिति** । कर्मकाण्डगोचरवेदवाक्यैः साक्षादगम्यतां गच्छतीति **अगम्यगः** ॥ ९–१४ ॥

अनात्मनः सर्वस्य मिथ्यात्वम्

अनात्मेति प्रसङ्गो वा अनात्मेति मनोऽपि वा ॥ १५ ॥
अनात्मेति जगद्वाऽपि [1]नास्त्यनात्मेति निश्चिनु ।
सर्वसंकल्पशून्यत्वात्सर्वकार्यविवर्जनात् ॥ १६ ॥
केवलं ब्रह्ममात्रत्वात् [2]नास्त्यनात्मेति निश्चिनु ।
देहत्रयविहीनत्वात्कालत्रयविवर्जनात् ॥ १७ ॥
जीवत्रयगुणाभावात्तापत्रयविवर्जनात् ।
लोकत्रयविहीनत्वात्सर्वमात्मेति शासनात् ॥ १८ ॥
चित्ताभावाच्चिन्तनीयं देहाभावाज्जरा न च ।
पादाभावाद्गतिर्नास्ति हस्ताभावात्क्रिया न च ॥ १९ ॥
मृत्युर्नास्ति जनाभावाद्बुद्ध्यभावात्सुखादिकम् ।
धर्मो नास्ति शुचिर्नास्ति सत्यं नास्ति [3]भयं न च ॥ २० ॥

[1] नास्तिनास्तीति—क, अ, अ १, अ २.
[2] नास्तिनास्तीति—अ २.
[3] भवं—अ २.

अक्षरोच्चारणं नास्ति गुरुशिष्यादि नास्त्यपि ।
एकाभावे द्वितीयं न न द्वितीये न चैकता ॥ २१ ॥
सत्यत्वमस्ति चेत्किंचिद्[1]सत्त्वं न च संभवेत् ।
असत्यत्वं यदि भवेत्सत्यत्वं न [2]घटिष्यति ॥ २२ ॥
शुभं यद्यशुभं विद्धि अशुभाच्छुभमिष्यते ।
भयं यद्यभयं विद्धि ह्यभयाद्भयमापतेत् ॥ २३ ॥
[3]बन्धत्वमस्ति चेन्मोक्षो बन्धाभावे क्व मोक्षता ।
मरणं यदि चेज्जन्म जन्माभावे मृतिर्न च ॥ २४ ॥
त्वमित्यपि भवेच्चाहं त्वं नो चेदहमेव न ।
इदं यदि तदेवास्ति तदभावादिदं न च ॥ २५ ॥
अस्तीति चेन्नास्ति तदा नास्ति चेदस्ति किंचन ।
कार्यं चेत्कारणं किंचित्कार्याभावे न कारणम् ॥ २६ ॥
द्वैतं यदि तदाऽद्वैतं द्वैताभावेऽद्वयं न च ।
दृश्यं यदि दृगप्यस्ति दृश्याभावे दृगेव न ॥ २७ ॥
अन्तर्यदि बहिः सत्यमन्ताभावे बहिर्न च ।
पूर्णत्वमस्ति चेत्किंचिदपूर्णत्वं प्रसज्यते ॥ २८ ॥
तस्मादेतत्कचिन्नास्ति त्वं चाहं वा इमे इदम् ।
नास्ति दृष्टान्तिकं सत्ये नास्ति दार्ष्टान्तिकं ह्यजे ॥ २९ ॥

[1] सत्यं—अ, अ १, अ २. [2] वदि—अ.
[3] इदं श्लोकार्ध (उ) (उ १) कोशयोर्नास्ति.

परं ब्रह्माहमस्मीति स्मरणस्य मनो न हि ।
ब्रह्ममात्रं जगदिदं ब्रह्ममात्रं त्वमप्यहम् ॥ ३० ॥
चिन्मात्रं केवलं चाहं नास्त्यनात्मेति निश्चिनु ।
इदं प्रपञ्चं नास्त्येव नोत्पन्नं नो स्थितं क्वचित् ॥ ३१ ॥
चित्तं प्रपञ्चमित्याहुर्नास्ति नास्त्येव सर्वदा ।
न प्रपञ्चं न चित्तादि नाहंकारो न जीवकः ॥ ३२ ॥
मायाकार्यादिकं नास्ति माया नास्ति भयं न हि ।
कर्ता नास्ति क्रिया नास्ति श्रवणं मननं न हि ॥ ३३ ॥
समाधिद्वितयं नास्ति मातृमानादि नास्ति हि ।
अज्ञानं चापि नास्त्येव ह्यविवेकं कदाचन ॥ ३४ ॥
अनुबन्धचतुष्कं न संबन्धत्रयमेव न ।
न गङ्गा न गया सेतुर्न भूतं नान्यदस्ति हि ॥ ३५ ॥
न भूमिर्न जलं नाग्निर्न वायुर्न च खं क्वचित् ।
न देवा न च दिक्पाला न वेदा न गुरुः क्वचित् ॥ ३६ ॥
न दूरं नान्तिकं नाळं न मध्यं न क्वचित्स्थितम् ।
नाद्वैतं द्वैतसत्यं वा ह्यसत्यं वा इदं न च ॥ ३७ ॥
बन्धमोक्षादिकं नास्ति सद्वाऽसद्वा सुखादि वा ।
जातिर्नास्ति गतिर्नास्ति वर्णो नास्ति न लौकिकम् ॥ ३८ ।
सर्वं ब्रह्मेति नास्त्येव [1]ब्रह्मेत्यपि च नास्ति हि ।
चिदित्येवेति नास्त्येव चिदहंभाषणं न हि ॥ ३९ ॥

[1] ब्रह्म इत्येव—क, अ, अ १, अ २. ब्रह्मेत्येव च—उ १.

अहं ब्रह्मास्मि नास्त्येव नित्यशुद्धोऽस्मि न क्वचित् ।
वाचा यदुच्यते किंचिन्मनसा मनुते क्वचित् ॥ ४० ॥
बुद्ध्या निश्चिनुते नास्ति चित्तेन ज्ञायते न हि ।
योगियोगादिकं नास्ति सदा सर्वं सदा न च ॥ ४१ ॥
अहोरात्रादिकं नास्ति स्नानध्यानादिकं न हि ।
भ्रान्तिरभ्रान्ति[1]नास्त्येव नास्त्यनात्मेति निश्चिनु ॥ ४२ ॥
वेदं शास्त्रं पुराणं च कार्यं कारणमीश्वरः ।
लोको भूतं जनस्त्वैक्यं सर्वं मिथ्या न संशयः ॥ ४३ ॥
बन्धो मोक्षः सुखं दुःखं ध्यानं चित्तं सुरासुराः ।
गौणं मुख्यं परं चान्यत्सर्वं मिथ्या न संशयः ॥ ४४ ॥
वाचा वदति यत्किंचित्संकल्पैः कल्प्यते च यत् ।
मनसा चिन्त्यते यद्यत्सर्वं मिथ्या न संशयः ॥ ४५ ॥
बुद्ध्या निश्चीयते [2]यद्यच्चित्ते निश्चीयते क्वचित् ।
शास्त्रैः प्रपञ्च्यते यद्यन्नेत्रेणै[3]व निरीक्ष्यते ॥ ४६ ॥
श्रोत्राभ्यां श्रूयते यद्यदन्यत्सद्भावमेव च ।
नेत्रं श्रोत्रं गात्रमेव मिथ्येति च सुनिश्चितम् ॥ ४७ ॥
[4]इदमित्येव निर्दिष्टमयमित्येव कल्प्यते ।
त्वमहं तदिदं सोऽहमन्यत्सद्भावमेव च ॥ ४८ ॥

[1] नास्त्येव—उ.
[2] किंचि—क, अ १.
[3] वं—उ १.
[4] इदं मिथ्येव—अ.

यद्यत्संभाव्यते लोके सर्वसंकल्पसंभ्रमः ।
सर्वाध्यासं सर्वगोप्यं सर्वभोगप्रभेदकम् ॥ ४९ ॥ ९
सर्वदोषप्रभेदाश्च नास्त्यनात्मेनि निश्चिनु ।
मदीयं च त्वदीयं च ममेति च तवेति च ॥ ५० ॥
मह्यं तुभ्यं मयेत्यादि तत्सर्वं वितथं भवेत् ।
रक्षको विष्णुरित्यादि ब्रह्मा सृष्टेस्तु कारणम् ॥ ५१ ॥
संहारे रुद्र इत्येवं सर्वं मिथ्येति निश्चिनु ।
स्नानं जपस्तपो होमः स्वाध्यायो देवपूजनम् ॥ ५२ ॥
मन्त्रं तन्त्रं च सत्सङ्गो गुणदोषविजृम्भणम् ।
अन्तःकरणसद्भाव अविद्यायाश्च संभवः ॥ ५३ ॥
अनेककोटिब्रह्माण्डं सर्वं मिथ्येति निश्चिनु ।
सर्वदेशिकवाक्योक्तिर्येन केनापि निश्चितम् ॥ ५४ ॥
दृश्यते [1]जगति यद्यद्यज्जगति वीक्ष्यते ।
वर्तते [1]जगति यद्यत्सर्वं मिथ्येति निश्चिनु ॥ ५५ ॥
येन केनाक्षरेणोक्तं येन केन विनिर्णितम् ।
येन केनापि गदितं येन केनापि मोदितम् ॥ ५६ ॥
येन केनापि यद्दत्तं येन केनापि यत्कृतम् ।
यत्र यत्र शुभं कर्म यत्र यत्र च दुष्कृतम् ॥ ५७ ॥
यद्यत्करोषि सत्येन सर्वं मिथ्येति निश्चिनु[2] ।

[1] जगती—अ, अ १.

[2] अत्र प्रथमखण्डान्तः—॥ १ ॥—चिह्नितोऽस्ति—अ १.

निदाघेन आत्मानात्मयाथात्म्यमनुब्रूहीति यत् पृष्टं तत्र स्वातिरिक्ता-विद्यापदतत्कार्यजातापह्नवसिद्धोऽयमात्मेत्यात्मयाथात्म्यमभिहितम् । अथानात्म-याथात्म्यमुच्यते—**अनात्मेति** । अनात्मा अस्ति नास्तीति वार्ताऽपि न विद्यते । अविद्यारूपेण अविद्याऽभावेऽपि तत्कार्यमनोरूपेण जगद्रूपेण वा अविद्या स्यादित्यत आह—**अनात्मेति** ॥ १५ ॥ मनःकार्यजगद्वाऽपि न विद्यते । यस्मादेवं तस्मात कार्यकारणात्मना येन केनापि वा हे निदाघ **नास्त्यनात्मेति निश्चिनु** निश्चयवान् भव, "नाविद्याऽस्तीह नो माया" इति, "अविद्यमानैवाविद्यावस्तुतत्त्वविचारिणाम्" इति,

नात्मभावेन नानेदं न स्वेनापि कथं चन ।
न पृथङ् नापृथक्किञ्चिदिति तत्त्वविदो विदुः ॥

इति श्रुतिस्मृतिगौडपादाचार्योक्तेः । जगन्मनोऽनात्मासम्भवे हेतुत्रयमाचष्टे —**सर्वेति** ॥ **सर्वसङ्कल्पशून्यत्वात्** सङ्कल्पादिवृत्तिसहस्रजुष्टमानसाभावात् । **सर्वकार्यविवर्जनात्** मनःकार्यजगदभावात ॥ १६ ॥ ब्रह्ममात्रस्य निष्प्रतियोगि-कत्वेन मनस्तत्कार्यहेत्वनात्मापह्नवसिद्धत्वात **नास्त्यनात्मेति निश्चिनु** । इतश्च अनात्मासम्भवे हेतूनुपन्यस्यति—**देहेति** ॥ १६–२० ॥ यद्यत सापेक्षं तत्तत् सविशेषं अनात्मत्वात् । यद्यत् अनात्मा न भवति तत्तत् सविशेषमपि न भवति यथा निर्विशेषं ब्रह्मेति श्रुतियुक्तितः स्वविकल्पितानात्मापह्नवसिद्धात्म-मात्रसिद्धये सापेक्षश्रुतिवाक्यान्युपन्यस्यति—**एकाभाव** इति ॥ २१–२७ ॥ **अन्ताभावे**, विसर्गलोपः, अन्तरभावे ॥ २८–३० ॥ कथं पुनः अनात्मा नास्तीत्युच्यते सम्भूतिस्थितिप्रलयवदनात्मप्रपञ्चदर्शनादित्यत आह—**इदमिति**॥ अयं प्रपञ्चः इति वक्तव्ये **इदं प्रपञ्चं** इति लिङ्गव्यत्ययः ॥ ३१–३६ ॥ **नाळं** [न आळं] दूरान्तिकयोः अन्तराळमित्यर्थः । मिथः सापेक्षतया **नाद्वैतं** ॥ ३७–४१ ॥ भ्रान्तिः अतस्मिन् तद्भावः, अभ्रान्तिः तस्मिन् तद्भावः, भ्रान्त्यादिगतभावस्य तूलान्तःकरणाविद्याकार्यत्वेन कारणतुल्यत्वात् । अभ्रान्ति नास्तीत्यत्र विसर्गलोप इति केचित् । तत्पक्षे—**भ्रान्तिरभ्रान्ति**

**नास्त्येव** इति पाठः ॥ ४२ ॥ स्वाज्ञदृष्ट्या यद्यत् विकल्पितं स्वज्ञस्तु तत्तत् मिथ्येति मन्यते इत्याह - वेदमित्यादिना । वेदं इति विभक्ति-व्यत्ययः ॥ ४३–५७ ॥

अहंवस्तुनः परमात्मत्वम्

**त्वमेव परमात्माऽसि त्वमेव परमो गुरुः ॥ ५८ ॥**

**त्वमेवाकाशरूपोऽसि साक्षिहीनोऽसि सर्वदा ।**

**त्वमेव सर्वभावोऽसि त्वं ब्रह्मासि न संशयः ॥ ५९ ॥**

**कालहीनोऽसि कालोऽसि सदा ब्रह्मासि चिद्घनः ।**

**सर्वतः स्वस्वरूपोऽसि चैतन्यघनवानसि ॥ ६० ॥**

**सत्योऽसि सिद्धोऽसि सनातनोऽसि मुक्तोऽसि मोक्षोऽसि मुदामृतोऽसि ।**

**देवोऽसि शान्तोऽसि निरामयोऽसि ब्रह्मासि पूर्णोऽसि परात्परोऽसि ॥**

**समोऽसि सच्चासि सनातनोऽसि सत्यादिवाक्यैः प्रतिबोधितोऽसि ।**

**सर्वाङ्गहीनोऽसि सदा स्थितोऽसि ब्रह्मेन्द्ररुद्रादिविभावितोऽसि ॥**

**सर्वप्रपञ्चभ्रमवर्जितोऽसि सर्वेषु भूतेषु च [1]भासितोऽसि ।**

**सर्वत्र संकल्पविवर्जितोऽसि सर्वागमान्तार्थविभावितोऽसि ॥६३॥**

**सर्वत्र संतोषसुखासनोऽसि सर्वत्र गत्यादिविवर्जितोऽसि ।**

**सर्वत्र लक्ष्यादिविवर्जितोऽसि ध्यातोऽसि विष्ण्वादिसुरैरजस्रम् ॥**

[1] भावितो—अ. भाव्यतो—उ १.

[1]चिदाकारस्वरूपोऽसि चिन्मात्रोऽसि निरङ्कुशः ।
आत्मन्येव स्थितोऽसि त्वं सर्वशून्योऽसि निर्गुणः ॥ ६५ ॥

आनन्दोऽसि परोऽसि [2]त्वमेक एवाद्वितीयकः ।
चिद्घनानन्दरूपोऽसि परिपूर्णस्वरूपकः ॥ ६६ ॥

सदसि त्वमसि ज्ञोऽसि सोऽसि जानासि वीक्षसि ।
सच्चिदानन्दरूपोऽसि वासुदेवोऽसि वै [3]प्रभुः ॥ ६७ ॥

अमृतोऽसि विभुश्चासि चञ्चलो ह्यचलो ह्यसि ।
सर्वोऽसि सर्वहीनोऽसि शान्ताशान्तविवर्जितः ॥ ६८ ॥

सत्तामात्रप्रकाशोऽसि सत्तासामान्यको ह्यसि ।
नित्यसिद्धिस्वरूपोऽसि सर्व[4]सिद्धिविवर्जितः ॥ ६९ ॥

ईषन्मात्रविशून्योऽसि अणुमात्रविवर्जितः ।
अस्तित्ववर्जितोऽसि त्वं नास्तित्वादिविवर्जितः ॥ ७० ॥

लक्ष्यलक्षणहीनोऽसि निर्विकारो निरामयः ।
सर्वनादान्तरोऽसि त्वं कला[5]काष्ठाविवर्जितः ॥ ७१ ॥

ब्रह्मविष्ण्वीशहीनोऽसि स्वस्वरूपं प्रपश्यसि ।
स्वस्वरूपावशेषोऽसि स्वानन्दाब्धौ निमज्जसि ॥ ७२ ॥

[6]स्वात्मराज्ये स्वमेवासि स्वयंभावविवर्जितः ।
शिष्टपूर्णस्वरूपोऽसि स्वस्मात्किंचिन्न पश्यसि ॥ ७३ ॥

[1] चिदाकाश—अ. [2] त्वमेकमे—उ. [3] विभुः—क, अ २.
[4] विद्ध—उ. [5] काष्ठ—अ १. [6] स्वात्मा—अ.

स्वस्वरूपान्न चलसि स्वस्वरूपेण जृम्भसि ।
स्वस्वरूपादनन्योऽसि ह्यहमेवासि निश्चिनु ॥ ७४ ॥[1]

वेदं शास्त्रं इत्यारभ्य एतावता ग्रन्थेन सर्वं मिथ्येत्यवधृतं; किमहं मिथ्याऽन्तःपाती इत्याशङ्कमानमालक्ष्य मिथ्याऽऽधारो निराधारो वा परमात्मा त्वमसीत्याह—त्वमेवेति । भगवदात्मना ब्रह्मविद्याऽऽचार्यत्वात् ॥ ९८–७४ ॥

अविद्यातत्कार्यप्रपञ्चस्य निष्प्रतियोगिकाभावरूपत्वम्

इदं प्रपञ्चं यत्किंचिद्यद्यज्जगति [2]विद्यते ।
दृश्यरूपं च दृग्रूपं सर्वं शशविषाणवत् ॥ ७५ ॥
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकारश्च तेजश्च लोकं भुवनमण्डलम् ॥ ७६ ॥
नाशं जन्म च सत्यं च पुण्यपापजयादिकम् ।
रागः कामः क्रोधलोभौ ध्यानं ध्येयं गुणं परम् ॥ ७७ ॥
गुरुशिष्योपदेशादिरादिरन्तं शमं शुभम् ।
भूतं भव्यं वर्तमानं लक्ष्यं लक्षणमद्वयम् ॥ ७८ ॥
शमो विचारः संतोषो भोक्तृभोज्यादिरूपकम् ।
यमाद्यष्टाङ्गयोगं च गमनागमनात्मकम् ॥ ७९ ॥
आदिमध्यान्तरङ्गं च ग्राह्यं त्याज्यं हरिः शिवः ।
इन्द्रियाणि मनश्चैव अवस्थात्रितयं तथा ॥ ८० ॥

[1] अत्र द्वितीयखण्डान्तः—॥ २ ॥—चिह्नितोऽस्ति—क. अ १, अ २.
[2] वीक्ष्यते—उ.

चतुर्विंशतितत्त्वं च साधनानां चतुष्टयम् ।
स्वजातीयं विजातीयं लोका भूरादयः क्रमात् ॥ ८१ ॥
सर्ववर्णाश्रमाचारं मन्नतन्नादिसंग्रहम् ।
विद्याऽविद्यादिरूपं च सर्ववेदं जडाजडम् ॥ ८२ ॥
बन्धमोक्षविभागं च ज्ञानविज्ञानरूपकम् ।
बोधाबोधस्वरूपं वा द्वैताद्वैतादिभाषणम् ॥ ८३ ॥
सर्ववेदान्तसिद्धान्तं सर्वशास्त्रार्थनिर्णयम् ।
अनेकजीवसद्भावमेकजीवादिनिर्णयम् ॥ ८४ ॥
यद्यद्ध्यायति चित्तेन यद्यत्संकल्प्यते क्वचित् ।
बुद्ध्या निश्चीयते यद्यद्गुरुणा संश्रुणोति यत् ॥ ८५ ॥
यद्यद्वाचा व्याकरोति यद्यदाचार्यभाषणम् ।
यद्यत् [1]स्वेरेन्द्रियैर्भाव्यं यद्यन्मीमांस्यते पृथक् ॥ ८६ ॥
यद्यन्न्यायेन निर्णीतं महद्भिर्वेदपारगैः ।
शिवो क्ष[ह]रति लोकान्वै विष्णुः पाति जगत्त्रयम् ॥ ८७ ॥
ब्रह्मा सृजति लोकान्वै एवमादिक्रियादिकम् ।
यद्यदस्ति पुराणेषु यद्यद्वेदेषु [2]निर्णयम् ॥ ८८ ॥
सर्वोपनिषदां भावं सर्वं शशविषाणवत् ।[3]

हे स्वामिन् भवदनुग्रहमहिम्ना शिष्टपूर्णस्वरूपोऽस्मीत्यत्र न हि संशयोऽस्ति । पुरा अनुभूतस्वान्तर्बाह्यविजृम्भितदृग्दृश्यकलनान्वितव्यष्टिसमष्टिविभागेद्धस्वाविद्या-

[1] सुरे—अ १. सर्वे—क. [2] निर्णितम्—अ, अ १.
[3] अत्र तृतीयखण्डान्तचिह्नं ॥ ३ ॥—अ १.

पदतत्कार्यप्रपञ्चस्य का गतिः इत्याकाङ्क्षायां स्वाज्ञदृष्ट्या सत्यत्वेन [1]स्वज्ञदृष्ट्या मिथ्यात्वेन अनुभूतोऽपि परमार्थदृष्ट्या शशविषाणवत् निःप्रतियोगिकाभावरूप एवेत्याह—इदमिति ॥ ७९ ॥ स्वातिरिक्तापह्नवः उक्तः । पुनरपह्नोतव्यविषयाभावात् उत्तरग्रन्थारम्भः किमर्थं इत्याकाङ्क्षायां, सत्यमपह्नवविषयो न विद्यते तस्य शशविषाणवत् अवस्तुत्वात् । तथाऽपि "इदं प्रपञ्चं" इत्यादि "सर्वं शशविषाणवत्" इत्यन्तश्रुतिवृत्त्यर्थतया उत्तरग्रन्थारम्भो युज्यते इत्याह—भूमिरित्यादि ॥ ७६–८३ ॥ तूलान्तःकरणाविद्याया यदनेकत्वं तदनेकजीवसद्भावप्रयोजकं; आदिशब्देन एकत्वानेकत्वहेत्वविद्याद्वयस्य व्यावहारिकादिदृष्ट्या मिथ्यात्वम् ॥ ८४–८८ ॥ परमार्थदृष्ट्या ब्रह्मातिरिक्तस्य शशविषाणवत् अवस्तुत्वं युज्यत एवेत्यर्थः ॥

सङ्कल्पादिरूपं मन एव सर्वानर्थहेतुः

देहोऽहमिति संकल्पं तदन्तःकरणं स्मृतम् ॥ ८९ ॥

देहोऽहमिति [2]संकल्पो महत्संसार उच्यते ।
देहोऽहमिति संकल्पं तद्बन्धमिति चोच्यते ॥ ९० ॥

देहोऽहमिति संकल्पं तद्दुःखमिति चोच्यते ।
देहोऽहमिति यत् ज्ञानं तदेव नरकं स्मृतम् ॥ ९१ ॥

देहोऽहमिति संकल्पं जगत्सर्वमितीर्यते ।
देहोऽहमिति संकल्पो हृदयग्रन्थिरीरितः ॥ ९२ ॥

देहोऽहमिति यज्ज्ञानं तदेवाज्ञानमुच्यते ।
देहोऽहमिति यज्ज्ञानं तदसद्भावमेव च ॥ ९३ ॥

[1] स्वाज्ञ—उ १. [2] संकल्पं—क.

देहोऽहमिति या बुद्धिः सा चाविद्येति भण्यते ।
देहोऽहमिति यज्ज्ञानं तदेव द्वैतमुच्यते ॥ ९४ ॥
देहोऽहमिति संकल्पः सत्यजीवः स एव हि ।
देहोऽहमिति यज्ज्ञानं परिच्छिन्नमितीरितम् ॥ ९५ ॥
देहोऽहमिति संकल्पो महापापमिति स्फुटम् ।
देहोऽहमिति या बुद्धिस्तृष्णा दोषामयः किल ।
यत्किंचिदपि संकल्पं तापत्रयमितीरितम् ॥ ९६ ॥
कामं क्रोधं बन्धनं सर्वदुःखं विश्वं दोषं कालनानास्वरूपम् ।
यत्किंचेदं सर्वसंकल्पजालं तत्किंचेदं मानसं सोम्य विद्धि ॥९७॥
मन एव जगत्सर्वं मन एव [1]महारिपुः ।
मन एव हि संसारो मन एव जगत्त्रयम् ॥ ९८ ॥
मन एव महद्दुःखं मन एव जरादिकम् ।
मन एव हि कालं च मन एव मलं तथा ॥ ९९ ॥
मन एव हि संकल्पो मन एव हि जीवकः ।
मन एव हि चित्तं च मनोऽहंकार एव च ॥ १०० ॥
मन एव महद्बन्धं मनोऽन्तःकरणं च तत् ।
मन एव हि भूमिश्च मन एव हि तोयकम् ॥ १०१ ॥
मन एव हि तेजश्च मन एव मरुन्महान् ।
मन एव हि चाकाशं मन एव हि शब्दकम् ॥ १०२ ॥

स्पर्शं रूपं रसं गन्धं कोशाः पञ्च मनोभवाः ।
जाग्रत्स्वप्नसुषुप्त्यादि मनोमयमितीरितम् ॥ १०३ ॥
दिक्पाला वसवो रुद्रा आदित्याश्च मनोमयाः ।
दृश्यं जडं द्वन्द्वजातमज्ञानं मानसं स्मृतम् ॥ १०४ ॥
संकल्पमेव यत्किंचित्तत्तन्नास्तीति निश्चिनु ।
नास्ति नास्ति जगत्सर्वं गुरुशिष्यादिकं नहि ॥ १०५ ॥

इत्युपनिषत् ॥[1]

स्वाज्ञदृष्टिप्रसक्तस्वातिरिक्तानर्थनिदानं किं इत्याशङ्क्य सर्वानर्थहेतुः सङ्कल्प एवेत्याह—देह इति ॥ सङ्कल्पमित्यादि विभक्तिव्यत्ययः ॥ ८९–९६ ॥ सङ्कल्पमूलं किमित्यत्र कामं इत्यादि ॥ ९७–१०४ ॥ स्वाविद्यापदतत्कार्यजातं मन एवेत्यर्थः । इत्युपनिषच्छब्दः अध्यायपरिसमाप्त्यर्थः ॥ १०५ ॥

इति पञ्चमोऽध्यायः

# षष्ठोऽध्यायः

सर्वस्य सच्चिदानन्दत्वम्

ऋभुः—

सर्वं सच्चिन्मयं विद्धि सर्वं सच्चिन्मयं ततम् ।
सच्चिदानन्दमद्वैतं सच्चिदानन्दमव्ययम् ॥ १ ॥
सच्चिदानन्दमात्रं हि सच्चिदानन्दमन्यकम् ।
सच्चिदानन्दरूपोऽहं सच्चिदानन्दमेव खम् ॥ २ ॥
सच्चिदानन्दमेव त्वं सच्चिदानन्दकोऽस्म्यहम् ।

[1] अत्र चतुर्थखण्डान्तचिह्नं ॥ ४ ॥—क.

यद्यत् स्वाज्ञदृष्टिविकल्पितं नामरूपविकल्पजालं तत्तत् स्वज्ञदृष्टया सच्चिदानन्दसुखम् । परमार्थदृष्टया ब्रह्ममात्रातिरिक्तप्रसक्तिरेव नास्ति । यदि स्वाज्ञादिदृष्टया अस्ति नास्तीति प्रसक्तं तदा तत् असदेव । स्वातिरिक्तासदपह्नवसिद्धं निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते इत्येतत्प्रपञ्चनाय षष्ठाध्याय आरभ्यते— ऋभुरिति ॥ १–२ ॥

सर्वस्य ब्रह्मत्वम्

न मनोबुद्ध्यहंकारचित्तसंघातका अमी ॥ ३ ॥
न त्वं नाहं न चान्यं वा सर्वं ब्रह्मैव केवलम् ।
न वाक्यं न पदं वेदं नाक्षरं न जडं क्वचित् ॥ ४ ॥
न मध्यं नादि नान्तं वा न सत्यं न निबन्धनम् ।
न दुःखं न सुखं भावं न माया प्रकृतिस्तथा ॥ ५ ॥
न देहं न मुखं घ्राणं न जिह्वा न च तालुनी ।
न दन्तोष्ठौ ललाटं च निश्वासोच्छ्वास एव च ॥ ६ ॥
न स्वेदमस्थि मांसं च न रक्तं न च मूत्रकम् ।
न दूरं नान्तिकं नाङ्गं नोदरं न किरीटकम् ॥ ७ ॥
न हस्तपादचलनं न शास्त्रं न च शासनम् ।
न वेत्ता वेदनं वेद्यं न जाग्रत्स्वप्नसुप्तयः ॥ ८ ॥
तुर्यातीतं न मे किंचित्सर्वं सच्चिन्मयं ततम् ।
नाध्यात्मिकं नाधिभूतं नाधिदैवं न मायिकम् ॥ ९ ॥
न विश्वस्तैजसः प्राज्ञो विराट्सूत्रात्मकेश्वराः ।
न गमागमचेष्टा च न नष्टं न प्रयोजनम् ॥ १० ॥

त्याज्यं ग्राह्यं न दूष्यं वा [1]ह्यमेध्यामेध्यकं तथा ।
न पीनं न कृशं क्लेदं न कालं देशभाषणम् ॥ ११ ॥
न सर्वं न भयं द्वैतं न वृक्षतृणपर्वताः ।
न ध्यानं योगसंसिद्धिर्न ब्रह्मक्षत्रवैश्यकम् ॥ १२ ॥
न पक्षी न मृगो नाङ्गी न लोभो मोह एव च ।
न मदो न च मात्सर्यं कामक्रोधादयस्तथा ॥ १३ ॥
न स्त्रीशूद्रबिडालादि भक्ष्यभोज्यादिकं च यत् ।
न प्रौढहीनौ नास्तिक्यं न वार्तावसरोऽस्ति हि ॥ १४ ॥
न लौकिको न लोको वा न व्यापारो न मूढता ।
न भोक्ता भोजनं भोज्यं न [2]मातृ मानमेयकम् ॥ १५ ॥
न शत्रुमित्रपुत्रादिर्न माता न पिता स्वसा ।
न जन्म न मृतिर्वृद्धिर्न देहोऽहमिति भ्रमः ॥ १६ ॥
न शून्यं नापि चाशून्यं नान्तःकरणसंसृतिः ।
न रात्रिर्न दिवा नक्तं न ब्रह्मा न हरिः शिवः ॥ १७ ॥
न वारपक्षमासादि वत्सरं न च चञ्चलम् ।
न ब्रह्मलोको वैकुण्ठं न कैलासो न चान्यकः ॥ १८ ॥
न स्वर्गो न च देवेन्द्रो नाग्निलोको न चाग्निकः ।
न यमो यमलोको वा न लोका लोकपालकाः ॥ १९ ॥
न भूर्भुवःस्वस्त्रैलोक्यं न पातालं न भूतलम् ।
नाविद्या न च विद्या च न माया प्रकृतिर्जडा ॥ २० ॥

[1] ह्यमेध्यं मे—अ, अ १. [2] मात्रं—उ.

न स्थिरं क्षणिकं नाशं न गतिर्न च धावनम् ।
न ध्यातव्यं न मे स्नानं न मन्त्रो न जपः क्वचित् ॥ २१ ॥
न पदार्थं न पूजार्हं नाभिषेकं न चार्चनम् ।
न पुष्पं न फलं पत्रं गन्धपुष्पादिधूपकम् ॥ २२ ॥
न स्तोत्रं न नमस्कारो न प्रदक्षिणमण्वपि ।
न प्रार्थना पृथग्भावो न हविर्नाग्निवन्दनम् ॥ २३ ॥
न होमो न च कर्माणि न दुर्वाक्यं सुभाषणम् ।
न गायत्री न वा संधिर्न [1]मनस्यं न दुःस्थितिः ॥ २४ ॥
न दुराशा न [2]दुष्टात्मा न चण्डालो न पौल्कसः ।
न दुःसहं दुरालापं न किरातो न कैतवम् ॥ २५ ॥
न पक्षपातं पक्षं वा न विभूषणतत्करौ ।
न च डम्भो डाम्भिको वा न हीनो नाधिको नरः ॥ २६ ॥
नैकं द्वयं त्रयं तुर्यं न महत्त्वं न चाल्पता ।
न पूर्णं न परिच्छिन्नं न काशी न व्रतं तपः ॥ २७ ॥
न गोत्रं न कुलं सूत्रं न विभुत्वं न शून्यता ।
न स्त्री न योषि[3]न्नो वृद्धा न कन्या न वितन्तुता ॥ २८ ॥
न सूतकं न जातं वा नान्तर्मुखसुविभ्रमः ।
न महावाक्यमैक्यं वा नाणिमादिविभूतयः ॥ २९ ॥
[4]सर्वं चैतन्यमात्रत्वात्सर्वदोषः सदा न हि ।
सर्वं सन्मात्ररूपत्वात्सच्चिदानन्दमात्रकम् ॥ ३० ॥

[1] नमस्यं—उ. [2] तुष्टात्मा—उ १. [3] नाबृद्धं—उ १. [4] सर्वचै—उ.

ब्रह्मैव सर्वं नान्योऽस्ति तदहं तदहं तथा ।
तदेवाहं तदेवाहं ब्रह्मैवाहं सनातनम् ॥ ३१ ॥
ब्रह्मैवाहं न संसारी ब्रह्मैवाहं न मे मनः ।
ब्रह्मैवाहं न मे बुद्धिर्ब्रह्मैवाहं न चेन्द्रियम् ॥ ३२ ॥
ब्रह्मैवाहं न देहोऽहं ब्रह्मैवाहं न गोचरः ।
ब्रह्मैवाहं न जीवोऽहं ब्रह्मैवाहं न भेदभूः ॥ ३३ ॥
ब्रह्मैवाहं जडो नाहमहं ब्रह्म न मे मृतिः ।
ब्रह्मैवाहं न च प्राणो ब्रह्मैवाहं परात्परः ॥ ३४ ॥
इदं ब्रह्म परं ब्रह्म सत्यं ब्रह्म प्रभुर्हि सः ।
कालो ब्रह्म कला ब्रह्म सुखं ब्रह्म स्वयंप्रभम् ॥ ३५ ॥
एकं ब्रह्म द्वयं ब्रह्म मोहो ब्रह्म शमादिकम् ।
दोषो ब्रह्म गुणो ब्रह्म दमः शान्तं विभुः प्रभुः ॥ ३६ ॥
लोको ब्रह्म गुरुर्ब्रह्म शिष्यो ब्रह्म सदाशिवः ।
पूर्वं ब्रह्म परं ब्रह्म शुद्धं ब्रह्म शुभाशुभम् ॥ ३७ ॥
जीव एव सदा ब्रह्म सच्चिदानन्दमस्म्यहम् ।
सर्वं ब्रह्ममयं प्रोक्तं सर्वं ब्रह्ममयं जगत् ॥ ३८ ॥
स्वयं ब्रह्म न संदेहः स्वस्मादन्यन्न किंचन ।
सर्वमात्मैव शुद्धात्मा सर्वं चिन्मात्रमद्वयम् ॥ ३९ ॥
नित्यनिर्मलरूपात्मा ह्यात्मनोऽन्यन्न किंचन ।

सच्चिदानन्दब्रह्मातिरेकेण न मन इत्यादि ॥ ३–२९ ॥ "न मनोबुद्ध्यहङ्कार" इत्यारभ्य "अणिमादिविभूतयः" इत्यन्तं यद्यत्

स्वाज्ञदृष्ट्यारोपितं स्वज्ञदृष्ट्या ब्रह्मातिरिक्तं नेत्यपोदितं च तत्तत् सर्वमित्यादि ॥ ३०–३९ ॥

ब्रह्मणः निष्प्रतियोगिकस्वमात्रत्वम्

अणुमात्रलसद्रूपमणुमात्रमिदं जगत् ॥ ४० ॥
अणुमात्रं शरीरं वा ह्यणुमात्रमसत्यकम् ।
अणुमात्रमचिन्त्यं वा चिन्त्यं वा ह्यणुमात्रकम् ॥ ४१ ॥
ब्रह्मैव सर्वं चिन्मात्रं ब्रह्ममात्रं जगत्त्रयम् ।
आनन्दं परमानन्दमन्यत्किंचिन्न किंचन ॥ ४२ ॥
चैतन्यमात्रमोंकारं ब्रह्मैव सकलं स्वयम् ।
अहमेव जगत्सर्वमहमेव परं पदम् ॥ ४३ ॥
अहमेव गुणातीत अहमेव परात्परः ।
अहमेव परं ब्रह्म अहमेव गुरोर्गुरुः ॥ ४४ ॥
अहमेवाखिलाधार अहमेव सुखात्सुखम् ।
आत्मनोऽन्यज्जगन्नास्ति आत्मनोऽन्यत्सुखं न च ॥ ४५ ॥
आत्मनोऽन्या गतिर्नास्ति सर्वमात्ममयं जगत् ।
आत्मनोऽन्यन्नहि क्वापि आत्मनोऽन्यत्तृणं न हि ॥ ४६ ॥
आत्मनोऽन्यत्तुषं नास्ति सर्वमात्ममयं जगत् ।
ब्रह्ममात्रमिदं सर्वं ब्रह्ममात्रमसन्न हि ॥ ४७ ॥
ब्रह्म[1]मात्रं श्रुतं सर्वं स्वयं ब्रह्मैव केवलम् ।
ब्रह्ममात्रं वृतं सर्वं ब्रह्ममात्रं रसं सुखम् ॥ ४८ ॥

[1] मात्रमिदं—अ, अ १.

ब्रह्ममात्रं चिदाकाशं सच्चिदानन्दमद्वयम् ।
ब्रह्मणोऽन्यतरन्नास्ति ब्रह्मणोऽन्यज्जगन्न च ॥ ४९ ॥
ब्रह्मणोऽन्यदहं नास्ति ब्रह्मणोऽन्यत्फलं न हि ।
ब्रह्मणोऽन्यत्तृणं नास्ति ब्रह्मणोऽन्यत्पदं न हि ॥ ५० ॥
ब्रह्मणोऽन्यद्गुरुर्नास्ति ब्रह्मणोऽन्यदसद्वपुः ।
ब्रह्मणोऽन्यन्न चाहंता त्वत्तेदन्ते न हि क्वचित् ॥ ५१ ॥
स्वयं ब्रह्मात्मकं विद्धि स्वस्मादन्यन्न किंचन ।
यत्किंचिद्दृश्यते लोके यत्किंचिद्धा[1]ष्यते जनैः ॥ ५२ ॥
यत्किंचिद्भुज्यते क्वापि तत्सर्वमसदेव हि ।
कर्तृभेदं क्रियाभेदं गुणभेदं रसादिकम् ॥ ५३ ॥
लिङ्गभेदमिदं सर्वमसदेव सदा सुखम् ।
कालभेदं देशभेदं वस्तुभेदं जयाजयम् ॥ ५४ ॥
यद्यद्भेदं च तत्सर्वमसदेव हि केवलम् ।
असदन्तःकरणकमसदेवेन्द्रियादिकम् ॥ ५५ ॥
असत्प्राणादिकं सर्वं संघातमसदात्मकम् ।
असत्यं पञ्चकोशाख्यमसत्यं पञ्च देवताः ॥ ५६ ॥
असत्यं षड्विकारादि असत्यमरिवर्गकम् ।
असत्यं षड्ऋतुश्चैव असत्यं षड्रसस्तथा ॥ ५७ ॥
सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत् ।
आत्मैवाहं परं सत्यं [2]नान्याः संसारदृष्टयः ॥ ५८ ॥

[1] षते—अ, अ१, उ १, क. [2] नान्यासं—अ १, अ २, क.

सत्यमानन्दरूपोऽहं चिद्घनानन्दविग्रहः ।
अहमेव परानन्द अहमेव परात्परः ॥ ५९ ॥
ज्ञानाकारमिदं सर्वं ज्ञानानन्दोऽहमद्वयः ।
सर्वप्रकाशरूपोऽहं [1]सर्वाभावस्वरूपकः ॥ ६० ॥
अहमेव सदा भामीत्येवंरूपं कुतोऽप्यसत् ।
त्वमित्येवं परं ब्रह्म चिन्मयानन्दरूपवान् ॥ ६१ ॥
चिदाकारं चिदाकाशं चिदेव परमं सुखम् ।
आत्मैवाहमसन्नाहं कूटस्थोऽहं गुरुः परः ॥ ६२ ॥
सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत् ।
कालं नास्ति जगन्नास्ति मायाप्रकृतिरेव न ॥ ६३ ॥
अहमेव हरिः साक्षादहमेव सदाशिवः ।
शुद्धचैतन्यभावोऽहं शुद्धसत्त्वानुभावनः ॥ ६४ ॥
अद्वयानन्दमात्रोऽहं चिद्घनैकरसोऽस्म्यहम् ।
सर्वं ब्रह्मैव सततं सर्वं ब्रह्मैव केवलम् ॥ ६५ ॥
सर्वं ब्रह्मैव सततं सर्वं ब्रह्मैव चेतनम् ।
सर्वान्तर्यामिरूपोऽहं सर्वसाक्षित्वलक्षणः ॥ ६६ ॥
परमात्मा परं ज्योतिः परं धाम परा गतिः ।
सर्ववेदान्तसारोऽहं सर्वशास्त्रसुनिश्चितः ॥ ६७ ॥
योगानन्दस्वरूपोऽहं मुख्यानन्दमहोदयः ।
सर्वज्ञानप्रकाशोऽस्मि मुख्यविज्ञानविग्रहः ॥ ६८ ॥

तुर्यातुर्यप्रकाशोऽस्मि तुर्यातुर्यादिवर्जितः ।
चिदक्षरोऽहं सत्योऽहं वासुदेवोऽजरोऽमरः ॥ ६९ ॥
अहं ब्रह्म चिदाकाशं नित्यं ब्रह्म निरञ्जनम् ।
शुद्धं बुद्धं सदामुक्तमनामकमरूपकम् ॥ ७० ॥
सच्चिदानन्दरूपोऽहमनुत्पन्नमिदं जगत् ।
सत्यासत्यं जगन्नास्ति संकल्पकलनादिकम् ॥ ७१ ॥
नित्यानन्दमयं ब्रह्म केवलं सर्वदा स्वयम् ।
अनन्तमव्ययं शान्तमेकरूपमनामयम् ॥ ७२ ॥

स्वाज्ञदृष्टिविकल्पितब्रह्मातिरिक्तजगतः परिच्छिन्नतां तदधिष्ठानब्रह्मणः त्रिविधपरिच्छेदशून्यतां वस्तुतो ब्रह्मातिरिक्तसामान्यस्य अपह्नवतां ब्रह्मणो निष्प्रतियोगिकस्वमात्रतां चाह—अणुमात्रेति ॥ ४०–४६ ॥ **जगत्** स्वाज्ञविकल्पितासत्प्रपञ्चापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रमित्याह—**ब्रह्ममात्रमिदमिति** ॥ ४७ ॥ उक्तार्थमेव प्रपञ्चयति—**ब्रह्ममात्रं श्रुतं** इत्यादिना ॥ ४८–७१ ॥ केवलं ब्रह्म कीदृशं इत्यत आह—**अनन्तमिति** ॥ ७२ ॥

स्वातिरिक्तप्रपञ्चस्यासत्त्वम्

मत्तोऽन्यदस्ति चेन्मिथ्या यथा मरुमरीचिका ।
वन्ध्याकुमारवचने भीतिश्चेदस्ति किंचन ॥ ७३ ॥
शशशृङ्गेण नागेन्द्रो मृतश्चेज्जगदस्ति तत् ।
मृगतृष्णाजलं पीत्वा तृप्तश्चेदस्त्विदं जगत् ॥ ७४ ॥
नरशृङ्गेण नष्टश्चेत्कश्चिदस्त्विदमेव हि ।
गन्धर्वनगरे सत्ये जगद्भवति सर्वदा ॥ ७५ ॥

गगने नीलिमासत्ये जगत्सत्यं भविष्यति ।
शुक्तिकारजतं सत्यं भूषणं चेज्जगद्भवेत् ॥ ७६ ॥
रज्जुसर्पेण दष्टश्चेन्नरो [1]भवतु संसृतिः ।
जातरूपेण बाणेन ज्वालाग्नौ नाशिते जगत् ॥ ७७ ॥
विन्ध्याटव्यां पायसान्नमस्ति चेज्जगदुद्भवः ।
रम्भास्तम्भेन काष्ठेन [2]पाके सिद्धे जगद्भवेत् ॥ ७८ ॥
सद्यःकुमारिकारूपैः पाके सिद्धे जगद्भवेत् ।
चित्रस्थदीपैस्तमसो नाशश्चेदस्त्विदं जगत् ॥ ७९ ॥
मामात्पूर्वं मृतो मर्त्यो ह्यागतश्चेज्जगद्भवेत् ।
तक्रं क्षीरस्वरूपं चेत्कचिन्नित्यं जगद्भवेत् ॥ ८० ॥
गोस्तनादुद्भवं क्षीरं पुनरारोपणे जगत् ।
भूरजोऽब्धौ समुत्पन्ने [3]जगद्भवतु सर्वदा ॥ ८१ ॥
कूर्मरोम्णा गजे बद्धे जगदस्तु तदोत्कटे ।
नालस्थतन्तुना मेरुश्चालितश्चेज्जगद्भवेत् ॥ ८२ ॥
तरङ्गमालया सिन्धुर्बद्धश्चेदस्त्विदं जगत् ।
अग्नेरधश्चेज्ज्वलनं जगद्भवतु सर्वदा ॥ ८३ ॥
ज्वालावह्निः शीतलश्चेदस्तिरूपमिदं जगत् ।
ज्वालाग्निमण्डले पद्मवृद्धिश्चेज्जगदस्त्विदम् ॥ ८४ ॥

[1] भवति—अ १, अ २, क. [2] पाकसिद्धिर्ज—अ, अ १, अ २, क.
[3] जगद्भवति—अ २, क.

महच्छैलेन्द्रनीलं वा संभवेच्चेदिदं जगत् ।
मेरुरागत्य पद्माक्षे स्थितश्चेदस्त्विदं जगत् ॥ ८५ ॥
निगिरिश्चेद्भृङ्गसूनुर्मेरुश्चलवदस्त्विदम् ।
मशकेन हते सिंहे जगत्सत्यं तदाऽस्तु ते ॥ ८६ ॥
अणुकोटर[1]विस्तीर्णं त्रैलोक्यं चेज्जगद्भवेत् ।
तृणानलश्च नित्यश्चेत्क्षणिकं यज्जगद्भवेत् ॥ ८७ ॥
स्वप्नदृष्टं च यद्वस्तु जागरे चेज्जगद्भवः ।
नदीवेगो निश्चलश्चेत्केनापीदं भवेज्जगत् ॥ ८८ ॥
क्षुधितस्याग्नि[2]भोज्यश्चेन्निमिषं कल्पितं भवेत् ।
जात्यन्धै रत्नविषयः सुज्ञातश्चेज्जगत्सदा ॥ ८९ ॥
नपुंसककुमारस्य स्त्रीसुखं चेद्भवेज्जगत् ।
निर्मितः शशशृङ्गेण [3]रथश्चेज्जगदस्ति तत् ॥ ९० ॥
सद्योजाता तु या कन्या भोगयोग्या भवेज्जगत् ।
वन्ध्या [4]गर्भान्वितत्सौख्यं ज्ञाता चेदस्त्विदं जगत् ॥ ९१ ॥
काको वा हंसवद्गच्छेज्जगद्भवतु निश्चलम् ।
महाखरो वा सिंहेन युध्यते चेज्जगत्स्थितिः ॥ ९२ ॥
महाखरो गजगतिं गतश्चेज्जगदस्तु तत् ।
संपूर्णचन्द्रसूर्यश्चेज्जगद्धातु स्वयं जडम् ॥ ९३ ॥

[1] विस्तीर्ण—अ. [2] भोंज्य—अ, अ १. [3] जगच्चे—अ, अ २.
[4] गर्भान्वितस्सौ—अ. गर्भान्वत्सौ—अ १.

चन्द्रसूर्यादिकौ त्यक्त्वा राहुश्चेद्दृश्यते जगत् ।
भृष्टबीजसमुत्पन्नवृद्धिश्चेज्जगदस्तु सत् ॥ ९४ ॥
[1]दरिद्रो धनिकानां च [2]सुखं भुङ्क्ते तदा जगत् ।
शुनां वीर्येण सिंहस्तु जितो यदि जगत्तदा ॥ ९५ ॥
ज्ञानिनो हृदयं मूढैर्ज्ञातं [3]चेत्कल्पनं तदा ।
श्वानेन सागरे पीते निःशेषेण मनो भवेत् ॥ ९६ ॥
शुद्धाकाशो मनुष्येषु पतितश्चेत्तदा जगत् ।
भूमौ वा पतितं व्योम व्योमपुष्पं [4]सुगन्धकम् ॥ ९७ ॥
शुद्धाकाशे वने जातं चलितं तु तदा जगत् ।
केवले दर्पणे नास्ति प्रतिबिम्बं तदा जगत् ॥ ९८ ॥
अजकुक्षौ जगन्नास्ति ह्यात्मकुक्षौ जगन्न हि ।
सर्वथा भेदकलनं द्वैताद्वैतं न विद्यते ॥ ९९ ॥
मायाकार्यमिदं भेदमस्ति चेद्ब्रह्मभावनम् ।
देहोऽहमिति दुःखं चेद्ब्रह्माहमिति निश्चयः ॥ १०० ॥
हृदयग्रन्थिरस्तित्वे छेदनं ब्रह्मचक्रकम् ।
संशये समनुप्राप्ते ब्रह्मनिश्चय[5]माप्नुयात् ॥ १०१ ॥
अनात्मरूपचोरश्चेदात्मरत्नस्य रक्षणम् ।
नित्यानन्दमयं ब्रह्म केवलं सर्वदा स्वयम् ॥ १०२ ॥

परिच्छित्तिव्ययकलनाऽनेकत्वप्रसक्तौ अनन्तमित्याद्यनेकविशेषणविशिष्टं न वस्तुतः तदस्ति । यदि मदतिरेकेण अनन्तमित्यादिविशेषणमस्तीति भ्रान्तिः

[1] दरिद्रैर्ध—अ. [2] सुखे ज्ञाते—उ. [3] चेदस्त्विदं जगत्—अ.
[4] सग—क. सुगन्धिकं—अ १. [5] माश्रयेत्—अ, अ १, क.

तदा तदसदेवेत्याह—मत्त इति । कथं पुनः स्वातिरिक्तप्रपञ्चस्य अत्यन्तासत्त्वं, घटोऽस्ति पटोऽस्ति इत्याद्यनेकधा प्रतीयमानत्वात्, इत्याशङ्क्याऽस्त्यस्तीति प्रतीतेः सन्मात्रत्वेन निष्प्रतियोगिकब्रह्ममात्रत्वात तत्र स्वातिरिक्तप्रपञ्चासम्भवे "वन्ध्याकुमारवचने भीतिश्चेदस्त्विदं जगत" इत्याद्यनेकदृष्टान्तेन विश्वसत्त्वं विडम्बयन् विश्वासत्त्वं प्रकटयति— वन्ध्येत्यादिना ॥ ७३–७८ ॥ अस्त्विदं जगत् परमार्थदृष्ट्येत्यर्थः ॥ ७९–८५ ॥ पर्यन्तपर्वतो निगिरिः ॥ ८६–८८ ॥ अग्निभोज्यः, विसर्गलोपः ॥ ८९–९० ॥ सद्यःकुमारिका, सद्योजाता तु या कन्या, इत्यत्र पुनरुक्तिः स्यादिति चेत् न; शब्दभेदवत् अर्थभेदसम्भवात् । तत् कथमित्यत्र "सद्यःकुमारिकारूपैः" वैद्यशास्त्रख्यातौषधिविशेषैः इन्धनैः "पाके सिद्धे" इत्युक्त्या पाकसाधनेन्धनविशेषो द्योत्यते, कुमारिकाया जलपूरितत्वेन नित्यक्लिन्नत्वात्, तस्या गाढाग्निमध्यपातितत्वेऽप्यग्निशान्तिकरत्वात न पुनर्वचः, तया पाकासम्भवात ॥९१–९८॥ यदेवमपह्नोतव्यं व्यष्ट्यादिकलनाविशिष्टं जगत तत्र समष्टिजगदजकुक्षौ व्यष्टिजगज्जीवकुक्षौ वर्तते, नह्यभावपदमर्हतीत्याशङ्क्य कालत्रयेऽपि न विद्यत इत्याह—अजेति । स्वाज्ञस्वज्ञदृष्टिविभातद्वैताद्वैतवृत्तेरपि परमार्थदृष्ट्याऽसम्भवात् स्वमात्रे स्वातिरिक्तकलना नास्त्येवेत्यर्थः ॥ ९९ ॥ तथाऽपि ब्रह्मानुसन्धानमजस्रं कर्तव्यमित्यत आह— मायेति । भेदः स्वाज्ञदृष्ट्या अस्ति चेत् स्वज्ञदृष्ट्या इदं जगत न भवति किं तु ब्रह्मैवेदमिति ब्रह्मभावनं कर्तव्यं, न हि परमार्थदृष्टेः तदुभयमस्तीत्यर्थः । तथा देहोऽहमिति ॥ १००–१०१ ॥ वस्तुतः नित्यानन्दमयं ब्रह्म केवलं निष्प्रतियोगिकब्रह्ममात्रमित्यर्थः ॥ १०२ ॥

अहं ब्रह्मेति भावनाविधिः

एवमादिसुदृष्टान्तैः साधितं ब्रह्ममात्रकम् ।
ब्रह्मैव सर्वं[1] भवनं भुवनं नाम संत्यज ॥ १०३ ॥

[1] भुवनं—अ

अहं ब्रह्मेति निश्चित्य अहंभावं परित्यज ।
सर्वमेव लयं याति सुमहस्तस्थपुष्पवत् ॥ १०४ ॥
न देहो न च कर्माणि सर्वं ब्रह्मैव केवलम् ।
न भूतं न च कार्यं च न चावस्थाचतुष्टयम् ॥ १०५ ॥
लक्षणात्रयविज्ञानं सर्वं ब्रह्मैव केवलम् ।
सर्वव्यापारमुत्सृज्य ह्यहं ब्रह्मेति भावय ॥ १०६ ॥
अहं ब्रह्म न संदेहो ह्यहं ब्रह्म चिदात्मकम् ।
सच्चिदानन्दमात्रोऽहमिति निश्चित्य तत्त्यज ॥ १०७ ॥

वन्ध्याकुमारवचन इति एवमादि इति । अस्यामुपनिषदि—

चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ।
सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्न हि ॥

इत्यादिश्रुत्या योऽर्थोऽभिहितः स्वातिरिक्तसर्वापह्नवसिद्धं स्वमात्रमिति तमेतमर्थं दुर्विज्ञेयं मन्यमाना श्रुतिः स्वाज्ञानां यथायथा स्वातिरिक्तापह्नवसिद्धब्रह्ममात्रज्ञानमुदेति तथातथा भूयोभूयः प्रसङ्गमापाद्यापाद्य स्वप्रकटितसिद्धान्तार्थमेव आदौ "तेजोबिन्दुपरं" इत्यारभ्य पञ्चदशाङ्गज्ञानयोगसहितमवान्तरवाक्येनाखण्डशुद्धचैतन्ययाथात्म्यं प्रतिपाद्य, स्वाज्ञदृष्ट्या दृश्यजडजगद्गतभावादिस्वर्गान्तखण्डताप्रसक्तौ कुमारशिवसंवादरूपेण "अखण्डैकरसं दृश्यं" इत्यादि "अखण्डैकरसं सर्वं" इत्यन्तेन "अखण्डैकरसः स्वयं" इति प्रकटयित्वा, अथ पुनरिदमयमित्यादिशब्दवाच्यभावानामचिन्मात्रत्वप्रसक्तौ "यत्किञ्चिद्यन्न किञ्चिच्च सर्वं चिन्मात्रमेव हि" इत्यादिना निष्प्रतियोगिकचिन्मात्रस्वरूपमभिधाय, ब्रह्मद्वयप्रसक्तौ "अखण्डैकरसं ब्रह्म चिन्मात्रान्न हि भिद्यते" इत्यखण्डैकरसचिन्मात्रयोरेकार्थपर्यवसानत्वमुक्त्वा, अथ "परं ब्रह्मस्वरूपोऽहम्" इत्यारभ्य स्वातिरिक्तप्रपञ्चासत्त्वप्रकटनपूर्वकं स्वानुभवं प्रकाशयित्वा, अहं ब्रह्मास्मीतिमन्त्रमाहात्म्यप्रशंसापूर्वकं मुमुक्षुकोटिग्राह्यतां प्रतिपाद्य, तदान्तराळिकमुख्यफलप्रकटनव्याजेन "चिदात्माऽहं परात्माऽहं" इत्युपक्रम्य

"स्वस्वरूपे स्वयं स्वप्स्ये स जीवन्मुक्त उच्यते" इत्यन्तेन निर्विशेष-ज्ञानान्तराळिकफलजीवन्मुक्तिं, "ब्रह्मभूतः प्रशान्तात्मा" इत्युपक्रम्य "स्वात्मानमेव मोदस्व वैदेही मुक्तिगो भव" इत्यन्तेन ब्रह्ममात्रज्ञानमुख्यफलं तन्मात्रावस्थानलक्षणविदेहमुक्तिं च प्रकटयित्वा, पुनराख्यायिकाऽन्तरमवलम्ब्य "सर्ववाचोऽवधिर्ब्रह्म" इत्यादिना स्वात्मयाथात्म्यं, "अनात्मेति प्रसङ्गो वा" इत्यादिना अनात्मयाथात्म्यं च प्रतिपाद्य आत्मानात्मेत्युक्त्या तयोरेकत्वानेकत्वप्रसक्तसविशेषतां "एकाभावे द्वितीयं न" इत्यादिसापेक्षश्रुतियुक्तिभिः शिथिलयित्वा, क्वचित् क्वचित् स्वातिरिक्तयोः आत्मानात्मनोः शब्दभेदेन अर्थभेदेन च स्वमात्रस्य निष्प्रतियोगिकभावरूपत्वं स्वातिरिक्त-सामान्यस्य "इदं प्रपञ्चं नास्त्येव" इत्यादिना "वन्ध्याकुमारवचने भीतिश्चेत्" इत्यादिस्वातिरिक्तजगदत्यन्तासम्भवदृष्टान्तेन च शशविषाणवत् अत्यन्ताभावरूपतां च विभक्तिलिङ्गपुरुषव्यत्ययमप्यनादरेण विस्मृत्येव महता वेगेन यत इयं श्रुतिः जामितामन्तरेण प्रवृत्ता अतोऽस्मिन् वेदान्तशास्त्रसमुदाये न हि पुनरुक्तिशङ्का सेद्धुं पारयति । स्वाज्ञादिमात्र-भावमापन्नायाः श्रुतेः स्वसन्तानस्वातिरिक्तमस्ति नास्तीति विभ्रमापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रावशेषलक्षणविकल्पैरकैवल्यसाम्राज्यपट्टाभिषेचनकर्मव्यग्रत्वात् सद्भिरत्र न कोऽपि दोषः स्मर्तव्यः । प्रकृते तु यद्यज्ञोऽसि तदा आदौ **ब्रह्मैव सर्वभवनं** सर्वाधिकरणं विचिन्तय । ततः स्वाधिष्ठेयनिरूपितमधिष्ठान-भ्रममपि भुवनं सन्त्यज ॥ १०३ ॥ सर्वं **अहं ब्रह्मेति निश्चित्य** तत्रत्याहम्भावं परित्यज । यद्येवमुद्योगवानसि तदा यद्यत् स्वविकल्पितं तत्तत् **सर्वमेव** ॥ १०४ ॥ तदानीं **न देह** इत्यादि ॥ १०५ ॥ **जहदादि लक्षणा** । आदौ **सर्वव्यापारं** ॥ १०६ ॥ **तन्निश्चयमपि संत्यज**, तद्वृत्तेरपि स्वातिरिक्ततया त्याज्यत्वात् । तथा चोक्तं—

तस्मिन् काले विदेहोतिदेहस्मरणवर्जितः ।
ईषन्मात्रं स्मृतं चेद्यस्तदा सर्वसमन्वितः ॥

**इति** ॥ १०७ ॥

शास्त्रसम्प्रदायविधिः

शाङ्करीयं महाशास्त्रं न देयं यस्य कस्यचित् ।
नास्तिकाय कृतघ्नाय दुर्वृत्ताय दुरात्मने ॥ १०८ ॥
गुरुभक्तिविशुद्धान्तःकरणाय महात्मने ।
सम्यक् परीक्ष्य दातव्यं मासं षाण्मासवत्सरम् ॥ १०९ ॥
सर्वोपनिषदभ्यासं दूरतस्त्यज्य सादरम् ।
तेजोबिन्दूपनिषदमभ्यसेत्सर्वदा मुदा ॥ ११० ॥
सकृदभ्यासमात्रेण ब्रह्मैव भवति स्वयम् ।
ब्रह्मैव भवति स्वयमित्युपनिषत् ॥ १११ ॥

शास्त्रसम्प्रदायार्थं प्रकटयन् उपसंहरति—**शाङ्करीयमिति** । कस्य वा न देयं कस्य वा देयं इत्यत आह—**नास्तीति** ॥ १०८–१०९ ॥ एवं गुरुमुखात् लब्धविद्यो मुमुक्षुः **सर्वोपनिषत्** । सर्वं परित्यज्य एतदभ्यासेन किमित्यत आह—**सकृदिति** । सकृच्छ्रवणपठनमात्रतो विद्वान् सर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रमवशिष्यत इत्यर्थः । **इत्युपनिषच्छब्दः** तेजोबिन्दूपनिषत्समाप्त्यर्थः ॥ १११ ॥

इति षष्ठोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं तेजोबिन्दोः स्फुटं लघु ॥
तेजोबिन्दूपनिषदो व्याख्यानग्रन्थविस्तरः ।
चतुष्पञ्चाशदधिकशतानां सप्तकं स्मृतः ॥

इतीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तत्रिंशत्सङ्ख्यापूरकं
तेजोबिन्दूपनिषद्विवरणं सम्पूर्णम्

---

[1] शैवमेतन्म—अ.

# त्रिशिखिब्राह्मणोपनिषत्

पूर्णमदः— इति शान्तिः

**ब्राह्मणम्**

आत्मब्रह्मविषये प्रश्नाः

त्रिशिखी ब्राह्मण आदित्यलोकं जगाम । तं गत्वोवाच ।
भगवन् किं देहः किं प्राणः किं कारणं किमात्मा ॥ १ ॥

योगज्ञानैकसंसिद्धशिवतत्त्वतयोज्ज्वलम् ।
प्रतियोगिविनिर्मुक्तं परं ब्रह्म भवाम्यहम् ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं त्रिशिखिब्राह्मणोपनिषत् निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना तदुपायाष्टाङ्गयोगप्रपञ्चप्रकाशिनी विजृम्भते । तस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । त्रिशिखिब्राह्मणादित्यप्रश्नप्रतिवचनरूपेयं आख्यायिका विद्यास्तुत्यर्था । केयं आख्यायिका इत्यत आह—त्रिशिखीति । नामतः त्रिशिखी, ब्रह्मणोऽपत्यं ब्राह्मणः, सनातनो नाम मुनिः, आदित्यलोकासनं आदित्यं विधिवत् उपसङ्गम्य देहप्राणादिकं तत्कारणं किं, स्वयं वा कीदृश इति पप्रच्छ ॥ १ ॥

### सर्वस्य शिवत्वम्

स होवाच सर्वमिदं शिव एव विजानीहि । किं तु नित्यः शुद्धो निरञ्जनो विभु[1]रद्वयानन्दः शिव एकः स्वेन [2]भासेदं सर्वं [3]सृष्ट्वा तन्तायःपिण्डवत् [4]ऐक्यं भिन्नवत् अवभासते । तद्भासकं किमिति चेत् उच्यते । सच्छब्दवाच्यं अविद्याशबलं ब्रह्म ॥ २ ॥

तत्प्रश्नं अङ्गीकृत्य तं होवाच भगवान् । किमिति ? सर्वमिदं इत्यादि । त्वया किं देह इत्यादि यत् पृष्टं तत् शिव एवेति विजानीहि, सर्वस्य शिवाज्ञानविकल्पितत्वात् । विकल्पाधिकरणत्वे अनित्यत्वादि स्यात् इत्यत आह—किन्त्विति । स्वाज्ञस्वविकल्पितविकल्पजालं अनित्यत्वादिदोषदुष्टमेव । किन्तु तद्विकल्पनाधारो नित्यत्वादिविशेषणविशिष्टः अद्वैतात्मा शिव एक एव, न कदाऽपि द्वैतभावमुपैतीत्यर्थः । विकल्पजातं केन विकल्पितं सदेकतां गतं, तद्भासकं किं इत्याशङ्कायां य एकः शिवः स स्वेन तेजसा सर्वमिदं सृष्ट्वा तेन तन्तायःपिण्डवत् एकीभूय तद्वैलक्षण्येनापि भासते इत्याह—स्वेनेति । ऐक्यं प्राप्य स्वज्ञदृष्ट्या भिन्नवत् अवभासते । किं तदित्यत्र किं देह इत्यादि त्रिशिखिप्रश्नप्रतिवचने सर्वमिदं शिव एवेति यत् प्रतिज्ञातं तत्र स्वविकल्पित-कार्यापेक्षया स्वस्य कारणत्वं स्वातिरिक्ताव्यक्तादेः कार्यत्वं च विशदीकरोति—सदिति । "सदेव सोम्येदमग्र आसीत्" इति स्वाविद्यायोगात् शबलत्वं स्वेन रूपेण ब्रह्मत्वं सिद्धं इत्यर्थः ॥ २ ॥

### ब्रह्मणः अखिलजगदुत्पत्तिः

ब्रह्मणोऽव्यक्तम् । अव्यक्तान्महत् । महतोऽहंकारः । अहंकारात् पञ्चतन्मात्राणि । पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि । पञ्चमहाभूतेभ्योऽखिलं जगत् ॥ ३ ॥

[1] रुद्रयः शि—क.
[2] भासेनेदं—क, अ २.
[3] दृष्ट्वा—क, अ, अ १, अ २.
[4] एकं—अ, अ १.

केवलब्रह्मणः कल्पनाऽनधिकरणत्वेन निष्प्रतियोगिकनिर्विकल्पत्वात् तत् तिष्ठतु, शबलब्रह्मणः किं विकल्पितं इत्यत आह—ब्रह्मणोऽव्यक्तमिति । ततः किं इत्यत्र गुणसाम्यभावमापन्नाव्यक्तात् महत् । सत्वभावमापन्नमहतः अहङ्कारः । रजोभावमापन्नाहङ्कारात् पञ्चतन्मात्राणि । तमःप्रधान-पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि, पञ्चीकृतानीत्यर्थः । तमस्तमःप्रधानत्रिगुणो-पसर्जनपञ्चीकृतपञ्चमहाभूतेभ्यः अखिलं जगत् ॥ ३ ॥

एकस्य पिण्डस्य बहुधा विभागः

[1]तदखिलं किमिति । भूतविकारविभागादिति । एकस्मिन् पिण्डे कथं भूतविकारविभाग इति । [2]तत्कार्यकारणभेदरूपेण अंशतत्त्ववाचकवाच्यस्थानभेदविषयदेवताकोशभेदविभागा भवन्ति ॥

एकस्य पिण्डात्मनो जगतः कथं अखिलत्वं इत्यत्र पञ्चीकृतपञ्चमहा-भूतविकारविभागादिति । तत्राप्याक्षिपति—एकस्मिन्निति । तत्प्रकारमाह—तदिति । पृथिव्यादेः आकाशकार्यत्वं आकाशादेः पृथिव्यादिकारणत्वमिति तत्तद्भूतकार्यकारणभेदरूपेण पृथिव्यादिपञ्चभूतविभागः । आकाशाद्यंशश्रोत्रादि-तत्त्वभेदेन तेषामभिधानाभिधेयभेदेन तत्तद्गोलकस्थानभेदेन शब्दादिविषयभेदेन दिगादिदेवताभेदेन आनन्दमयादिकोशभेदेन च बहुधा विभागा भवन्ति । एकस्मिन् अविद्याऽण्डपिण्डे भूतभौतिकविकारविभागाः उपपद्यन्त इत्यर्थः ॥ ४ ॥

आकाशादीनामंशभेदाः

अथाकाशः अन्तःकरणमनोबुद्धिचित्ताहंकाराः । वायुः समानो[3]दानोव्यानापानप्राणाः । वह्निः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाः । आपः शब्दस्पर्शरूपरसगन्धाः । पृथिवी वाक्पाणिपादपायूपस्थाः ॥

[1] जगदखिलं—क. [2] तत्तत्कार्य—क, अ, अ १, अ २. [3] दान—अ.

एवं यत् सूत्रितं तदर्थं आकाशादिक्रमेण विशदीकरोति—अथेत्यादिना ॥ आकाशांशा व्यर्थः । अथ वाय्वाद्यंशा उच्यन्ते—वायुरिति ॥ ५ ॥

तेषां विषयभेदाः

ज्ञानसंकल्पनिश्चयानुसंधानाभिमाना आकाश[1]कार्यान्तः-करणविषयाः । समीकरणोन्नयनग्रहण[2]श्रपणोच्छ्वासा वायुकार्य-प्राणादिविषयाः । [3]शब्दस्पर्शरूपरसगन्धा अग्निकार्यज्ञानेन्द्रियविषया अब्बाश्रिताः । वचनादानगमनविसर्गानन्दाः पृथिवीकार्यकर्मे-न्द्रियविषयाः । कर्मज्ञानेन्द्रियविषयेषु प्राणतन्मात्रविषया अन्तर्भूताः । मनोबुद्ध्योश्चित्ताहंकारौ चान्तर्भूतौ ॥ ६ ॥

अंशभेदानुक्त्वा विषयभेदानाह—ज्ञानेति ॥ ६ ॥

सूक्ष्मभूतमात्राः

अवकाशविधूतदर्शनपिण्डीकरणधारणाः सूक्ष्मतमा [4]जैव-तन्मात्रविषयाः ॥ ७ ॥

सूक्ष्मभूतमात्रा उच्यन्ते—अवकाशेति ॥ ७ ॥

आध्यात्मिकादिविभागः

एवं द्वादशाङ्गानि आध्यात्मिकान्याधिभौतिकान्याधिदैवि-कानि । अत्र निशाकरचतुर्मुखदिग्वातार्कवरुणाश्वयग्नीन्द्रोपेन्द्रप्रजापति-[5]यमा अक्षाधिदेवतारूपैर्द्वादशनाड्यन्तःप्रवृत्ताः प्राणा एवाङ्गानि अङ्गज्ञानं तदेव ज्ञातेति ॥ ८ ॥

[1] कार्या अन्तः—अ २.
[2] श्रवणो—क, अ.
[3] कर्मज्ञानेन्द्रियविषयेषु शब्दस्पर्श—अ.
[4] 'जैव' इत्येतत् 'एव' इति शोधितं—क.
[5] यमाक्ष्या—क, अ, अ १, अ २.

अंशादिभेदेन एवं इत्यादि । अत्र आत्मानं देहं भूतजातं देवताजातं च अधिकृत्य भवन्तीति आध्यात्मिकानि इत्यादि । तत्र आध्यात्मिकानि आधिभौतिकानि उक्तानि । अत्र आधिदैविकविवक्षया करणाधिपाः उच्यन्ते—अत्रेति । इडादि द्वादशनाडी । यत् सर्वाङ्गज्ञानं अन्तःकरणं तदेव उपाधित्वेन योऽभिमन्यते स एव ज्ञाता जीवो भवतीत्यर्थः ॥ ८ ॥

ज्ञातृव्यापाराभिव्यक्तिः

अथ व्योमानिलानलजलान्नानां पञ्चीकरणमिति । ज्ञातृत्वं समानयोगेन श्रोत्रद्वारा शब्दगुणो वागधिष्ठित आकाशे तिष्ठति आकाशस्तिष्ठति । मनो व्यानयोगेन त्वग्द्वारा स्पर्शगुणः पाण्यधिष्ठितो वायौ तिष्ठति वायुस्तिष्ठति । बुद्धिरुदानयोगेन चक्षुर्द्वारा रूपगुणः पादाधिष्ठितोऽग्नौ तिष्ठत्यग्निस्तिष्ठति । चित्तमपानयोगेन जिह्वाद्वारा रसगुण उपस्थाधिष्ठितोऽप्सु तिष्ठत्यापस्तिष्ठन्ति । अहंकारः प्राणयोगेन घ्राणद्वारा गन्धगुणो गुदाधिष्ठितः पृथिव्यां तिष्ठति पृथिवी तिष्ठतीत्येवं वेद ॥ ९ ॥

एवं आध्यात्मिकादितापत्रयं निरूप्य अथ पञ्चीकरणाभिव्यक्तज्ञातृव्यापृतिं व्यक्तीकरोति—अथेति । पञ्चीकरणमिति पञ्चीकरणनिष्पन्नं ज्ञातुः ज्ञातृत्वमित्यर्थः । व्यष्टिसमष्टिप्रपञ्चगोपाधिकरणजीवेश्वरयोः व्यापृतिं भूत-तत्कार्यानुप्रवेशं चाह—ज्ञातृत्वमिति । जीवेशाववष्टभ्य ज्ञातृत्वं इत्यादि । आकाशस्तिष्ठति आकाशादौ आकाशादिः भूत्वा तिष्ठतीत्यर्थः । एवं वेद य एवं पञ्चभूततत्कार्यासङ्गान्तर्यामिणं वेद सोऽन्तर्यामी भवतीति शेषः ॥ ९ ॥

## मन्त्रः

### ब्रह्मणः सकाशात् पञ्चीकरणान्ता सृष्टिः

अत्रैते श्लोका भवन्ति—

पृथग्भूते षोडश कलाः स्वार्धभागान् [1]परान् क्रमात् ।
अन्तःकरण[2]व्यानाक्षिरस[3]पायुनभःक्रमात् ॥ १ ॥
[4]मुख्यान् पूर्वोत्तरैर्भागैर्भूतेभूते चतुश्चतुः ।
पूर्वमाकाशमाश्रित्य पृथिव्यादिषु [5]संस्थितः ॥ २ ॥
[6]मुख्या[7]ऊर्ध्वे परा ज्ञेया ना[अ]परानुत्तरान्विदुः ।
[8]एवमंशो अभूत्तस्मात्तेभ्यश्चां[9]शो अभूत्तथा ॥ ३ ॥
तस्मादन्योन्यमाश्रित्य ह्यो[10]तं प्रोतमनुक्रमात् ।

ब्राह्मणेन योऽर्थोऽभिहितः तमेतमर्थं मन्त्रा अप्यनुवदन्तीत्याह—**अत्रेति**। स्वाज्ञविकल्पितस्वातिरिक्तषोडशकलातत्कार्यजातात् स्वज्ञदृष्ट्या **पृथग्भूते** निष्कले ब्रह्मणि निर्बीजे सकलकलनानिर्वाहकस्वाज्ञदृष्ट्या प्रश्नोपनिषत्परिपठितप्राणादिनामान्तकला बीजरूपेण आदौ विकल्पिताः सत्यः स्वारोपाधिकरणेश्वरयोगात् ईश्वरो भूत्वा । **अन्तःकरण**शब्देन तत्कारणं आकाशमुच्यते, **व्यान**शब्देन वायुः, **अक्षि**शब्देन अग्निः—अक्ष्णः तैजसत्वात्—**रस**शब्देन आपः, **पायु**शब्देन पृथिवी, इत्येवं **नभःक्रमात्** आकाशादिक्रमात् **परान् स्वार्धभागान्** पञ्चभूतानां **मुख्यान्** अंशान् **क्रमात्** तत्तद्भूते निक्षिप्य ॥ १ ॥ **पूर्वोत्तरैः** आकाशादिपृथिव्यन्तैः **भागैः** तत्तद्भूतार्धांशानां तत्तद्भूते निक्षिप्तत्वात् शिष्टार्धांशान् **चतुश्चतुर्धा** विधाय आकाशः स्वांशेतरार्धांशान् वाय्वादिभूतचतुष्टये निक्षिप्य, तथा वायुः स्वांशेतरार्धांशान् आकाशाग्निजलपृथिवीषु निक्षिप्येत्यादि

[1] वरान्—अ १. [2] व्यानोऽक्षि—क. [3] पायू नभः —क, अ २.
[4] मुख्यात्—क, अ १. [5] संस्थिताः—अ १. [6] परा—अ.
[7] ऊर्ध्वं—अ १. [8] एवमंशा—क, अ, अ १, अ २.
[9] शा—क, अ, अ १, अ २. [10] तप्रोतं—अ १.

समानम् । एवं पञ्चीकृते सति पूर्वं आकाशमाश्रित्य योंऽशोऽस्ति सोऽयं पञ्चीकरणानन्तरं पृथिव्यादिषु संस्थितो भवति ॥ २ ॥ ऊर्ध्वे पूर्वं तत्तद्भूतमुख्यांशा एव पराः श्रेष्ठाः इति ज्ञेयाः । पञ्चीकृतेऽपि "वैशेष्यात्तु तद्वादस्तद्वादः" इति वैय्यासिकसूत्रानुरोधेन तत्तद्भूतव्यपदेशात् परत्वं युज्यते । उत्तरान् मुख्यांशेतरान् अंशान् अपरान् गौणान् विदुः तद्विद इत्यर्थः । यस्मात् एवं पञ्चभूतांशः अभूत् तस्मात् तेभ्यः मुख्यांशेभ्यः तथा गौणांशः अभूत् । "पञ्चभूतांशा अभूत्" "गौणांशा अभूत्" इति पाठे अभूवन्नित्यर्थे अभूदिति वचनव्यत्ययः ॥ ३ ॥ यस्मात् एवं तस्मात् अनुक्रमात् ओतं प्रोतं यथा भवति तथा पञ्चभूतेषु मुख्यांशोज्ज्वलेषु गौणांशाः अन्योन्यमाश्रित्य वर्तन्ते इत्यर्थः ॥

चराचरात्मकविश्वसृष्टिः

पञ्चभूतमया भूमिः सा चेतनसमन्विता ॥ ४ ॥
तत ओषधयोऽन्नं च ततः पिण्डाश्चतुर्विधाः ।
रसासृङ्मांसमेदोऽस्थिमज्जाशुक्रानि धातवः ॥ ५ ॥
केचित्तद्योगतः पिण्डा भूतेभ्यः संभवाः क्वचित् ।
तस्मिन्नन्नमयः पिण्डो नाभिमण्डलसंस्थितः ॥ ६ ॥
अस्य मध्येऽस्ति हृदयं सनालं पद्मकोशवत् ।
सत्वान्तर्वर्तिनो देवाः कर्त्रहंकारचेतनाः ॥ ७ ॥
अस्य बीजं तमःपिण्डं मोहरूपं जडं घनम् ।
वर्तते कण्ठमाश्रित्य मिश्रीभूतमिदं जगत् ॥ ८ ॥
प्रत्यगानन्दरूपात्मा [1]मूर्ध्नि स्थाने परंपदे ।
अनन्तशक्ति[2]संयुक्तो जगद्रूपेण भासते ॥ ९ ॥

[1] मूर्ध्नः—अ. [2] संयुक्ते—अ, अ १.

एवं पञ्चीकृतभूततः चेतनयुक्तात् किं जायते इत्यत्र चराचरात्मकं विश्वं जायते इत्याह—पञ्चेति ॥ ४ ॥ चेतनाधिष्ठितात् ततः, चैतन्याधिष्ठितान्नात्, जरायुजादिभेदेन चतुर्विधाः पिण्डाः सञ्जाताः इत्यर्थः । धातवोऽप्यन्नादेव जायन्ते इत्याह—रसेति ॥ ५ ॥ केचिदेव वदन्तीत्याह—केचिदिति । तद्योगतः शुक्रशोणितयोगतः पिण्डाः भुक्तान्नपुरुषभूतेभ्यः सञ्जातशुक्रशोणित-सम्भवाः पिण्डाः इति केचिदाहुः । सर्वथा अन्नमया इत्यर्थः । अन्नसारःपिण्डः क्व आसनमर्हति इत्यत आह—तस्मिन्निति । तस्मिन् भूतकदम्बे, तस्य सर्वप्राणिजीवननिमित्तत्वात ॥ ६ ॥ तन्मध्ये किं वर्तते इत्यत आह—अस्येति । अन्नमयस्य । तदाश्रित्य के वर्तन्ते इत्यत आह—सत्त्वेति । सत्वान्तर्वर्तिनः सत्वगुणप्रधानाः इन्द्रादयो ब्रह्मादयश्च देवाः वर्तन्ते । यद्वा—कर्त्रहङ्कारचेतनाः अन्तःकरणविशिष्टाः देवाः इन्द्रियाणि विद्यन्ते इत्यर्थः ॥ ७ ॥ हृदयबीजं किं इत्यत आह—अस्येति । घनम् स्वाज्ञानमित्यर्थः । तत कुत्र वर्तते इत्यत आह—वर्तते इति । "स्वाज्ञानं मनःस्थानं गळान्तं" इति श्रुत्यनुरोधेन कण्ठं कण्ठासनं मनः आश्रित्य वर्तते । तेन स्वाज्ञानकवळितमनसा इदं जगत मिश्रीभूतं व्याप्तं भवति ॥ ८ ॥ जगतः स्वाज्ञानमिश्रितत्वे जगद्रूपेण भानं किं इत्यत आह—प्रत्यगिति । जगतः स्वाज्ञानव्याप्तत्वेऽपि "तुरीयं मूर्ध्नि संस्थितम्" इति श्रुत्या स्वाज्ञानास्पृष्टमूर्ध्नि स्थाने परंपदे प्रत्यगानन्दरूपात्मा स्थिरासनो भूत्वा ईश्वरात्मना अनन्त-शक्तियुक्तः सन् जगद्रूपेण भासते । यतः एवं अतः जगद्रूपेणापि भानं प्रत्यगात्मनिष्ठं न स्वाज्ञानतत्कार्यजगन्निष्ठं इत्यर्थः ॥ ९ ॥

अवस्थाचतुष्टयम्

सर्वत्र वर्तते जाग्रत्स्वप्नं[1] जाग्रति वर्तते ।
सुषुप्तं च तुरीयं च नान्यावस्थासु कुत्रचित् ॥ १० ॥

[1] प्रजा—अ १, अ २.

सर्वदेशेष्वनुस्यूतश्च[1]तूरूपः शिवात्मकः ।
यथा महाफले सर्वे रसाः सर्वप्रवर्तकाः ॥ ११ ॥
तथैवान्नमये कोशे कोशास्तिष्ठन्ति [2]चान्तरे ।
यथा कोशस्तथा जीवो यथा जीवस्तथा शिवः ॥ १२ ॥
सविकारस्तथा जीवो निर्विकारस्तथा शिवः ।
कोशास्तस्य विकारास्ते ह्यवस्था[3]सु प्रवर्तकाः ॥ १३ ॥
यथा रसाशये फेनं मथनादेव जायते ।
मनोनिर्मथनादेव विकल्पा बहवस्तथा ॥ १४ ॥

जगत्कलनानिर्वर्त्यावस्थाचतुष्टयेयत्तां तद्वासकचिद्धातुस्वरूपं चाह—सर्वत्रेति । साक्षिभास्यप्रपञ्चे सर्वत्र जाग्रदवस्था वर्तते, करणग्रामव्यापृतेः स्फुटं अवगन्तुं शक्यत्वात् । अन्नमयकोशे प्राणादिकोशवत् जाग्रति स्वप्नादित्रयं वर्तते, नान्यावस्थास्वित्यर्थः ॥ १० ॥ जाग्रदवस्थायाः स्वप्नाद्याधारत्वं स्वागंपाधारेश्वरनिष्ठं इत्याह सर्वेति । विश्वविराडोत्रादिद्वितुर्याविकल्पान्तरूपेण व्यष्टिसमष्ट्यात्मकजाग्रदादिसर्वदेशेष्वनुस्यूतः प्रत्यगात्मा सदा वर्तते इत्यर्थः । कथं पुनः प्रतीचः सर्वानुस्यूतत्वं इत्यत्र विकारवत् कोशजीवदृष्टान्तेन सर्वानुस्यूतत्वं साधयति—यथेति । यथा अन्नमयकोशः सर्वकोशाधारो व्यापकश्च भवति तथा जीवः यथा कृत्स्नकोशविकारं आत्मात्मीयाभिमानपूर्वकं व्याप्य वर्तते तथा तद्विकारास्पृष्टः सन् शिवोऽपि वर्तते । जीवशिवयोः सविकारनिर्विकारत्वं कोशाभिमानभावाभावनिष्ठम् ॥ ११–१३ ॥ य(क?)स्मात् अवस्थात्रयतद्धेतुपञ्चकोशादिविकल्पः सञ्जात इत्यत्र—मथनसञ्जातरसाशयफेनवत् एवं मनोनिर्मथनात् जाग्रदादि विद्यते इति । सङ्कल्पात् एवमादिबहवो विकल्पाः जायन्ते, मनःसङ्कल्पाभावे किमपि नास्तीत्यर्थः ॥ १४ ॥

[1] तुरूपः—अ, क. [2] चापरे—क, क २. [3] सं—अ २.

दक्षिणोत्तरायणगतिः

कर्मणा वर्तते कर्मी तत्त्यागाच्छान्तिमाप्नुयात् ।
अयने दक्षिणे प्राप्ते प्रपञ्चाभिमुखं गतः ॥ १५ ॥
अहंकाराभिमानेन जीवः स्याद्धि सदाशिवः ।
स चाविवेकप्रकृतिसङ्गत्या तत्र मुह्यते ॥ १६ ॥
नानायोनिशतं गत्वा शेतेऽसौ वासनावशात् ।
विमोक्षात्संचरत्येव मत्स्यः कूलद्वयं यथा ॥ १७ ॥
ततः कालवशादेव ह्यात्मज्ञानविवेकतः ।
उत्तराभिमुखो भूत्वा स्थानात्स्थानान्तरं क्रमात् ॥ १८ ॥
मूर्ध्न्याधायात्मनः प्राणान्योगाभ्या[1]मं स्थितश्चरन् ।

एवं सङ्कल्पसञ्जातनानाविधकर्मणा कर्मी जीवो मनःकल्पितसंसारपाशेन निरुच्छ्वासं बद्धः सन् वर्तते । यावत् स्वज्ञानेन स्वभावापत्तिः तावत् संसरति । यदाऽयं स्वज्ञानेन स्वाज्ञानतत्कार्यं त्यजति तदा स्वातिरिक्तविभ्रमशान्तिमाप्नुयात् । शिवस्य जीवत्वं जीवस्य शिवत्वं कथं भवतीत्याशङ्क्य अनात्मनि आत्माभिमानात् शिवस्य जीवत्वं तदभिमतित्यागात् जीवस्य शिवत्वं च स्यादित्याह—अयन इति । ज्ञानगन्धविकलकामसङ्कल्पादिघटितेष्टापूर्तादिकर्मणा अयने दक्षिणे प्राप्ते ॥ १५–१७ ॥ कदा जीवः शिवो भवति? स्वभावाप्तौ किं साधनं? इत्यत आह—तत इति । ततो निष्कामबुद्ध्या अनुष्ठितसत्कर्मफलसमर्पणेश्वरप्रसादात् उत्तराभिमुखो भूत्वा "तेऽर्चिषमभिसम्भवन्ति" इत्यादिस्थानात् स्थानान्तरं प्राप्य शबलब्रह्मपदं क्रमात् प्राप्नोतीत्यर्थः ॥ १८ ॥ किं कुर्वन् उत्तराभिमुखो भवति इत्यत आह—

[1] सस्थितः—अ २.

मूर्ध्नीति । सिद्धासनस्थो योगी स्वात्मनः प्राणान् सुषुम्नाद्वारेण मूर्ध्नि आधाय सदा एवं योगाभ्यासं चरन् यथोक्तकाले मूर्धानं भित्त्वा देवयानेन पथा ब्रह्मलोकमेत्य न पुनरावर्तते इत्यर्थः ॥

सद्योमुक्तिप्रापकं ज्ञानम्

योगात्संजायते ज्ञानं ज्ञानाद्योगः प्रवर्तते ॥ १९ ॥

योगज्ञानपरो नित्यं स योगी न प्रणश्यति ।

विकारस्थं शिवं पश्येद्विकारश्च शिवे न तु ॥ २० ॥

*योगप्रकाशकं योगैर्ध्यायेच्चानन्यभावनः ।*

केवलकर्मानुष्ठानफलं चान्द्रपदं, कर्मज्ञानसमुच्चयानुष्ठानफलं तु ब्रह्मलोकावाप्तिः इत्युक्त्वा सद्यःकैवल्यप्रापकनिर्विशेषज्ञानं सोपायमाह -योगादिति । स्वाश्रमाचारसत्कृतनित्यादिसाधनचतुष्टयवदनुष्ठितसर्ववेदान्तश्रवणयोगात् निर्विशेषज्ञानं सञ्जायते । यथोक्तमननाभिवर्धितज्ञानात् योगो निदिध्यासो ब्रह्मातिरिक्तं न किञ्चिदस्तीति सम्यज्ज्ञानं प्रवर्तते प्रादुर्भवति ॥ १९ ॥ नित्यमेवं योगज्ञानपरो योगी स्वाज्ञवत् स्वातिरिक्तास्तित्वधिया न कदाऽपि प्रणश्यति सम्यज्ज्ञानसमकालं सर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रभावापन्नो भवतीत्यर्थः । सम्यज्ज्ञानोपायस्तु —"सर्वं खल्विदं ब्रह्म" इति श्रुत्यनुरोधेन स्वाज्ञदृष्टिप्रसक्तसर्वविकारस्थं शिवं पश्येत् । एवं सर्वं ब्रह्मेति बोधे सिद्धे सर्वविकारजातं शिवे न किञ्चिदस्तीति विज्ञानं जायते ॥ २० ॥ ततो विज्ञानयोगी सर्वविकारासम्भवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रं इति अनन्यभावनः सम्यज्ज्ञानीभूत्वा पुरोदितश्रवणादियोगैः सञ्जातसम्यज्ज्ञानयोगप्रकाशकं आत्मानं ब्रह्ममात्रं ध्यायेत् । एवं ध्यानात्मकसम्यज्ज्ञानसमकालं कृतकृत्यो भवतीत्यर्थः ॥

ज्ञानोपायभूतो योगः

**योगज्ञाने न विद्येते तस्य भावो न सिध्यति ॥ २१ ॥**
**तस्मादभ्यासयोगेन मनःप्राणान्निरोधयेत् ।**
**योगी निशितधारेण क्षुरेणैव निकृन्तयेत् ॥ २२ ॥**
**शिखा [1]प्राणमयी वृत्तिर्यमाद्यष्टाङ्गसाधनैः ।**

यदि श्रवणाधिकारी न भवति **तस्य** स्वप्नेऽपि **योगज्ञाने न विद्येते,** सम्यज्ज्ञानभावोऽपि **न सिध्यति** ॥ २१ ॥ यस्मात् एवं **तस्मात्** । एवं अभ्यासयोगतः ब्रह्मप्राप्तिप्रतिबन्धकाज्ञानं **योगी निशितधारेण** अभ्यासयोगक्षुरेणैव **निकृन्तयेदिति** ॥ २२ ॥ एवं अभ्यासयोगः केनोपायेन जायते इत्यत आह—**शिखेति** । वक्ष्यमाणयमाद्यष्टाङ्गयोगसाधनैः **प्राणमयी वृत्तिः योगशिखा** अभ्यासयोगफलप्रापिका सञ्जायते इत्यर्थः ॥

कर्मज्ञानयोगौ

**ज्ञानयोगः कर्मयोग इति योगो द्विधा मतः ॥ २३ ॥**
**क्रियायोगमथेदानीं शृणु ब्राह्मणसत्तम ।**
**अव्याकुलस्य चित्तस्य बन्धनं विषये क्वचित् ॥ २४ ॥**
**यत्संयोगो द्विजश्रेष्ठ स च द्वैविध्यमश्नुते ।**
**कर्म कर्तव्यमित्येव विहितेष्वेव कर्मसु ॥ २५ ॥**
**बन्धनं मनसो [2]नित्यं कर्मयोगः स उच्यते ।**
**यत्तु चित्तस्य [3]सततमर्थे श्रेयसि बन्धनम् ॥ २६ ॥**

[1] ज्ञातमयी—अ २. ज्ञानमयी—क. [2] नित्यः—क.
[3] वितत—क.

**ज्ञानयोगः स विज्ञेयः सर्वसिद्धिकरः शिवः ।**
**यस्योक्तलक्षणे योगे द्विविधेऽप्यव्ययं मनः ॥ २७॥**
**स याति परमं श्रेयो मोक्षलक्षणमञ्जसा ।**

ज्ञानकर्मभेदेन योगद्वैविध्यं तदियत्तामाह—**ज्ञानेति** ॥ २३ ॥ तत्र **क्रियायोगं** इत्यादि । किं तत्? **अव्याकुलस्य** इत्यादि ॥ २४ ॥ क्रियायोगस्य कथं द्वैविध्यं इत्यत्र कर्म कर्तव्यं इत्यादि । ईश्वराराधनधिया निष्कामकर्मानुष्ठानाभिनिवेश एव कर्मयोग इत्यर्थः ॥ २५ ॥ श्रेयोमार्गाभिनिवेश एव ज्ञानयोगः इत्याह—**यस्त्विति** ॥ २६ ॥ एवं उपायोपेयद्विविधयोगानुष्ठानतः श्रेयो भवतीत्याह—*यस्येति* ॥ २७ ॥

निर्विशेषब्रह्मज्ञानोपायः अष्टाङ्गयोगः

**देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः ॥ २८ ॥**
**अनुरक्तिः परे तत्त्वे सततं नियमः स्मृतः ।**
**सर्ववस्तून्युदासीनभाव [1]आसनमुत्तमम् ॥ २९ ॥**
**जगत्सर्वमिदं मिथ्याप्रतीतिः प्राणसंयमः ।**
**चित्तस्यान्तर्मुखीभावः प्रत्याहारस्तु सत्तम ॥ ३० ॥**
**चित्तस्य निश्चलीभावो धारणा धारणं विदुः ।**
**सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते ॥ ३१ ॥**
**ध्यानस्य विस्मृतिः सम्यक्समाधिरभिधीयते ।**

पूर्वोक्तनिर्विशेषब्रह्मज्ञानोपायतया संक्षेपविस्ताराभ्यां अष्टाङ्गयोगं उपदिशति—**देहेति** ॥ २८–३१ ॥

[1] मासन—क, अ, अ १, अ २.

दशविधयमनियमाः

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयाऽऽर्जवम् ॥ ३२ ॥
क्षमा धृतिर्मिताहारः शौचं चेति यमा दश ।
तपस्सन्तुष्टिरास्तिक्यं दानमाराधनं हरेः ॥ ३३ ॥
वेदान्तश्रवणं[1]चैव ह्रीर्मतिश्च जपो व्रतम् ॥
इति ॥

उत्तमाधिकारिणां ब्रह्मज्ञानसाधनतया अष्टाङ्गयोगो निरूपितः । तत्र यमो दशधा भिद्यते इत्यत आह—अहिंसेति ॥ ३२ ॥ तथा नियमोऽपीत्याह—तप इति ॥ ३३ ॥

हठयोगरीत्या आसनानि

आसनानि तदङ्गानि स्वस्तिकादीनि वै द्विज ॥ ३४ ॥
[2]वर्ण्यते स्वस्तिकं पादतलयोरुभयोरपि ।
पूर्वोत्तरे जानुनी द्वे [3]कृत्वाऽऽसनमुदीरितम् ॥ ३५ ॥
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ।
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखं यथा ॥ ३६ ॥
एकं चरणमन्यस्मिन्नूरावारोप्य निश्चलः ।
आस्ते यदिदमेनोघ्नं वीरासनमुदीरितम् ॥ ३७ ॥
गुदं नियम्य गुल्फाभ्यां व्युत्क्रमेण [4]समाहितः ।
योगासनं भवेदेतदिति योगविदो विदुः ॥ ३८ ॥

[1] ह्रीश्च जप इत्यादि लक्षणं—अ, अ १. [2] वर्ण्यन्ते—क, अ, अ १, अ २.
[3] कूर्मासन—अ. [4] समासितः—अ, अ १.

ऊर्वोरुपरि वै धत्ते यदा पादतले उभे ।
पद्मासनं भवेदेतत्सर्वव्याधिविषापहम् ॥ ३९ ॥
पद्मासनं सुसंस्थाप्य [1]तदङ्गुष्ठद्वयं पुनः ।
व्युत्क्रमेणैव हस्ताभ्यां बद्धपद्मासनं भवेत् ॥ ४० ॥
पद्मासनं सुसंस्थाप्य जानूर्वोरन्तरे करौ ।
निवेश्य भूमावातिष्ठेद्योमस्थः कुक्कुटासनः ॥ ४१ ॥
कुक्कुटासनबन्धस्थो दोर्भ्यां संबध्य कन्धरम् ।
शेते कूर्मवदुत्तान एतदुत्तानकूर्मकम् ॥ ४२ ॥
पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।
धनुराकर्षकाकृष्टं धनुरासनमीरितम् ॥ ४३ ॥
सीवनीं गुल्फ[2]देशेभ्यो निपीडच व्युत्क्रमेण तु ।
प्रसार्य [3]जानुनोर्हस्तावासनं सिंहरूपकम् ॥ ४४ ॥
गुल्फौ च वृषणस्याधः [4]सीविन्युभयपार्श्वयोः ।
निवेश्य [5]भूमौ हस्ताभ्यां बद्धा भद्रासनं भवेत् ॥ ४५ ॥
[6]सीवनीपार्श्वमुभयं गुल्फाभ्यां व्युत्क्रमेण तु ।
निपीड्यासनमेतच्च मुक्तासनमुदीरितम् ॥ ४६ ॥

[1] पद—क. [2] देशाभ्यां—अ, क, अ १, अ २.
[3] जानुनो (तो?) हस्तौ—अ, क, अ १, अ २.
[4] सीविन्यो—क, अ २. [5] पादौ—अ, क, अ १, अ २.
[6] ' सीविनीं गुल्फदेशाभ्यां निपीड्य ' इति च—क.

[1]अवष्टभ्य धरां सम्यक्तलाभ्यां हस्तयोर्द्वयोः ।
कूर्परौ नाभिपार्श्वे तु स्थापयित्वा मयूरवत् ॥ ४७ ॥
समुन्नतशिरः[2]पादो मयूरासनमिष्यते ।
वामोरुमूले दक्षाङ्घ्रिं जान्वोर्वेष्टितपाणिना ॥ ४८ ॥
वामेन वामाङ्गुष्ठं तु गृहीतं मत्स्यपीठकम् ।
योनिं वामेन संपीड्य मेढ्रादुपरि दक्षिणम् ॥ ४९ ॥
ऋजुकायः समासीनः सिद्धासनमुदीरितम् ।
प्रसार्य मुवि पादौ [3]तु दोर्भ्यामङ्गुष्ठमादरात् ॥ ५० ॥
जानूपरि ललाटं तु पश्चिमं ताणमुच्यते ।
येन केन प्रकारेण सुखं [4]धार्यं च जायते ॥ ५१ ॥
तत्सुखासनमित्युक्तमशक्तस्तत्समाचरेत् ।
आसनं विजितं येन जितं तेन जगत्त्रयम् ॥ ५२ ॥

अथ मध्यमाधिकारिणां हठयोगरीत्या आसनाद्यङ्गानि उपदिशति —आसनानीति ॥ ३४ ॥ तत्र स्वस्तिकासनलक्षणमाह—वर्ण्यत इति ॥ ३५ ॥ गोमुखासनलक्षणमुच्यते—सव्य इति ॥ ३६ ॥ वीरासनलक्षणमाचष्टे—एकमिति ॥ ३७ ॥ योगासनलक्षणं व्यनक्ति—गुदमिति ॥ ३८ ॥ पद्मासनलक्षणं प्रकाशयति—ऊर्वोरिति ॥ ३९ ॥ बद्धपद्मासनलक्षणं विशदयति—पद्मासनमिति । हस्ताभ्यां बद्धेति यत् तत् बद्धपद्मासनं भवेत् ॥ ४० ॥ कुक्कुटासनप्रकारं व्यक्तीकरोति—पद्मेति ॥ ४१ ॥ उत्तानकूर्मलक्षणमाह—कुक्कुटेति ॥ ४२ ॥ धनुरासनमाह—

[1] अवष्टभ्याधरां—अ.
[2] पादं—क, अ, अ १, अ २.
[3] तौ—अ.
[4] धैर्यं—अ, अ २.

पादेति ॥ ४३ ॥ सिंहासनं दर्शयति—सीविनीमिति ॥ ४४ ॥ भद्रासनलक्षणमाह—गुल्फाविति ॥ ४५ ॥ मुक्तासनस्वरूपमाह—सीविनीति ॥ ४६ ॥ मयूरासनप्रकारमाह—अवष्टभ्येति ॥ ४७ ॥ मत्स्यासनलक्षणमाचष्टे—वामेति ॥ ४८ ॥ सिद्धासनलक्षणमाह— योनिमिति ॥ ४९ ॥ पश्चिमतानलक्षणं प्रकटयति—प्रसार्येति ॥ ५० ॥ अशक्तोपयोग्यासनमाह—येनेति ॥ ५१ ॥ आसनफलमाह—आसनमिति ॥ ५२ ॥

नाडीशुद्धिपूर्वकप्राणायामविधिः

यमैश्च नियमैश्चैव ह्यासनैश्च सुसंयतः ।
नाडीशुद्धिं च कृत्वाऽऽदौ प्राणायामं समाचरेत् ॥ ५३ ॥
देहमानं स्वाङ्गुलिभिः षण्णवत्यङ्गुलायतम् ।
प्राणः शरीरादधिको द्वादशाङ्गुलमानतः ॥ ५४ ॥
देहस्थमनिलं देहसमुद्भूतेन वह्निना ।
न्यूनं समं वा योगेन कुर्वन्ब्रह्मविदिष्यते ॥ ५५ ॥

यमाद्यङ्गत्रयविशिष्टयोगिनो नाडीशुद्धिपूर्वकं प्राणायामक्रममाह—यमैश्चेति । पूर्वोक्तैः ॥ ५३ ॥ अभ्यासानुकूलदेहप्राणमानं तत्र प्राणाभ्यासफलं चाह—देहमानमिति ॥ ५४–५५ ॥

अग्निमण्डलस्वरूपम्

देहमध्ये शिखिस्थानं तप्तजाम्बूनदप्रभम् ।
त्रिकोणं द्विपदामन्यच्चतुरश्रं चतुष्पदाम् ॥ ५६ ॥
वृत्तं [1]विहङ्गमानां तु षडश्रं [2]सर्पजन्मनाम् ।
अष्टाश्रं स्वेदजानां तु तस्मिन्दीपवदुज्ज्वलम् ॥ ५७ ॥

[1] विहङ्गमानं—उ. [2] सर्व—क, अ २.

मूलाग्निमण्डलस्वरूपमाह—देहेति ॥ ९६ ॥ तत्तज्जन्त्वग्निमण्डले तस्मिन् उज्ज्वलं वह्निं विद्धीत्यर्थः ॥ ९७ ॥

नाभिस्थानम्

कन्दस्थानं मनुष्याणां [1]देहमध्यं नवाङ्गुलम् ।
चतुरङ्गुलमुत्सेधं चतुरङ्गुलमायतम् ॥ ९८ ॥
अण्डाकृति तिरश्चां च द्विजानां च चतुष्पदाम् ।
तुन्दमध्यं तदिष्टं वै तन्मध्यं नाभिरिष्यते ॥ ९९ ॥

मनुष्यादिदेहमध्यं विशदयति—कन्देति ॥ ९८–९९ ॥

नाडीचक्रे जीवभ्रमणम्

तत्र चक्रं द्वादशारं तेषु विष्ण्वादिमूर्तयः ।
अहं तत्र स्थितश्चक्रं भ्रामयामि स्वमायया ॥ ६० ॥
अरेषु भ्रमते जीवः क्रमेण द्विजसत्तम ।
तन्तुपञ्जरमध्यस्था यथा भ्रमति लूतिका ॥ ६१ ॥
प्राणाधिरूढश्चरति जीवस्तेन विना न हि ।

तत्रस्थनाडीचक्रं विष्ण्वादिभिरधिष्ठितं सत् वर्तते । तत्राहमन्तर्याम्यात्मना स्थित्वा तच्चालयामीत्याह—तत्रेति । तत्र नाभिमध्ये नाडीचक्रं ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥

इति स्मृत्यनुरोधेन अहं इत्यादि ॥ ६० ॥ को वा त्वया भ्राम्यते इत्यत आह—अरेष्विति । नाडीचक्रारेषु । जीवभ्रमणं सदृष्टान्तमाह—तन्त्विति । लूतिका ऊर्णनाभिः कीटविशेषः । तथा जीवः चलनमेतीत्यर्थः ॥ ६१ ॥

[1] देहमध्ये—अ.

कुण्डलिनीस्थानं तद्व्यापारश्च

तस्योर्ध्वे कुण्डलीस्थानं नाभेस्तिर्यगथोर्ध्वतः ॥ ६१ ॥
अष्टप्रकृतिरूपा सा चाष्टधा कुण्डलीकृता ।
यथावद्वायु[1]संचारं [2]जलान्नादि च नित्यशः ॥ ६२ ॥
परितः कन्दपार्श्वे तु निरुध्यैव सदा स्थिता ।
मुखेनैव समावेष्टच ब्रह्मरन्ध्रमुखं तथा ॥ ६४ ॥
योगकालेन मरुता साग्निना बोधिता सती ।
स्फुरिता हृदयाकाशे नागरूपा महोज्ज्वला ॥ ६५ ॥

तदूर्ध्वविलसितकुण्डलिनीस्थानं तद्व्यापारं चाह—तस्येति । नाडीचक्रस्य तस्य ॥ ६२ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

इति स्मृत्यनुरोधेन अष्टप्रकृतिरूपा वायुसञ्चारं प्राणापानयोरैक्यमित्यर्थः । भुक्तजलान्नादि ॥ ६३ ॥ किं कुर्वती स्थितेत्यत्र मुखेनैव इत्यादि ॥ ६४ ॥ सा कदा ऊर्ध्वं प्रसरतीत्यत्र योगकालेन इत्यादि ॥ ६५ ॥

देहमध्यस्थनाडीकन्दस्वरूपम्

[3]अपानाद्वयङ्गुलादूर्ध्वमधो मेढ्रस्य तावता ।
देहमध्यं मनुष्याणां हन्मध्यं तु चतुष्पदाम् ॥ ६६ ॥

[1] सारं च—क, अ १, अ २.

[2] चलनादि—अ. ज्वलनादि—क, अ १, अ २. 'सञ्चारं जलान्नादि' इति च—क, अ २.

[3] अपानद्वय—अ, अ १.

इतरेषां तुन्द[1]मध्यं नानानाडीसमावृतम् ।
[2]चतुष्प्रकारव्ययुते देहमध्ये सुषुम्नया ॥ ६७ ॥
कन्दमध्ये स्थिता नाडी सुषुम्ना सुप्रतिष्ठिता ।
पद्मसूत्रप्रतीकाशा ऋजुरूर्ध्व[3]प्रवर्तिनी ॥ ६८ ॥
ब्रह्मणो विवरं यावद्वि[4]द्युदाभासनालकम् ।
वैष्णवी ब्रह्मनाडी च निर्वाणप्राप्तिपद्धतिः ॥ ६९ ॥
इडा च पिङ्गला चैव तस्याः सव्येतरे स्थिते ।
इडा समुत्थिता कन्दाद्वामनासापुटावधिः ॥ ७० ॥
पिङ्गला चोत्थिता तस्माद्दक्षनासापुटावधिः ।
गान्धारी हस्तिजिह्वा च द्वे चान्ये नाडिके स्थिते ॥ ७१ ॥
पुरतः पृष्ठतस्तस्याः वामेतरदृशौ प्रति ।
पूषायशस्विनीनाड्यौ तस्मादेव समुत्थिते ॥ ७२ ॥
सव्येतरश्रुत्यवधि पायु[5]मूलावलम्बुसा ।
अधोगता शुभा नाडी मेढ्रान्तावधिरायता ॥ ७३ ॥
पादाङ्गुष्ठावधिः कन्दादधोयाता च कौशिकी ।
दशप्रकारभूतास्ताः कथिताः कन्दसंभवाः ॥ ७४ ॥

[1] मध्ये—अ १, अ.
[2] चतुष्प्रकारेत्यादि श्लोकार्धं (अ, अ १) कोशानुसारेण मूले धृतं.
[3] प्रकाशिनी—क, अ २.
[4] द्युदाभं स—क, अ २.
[5] मूलादलम्बुसा— अ.

तन्मूला बहवो नाड्यः [1]स्थूलाः सूक्ष्माश्च नाडिकाः ।
द्वासप्ततिसहस्राणि स्थूलाः सूक्ष्माश्च नाडयः ॥ ७५ ॥
संख्यातुं नैव शक्यन्ते [2]स्थूलमूलाः पृथग्विधाः ।
यथाऽश्वत्थ[3]दले सूक्ष्माः स्थूलाश्च विततास्तथा ॥ ७६ ॥

देहमध्यं तदाश्रयनाडीकन्दस्वरूपमाह—**अपानादिति** ॥ ६६–६७ ॥ तत्र केयं प्रधाननाडी ? तदाश्रित्य कति नाडयो वर्तन्ते ? इत्यत्रोच्यते—**कन्देति** । वीणादण्डमाश्रित्य **ऋजुरूर्ध्वप्रवर्तिनी** ॥ ६८ ॥ कियत्पर्यन्तं ऊर्ध्वं प्रवृत्तेत्यत्र **ब्रह्मरन्ध्रान्तमित्याह—ब्रह्मण** इति । **विद्युल्लेखेव आ** समन्तात् **भासमाननाळकं** ब्रह्मरन्ध्रं तावत्, मूलाधारमारभ्य **ब्रह्मरन्ध्रपर्यन्तं** प्रवर्तते इत्यर्थः । तस्या नाम निर्दिशति—**वैष्णवीति** । विष्ण्वधिष्ठितत्वात् । **ब्रह्मनाडी** ब्रह्मलोकप्रापकत्वात्, तदन्तर्गतकैवल्यनाडी । **निर्वाणप्राप्तिपद्धतिः** कैवल्यसृतित्वात् ॥ ६९ ॥ तदाश्रयनाड्यः उच्यन्ते—**इडा चेति** ॥ ७०–७५ ॥ असङ्ख्येयत्वे दृष्टान्तमाह—**यथेति** ॥ ७६ ॥

नाडीचराः वायवः

प्राणापानौ समानश्च उदानो व्यान एव च ।
नागः कूर्मश्च कृकरो देवदत्तो धनंजयः ॥ ७७ ॥
चरन्ति दशनाडीषु दश प्राणादिवायवः ।
प्राणादिपञ्चकं तेषु प्रधानं तत्र च द्वयम् ॥ ७८ ॥
प्राण एवाथवा ज्येष्ठो जीवात्मानं बिभर्ति यः ।
आस्यनासिकयोर्मध्यं हृदयं नाभिमण्डलम् ॥ ७९ ॥

[1] स्थूलसूक्ष्माश्च—अ, क, अ १, अ २. [2] स्थूले—अ, अ १.
[3] दळैः—अ, अ १.

पादाङ्गुष्ठमिति प्राणस्थानानि द्विजसत्तम ।
अपानश्चरति ब्रह्मन् गुदमेढ्रोरुजानुषु ॥ ८० ॥
समानः सर्वगात्रेषु सर्वव्यापी व्यवस्थितः ।
उदानः सर्वसन्धिस्थः पादयोर्हस्तयोरपि ॥ ८१ ॥
व्यानः श्रोत्रोरुकट्यां च गुल्फस्कन्धगलेषु च ।
नागादिवायवः पञ्च त्वगस्थ्यादिषु संस्थिताः ॥ ८२ ॥
तुन्दस्थं जलमन्नं च [1]रसादि च समीकृतम् ।
तुन्दमध्यगतः प्राणस्तानि कुर्यात्पृथक्पृथक् ॥ ८३ ॥
इत्यादिचेष्टनं प्राणः करोति च पृथक्[2]स्थितः ।
अपानवायुर्मूत्रादेः करोति च विसर्जनम् ॥ ८४ ॥
प्राणापानादिचेष्टादि क्रियते व्यानवायुना ।
उज्जीर्यते शरीरस्थमुदानेन नभस्वता ॥ ८५ ॥
पोषणादि शरीरस्य समानः कुरुते सदा ।
उद्गारादिक्रियो नागः कूर्मोऽक्ष्यादिनिमीलनः ॥ ८६ ॥
कृकरः क्षपयोः कर्ता दत्तो निद्रादिकर्मकृत् ।
मृतगात्रस्य [3]शोभादि धनंजय उदाहृतः ॥ ८७ ॥

नाडीचरा वायवः कतिसङ्ख्याकाः इत्यत्र प्राणापानौ इत्यादि ॥ ७७ ॥ तेषु कः प्रधानः इत्यत आह—प्राणादीति ॥ ७८ ॥ तेषां स्थानानि निर्दिशति—आस्येति ॥ ७९–८२ ॥ प्राणादिव्यापारमाह—तुन्दस्थमिति ॥ ८३–८६ ॥ क्षपयोः निमेषोन्मेषयोः ॥ ८७ ॥

[1] रसानि च समीकृतौ—अ, अ १. [2] स्थितं—अ, क, अ १, अ २.
[3] शोभादेर्धनञ्जयः इति मुद्रितपुस्तके. यो भाति धनञ्जयः—अ.

नाडीज्ञानपुरःसरा नाडीशुद्धिः

नाडीभेदं मरुद्भेदं मरुतां स्थानमेव च ।
चेष्टाश्च विविधास्तेषां [1]ज्ञात्वैवं द्विजसत्तम ॥ ८८ ॥
शुद्धौ यतेत नाडीनां पूर्वोक्तज्ञानसंयुतः ।

एवं नाडीभेदस्थानादिकं ज्ञात्वा तच्छुद्ध्यर्थं यतेदित्याह—नाडीति ॥ ८८ ॥

योगाभ्यासस्थलं तद्विधिश्च

विविक्तदेश[2]मास्थाय सर्वसंबन्धवर्जितः ॥ ८९ ॥
योगाङ्गद्रव्यसंपूर्णं तत्र दारुमये शुभे ।
आसने कल्पिते दर्भकुशकृष्णाजिनादिभिः ॥ ९० ॥
तावदासनमुत्सेधे तावद्व्यसमायते ।
उपविश्यासनं सम्यक्स्वस्तिकादि यथारुचि ॥ ९१ ॥

योगस्थलं योगविधिं चाह—विविक्तेति ॥ ८९–९१ ॥

चिन्मुद्रासहितकेवलकुंभकम्

बद्ध्वा प्रागासनं विप्र ऋजुकायः समाहितः ।
नासाग्रन्यस्तनयनो दन्तै[3]र्दन्तानसंस्पृशन् ॥ ९२ ॥
रसनां तालुनि न्यस्य स्वस्थचित्तो निरामयः ।
आकुञ्चितशिरः किंचिन्निबध्नन्योगमुद्रया ॥ ९३ ॥
हस्तौ यथोक्तविधिना प्राणायामं समाचरेत् ।

[1] ज्ञात्वैव—अ, अ १. [2] माश्रित्य—क, अ २. मासाद्य—अ, अ १.
[3] र्दन्तासनं-

प्राणायामलक्षणं वक्तुं भूमिकां रचयति—बध्नेति । नासिकाबन्धनं बन्धत्रयं वा योगमुद्रेत्यर्थः ॥ ९२-९३ ॥ हस्तौ इत्यादि । यद्वा—हस्तौ चिन्मुद्रायुतौ विधाय केवलकुम्भकप्राणायामं कुर्यादित्यर्थः ॥

सहितप्राणायामः

रेचनं पूरणं वायोः शोधनं रेचनं तथा ॥ ९४ ॥
चतुर्भिः क्लेशनं वायोः प्राणायाम उदीर्यते ।

सहितप्राणायामलक्षणमाह—रेचनमिति ॥ ९४ ॥ प्राणायामारम्भसमये शरीरगतदुष्टवायुरेचनं ततः पूरणं ततः कुम्भकेन वायोः शोधनं पुनः निःशेषतो रेचनं, एवं चतुर्भिः पर्यायैः वायोः क्लेशनं उपक्रमप्राणायामः उदीर्यते । एवं प्राणायामत्रये कृते सति अथ यथोक्तप्राणायामयोग्यं शरीरं भवतीत्यर्थः ॥

नाडीशोधकप्राणायामः

हस्तेन दक्षिणेनैव पीडयेन्नासिकापुटम् ॥ ९५ ॥
शनैः शनैरथ बहिः प्रक्षिपेत्पिङ्गलानिलम् ।
इडया वायुमापूर्य ब्रह्मन्षोडशमात्रया ॥ ९६ ॥
पूरितं कुम्भयेत्पश्चाच्चतुःषष्ट्या तु मात्रया ।
द्वात्रिंशन्मात्रया सम्यग्रेचयेत्पिङ्गलानिलम् ॥ ९७ ॥
एवं पुनः पुनः कार्यं व्युत्क्रमानुक्रमेण तु ।
संपूर्णकुम्भवद्देहं कुम्भयेन्मातरिश्वना ॥ ९८ ॥
पूरणान्नाडयः सर्वाः पूर्यन्ते मातरिश्वना ।
एवं कृते सति ब्रह्मंश्चरन्ति दश वायवः ॥ ९९ ॥

हृदयाम्भोरुहं चापि व्याकोचं भवति स्फुटम् ।
तत्र पश्येत्परात्मानं वासुदेवमकल्मषम् ॥ १०० ॥
[1]प्रातर्माध्यन्दिने सायमर्धरात्रे च कुम्भकान् ।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥ १०१ ॥
एकाहमात्रं कुर्वाणः सर्वपापैः प्रमुच्यते ।
संवत्सरत्रयादूर्ध्वं प्राणायामपरो नरः ॥ १०२ ॥
योगसिद्धो भवेद्योगी वायुजिद्विजितेन्द्रियः ।
अल्पाशी स्वल्पनिद्रश्च तेजस्वी बलवान्भवेत् ॥ १०३ ॥
अपमृत्यु[2]मपक्रम्य दीर्घमायुरवाप्नुयात् ।

नाडीशोधनहेतुतया अभ्यसनीयप्राणायामक्रमः उच्यते—**हस्तेनेति** । **अनुक्रमस्तु**, इडया आपूर्य कुम्भित्वा पिङ्गळया रेचनम् । **व्युत्क्रमस्तु**, पिङ्गळया आपूर्य कुम्भित्वा इडया रेचनम् ॥ ९५–९७ ॥ एवं अहरहः चतुर्वारं दिनैकमात्रावृद्धिपूर्वकं अशीतिप्राणायाममभ्यसेत् इत्याह—**सम्पूर्णेति** ॥ ९८–९९ ॥ **व्याकोचं** विकासम् ॥ १००–१०३ ॥

प्राणायामफलम्

प्रस्वेदजननं यस्य [3]प्राणायामेषु सोऽधमः ॥ १०४ ॥
कम्पनं वपुषो यस्य प्राणायामेषु मध्यमः ।
उत्थानं वपुषो यस्य स उत्तम उदाहृतः ॥ १०५ ॥
अधमे व्याधिपापानां नाशः स्यान्मध्यमे पुनः ।
पापरोगमहाव्याधिनाशः स्यादुत्तमे पुनः ॥ १०६ ॥

[1] प्रातर्म—अ, अ २. [2] मतिक्रम्य—क, अ, अ १, अ २.
[3] प्राणायामस्तु—क, अ, अ १, अ २.

अल्पमूत्रोऽल्पविष्ठश्च लघुदेहो मिताशनः ।
पट्वीन्द्रियः पटुमतिः कालत्रयविदात्मवान् ॥ १०७ ॥
रेचकं पूरकं मुक्त्वा कुम्भीकरणमेव यः ।
करोति त्रिषु कालेषु नैव तस्यास्ति दुर्लभम् ॥ १०८ ॥

प्रथमाभ्यासकाले स्वेदकम्पनोत्थानादिसिद्धिं तत्फलं चाह—प्रस्वेदेति ॥ १०४–१०७ ॥ केवलकुम्भकारूढयोगिनो वाञ्छितार्थसिद्धिः स्यादित्याह—रेचकमिति ॥ १०८ ॥

प्राणधारणाद्रोगनाशः

नाभिकन्दे च नासाग्रे पादाङ्गुष्ठे च यत्नवान् ।
धारयेन्मनसा प्राणान्सन्ध्याकालेषु वा सदा ॥ १०९ ॥
सर्वरोगैर्विनिर्मुक्तो जीवेद्योगी गतक्लमः ।
कुक्षिरोगविनाशः स्यान्नाभिकन्देषु धारणात् ॥ ११० ॥
[1]नासाग्रधारणाद्दीर्घमायुः स्याद्देहलाघवः ।
ब्राह्मे मुहूर्ते संप्राप्ते वायुमाकृष्य जिह्वया ॥ १११ ॥
पिबतस्त्रिषु मासेषु वाक्सिद्धिर्महती भवेत् ।
[2]अभ्यस्यतुश्च षण्मासान्महारोगविनाशनम् ॥ ११२ ॥
यत्रयत्र धृतो वायुरङ्गे रोगादिदूषितें ।
धारणादेव मरुतस्तत्तदारोग्यमश्नुते ॥ ११३ ॥

[1] नासाग्रे—क, अ, अ १, अ २.
[2] अभ्यासतश्च—मु. 'अभ्यस्यतश्च' इति तु पाठो युक्तो भाति.

यद्यदङ्गं रोगदूषितं भवति तत्तदङ्गवायुधारणात् तत्तद्रोगनिवृत्तिद्वारा आयुर्वृद्धिः स्यादित्याह—**नाभीति** । केवलकुम्भकाभ्यासस्सिद्धो योगी **नाभिकन्दे** इत्यादि ॥ १०९–११३ ॥

षण्मुखीमुद्रया मनोजयः

**मनसो धारणादेव पवनो धारितो भवेत् ।**
**मनसः स्थापने हेतुरुच्यते द्विजपुङ्गव ॥ ११४ ॥**
**कारणानि समाहृत्य विषयेभ्यः समाहितः ।**
**अपानमूर्ध्वमा[1]कृष्येदुदरोपरि धारयेत् ॥ ११५ ॥**
**बध्नन्कराभ्यां श्रोत्रादिकरणानि [2]यथातथम् ।**
**[3]युञ्जानस्य यथोक्तेन [4]वर्त्मना स्ववशं मनः ॥ ११६ ॥**
**[5]मनोवशात्प्राणवायुः स्ववशे स्थाप्यते सदा ।**

मनःप्राणयोरविनाभावात् मनोवशार्थं षण्मुखीमुद्रां दर्शयति—**मनस इति** ॥ ११४ ॥ किं तत्? **कारणानि** इत्यादि ॥ ११५–११६ ॥ मनोवशतः प्राणोऽपि स्ववशो भवतीत्याह—**मन इति** ॥

प्राणगतिः

**नासिकापुटयोः प्राणः पर्यायेण प्रवर्तते ॥ ११७ ॥**
**तिस्रश्च नाडिकास्तासु स [6]यावन्तश्चरत्ययम् ।**
**शङ्खिनीविवरे याम्ये प्राणः प्राणभृतां सताम् ॥ ११८ ॥**
**[7]तावन्तं च पुनः कालं सौम्ये चरति संततम् ।**

[1] कृष्य उ—अ. [2] यथा तथा—क, अ २. [3] युञ्जानश्च—अ, अ १.
वर्तनात्—क, अ २. [5] मनश्चक्षुश्च वै—अ, अ १.
[6] यावन्तं च—क, अ २. यावन्नश्च—अ १.
[7] तावन्तश्च—अ, क, अ २.

प्राणगतिं विवृणोति—नासिकेति ॥ ११७ ॥ मूलाधारमारभ्य भ्रूमध्यान्तमिडापिङ्गळादिभेदेन तिस्रश्च इत्यादि । इडादिभेदेन तिस्रो नाडिकाः सन्ति । तासु सुषुम्नायां प्राणगतिः प्राणभृतां मध्ये सतां योगिनामेव भवति । अयोगिनां तु सोऽयं प्राणः शङ्खवत् अन्तर्गवर्तत्रयविशिष्टयं शङ्खिनी नासिका तस्या याम्ये विवरे पिङ्गळेतिविश्रुतदक्षिणनासापुटे यावन्तं कालं चरति ॥ ११८ ॥ पुनः तावन्तं कालं सौम्ये वामनासापुटे चरति । एवं प्राणगतिः पिङ्गळेडयोः सन्ततं भवतीत्यर्थः ॥

प्राणगतज्ञानेन योगावाप्तिः

इत्थं क्रमेण चरता वायुना वायुनिग्रहः ॥ ११९ ॥

अहश्च रात्रिं पक्षं च [1]मासं मत्वायनादिकम् ।

अन्तर्मुखो विजानीयात् [2]कालभेदं [3]समाहितः ॥ १२० ॥

अङ्गुष्ठादि[4]स्वावयवास्फुरणादर्शनैरपि ।

अरिष्टैर्जीवितस्यापि जानीयात्क्षयमात्मनः ॥ १२१ ॥

ज्ञात्वा यतेत कैवल्यप्राप्तये योगवित्तमः ।

पादाङ्गुष्ठे कराङ्गुष्ठे स्फुरणं यस्य नश्यति ॥ १२२ ॥

तस्य संवत्सरादूर्ध्वं [5]जीवितव्यक्षयो भवेत् ।

मणिबन्धे तथा गुल्फे स्फुरणं यस्य नश्यति ॥ १२३ ॥

षण्मासावधिरेतस्य जीवितस्य स्थितिर्भवेत् ।

[6]कूर्परास्फुरणं यस्य तस्य त्रैमासिकी स्थितिः ॥ १२४ ॥

[1] मासमृत्वय—मु. [2] कालभेदस्स—अ, अ १. [3] समाहितं—अ २.
[4] स्वावयवात्—क. स्वावयव—अ, अ १.
[5] जीवितस्य—क, अ, अ २. [6] कूर्परे—अ, क, अ २.

कक्षे मेहनपार्श्वे च स्फुरणानुपलम्भने ।
मासावधि[1]जीवितं स्यात् [2]तदर्धं सत्वदर्शने ॥ १२५ ॥
आश्रिते [3]जठरे द्वारे दिनानि दश जीवितम् ।
ज्योतिः खद्योतवद्यस्य तदर्धं तस्य जीवितम् ॥ १२६ ॥
जिह्वाग्रादर्शने त्रीणि दिनानि स्थितिरात्मनः ।
ज्वालाया दर्शने मृत्युर्द्विदिने भवति ध्रुवम् ॥ १२७ ॥
एवमादीन्यरिष्टानि दृष्ट्वाऽऽयुः[4]क्षरकारणम् ।
निःश्रेयसाय युञ्जीत जपध्यानपरायणः ॥ १२८ ॥
मनसा परमात्मानं ध्यात्वा तद्रूपतामियात् ।

यद्येवं वायुगतिज्ञो योगी भवति तदा स्वशास्त्रानुरोधेन स्वकालगतिं विदित्वा झटिति मानसं निःश्रेयसाय युञ्जन् अनात्मापह्नवसिद्धं परमात्मानं स्वमात्रमिति ज्ञात्वा तद्भावापन्नो भवेदित्याह---इत्थमिति ॥ ११९–१२० ॥ कालभेदज्ञानोपायमाह---अङ्गुष्ठादीत्यादिना ॥ १२१ ॥ स्ववाक्यं स्वयमेव विवृणोति---पादाङ्गुष्ठ इति ॥ १२२–१२८ ॥

मर्मस्थानेषु प्राणस्य प्रत्याहारः

यद्यष्टादशभेदेषु मर्मस्थानेषु धारणम् ॥ १२९ ॥
स्थानात्स्थानं समाकृष्य प्रत्याहारः स उच्यते ।
पादाङ्गुष्ठं तथा गुल्फं जङ्घामध्यं तथैव च ॥ १३० ॥
मध्यमूर्वोश्च मूलं च पायुर्हृदयमेव च ।
मेहनं देहमध्यं च नाभिं च गलकूपरम् ॥ १३१ ॥

[1] जीवितस्य—अ, क, अ १, अ २. [2] तदर्धस्य तु—अ.
[3] जठर—क, अ २. [4] क्षय—अ, क, अ १, अ २.

तालुमूलं च मूलं च घ्राणस्याक्ष्णोश्च मण्डलम् ।
भ्रुवोर्मध्यं ललाटं च मूलमूर्ध्वं च जानुनी ॥ १२२ ॥
मूलं च करयोर्मूलं महान्त्येतानि वै द्विज ।

प्रत्याहारप्रकारमाह—यदीति ॥ १२९ ॥ कानि मर्मस्थानानीत्यत आह—पादाङ्गुष्ठमिति । पादाङ्गुष्ठाद्यष्टादशस्थानेषु आरोहावरोहणक्रमेण प्राणं प्रत्याहरेदित्यर्थः ॥ १३०–१३२ ॥

धारणाप्रकारः

पञ्चभूतमये देहे भूतेष्वेतेषु पञ्चसु ॥ १३३ ॥
मनसो धारणं यत्तद्युक्तस्य च यमादिभिः ।
धारणा सा च संसारसागरोत्तारकारणम् ॥ १३४ ॥

सङ्क्षेपविस्ताराभ्यां धारणाप्रकारमाह—पञ्चेति । प्रविभक्तपञ्चभूतेषु ॥ १३३–१३४ ॥

देहावयवेषु पञ्चभूतधारणम्

आजानुपादपर्यन्तं पृथिवीस्थानमिष्यते ।
[1]पीतला चतुरस्रा च वसुधा वज्रलाञ्छिता ॥ १३५ ॥
स्मर्तव्या पञ्चघटिका तत्रारोप्य प्रभञ्जनम् ।
आजानुकटिपर्यन्तमपां स्थानं प्रकीर्तितम् ॥ १३६ ॥
अर्धचन्द्रसमाकारं श्वेतमर्जुनलाञ्छितम् ।
स्मर्तव्यमम्भः श्वसनमारोप्य दश[2]नाडिका ॥ १३७ ॥

[1] पित्तला—मु. [2] नाडिकां—क. नाडिकाः—अ.

आदेहमध्यकट्यन्तमग्निस्थानमुदाहृतम् ।
तत्र सिन्दूरवर्णोऽग्निर्ज्वलनं दश पञ्च च ॥ १३८ ॥
[1]स्मर्तव्या घटिका प्राणं कृत्वा कुम्भे तथेरितम् ।
नाभेरुपरि नासान्तं वायुस्थानं तु तत्र वै ॥ १३९ ॥
वेदिकाकारवद्धूम्रो बलवान्भूतमारुतः ।
स्मर्तव्यः कुम्भकेनैव प्राणमारोप्य मारुतम् ॥ १४० ॥
घटिकाविंशतिस्तस्माद् [2]घ्राणाद्ब्रह्मबिलावधि ।
व्योमस्थानं नभस्तत्र भिन्नाञ्जनसमप्रभम् ॥ १४१ ॥
[3]व्योम्नि मारुतमारोप्य कुम्भकेनैव यत्नवान् ।

स्वदेहावयवे पृथिव्यादिपञ्चभूतधारणं तत्फलं चाह—आजान्विति ॥ १३९ ॥ एवं पृथिव्यादिपञ्चभूतधारणात् पञ्चभूतभौतिकजयः । तत्र मृत्युरपि न विद्यते इत्यर्थः । अबादिधारणाक्रममाह—आजान्विति ॥ १३६–१४१ ॥

पृथिव्यादिषु अनिरुद्धादिध्यानं तत्फलं च

पृथिव्यंशे तु देहस्य चतुर्बाहुं किरीटिनम् ॥ १४२ ॥
अनिरुद्धं हरिं योगी यतेत भवमुक्तये ।
अबंशे पूरयेद्योगी नारायणमुदग्रधीः ॥ १४३ ॥
प्रद्युम्नमग्नौ वाय्वंशे संकर्षणमतः परम् ।
व्योमांशे परमात्मानं वासुदेवं सदा स्मरेत् ॥ १४४ ॥
अचिरादेव तत्प्राप्तिर्युञ्जानस्य न संशयः ।

[1] स्मर्तव्या नाडिका—अ, क, अ १, अ २. [2] प्राणा—अ १.
[3] ध्येयं मारुत—अ, अ १.

एवं आदौ पञ्चभूतधारणां कृत्वा अथ पृथिव्याद्यंशेषु अनिरुद्धादीन् ध्यायेदित्याह- पृथिवीति ॥ १४२-१४४ ॥ ध्यानफलमाह— अचिरादिति ॥

परमात्मध्यानं तत्फलं च

बद्ध्वा योगासनं पूर्वं हृद्देशे हृदयाञ्जलिः ॥ १४५ ॥
नासाग्रन्यस्तनयनो जिह्वां कृत्वा च तालुनि ।
दन्तैर्दन्तानसंस्पृश्य ऊर्ध्वकायः समाहितः ॥ १४६
संयमेच्चेन्द्रियग्राम[1]मात्मबुद्ध्या विशुद्धया ।
चिन्तनं वासुदेवस्य परस्य परमात्मनः ॥ १४७ ॥
स्वरूपव्याप्तरूपस्य ध्यानं कैवल्यसिद्धिदम् ।
याममात्रं वासुदेवं चिन्तयेत्कुम्भकेन यः ॥ १४८ ।
सप्तजन्मार्जितं पापं तस्य नश्यति योगिनः ।

परमात्मध्यानोपायं तत्फलं चाह—बद्ध्वेति ॥ १४५-१४७ ॥ एवं ध्यानावान्तरफलमाह—याममिति ॥ १४८ ॥ पापं तदुपलक्षितागाम्यादि-कर्मत्रयम् ॥

तुरीयातीतं वासुदेवचैतन्यम्

नाभिकन्दात्समारभ्य यावद्धृदयगोचरम् ॥ १४९ ॥
जाग्रद्वृत्तिं विजानीयात्कण्ठस्थं स्वप्नवर्तनम् ।
सुषुप्तं तालुमध्यस्थं तुर्यं भ्रूमध्यसंस्थितम् ॥ १५० ॥

[1] मात्र—उ.

तुर्यातीतं परं ब्रह्म ब्रह्मरन्ध्रे तु लक्षयेत् ।
जाग्रद्वृत्तिं समारभ्य यावद्ब्रह्मबिलान्तरम् ॥ १९१ ॥
तत्रात्माऽयं [1]तुरीयः स्यात् [2]तुर्यान्ते विष्णुरुच्यते ।

वासुदेवापेक्षया तुर्यातीतं भिन्नं इत्याशङ्क्य तुर्यातीतभूमिकाप्रदर्शनपूर्वकं वासुदेवचैतन्यमेव तुर्यातीतमित्याह—नाभीति ॥ १४९ ॥ ब्रह्मरन्ध्राद्यसम्भवप्रबोधतः तुर्यातीतमेव विष्णुतत्त्वं नेतरदित्यर्थः ॥ १९०–१९१ ॥

सगुणध्यानम्

ध्यानेनैव समायुक्तो व्योम्नि चात्यन्तनिर्मले ॥ १९२ ॥
सूर्यकोटिद्युतिधरं नित्योदितमधोक्षजम् ।
हृदयाम्बुरुहासीनं ध्यायेद्वा विश्वरूपिणम् ॥ १९३ ॥
अनेकाकारखचितमनेकवदनान्वितम् ।
अनेकभुजसंयुक्तमनेकायुधमण्डितम् ॥ १९४ ॥
नानावर्णधरं देवं शान्तमुग्रमुदायुधम् ।
अनेकनयनाकीर्णं सूर्यकोटिसमप्रभम् ॥ १९५ ॥
ध्यायतो योगिनः सर्वमनोवृत्तिर्विनश्यति ।

सगुणनिर्गुणध्यानप्रकारमाह—ध्यानेनेति ॥ १९२ ॥ ध्यायेत् यद्वा विराजं विश्वरूपिणम ॥ १९३ ॥ अनेकाकारखचितं स्थिरचरात्मकमित्यर्थः ॥ १९४–१९५ ॥ वैराजपदध्यानफलमाह—ध्यायत इति । वैराजपदध्यानारूढमनसः विराजो विभुत्वेन तत्रैव पर्यवसन्नत्वात् मनो मनस्त्वं विहाय वैराजपदमेव भजतीत्यर्थः ॥

[1] तु तुर्यस्य—क, अ २, तुरीयस्य—अ, अ १. [2] कथान्ते—अ, अ १.

निर्गुणध्यानम्

हृत्पुण्डरीकमध्यस्थं [1]चैतन्यज्योतिरव्ययम् ॥ १९६ ॥
कदम्बगोलकाकारं तुर्यातीतं परात्परम् ।
अनन्तमानन्दमयं चिन्मयं भास्करं विभुम् ॥ १९७ ॥
निवातदीपसदृशमकृत्रिममणिप्रभम् ।
ध्यायतो योगिनस्तस्य मुक्तिः करतले स्थिता ॥ १९८ ॥

निर्गुणध्यानमाह— हृदिति ॥ हृत्पुण्डरीकमध्ये प्रत्यग्रूपेण तिष्ठतीति **हृत्पुण्डरीकमध्यस्थम्** । हृत्सम्बन्धात् जडत्वप्रसक्तौ **चैतन्यज्योतिः**। तस्य स्वाश्रयनाशात् व्ययप्रसक्तौ **अव्ययम्** ॥ १९६ ॥ कदम्बगोळकवत् आकारो यस्य सहस्राग्रस्य तत् **कदम्बगोळकाकारम्** । "तुरीयं मूर्ध्नि संस्थितम्" इति श्रुत्यनुरोधेन तत्र उपलभ्यमानतुरीयस्य तदाकृतित्वं युज्यत एवेत्यर्थः । तदुपाध्यभावे तदेव **तुरीयातीतं परात्** तुरीयादपि **परं, अनन्तं** परिच्छेदत्रयाभावात्, "देशतः कालतो वस्तुतः परिच्छेदरहितं ब्रह्म" इति श्रुतेः । **आनन्दमयं**, परमानन्दस्वरूपत्वात । **चिन्मयं**, चिन्मात्रत्वात् । खद्योतादिसूर्यान्तभासामपि भासकाकारत्वात **भास्करम्** । विद्वद्दृष्ट्या ब्रह्ममात्रं भवतीति **विभुम्** ॥ १९७ ॥ **निवातदीपसदृशं**, आकाशवदचलत्वात् । **अकृत्रिम-कौस्तुभादिमणिप्रभं** प्रकाशमात्रमित्यर्थः । य एवंविशेषणविशिष्टं ब्रह्म स्वमात्रधिया ध्यायति तस्य एवं **ध्यायतो योगिनो मुक्तिः** विदेहमुक्तिः **करे स्थिता**, तद्भावापन्नत्वात् इत्यर्थः ॥ १९८ ॥

सविशेषज्ञानस्यापि मुक्तिहेतुत्वम्

विश्वरूपस्य देवस्य रूपं यत्किंचिदेव हि ।
स्वीयः सूक्ष्ममन्यद्वा पश्यन्हृदयपङ्कजे ॥ १९९ ॥

[1] वैतानज्योति—अ, अ १.

ध्यायतो योगिनो यस्तु साक्षादेव प्रकाशते ।
अणिमादिफलं चैव सुखेनैवोपजायते ॥ १६० ॥
जीवात्मनः परस्यापि यद्येवमुभयोरपि ।
अहमेव परंब्रह्म ब्रह्माहमिति संस्थितिः ॥ १६१ ॥
समाधिः स तु विज्ञेयः सर्ववृत्तिविवर्जितः ।
ब्रह्म संपद्यते योगी न भूयः संसृतिं व्रजेत् ॥ १६२ ॥
एवं विशोध्य तत्त्वानि योगी निःस्पृहचेतसा ।
यथा निरिन्धनो वह्निः स्वयमेव प्रशाम्यति ॥ १६३ ॥
ग्राह्याभावे मनःप्राणो निश्चयज्ञानसंयुतः ।
शुद्धसत्त्वे परे लीनो जीवः सैन्धवपिण्डवत् ॥ १६४ ॥
मोहजालक[1]संघातं विश्वं पश्यति स्वप्नवत् ।
सुषुप्तिवद्यश्चरति स्वभावपरि[2]निश्चलः ॥ १६५ ॥
निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते ॥

इत्युपनिषत् ॥

निर्विशेषज्ञानिन एव मुक्तिः न हि सविशेषज्ञानिनः इत्याशङ्क्य सविशेषज्ञानस्य निर्विशेषज्ञानहेतुतया तस्यापि मुक्तिहेतुत्वं सिद्धं इत्याह—विश्वरूपस्येति ॥ १५९ ॥ अणिमादिफलं सकामस्येत्यर्थः । यदि निष्कामः तदा तस्य प्रत्यगभिन्नब्रह्मनिर्विकल्पकसमाधिः स्यादिति ॥ १६० ॥ समाधिलक्षणमप्याह—जीवेति । अब्रह्मत्वानात्मत्वप्रसक्तौ तन्निरसनाय तयोः एकत्वप्रबोधाय च व्यतिहारेण अहमेव परं ब्रह्म ब्रह्माहमिति प्रत्यगभिन्नब्रह्मरूपेण

[1] सङ्घातो—अ, अ १. [2] निश्चयः—अ, अ १.

अवस्थानासंप्रज्ञातनिर्विकल्पकसमाधिः । एवं निर्विकल्पकसमाधिबलात् पराक्सापेक्षप्रत्यगभिन्नब्रह्मगतविशेषासम्भवप्रबोधसिद्धं ब्रह्म संपद्यते ॥ १६१–१६२ ॥ केन ब्रह्म सम्पद्यते इत्यत्र—एवं इति । स्वातिरिक्तस्पृहाविरळचेतसा ब्रह्म सम्पद्यते इत्यर्थः । मनआदिकरणग्रामे सति ब्रह्मसम्पत्तिः कुत इत्याशङ्क्य निष्प्रतियोगिकब्रह्ममात्रप्रबोधसमकालं आभासतो वाऽपि करणग्रामोऽस्तीति यदि भ्रान्तिः तदा तच्छान्तिः भवेदिति सदृष्टान्तमाह—यथेति । प्रशाम्यते शाम्यति ॥ १६३ ॥ कुतः ? स्वातिरेकेण ग्राह्याभावे प्राणोपाधिकः शुद्धसत्त्वे परे लीनो जीवः सल्लिसैन्धवपिण्डवत् जीवभावं विहाय ब्रह्मीभूतो भवतीत्यर्थः ॥ १६४ ॥ यदि स्वातिरिक्तविश्वस्फूर्तिः स्यात् तदा तत्स्फूर्त्तौ मोह इत्यादि । तदस्फूर्त्तौ सुषुप्तिवद्यश्चरति सः स्वभावपरिनिश्चलः ॥ १६५ ॥ स्वातिरिक्तविश्वस्फूर्त्यपह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रतया अवस्थानं यत् तत् निर्वाणपदम् । एवं ब्रह्ममात्रज्ञानयोगी ज्ञानसमकालं कैवल्यरूपेण अवशिष्यते इत्यर्थः । इत्युपनिषच्छब्दः त्रिशिखिब्राह्मणोपनिषत्समाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
प्रकृतोपनिषद्व्याख्या लिखिता स्फुटतो लघु ॥
प्रकृतोपनिषद्व्याख्या षष्ट्युत्तरशतत्रयम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चतुश्चत्वारिंशत्सङ्ख्यापूरकं त्रिशिखिब्राह्मणोपनिषद्विवरणं सम्पूर्णम्

# दर्शनोपनिषत्

आप्यायन्तु—इति शान्तिः

जीवन्मुक्तिसाधनं अष्टाङ्गयोगः

दत्तात्रेयो महायोगी भगवान्भूतभावनः ।
चतुर्भुजो महाविष्णुर्योगसाम्राज्यदीक्षितः ॥ १ ॥
तस्य शिष्यो मुनिवरः सांकृतिर्नाम भक्तिमान् ।
पप्रच्छ गुरुमेकान्ते प्राञ्जलिर्विनयान्वितः ॥ २ ॥
भगवन्ब्रूहि मे योगं साष्टाङ्गं सप्रपञ्चकम् ।
येन विज्ञानमात्रेण जीवन्मुक्तो भवाम्यहम् ॥ ३ ॥
सांकृते शृणु वक्ष्यामि योगं साष्टाङ्गदर्शनम् ।

यमाद्यष्टाङ्गयोगेन्द्रब्रह्ममात्रप्रबोधतः ।
योगिनो यत्पदं यान्ति तत्कैवल्यपदं भजे ॥

इह खलु सामवेदप्रविभक्तेयं दर्शनोपनिषत् निर्विशेषब्रह्मज्ञानसहकृतयमाद्यष्टाङ्गयोगप्रकटनव्यग्रा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । साङ्कृतिदत्तात्रेयप्रश्नप्रतिवचनरूपेयं आख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—**दत्तात्रेय** इति ॥ १-२ ॥ किमिति ? **भगवन्** इत्यादि ॥ ३ ॥ साङ्कृतिना एवं पृष्टो भगवानाह—**साङ्कृत** इति ॥

अष्टाङ्गोद्देशः

यमश्च नियमश्चैव तथैवासनमेव च ॥ ४ ॥
प्राणायामस्तथा ब्रह्मन्प्रत्याहारस्ततः परम् ।
धारणा च तथा ध्यानं समाधिश्चाष्टमं मुनें ॥ ५ ॥

अष्टाङ्गानि कानीत्यत आह—यमश्चेति ॥ ४–५ ॥

दशविधयमः

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयाऽऽर्जवम् ।
क्षमा धृतिर्मिताहारः शौचं चेति यमा दश ॥ ६ ॥

दशधा भिन्नयमावयवमाह—अहिंसेति ॥ ६ ॥

अहिंसा

वेदोक्तेन प्रकारेण विना सत्यं तपोधन ।
कायेन मनसा वाचा हिंसा हिंसा न चान्यथा ॥ ७ ॥
आत्मा सर्वगतोऽच्छेद्यो न ग्राह्य इति या मतिः ।
सा चाहिंसा वरा प्रोक्ता मुने वेदान्तवेदिभिः ॥ ८॥

उपायोपेयभेदेन अहिंसादिदशयमलक्षणमाह—वेदेति । वेदोक्तयज्ञीयपश्वादिहिंसा अहिंसैवेत्यर्थः ॥ ७ ॥ यद्वा—आत्मेत्यादि ॥ ८ ॥

सत्यम्

चक्षुरादीन्द्रियैर्दृष्टं श्रुतं घ्रातं मुनीश्वर ।
तस्यैवोक्तिर्भवेत्सत्यं विप्र तन्नान्यथा भवेत् ॥ ९ ॥

सर्वं सत्यं [1]वरं ब्रह्म न चान्यदिति या मतिः ।
तच्च सत्यं वरं प्रोक्तं वेदान्तज्ञानपारगैः ॥ १० ॥

उपायोपेयसत्यलक्षणं तु—चक्षुरित्यादि ॥ ९–२९ ॥

अस्तेयम्

अन्यदीये तृणं रत्ने काञ्चने मौक्तिकेऽपि च ।
[2]मनसा विनिवृत्तिर्या तदस्तेयं विदुर्बुधाः ॥ ११ ॥
आत्मन्यनात्मभावेन व्यवहारविवर्जितम् ।
यत्तदस्तेयमित्युक्तमात्मविद्भिर्महा[3]मुने ॥ १२ ॥

ब्रह्मचर्यम्

कायेन वाचा मनसा स्त्रीणां परिविवर्जनम् ।
ऋतौ भार्यां तदा [4]स्वस्य ब्रह्मचर्यं तदुच्यते ॥ १३ ॥
ब्रह्मभावे मनश्चारं ब्रह्मचर्यं परन्तप ।

दया

स्वात्मवत्सर्वभूतेषु कायेन मनसा गिरा ॥ १४ ॥
अनुज्ञा या दया सैव प्रोक्ता वेदान्तवेदिभिः ।

आर्जवम्

पुत्रे मित्रे कलत्रे च रिपौ स्वात्मनि संततम् ॥ १५ ॥
एकरूपं [5]मुने यत्तदार्जवं प्रोच्यते मया ।

[1] परं—अ, क. [2] मनसाऽपिनि—अ. [3] मते—क, अ, अ १.
[4] तस्य—अ १, क. [5] मनो—अ.

क्षमा

कायेन मनसा वाचा शत्रुभिः परिपीडिते ॥ १६ ॥
बुद्धिक्षोभनिवृत्तिर्या क्षमा सा मुनिपुङ्गव ।

धृतिः

वेदादेव विनिर्मोक्षः संसारस्य न चान्यथा ॥ १७ ॥
इति विज्ञाननिष्पत्तिर्धृतिः प्रोक्ता हि वैदिकैः।
अहमात्मा न चान्योऽस्मीत्येवमप्रच्युता मतिः ॥ १८ ॥

मिताहारः

अल्पमृष्टाशनाभ्यां च चतुर्थांशावशेषकम् ।
[1]तस्माद्योगानुगुण्येन भोजनं मितभोजनम् ॥ १९ ॥

शौचम

स्वदेहमलनिर्मोक्षो मृज्जलाभ्यां महामुने ।
यत्तच्छौचं भवेद्बाह्यं मानसं मननं विदुः ॥ २० ॥
अहं शुद्ध इति ज्ञानं शौचमाहुर्मनीषिणः ।
अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः ॥ २१ ॥
उभयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते ।
ज्ञानशौचं परित्यज्य बाह्ये यो रमते नरः ॥ २२ ॥
स मूढः काञ्चनं त्यक्त्वा लोष्टं गृह्णाति सुव्रत ।

[1] यत्तयो—अ.

ब्रह्मात्मवेदनविधिः

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ॥ २३ ॥
न चास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित् ।
लोकत्रयेऽपि कर्तव्यं किंचिन्नास्त्यात्मवेदिनाम् ॥ २४ ॥
तस्मात्सर्वप्रयत्नेन मुनेऽहिंसादिसाधनैः ।
आत्मानमक्षरं ब्रह्म विद्धि [1]ज्ञानात्तु वेदनात् ॥ २५ ॥

इति प्रथमः खण्डः

दशविधनियमः

तपः संतोषमास्तिक्यं दानमीश्वरपूजनम् ।
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम् ॥ १ ॥
एते च नियमाः प्रोक्तास्तान्वक्ष्यामि क्रमाच्छृणु ।

दशधा भिन्ननियमावयवानाह—तप इति ॥ १ ॥

तपः

वेदोक्तेन प्रकारेण कृच्छ्रचान्द्रायणादिभिः ॥ २ ॥
शरीरशोषणं यत्तत्तप इत्युच्यते बुधैः ।
को वा मोक्षः कथं [2]केन संसारं प्रतिपन्नवान् ॥ ३ ॥
इत्या[3]लोकनमर्थज्ञास्तपः शंसन्ति पण्डिताः ।

उपायोपेयभेदेन तपआदिनियमलक्षणमाह—वेदेति ॥ २–१० ॥

[1] ज्ञानात्म—अ, [2] तेन—उ, [3] लोचन—अ २, क.

सन्तोषः

अदृच्छालाभतो नित्यं प्रीतिर्या जायते नृणाम् ॥ ४ ॥
तत्संतोषं विदुः प्राज्ञाः परिज्ञानैकतत्पराः ।
[1]ब्रह्मावलोकपर्यन्ताद्विरक्त्या यल्लभेत्प्रियम् ॥ ५ ॥
सर्वत्र विगतस्नेहः संतोषं परमं विदुः ।

आस्तिक्यम्

श्रौते स्मार्ते च विश्वासो [2]यत्तदास्तिक्यमुच्यते ॥ ६ ॥

दानम्

न्यायार्जितधनं श्रान्ते श्रद्धया वैदिके जने ।
अन्यद्वा [3]यत्प्रदीयन्ते तद्दानं प्रोच्यते मया ॥ ७ ॥

ईश्वरपूजनम्

रागाद्यपेतं हृदयं वागदुष्टाऽनृतादिना ।
हिंसादिरहितं कर्म यत्तदीश्वरपूजनम् ॥ ८ ॥

सिद्धान्तश्रवणम्

सत्यं ज्ञानमनन्तं च परानन्दं परं ध्रुवम् ।
प्रत्यगित्यवगन्तव्यं वेदान्तश्रवणं [4]बुधः ॥ ९ ॥

[1] ब्रह्मादि—उ. [2] यस्तदा—अ, अ १.
[3] यत्प्रदीयेत—अ. यत्प्रतीयन्ते—उ १. [4] बुधाः—अ, अ १, अ २. बुध—क.

ह्रीः

वेदलौकिकमार्गेषु कुत्सितं कर्म यद्भवेत् ।
तस्मिन्भवति या लज्जा ह्रीः सैवेति प्रकीर्तिता ॥ १० ॥

मतिः

वैदिकेषु च सर्वेषु श्रद्धा या सा मतिर्भवेत् ।
गुरुणा चोपदिष्टोऽपि [1]तत्र संबन्धवर्जितः ॥ ११ ॥

वेदविरुद्धमार्गः गुरुणा उपदिष्टोऽपि तत्र संबन्धवर्जितः सन वेदोक्तानुष्ठानमेव कुर्यादित्यर्थः ॥ ११–१६ ॥

जपः

वेदोक्तेनैव मार्गेण मन्त्राभ्यासो जपः स्मृतः ।
कल्पसूत्रे यथा वेदे धर्मशास्त्रे पुराणके ॥ १२ ॥
इतिहासे च वृत्तिर्या स जपः प्रोच्यते मया ।
जपस्तु द्विविधः प्रोक्तो वाचिको मानसस्तथा ॥ १३ ॥
वाचिकोपांशुरुच्चैश्च द्विविधः परिकीर्तितः ।
मानसो मननध्यानभेदाद्वैविध्यमाश्रितः ॥ १४ ॥
उच्चैर्जपादुपांशुश्च सहस्रगुणमुच्यते ।
मानसश्च तथोपांशोः सहस्रगुणमुच्यते ॥ १५ ॥

[1] तन्त्र—अ.

उच्चैर्जपश्च सर्वेषां यथोक्तफलदो भवेत् ।
नीचैः श्रोत्रेण चेन्मन्त्रः [1]श्रुतश्चेन्निष्फलं भवेत् ॥ १६ ॥

इति द्वितीयः खण्डः

आसनानि नव

स्वस्तिकं गोमुखं पद्मं वीरसिंहासने तथा ।
भद्रं मुक्तासनं चैव मयूरासनमेव च ॥ १ ॥
सुखासनसमाख्यं च नवमं मुनिपुङ्गव ।

यमनियमलक्षणमुक्त्वा आसनलक्षणमाह---स्वस्तिकमिति ॥ १–१४ ॥

स्वस्तिकम्

जानूर्वोरन्तरे कृत्वा सम्यक् पादतले उभे ॥ २ ॥
समग्रीवशिरःकायः स्वस्तिकं नित्यमभ्यसेत् ।

गोमुखम्

सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ॥ ३ ॥
दक्षिणेऽपि तथा सव्यं गोमुखं तत्प्रचक्षते ।

पद्मम्

अङ्गुष्ठावधि गृह्णीयाद्धस्ताभ्यां व्युत्क्रमेण तु ॥ ४ ॥
ऊर्वोरुपरि विप्रेन्द्र कृत्वा पादतलद्वयम् ।
पद्मासनं भवेत्प्राज्ञ सर्वरोगभयापहम् ॥ ५ ॥

[1] श्रुतःस्याच्चेन्निष्फलो---अ. श्रुतं चे---क, अ २.

देहमध्यं विजानीहि मनुजानां तु सांकृते ।
कन्दस्थानं मुनिश्रेष्ठ मूलाधारान्नवाङ्गुलम् ॥ ३ ॥
चतुरङ्गुलमायामविस्तारं मुनिपुङ्गव ।
कुक्कुटाण्डवदाकारं भूषितं तु त्वगादिभिः ॥ ४ ॥
तन्मध्ये नाभिरित्युक्तं योगज्ञैर्मुनिपुङ्गव ।

प्राणायामस्य नाडीपुञ्जदेहप्राणनिर्वर्त्यत्वेन देहतत्कार्येयत्तापरिज्ञानं विन प्राणायामसिद्धिः न स्यादिति देहनाडीप्राणेयत्तां प्रपञ्चयति—शरीरमिति शिखिस्थानं अग्निस्थानम् ॥ १–१० ॥

नाडीपरिगणनम्

कन्दमध्यस्थिता नाडी सुषुम्नेति प्रकीर्तिता ॥ ५ ॥
तिष्ठन्ति परितस्तस्य नाडयो मुनिपुङ्गव ।
द्विसप्ततिसहस्राणि तासां मुख्याश्चतुर्दश ॥ ६ ॥
सुषुम्ना पिङ्गला तद्वदिडा चैव सरस्वती ।
पूषा च वरुणा चैव हस्तिजिह्वा यशस्विनी ॥ ७ ॥
अलम्बुसा कुहूश्चैव विश्वोदारा पयस्विनी ।
शङ्खिनी चैव गान्धारा इति मुख्याश्चतुर्दश ॥ ८ ॥
आसां मुख्यतमास्तिस्रस्तिसृष्वेकोत्तमोत्तमा ।
ब्रह्मनाडीति सा प्रोक्ता मुने वेदान्तवेदिभिः ॥ ९ ॥
पृष्ठमध्यस्थितेनास्था वीणादण्डेन सुव्रत ।
सह मस्तकपर्यन्तं सुषुम्ना सुप्रतिष्ठिता ॥ १० ॥

कुण्डल्याः स्थानं स्वरूपं च

नाभिकन्दादधः स्थानं कुण्डल्या व्यङ्गुलं मुने ।
अष्टप्रकृतिरूपा सा कुण्डली मुनिसत्तम ॥ ११ ॥
यथावद्वायुचेष्टां च जलान्नादीनि नित्यशः ।
परितः कन्दपार्श्वेषु निरुध्यैव सदा स्थिता ॥ १२ ॥
स्वमुखेन [1]सदाऽऽवेष्टच ब्रह्मरन्ध्रमुखं मुने ।

कुण्डलिनीस्थानं तत्स्वरूपं चाह— नाभीति । पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यहङ्काररूपिण्यः अष्टौ प्रकृतयः ॥ ११–१२ ॥

नाडीस्थानानि

सुषुम्नाया इडा मध्ये दक्षिणे पिङ्गला स्थिता ॥ १३ ॥
सरस्वती कुहूश्चैव सुषुम्नापार्श्वयोः स्थिते ।
गान्धारा हस्तिजिह्वा च इडायाः पृष्ठपूर्वयोः ॥ १४ ॥
पूषा यशस्विनी चैव पिङ्गलापृष्ठपूर्वयोः ।
कुहोश्च हस्तिजिह्वाया मध्ये विश्वोदरा स्थिता ॥ १५ ॥
यशस्विन्याः कुहोर्मध्ये वरुणा सुप्रतिष्ठिता ।
पूषायाश्च सरस्वत्या मध्ये प्रोक्ता यशस्विनी ॥ १६ ॥
गान्धारायाः सरस्वत्या मध्ये प्रोक्ता च शङ्खिनी ।
अलम्बुसा स्थिता पायुपर्यन्तं कन्दमध्यगा ॥ १७ ॥
पूर्वभागे सुषुम्नाया राकायाः संस्थिता कूहूः ।
अधश्चोर्ध्वं स्थिता नाडी [2]याम्यनासान्तमिष्यते ॥ १८ ॥

[1] समावेष्टय—क, अ २. [2] वामना—अ, अ १.

इडा तु सव्यनासान्तं संस्थिता मुनिपुङ्गव ।
यशस्विनी च वामस्य पादाङ्गुष्ठान्तमिष्यते ॥ १९ ॥
पूषा वामाक्षिपर्यन्ता पिङ्गलायास्तु पृष्ठतः ।
पयस्विनी च याम्यस्य कर्णान्तं प्रोच्यते बुधैः ॥ २० ॥
सरस्वती तथा [1]चोर्ध्वं गता जिह्वा तथा मुने ।
हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्तमिष्यते ॥ २१ ॥
शङ्खिनी नाम या नाडी सव्यकर्णान्तमिष्यते ।
गान्धारा सव्यनेत्रान्ता प्रोक्ता वेदान्तवेदिभिः ॥ २२ ॥
विश्वोदराभिधा नाडी कन्दमध्ये व्यवस्थिता ।

सुषुम्नानाडीपरितः प्रधाननाड्यः तिष्ठन्तीत्याह—**सुषुम्नाया** इति ॥ १३–२२ ॥

नाडीषु वायुसञ्चारः

प्राणोऽपानस्तथा व्यानः समानोदान एव च ॥ २३ ॥
नागः कूर्मश्च कृकरो देवदत्तो धनंजयः ।
एते नाडीषु सर्वासु चरन्ति दश वायवः ॥ २४ ॥
तेषु प्राणादयः पञ्च मुख्याः पञ्चसु सुव्रत ।
प्राणसंज्ञस्तथाऽपानः पूज्यः प्राणस्योर्मुने ॥ २५ ॥
आस्यनासिकयोर्मध्ये नाभिमध्ये तथा हृदि ।
प्राणसंज्ञोऽनिलो नित्यं वर्तते मुनिसत्तम ॥ २६ ॥

[1] चोर्ध्वगा जिह्वान्तं स्थिता मुने—क, अ २. चोर्ध्वानाजिह्वायास्तथा मुने—अ १. चोर्ध्वाजिह्वायाश्च तथा मुने—अ.

अपानो वर्तते नित्यं गुद[1]मध्योरुजानुषु ।
उदरे सकले कट्यां नाभौ जङ्घे च सुव्रत ॥ २७ ॥
व्यानः श्रोत्राक्षिमध्ये च ककुद्ग्रीवां गुल्फयोरपि ।
प्राणस्थाने गले चैव वर्तते मुनिपुङ्गव ॥ २८ ॥
उदानसंज्ञो विज्ञेयः पादयोर्हस्तयोरपि ।
समानः सर्वदेहेषु व्याप्य तिष्ठत्य[2]संशयः ॥ २९ ॥
नागादिवायवः पञ्च त्वगस्थ्यादिषु संस्थिताः ।

एवमुक्तासु नाडीषु प्राणादयश्चरन्तीत्याह—प्राण इति ॥ २३–२६ ॥ उदरे सकले यावदुदरे । जङ्घे जङ्घायां ॥ २७–२९ ॥

वायुव्यापाराः

निःश्वासोच्छ्वासकामाश्च प्राणकर्म हि सांकृते ॥ ३० ॥
अपानाख्यस्य वायोस्तु विण्मूत्रादिविमर्जनम् ।
समानः सर्वसामीप्यं करोति मुनिपुङ्गव ॥ ३१ ॥
उदान ऊर्ध्वगमनं करोत्येव न संशयः ।
व्यानो [3]विवादकृत् प्रोक्तो मुने वेदान्तवेदिभिः ॥ ३२ ॥
उद्गारादिगुणः प्रोक्तो नागाख्यस्य महामुने ।
धनंजयस्य शोभादि कर्म प्रोक्तं हि सांकृते ॥ ३३ ॥
निमीलनादि कूर्मस्य क्षुधा तु कृकरस्य च ।
देवदत्तस्य विप्रेन्द्र तन्द्रीकर्म प्रकीर्तितम् ॥ ३४ ॥

प्राणादिदशवायुव्यापारानाह—निःश्वासेति ॥ ३०–३४ ॥

[1] मेढ्रोरु—क, अ २. [2] संशयम्—अ. [3] विनाद—क.

नाडीदेवताः

सुषुम्नायाः शिवो देव इडाया देवता हरिः ।
पिङ्गलाया विरिञ्चः स्यात् सरस्वत्या विराण्मुने ॥ ३५ ॥
पूषाऽधिदेवता प्रोक्तो वरुणा वायुदेवता ।
हस्तिजिह्वाभिधायास्तु वरुणो देवता भवेत् ॥ ३६ ॥
यशस्विन्या मुनिश्रेष्ठ भगवान् भास्करस्तथा ।
अलम्बु[1]माया अत्रात्मा वरुणः परिकीर्तितः ॥ ३७ ॥
कुहोः क्षुद्देवता प्रोक्ता गान्धारी चन्द्रदेवता ।
शङ्खिन्याश्चन्द्रमास्तद्वत् पयस्विन्याः प्रजापतिः ॥ ३८ ॥
विश्वोदराभिधायास्तु भगवान् पावकः पतिः ।

सुषुम्नादिचतुर्दशनाडीदेवताभेदमाह सुषुम्नाया इति ॥ ३५--३८ ॥

नाडीषु चन्द्रसूर्यसञ्चारः

इडायां चन्द्रमा नित्यं चरत्येव महामुने ॥ ३९ ॥
पिङ्गलायां रविस्तद्वन्मुने वेदविदां वर ।

सदेडापिङ्गळयोश्चन्द्रसूर्यौ चरतः इत्याह-- --इडायामिति ॥ ४० ॥

नाडीषु संवत्सरात्मकप्राणसूर्यसञ्चारः

पिङ्गलाया इडायां तु वायोः संक्रमणं तु यत् ॥ ४० ॥
तदुत्तरायणं प्रोक्तं मुने वेदान्तवेदिभिः ।
इडायाः पिङ्गलायां तु प्राणसंक्रमणं मुने ॥ ४१ ॥

[1] षाधमन्यात्मा—अ, अ १.

दक्षिणायनमित्युक्तं पिङ्गलायामिति श्रुतिः ।
इडापिङ्गलयोः संधिं यदा प्राणः समागतः ॥ ४२ ॥
अमावास्या तदा प्रोक्ता देहे देहभृतां वर ।
मूलाधारं यदा प्राणः प्रविष्टः पण्डितोत्तम ॥ ४३ ॥
तदाद्यं विषुवं प्रोक्तं तापसैस्तापसोत्तम ।
प्राणसंज्ञो मुनिश्रेष्ठ मूर्धानं [1]प्राविशद्यदा ॥ ४४ ॥
तदन्त्यं विषुवं प्रोक्तं तापसैस्तत्त्वचिन्तकैः ।
निःश्वासोच्छ्वासनं सर्वं मासानां संक्रमो भवेत् ॥ ४५ ॥
[2]इडया कुण्डलीस्थानं यदा प्राणः समागतः ।
सोमग्रहणमित्युक्तं तदा तत्त्वविदां वर ॥ ४६ ॥
यदा पिङ्गलया प्राणः कुण्डलीस्थानमागतः ।
तदातदा भवेत् सूर्यग्रहणं मुनिपुङ्गव ॥ ४७ ॥

संवत्सरात्मकप्राणसूर्यस्य नाडीगशिसञ्चारतो दिनपक्षमासायनादिग्रहणादिः भवतीत्याह—पिङ्गलाया इति ॥ ४१–४७ ॥

अन्तस्तीर्थप्राशस्त्यम्

श्रीपर्वतं शिरःस्थाने केदारं तु ललाटके ।
वाराणसीं महाप्राज्ञ भ्रुवोर्घ्राणस्य मध्यमे ॥ ४८ ॥
कुरुक्षेत्रं कुचस्थाने प्रयागं हृत्सरोरुहे ।
चिदम्बरं तु हृन्मध्ये आधारे कमलालयम् ॥ ४९ ॥

[1] प्रविशेद्यदा—अ. [2] इडायाः—अ, अ १, अ २.

आत्मतीर्थं समुत्सृज्य बहिस्तीर्थानि यो व्रजेत् ।
करस्थं स महारत्नं त्यक्त्वा काचं विमार्गते ॥ ९०॥
भावतीर्थं परं तीर्थं प्रमाणं सर्वकर्मसु ।
अन्यथाऽऽलिङ्ग्यते कान्ता [1]अन्यथाऽऽलिङ्ग्यते सुता ॥ ९१ ॥
तीर्थानि तोयपूर्णानि देवान् काष्ठादिनिर्मितान् ।
योगिनो न प्रपद्यन्ते स्वात्मप्रत्ययकारणात् ॥ ९२ ॥
बहिस्तीर्थात् परं तीर्थमन्तस्तीर्थं महामुने ।
आत्मतीर्थं महातीर्थमन्यत्तीर्थं निरर्थकम् ॥ ९३ ॥
चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुध्यति ।
शतशोऽपि जलैर्धौतं सुराभाण्डमिवाशुचि ॥ ९४ ॥
विषुवायनकालेषु ग्रहणे चान्तरे सदा ।
वाराणस्यादिके स्थाने स्नात्वा शुद्धो भवेन्नरः ॥ ९५ ॥
ज्ञानयोगपराणां तु पादप्रक्षालितं जलम् ।
भावशुद्ध्यर्थं[2]मज्ञानां तत्तीर्थं मुनिपुङ्गव ॥ ९६ ॥

मस्तकाद्याधारान्तं श्रीशैलादिपुण्यस्थलं भवतीत्याह—श्रीपर्वतमिति ॥ ४८–४९. ॥ एवं भावनामयमात्मतीर्थं तदेव मुमुक्षुभिः सेव्यं इति स्तौति—आत्मतीर्थमिति । काचं—काचमणिम् ॥ ९० ॥ देहादिनिर्वर्त्य-सर्वकर्मसु तीर्थबुद्धिः गरीयसीत्यर्थः । तत्र दृष्टान्तस्तु—अन्यथेति ॥ ९१ ॥ अत एवं तीर्थानीति ॥ ९२ ॥ तदेव आत्मतीर्थम् ॥ ९३ ॥ बाह्यतीर्थस्नानेन कोऽपि न शुध्यतीति सदृष्टान्तमाह—चित्तमिति ॥ ९४ ॥ न तथा

[1] 'भावेनदुहिताऽन्यथा' इति पाठान्तरम्—उ. [2] मज्ञानात्—अ, अ १.

भावतीर्थस्नानेनेत्याह—विष्वेति । भ्रूमध्यादिस्थानेषु स्वात्मलक्ष्यानुसन्धानतः शुद्धात्मैव भवतीत्यर्थः ॥ ५५ ॥ एवमात्मतीर्थस्नानानधिकारे[रि]तीर्थपादचरणोदकस्पर्शतः शुद्धो भवतीत्याह—ज्ञानेति ॥ ५६ ॥

आत्मनि शिवदृष्टिः

तीर्थे दाने जपे यज्ञे काष्ठे पाषाणके सदा ।
शिवं पश्यति मूढात्मा शिवे देहे प्रतिष्ठिते ॥ ५७ ॥
अन्तःस्थं मां परित्यज्य बहिष्ठं यस्तु सेवते ।
हस्तस्थं पिण्डमुत्सृज्य लिहेत् कूर्परमात्मनः ॥ ५८ ॥
शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः ।
अज्ञानां भावनार्थाय प्रतिमाः परिकल्पिताः ॥ ५९ ॥

स्वाज्ञाः स्वातिरिक्तात्मानं द्रष्टुमिच्छन्ति, स्वज्ञाः स्वमात्मानं पश्यन्तीत्याह—तीर्थे इति ॥ ५७–५८ ॥ अत एव शिवमिति । अयोगिजनानुकम्पया प्रतिमाऽपि विकल्पितेत्याह—अज्ञानामिति ॥ ५९ ॥

ब्रह्मदर्शनेन ब्रह्मभावः

अपूर्वमपरं ब्रह्म स्वात्मानं सत्यमद्वयम् ।
प्रज्ञानघनमानन्दं यः पश्यति स पश्यति ॥ ६० ॥
नाडीपुञ्जं सदाऽसारं नरभावं महामुने ।
समुत्सृज्यात्मनाऽऽत्मानमहमित्यवधारय ॥ ६१ ॥
अशरीरं शरीरेषु महान्तं विभुमीश्वरम् ।
आनन्दमक्षरं साक्षान्मत्वा धीरो न शोचति ॥ ६२ ॥

विभेदजनके ज्ञाने नष्टे ज्ञानबलान्मुनेः ।
आत्मनो ब्रह्मणो भेदमसन्तं [1]किं करिष्यति ॥ ६३ ॥

निर्विशेषं ब्रह्म यः पश्यति स तदेव भवतीत्याह—अपूर्वमिति । यस्मात् पूर्वं कारणं परं कार्यं वा न विद्यते तत् कार्यकारणकलनाशून्यं ब्रह्म स्वमात्रमिति यः पश्यति स तन्मात्रमवशिष्यते इत्यर्थः ॥ ६० ॥ यावच्चित्तशुद्धिः तावत् नरभावनया योगं युञ्जीत, ततः शुद्धावुदितायां नरभावं विहाय ब्रह्मभावेन वर्तस्वेत्याह—नाडीति ॥ ६१ ॥ यः कोऽप्येवमात्मानं जानाति स कृतकृत्यो भवतीत्याह— अशरीरमिति ॥ ६२ ॥ स्वाज्ञानजभेददृष्ट्यपाये निर्भेदं ब्रह्म प्रसीदतीत्याह—विभेदेति । वस्तुतः कालत्रयेऽप्यसंभवभेदः किं करिष्यति? स्वस्य लब्धात्मकत्वान्निर्भेदं ब्रह्मावशिष्यते इत्यर्थः ॥ ६३ ॥

इति चतुर्थः खण्डः

## नाडीशोधनम्

सम्यक्कथय मे ब्रह्मन् नाडीशुद्धिं समासतः ।
यया शुद्ध्या सदा ध्यायन् जीवन्मुक्तो भवाम्यहम् ॥ १ ।
सांकृते शृणु वक्ष्यामि नाडीशुद्धिं समासतः ।
विध्युक्तकर्मसंयुक्तः कामसंकल्पवर्जितः ॥ २ ॥
यमाद्यष्टाङ्गसंयुक्तः शान्तः सत्यपरायणः ।
स्वात्मन्यवस्थितः सम्यक् ज्ञानिभिश्च सुशिक्षितः ॥ ३ ॥

[1] कः—अ.

पर्वताग्रे नदीतीरे बिल्वमूले वनेऽथवा ।
अनोरमे शुचौ देशे मठं कृत्वा समाहितः ॥ ४ ॥
आरभ्य चासनं पश्चात् प्राङ्मुखोदङ्मुखोऽपि वा ।
समग्रीवशिरःकायः संवृताम्यः सुनिश्चलः ॥ ५ ॥
नासाग्रे शशभृद्बिम्बे बिन्दु[1]मध्ये तुरीयकम् ।
स्रवन्तममृतं पश्येन्नेत्राभ्यां सुसमाहितः ॥ ६ ॥
[2]इडया प्राणमाकृष्य पूरयित्वोदरस्थितम् ।
ततोऽग्निं देहमध्यस्थं ध्यायन् ज्वालावलीयुतम् ॥ ७ ॥
बिन्दुनादसमायुक्तमग्निबीजं विचिन्तयेत् ।
पश्चाद्विरेचयेत् सम्यक् प्राणं पिङ्गलया बुधः ॥ ८ ॥
पुनः पिङ्गलयाऽऽपूर्य वह्निबीजमनुस्मरेत् ।
पुनर्विरेचयेद्धीमानिडयैव शनैःशनैः ॥ ९ ॥
त्रिचतुर्वासरं [3]वाऽथ त्रिचतुर्वारमेव [4]च ।
षट्[5]कृत्वो विचरेन्नित्यं [6]रहस्येवं त्रिसंधिषु ॥ १० ॥

नरभावभावितनाडीशुद्धिबुभुत्सया पृच्छतीत्याह—सम्यगिति ॥ १ ॥ प्रश्नोत्तरं भगवानाह—साङ्कृत इति ॥ कस्तत्प्रकारः इत्यत्र—विध्युक्तेति ॥ २–५ ॥ स्रवदमृतचन्द्रबिम्बं नासाग्रे अवलोकयन् योगं समारभेदित्यर्थः ॥ ६–७ ॥ रामिति अग्निबीजम् ॥ ८–९ ॥ प्रतिदिनं त्रिचतुर्वारम् ॥ १०–१४ ॥

[1] मध्यतु—अ १. मध्यं तु—अ. [2] इडायाः—अ. [3] वाऽपि—अ.
[4] वा—अ. [5] कृत्वा—अ १, अ २, क. [6] रहस्ये—उ, अ १.

नाडीशुद्धिचिह्नानि

नाडीशुद्धिमवाप्नोति पृथक्चिह्नोपलक्षितः ।
शरीरलघुता दीप्तिर्वह्नेर्जाठरवर्तिनः ॥ ११ ॥
नादाभिव्यक्तिरित्येतच्चिह्नं तत्सिद्धिसूचकम् ।
यावदेतानि संपश्येत्तावदेवं समाचरेत् ॥ १२ ॥

स्वात्मशुद्धिः

अथवैतत् परित्यज्य स्वात्मशुद्धिं समाचरेत् ।
आत्मा शुद्धः सदा नित्यः सुखरूपः स्वयंप्रभः ॥ १३ ॥
अज्ञानान्मलिनो भाति ज्ञानाच्छुद्धो [1]विभात्ययम् ।
अज्ञानमलपङ्कं यः क्षालयेज्ज्ञानतोयतः ।
स एव सर्वदा शुद्धो नान्यः कर्मरतो हि सः ॥ १४ ॥

इति पञ्चमः खण्डः

प्राणायामलक्षणम्

प्राणायामक्रमं वक्ष्ये सांकृते शृणु सादरम् ।
प्राणायाम इति प्रोक्तो रेचपूरककुम्भकैः ॥ १ ॥
वर्णत्रयात्मकाः प्रोक्ता रेचपूरककुम्भकाः ।
स एष प्रणवः प्रोक्तः प्राणायामश्च तन्मयः ॥ २ ॥

[1] भव—उ,

इडया वायुमाकृष्य पूरयित्वोदरस्थितम् ।
शनैः षोडशभिर्मात्रैरकारं तत्र संस्मरेत् ॥ ३ ॥
पूरितं धारयेत् पश्चाच्चतुःषष्ट्या तु मात्रया ।
उकारमूर्तिमत्रापि संस्मरन् प्रणवं जपेत् ॥ ४ ॥
यावद्वा शक्यते तावद्धारयेज्जपतत्परः ।
पूरितं रेचयेत् पश्चान्मकारेणानिलं बुधः ॥ ५ ॥
शनैः पिङ्गलया तत्र द्वात्रिंशन्मात्रया पुनः ।
प्राणायामो भवेदेषः ततश्चैवं समभ्यसेत् ॥ ६ ॥
पुनः पिङ्गलयाऽऽपूर्य मात्रैः षोडशभिस्तथा ।
अकारमूर्तिमत्रापि स्मरेदेकाग्रमानसः ॥ ७ ॥
धारयेत् पूरितं विद्वान् प्रणवं संजपन् वशी ।
उकारमूर्तिं [1]स ध्यायन् चतुःषष्ट्या तु मात्रया ॥ ८ ॥
मकारं तु स्मरन् पश्चाद्रेचयेदिडयाऽनिलम् ।
एवमेव पुनः कुर्यादिडयाऽऽपूर्य बुद्धिमान् ॥ ९ ॥
एवं समभ्यसेन्नित्यं प्राणायामं मुनीश्वर ।
एवमभ्यासतो नित्यं षण्मासाद् ज्ञानवान् भवेत् ॥ १० ॥
वत्सराद्ब्रह्मविद्वान् स्यात् तस्मान्नित्यं समभ्यसेत् ।
योगाभ्यासरतो नित्यं स्वधर्मनिरतश्च यः ॥ ११ ॥
प्राणसंयमनेनैव ज्ञानान्मुक्तो भविष्यति ।

विशेषतः प्राणायामेति ॥ १–११ ॥

[1] संधाय च—अ २. संध्यायां च—अ १. स ध्यायात् च—अ.

पूरकादिलक्षणम्

बाह्यादापूरणं वायोरुदरे पूरको हि सः ॥ १२ ॥
संपूर्णकुम्भवद्वायोर्धारणं कुम्भको भवेत् ।
बहिर्विरेचनं वायोरुदराद्रेचकः स्मृतः ॥ १३ ॥

पूरकादिलक्षणमाह—बाह्यादिति ॥ १२–१३ ॥

प्राणायामसिद्धयः

प्रस्वेदजनको यस्तु प्राणायामेषु सोऽधमः ।
कम्पनं मध्यमं विद्यादुत्थानं चोत्तमं विदुः ॥ १४ ॥
पूर्वपूर्वं प्रकुर्वीत यावदुत्थानसंभवः ।
संभवत्युत्तमे प्राज्ञः प्राणायामे सुखी भवेत् ॥ १५ ॥
प्राणायामेन चित्तं तु शुद्धं भवति सुव्रत ।
चित्ते शुद्धे शुचिः साक्षात् प्रत्यग्ज्योतिर्व्यव[1]स्थितः ॥ १६
[2]प्राणश्चित्तेन संयुक्तः परमात्मनि तिष्ठति ।
प्राणायामपरस्यास्य पुरुषस्य महात्मनः ॥ १७ ॥
देहश्चोत्तिष्ठते तेन किंचिज्ज्ञानाद्विमुक्तता ।
रेचकं पूरकं मुक्त्वा कुम्भकं नित्यमभ्यसेत् ॥ १८ ॥
सर्वपापविनिर्मुक्तः सम्यज्ज्ञानमवाप्नुयात् ।
मनोजवत्वमाप्नोति पलितादि च नश्यति ॥ १९ ॥

[1] स्थितम्—अ. [2] प्राणचि—उ, क.

प्राणायामैकनिष्ठस्य न किंचिदपि दुर्लभम् ।
तस्मात् सर्वप्रयत्नेन प्राणायामान समभ्यसेत् ॥ २० ॥

स्वेदादिसिद्धिमाह— प्रस्वेदेति ॥ १४–१७ ॥ उत्तिष्ठते भूतलात् ॥ १८–२० ॥

रोगनिवर्तकप्राणायामभेदाः

विनियोगान् प्रवक्ष्यामि प्राणायामस्य सुव्रत ।
संध्ययोर्बाह्यकालेऽपि मध्याह्ने वाऽथवा सदा ॥ २१ ॥
बाह्यं प्राणं समाकृष्य [1]पूरयित्वोदरेण च ।
नासाग्रे नाभिमध्ये च पादाङ्गुष्ठे च धारणात् ॥ २२ ॥
सर्वरोगविनिर्मुक्तो जीवेद्वर्षशतं नरः ।
नासाग्रधारणाद्वाऽपि जितो भवति सुव्रत ॥ २३ ॥
सर्वरोगनिवृत्तिः स्यान्नाभिमध्ये तु धारणात् ।
शरीरलघुता विप्र [2]पादाङ्गुष्ठनिरोधनात् ॥ २४ ॥
जिह्वया वायुमाकृष्य यः पिबेत् सततं नरः ।
श्रमदाहविनिर्मुक्तो योगी नीरोगतामियात् ॥ २५ ॥
जिह्वया वायुमाकृष्य जिह्वामूले निरोधयेत् ।
पिबेदमृतमव्यग्रं सकलं सुखमाप्नुयात् ॥ २६ ॥
इडया वायुमाकृष्य भ्रुवोर्मध्ये निरोधयेत् ।
यः पिबेदमृतं शुद्धं व्याधिभिर्मुच्यते हि सः ॥ २७ ॥

[1] पूरयित्वाऽऽद—अ १. [2] पादाङ्गुष्ठे—अ.

इडया वेदतत्त्वज्ञ तथा पिङ्गलयैव च ।
नाभौ निरोधयेत्तेन व्याधिभिर्मुच्यते नरः ॥ २८ ॥
मासमात्रं त्रिसन्ध्यायां जिह्वयाऽऽरोप्य मारुतम् ।
अमृतं च [1]पिबन्नाभौ मन्दंमन्दं निरोधयेत् ॥ २९ ॥
वातजाः पित्तजा दोषा नश्यन्त्येव न संशयः ।
नासाभ्यां वायुमाकृष्य नेत्र[2]द्वन्द्वे निरोधयेत् ॥ ३० ॥
नेत्ररोगा विनश्यन्ति तथा श्रोत्रनिरोधनात् ।
तथा वायुं समारोप्य धारयेच्छिरसि स्थितम् ॥ ३१ ॥
शिरोरोगा विनश्यन्ति सत्यमुक्तं हि सांकृते ।

योगसिद्धयन्तरायरोगनिरासकान् धारणाभेदानाह—**विनियोगानिति** । ब्राह्मकाले ब्राह्मे मुहूर्ते ॥ २१–३९ ॥

षण्मुखीमुद्राभ्यासादिना वायुजयः

स्वस्तिकासनमास्थाय समाहितमनास्तथा ॥ ३२ ॥
अपानमूर्ध्वमुत्थाप्य प्रणवेन शनैः शनैः ।
हस्ताभ्यां धारयेत्सम्यक् कर्णादिकरणानि च ॥ ३३ ॥
अङ्गुष्ठाभ्यां मुनेः श्रोत्रे तर्जनीभ्यां तु चक्षुषी ।
नासापुटावथान्याभ्यां प्रच्छाद्य करणानि वै ॥ ३४ ॥
आनन्दावि[3]र्भवो यावत् तावन्मूर्धनि [4]धारयेत् ।
प्राणः प्रयात्यनेनैव ब्रह्मरन्ध्रं महामुनेः ॥ ३५ ॥

[1] पिबे—क, अ २.
[2] द्वन्द्वं—अ १.
[3] र्भवं—अ १.
[4] धाराणात्—क, अ १, अ २.

ब्रह्मरन्ध्रं गते वायौ नादश्चोत्पद्यतेऽनघ ।
शङ्खध्वनिनिभश्चादौ मध्ये मेघध्वनिर्यथा ॥ ३६ ॥
शिरोमध्यगते वायौ गिरिप्रस्रवणं यथा ।
पश्चात् प्रीतो महा[1]प्राज्ञ साक्षादात्मोन्मुखो भवेत् ॥ ३७ ॥
पुनस्तज्ज्ञाननिष्पत्तिर्योगात् संसारनिह्नुतिः ।
[2]दक्षिणोत्तरगुल्फेन सीविनीं पीडयेत् स्थिराम् ॥ ३८ ॥
सव्येतरेण गुल्फेन पीडयेद्बुद्धिमान् नरः ।
जान्वोरधः स्थितां सन्धिं स्मृत्वा देवं त्रियम्बकम् ॥ ३९ ॥
विनायकं च संस्मृत्य तथा वागीश्वरीं पुनः ।
[3]लिङ्गनालात् समाकृष्य वायुमप्यग्रतो मुने ॥ ४० ॥
प्रणवेन नियुक्तेन बिन्दुयुक्तेन बुद्धिमान् ।
मूलाधारस्य विप्रेन्द्र मध्ये तं तु निरोधयेत् ॥ ४१ ॥
निरुध्य वायुना दीप्तो वह्निरूहति कुण्डलीम् ।
पुनः सुषुम्नया वायुर्वह्निना सह गच्छति ॥ ४२ ॥
एवमभ्यसतस्तस्य जितो वायुर्भवेद्ध्रुवम् ।

एवं षण्मुखीमुद्राभ्यासतः **ब्रह्मरन्ध्रमिति** ॥ ३६ ॥ **यथा** तथा चन्द्रमण्डलगिरितः अमृतप्रवाहो जायते । तेन भ्रूमध्यस्थज्योतिर्लिङ्गमभिषिच्य तदमृतास्वादनतो योगी विमृत्युः भवति । ततः **पश्चात्** ॥ ३७–३८ ॥ दक्षिणेतरगुल्फाभ्यां सीविनीं मेढ्रगुदान्तराळस्थनाडीं सम्पीडयन् जान्वोरधः-स्थितसन्धिं शिवलिङ्गं स्मृत्वा विनायकं वागीश्वरीं च ध्यात्वा ततो **लिङ्गनालादित्यादि** ॥ ३९–४२ ॥

[1] प्रज्ञः—अ. [2] दक्षिणेतर—अ, अ २, क. [3] लिङ्गे—क.

वायुजयचिह्नानि

प्रस्वेदः प्रथमः पश्चात् कम्पनं मुनिपुङ्गव ॥ ४३ ॥
उत्थानं च शरीरस्य चिह्नमेतज्जितेऽनिले ।

वायुजयसूचकचिह्नान्याह — प्रस्वेद इति ॥ ४३–४८ ॥

वायुजयेन रोगपापविनाशवैराग्यपूर्विका ज्ञानोत्पत्तिः

एवमभ्यसतस्तस्य मूलरोगो विनश्यति ॥ ४४ ॥
भगन्दरं च नष्टं स्यात् सर्व[1]रोगाश्च सांकृते ।
पातकानि विनश्यन्ति क्षुद्राणि च महान्ति च ॥ ४५ ॥
नष्टे पापे विशुद्धं स्याच्चित्तदर्पणमद्भुतम् ।
पुनर्ब्रह्मादिभोगेभ्यो वैराग्यं जायते हृदि ॥ ४६ ॥
विरक्तस्य तु संसाराज्ज्ञानं कैवल्यसाधनम् ।
तेन पाशापहानिः स्यात् [2]ज्ञात्वा देवं सदाशिवम् ॥ ४७ ॥
ज्ञानामृतरसो येन सकृदास्वादितो भवेत् ।
स सर्वकार्यमुत्सृज्य तत्रैव परिधावति ॥ ४८ ॥
ज्ञानस्वरूपमेवाहुर्जगदेतद्वि[3]चक्षणाः ।
अर्थस्वरूपमज्ञानात् पश्यन्त्यन्ये कुदृष्टयः ॥ ४९ ॥
आत्मस्वरूपविज्ञानादज्ञानस्य परिक्षयः ।
क्षीणेऽज्ञाने महाप्राज्ञ रागादीनां परिक्षयः ॥ ९० ॥

[1] रोगाणि—उ. [2] ज्ञाना—अ १. ज्ञानादेव सदाशिवः—अ. [3] लक्ष—उ.

रागाद्यसंभवे प्राज्ञ पुण्यपापवि[1]मर्शनम् ।
त्रयोर्नाशे शरीरेण न पुनः संप्रयुज्यते ॥ ९१ ॥

विचक्षणाः ज्ञानिनः ॥ ४९–९० ॥ विमर्शनं विशोधनं विनाशनमित्यर्थः ॥ ९१ ॥

इति षष्ठः खण्डः

---

प्रत्याहारलक्षणम्, तद्भेदाश्च

अथातः संप्रवक्ष्यामि प्रत्याहारं महामुने ।
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ॥ १ ॥
बलादाहरणं तेषां प्रत्याहारः स उच्यते ।
यत्पश्यति तु तत्सर्वं ब्रह्म पश्यन्समाहितः ॥ २ ॥
प्रत्याहारो भवेदेष ब्रह्मविद्भिः पुरोदितः ।
[2]यद्यच्छुद्धमशुद्धं वा करोत्यामरणान्तिकम् ॥ ३ ॥
तत्सर्वं ब्रह्मणे कुर्यात् प्रत्याहारः स उच्यते ।
अथवा नित्यकर्माणि ब्रह्माराधनबुद्धितः ॥ ४ ॥
काम्यानि च तथा कुर्यात् प्रत्याहारः स उच्यते ।
अथवा वायुमाकृष्य स्थानात् स्थानं निरोधयेत् ॥ ५ ॥
दन्तमूलात्तथा कण्ठे कण्ठादुरसि मारुतम् ।
उरोदेशात् समाकृष्य नाभिदेशे निरोधयेत् ॥ ६ ॥

[1] मर्दनम्—अ, अ १, अ २, क. [2] यदिच्छु—अ २.

नाभिदेशात् समाकृष्य कुण्डल्यां तु निरोधयेत् ।
कुण्डलीदेशतो विद्वान् मूलाधारे निरोधयेत् ॥ ७ ॥
अथापानात् कटिद्वन्द्वे तथोरौ च सुमध्यमे ।
तस्माज्जानुद्वये जङ्घे पादाङ्गुष्ठे निरोधयेत् ॥ ८ ॥
प्रत्याहारोऽयमुक्तस्तु प्रत्याहारपरैः पुरा ।

यमनियमासनप्राणायामेयत्ता प्रतिपाद्य ततः प्रत्याहारस्वरूपमाह— अथेति ॥ १–१२ ॥

प्रत्याहारफलम्

एवमभ्यासयुक्तस्य पुरुषस्य महात्मनः ॥ ९ ॥
सर्वपापानि नश्यन्ति भवरोगश्च सुव्रत ।

वायुधारणात्मकप्रत्याहारः

नासाभ्यां वायुमाकृष्य निश्चलः स्वस्तिकासनः ॥ १० ॥
पूरयेदनिलं विद्वानापादतलमस्तकम् ।
पश्चात् पादद्वये तद्वत् मूलाधारे तथैव च ॥ ११ ॥
नाभिकन्दे च हृन्मध्ये कण्ठमूले च तालुके ।
भ्रुवोर्मध्ये ललाटे च तथा मूर्धनि धारयेत् ॥ १२ ॥

वदान्तसम्मतप्रत्याहारः

देहे त्वात्ममतिं विद्वान् समाकृष्य समाहितः ।
आत्मनाऽऽत्मनि निर्द्वन्द्वे निर्विकल्पे निरोधयेत् ॥ १३ ॥

प्रत्याहारः समाख्यातः साक्षाद्वेदान्तवेदिभिः ।
एवमभ्यसतस्तस्य न किंचिदपि दुर्लभम् ॥ १४ ॥

किं बहुना—देहे इति ॥ १३–१४ ॥

इति सप्तमः खण्डः

## पञ्चभूतेषु धारणा

अथातः संप्रवक्ष्यामि धारणाः पञ्च सुव्रत ।
देहमध्यगते व्योम्नि बाह्याकाशं तु धारयेत् ॥ १ ॥
प्राणे बाह्यानिलं तद्वत् ज्वलने चाग्निमौदरे ।
तोयं तोयांशके भूमिं भूमिभागे महामुने ॥ २ ॥
हयरावलकाराख्यं मन्त्रमुच्चारयेत् क्रमात् ।
धारणैषा परा प्रोक्ता सर्वपापविशोधिनी ॥ ३ ॥
[1]जान्वन्तं पृथिवी ह्यंशो ह्यपां [2]पाय्वन्तमुच्यते ।
[3]हृदयांशस्तथाग्न्यंशो भ्रू[4]मध्यान्तोऽनिलांशकः ॥ ४ ॥
आकाशांशस्तथा प्राज्ञ मूर्धांशः परिकीर्तितः ।
ब्रह्माणं पृथिवीभागे विष्णुं तोयांशके तथा ॥ ५ ॥
अग्न्यंशे च महेशानमीश्वरं चानिलांशके ।
आकाशांशे महाप्राज्ञ धारयेत्तु सदाशिवम् ॥ ६ ॥

प्रत्याहारलक्षणमुक्त्वा धारणालक्षणमाह—अथेति ॥ १–६ ॥

[1] जान्वन्तः—अ. [2] पाय्वंश—अ २, क. पाय्वन्त उ, अ.
[3] हृदयान्त—अ, अ १. [4] मध्यांशो—क, अ २.

### आत्मनि धारणा

अथ वा तव वक्ष्यामि धारणां मुनिपुङ्गव ।
पुरुषे सर्व[1]शास्तारं बोधानन्दमयं शिवम् ॥ ७ ॥
धारयेद्बुद्धिमान् नित्यं सर्वपापविशुद्धये ।
ब्रह्मादिकार्यरूपाणि स्वेस्वे संहृत्य कारणे ॥ ८ ॥
सर्वकारणमव्यक्तमनिरूप्यमचेतनम् ।
साक्षादात्मनि संपूर्णे धारयेत् प्रणवे मनः ।
इन्द्रियाणि समाहृत्य मनसात्मनि योजयेत् ॥ ९ ॥

पुरुषे प्रतीचि स्वातिरिक्तसर्वग्रासतया शिवं धारयेत् । यद्वा—पुरुषे परमात्मनि सर्वशास्तारं प्रत्यञ्चं धारयेत् ॥ ७–९ ॥

इत्यष्टमः खण्डः

### सविशेषब्रह्मध्यानम्

अथातः संप्रवक्ष्यामि ध्यानं संसारनाशनम् ।
ऋतं सत्यं परं ब्रह्म सर्वसंसारभेषजम् ॥ १ ॥
ऊर्ध्व[2]रेतं विरूपाक्षं विश्वरूपं महेश्वरम् ।
सोऽहमित्यादरेणैव ध्यायेद्योगीश्वरेश्वरम् ॥ २ ॥

धारणामुक्त्वा सविशेषनिर्विशेषब्रह्मध्यानमाह—अथेति । ऋतं कर्मफलमपरं ब्रह्म । सत्यं ज्ञानफलं परं ब्रह्म ॥ १–२ ॥

[1] शस्ता—उ १. [2] रूपं—अ, अ१.

निर्विशेषब्रह्मध्यानम्

अथ वा सत्यमीशानं ज्ञानमानन्दमद्वयम् ।
अत्यर्थ[1]ममलं नित्यमादिमध्यान्तवर्जितम् ॥ ३ ॥
तथाऽस्थूलमनाकाशमसंस्पृश्यमचाक्षुषम् ।
न रसं न च गन्धाख्यमप्रमेयमनूपमम् ॥ ४ ॥
आत्मानं सच्चिदानन्दमनन्तं ब्रह्म सुव्रत ।
अहमस्मीत्यभिध्याये[2]द्देहातीतं विमुक्तये ॥ ५ ॥

अर्थजातमतीत्य ज्ञप्तिमात्रतया वर्तते इति अत्यर्थम् ॥ ३ ॥ अनाकाशमित्यादिपञ्चविशेषणतः पञ्चभूतवैलक्षण्यमुक्तं भवति ॥ ४–६ ॥

ध्यानफलम्

एवमभ्याससयुक्तस्य पुरुषस्य महात्मनः ।
क्रमाद्वेदान्तविज्ञानं [3]विजायेत न संशयः ॥ ६ ॥

इति नवमः खण्डः

समाधिस्वरूपम्

अथातः संप्रवक्ष्यामि समाधिं भवनाशनम् ।
समाधिः संविदुत्पत्तिः परजीवैकतां प्रति ॥ १ ॥
नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ।
[4]एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः ॥ २ ॥

[1] मचलं—अ, अ १, अ २, क.
[2] द्धयेया—मु.
[3] विज्ञायेत—अ २.
[4] एकस्मिन्—उ.

तस्माद्द्वैतमेवास्ति न प्रपञ्चो न संसृतिः ।
यथाऽऽकाशो घटाकाशो [1]मठाकाश इतीरितः ॥ ३ ॥
तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना ।
नाहं देहो न च प्राणो नेन्द्रियाणि मनो न हि ॥ ४ ॥
सदा साक्षिस्वरूपत्वाच्छिव [2]एवास्मि केवलः ।
इति धीर्या मुनिश्रेष्ठ सा समाधिरिहोच्यते ॥ ५ ॥

ध्यानप्रकारमुक्त्वा समाधिप्रकारमाह-- अथेति ॥ १–२ ॥ यस्मादेवं तस्मात् । यथाऽऽकाश एव घटाकाशः ॥ ३–६ ॥

ब्रह्ममात्रावशेषः

सोऽहं ब्रह्म न संसारी न मत्तोऽन्यः कदाचन ।
यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः ॥ ६ ॥
समुद्रे लीयते तद्वत् जगन्मय्यनुलीयते ।
तस्मान्मनः पृथङ् नास्ति जगन्माया च नास्ति हि ॥ ७ ॥
यस्यैवं परमात्माऽयं प्रत्यग्भूतः प्रकाशितः ।
स तु याति [3]च पुंभावं स्वयं साक्षात् परामृतम् ॥ ८ ॥
यदा मनसि चैतन्यं भाति सर्वत्रगं सदा ।
योगिनोऽव्यवधानेन तदा संपद्यते स्वयम् ॥ ९ ॥
यदा सर्वाणि भूतानि स्वात्मन्येव हि पश्यति ।
सर्वभूतेषु चात्मानं ब्रह्म संपद्यते तदा ॥ १० ॥

[1] महाकाश—अ, अ १. [2] एवास्ति—अ २.
[3] सपुं—क, अ १, अ २, उ १. स्वपुं—अ.

यदा सर्वाणि भूतानि समाधिस्थो न पश्यति ।
ब्रह्मीभूतः परेणासौ तदा भवति केवलः ॥ ११ ॥
यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रं जगत् कृत्स्नं तदा भवति निर्वृतिः ॥ १२ ॥

यस्मादेवं तस्मात् मनः मत्तः पृथक् नास्ति ॥ ७ ॥ प्रत्यक्परचितोरैकत्वात् स्वयं इत्यादि । स्वातिरिक्तप्रपञ्चे मायामात्रपदं गते स्वयमेव निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते इति दर्शनोपनिषत्फलितोऽर्थः ॥ ८–१२ ॥

उपसंहारः

एवमुक्त्वा स भगवान् दत्तात्रेयो महामुनिः ।
[1]सांकृतिः स्वस्वरूपेण सुख[2]मास्तेऽतिनिर्भयः ॥ १३ ॥
इति ॥

आख्यायिकामुपसंहरति—एवमिति । इतिशब्दो दर्शनोपनिषत्परिसमाप्त्यर्थः ॥ १३ ॥

इति दशमः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
दर्शनोपनिषद्व्याख्या लिखिता ब्रह्ममात्रगा ॥
दर्शनोपनिषद्व्याख्याग्रन्थस्तु द्विशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे नवतिसंख्यापूरकं दर्शनोपनिषद्विवरणं सम्पूर्णम्

[1] सांकृतेः—अ. [2] मास्ते—क, अ १.

# ध्यानबिन्दूपनिषत्

सह नाववतु—इति शान्तिः

ब्रह्मध्यानयोगमहिमा

यदि शैलसमं पापं विस्तीर्णं बहुयोजनम् ।
भिद्यते ध्यानयोगेन नान्यो भेदः कदाचन ॥ १ ॥
बीजाक्षरं परं [1]बिन्दु [2]नादं तस्योपरि स्थितम् ।
सशब्दश्चाक्षरे क्षीणे निःशब्दं परमं पदम् ॥ २ ॥
अनाहतं तु यच्छब्दं तस्य शब्दस्य यत्परम् ।
तत्परं विन्दते यस्तु स योगी छिन्नसंशयः ॥ ३ ॥

ध्यात्वा यद्ब्रह्ममात्रं ते स्वावशेषधिया ययुः ।
योगतत्त्वज्ञानफलं तत्स्वमात्रं विचिन्तये ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं ध्यानविन्दूपनिषत् निर्विशेषब्रह्ममात्रपर्यवसन्नाऽन्तःप्रणवार्थप्रकाशिनी तदुपायाजपाहंसविद्यातदुपायषडङ्गयोगप्रकाशिनी च सती प्रवृत्ता । तस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । तस्याः उपोद्घातादिकं कठवल्ल्यादिवत् ऊह्यम् । श्रुतिगदौ तावत् ध्यानयोगसामान्यमुख्यफलप्रकटनपूर्वकं निर्विशेषब्रह्मस्वरूपं प्रकाशयति—यदीति ।

[1] बिन्दुं—अ, अ १. बीज—अ २. [2] नादान्त—अ.

यस्य कस्यचिद्योगिनोऽनन्तकोटिजन्मसञ्चितं विस्तीर्णं बहुयोजनं यदि शैलसमं पापं दुर्भेदं विद्यते तदा तदपि वज्रटङ्कोपमब्रह्मध्यानयोगेन भिद्यते तिलशश्छिद्यते । इत्थंभूतध्यानयोगं विना कदाचन नान्यो भेदो भेदकोऽस्तीत्यर्थः ॥ १ ॥ एवं ध्यानयोगं स्तुत्वा ध्येयस्वरूपमाह—बीजेति । प्रणवो हि बीजाक्षरं अकारोकारमकारार्धमात्रात्मकं तत्परं तु बिन्दु[1]नादकला-कलातीतम् । यः एवंविशेषणविशिष्टः शब्दप्रपञ्चः प्रणवः तस्योपरि निर्विशेषतया यत् स्थितं तत् निःशब्दं इत्यर्थः । सशब्दः प्रणवः चशब्दः तदभिधेयोपलक्षणार्थः । तस्मिन् शब्दप्रपञ्चे स्वाधिकरणपरमाक्षरे क्षीणे विलयमपह्नवं वा गते सति ततो यन्निःशब्दं ब्रह्म अवशिष्यते तदेव परमं पदं विदेहकैवल्यमित्यर्थः ॥ २ ॥ एवंविदं स्तौति—अनाहतमिति । ह्रस्वत्वात् नित्यत्वाद्वा अनाहतम् । तुशब्दो नित्यत्वख्यापनार्थः । तथाच भाष्यवार्तिककारोक्तेः "नित्यो ह्योङ्कारः" इति, "ओङ्कारस्य तु नित्यत्वात् नाञ्जसोत्पत्तिरिष्यते" इति च । यच्छब्दं शब्दात्मकप्रणवरूपं विद्यते तस्य शब्दस्य यत् परं व्यष्टिसमष्टिसाक्षिरूपं तन् परं निर्विशेषं ब्रह्म यस्तु यो वा को वा स्वमात्रमिति विन्दते सः योगी छिन्नसंशयो विदेहमुक्तो भवति ॥ ३ ॥

ब्रह्मणः सूक्ष्मत्वं सर्वव्यापकत्वं च

वालाग्रशतसाहस्रं तस्य भागस्य भागिनः ।
तस्य भागस्य भागार्धं तत्क्षये तु निरञ्जनम् ॥ ४ ॥
पुष्पमध्ये यथा गन्धः पयोमध्ये यथा घृतम् ।
तिलमध्ये यथा तैलं पाषाणेष्विव काञ्चनम् ॥ ५ ॥
एवं सर्वाणि भूतानि मणौ सूत्र इवात्मनि ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ ६ ॥

[1] नादकलातीतम्—अ १.

तिलानां तु यथा तैलं पुष्पे गन्ध इवाश्रितः ।
पुरुषस्य शरीरे तु सबाह्याभ्यन्तरे स्थितः ॥ ७ ॥
वृक्षं तु सकलं विद्याच्छाया तस्यैव निष्कला ।
सकले निष्कले भावे सर्वत्रात्मा व्यवस्थितः ॥ ८ ॥

इत्थंभूतयोगिगम्यब्रह्मणो निर्विशेषत्वेन परमसूक्ष्मतामाह—**वालाग्रेति** । वालाग्रं नीवारशूकं दृश्यादृश्यतया स्थितसुसूक्ष्मं, तस्य शतसाहस्रं लक्षैकांशसूक्ष्मं जीवचैतन्यं सूक्ष्मं व्यष्टिप्रपञ्चव्यापकत्वात्, तस्य जीवचैतन्यगतसूक्ष्मस्य शतसहस्रैकभागयुक्तमीश्वरचैतन्यं सूक्ष्मतरं [1]समष्ट्यण्डव्यापकत्वात्, तस्यैवं **भागिनः** ईश्वरस्य **भागार्धं** पञ्चाशत्सहस्रैकभागरूपं साक्षिचैतन्यं सूक्ष्मतमं स्वाविद्यापदतत्कार्यव्यापकत्वात्, साक्ष्यसापेक्षसाक्षिचैतन्यगतसविशेषक्षये तु तत्सर्वकलनानिरञ्जनं अज्ञनीयस्वातिरिक्तासम्भवात् निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते इत्यर्थः ॥ ४ ॥ कथं पुनः साक्षिणोऽविद्यापदव्यापकत्वमित्यत आह—**पुष्पेति** । पुष्पतिलपाषाणेषु गन्धतैलकाञ्चनं यथा व्याप्य वर्तते, यथा मणिगणे सूत्रं, तथैव जीवात्मना **पुरुषस्य शरीरे तु सबाह्याभ्यन्तरे स्थितः** ॥ ५–७ ॥ ईश्वरसाक्ष्यात्मना ब्रश्चनं छेदनमर्हतीति **वृक्षं** तु स्वाविद्यापादं **सकळमिति विद्यात्** । स्वेन रूपेणाविद्यापदवृक्षं छादयत्यावृणोतीति **छाया** माया तु **निष्कळा** निरवयवत्वात् । इत्थं **सकळे निष्कळे भावे** वृक्षच्छायास्थानीयस्वाविद्यापदतद्धेतुमायातत्त्वे **सर्वत्र** तत्कार्ये च **परमात्मा व्यवस्थितः** व्याप्य स्थितः, "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेः । यद्वा—**सकळे** जीवादिसाक्ष्यन्ते **निष्कळे भावे**—इत्यत्र द्वितीयार्थे सप्तमी—निष्कळभावं गते पुरा स्वाज्ञदशायां **सर्वत्र** स्वातिरिक्तं यदनुभूतं तदात्मैव स्वमात्रं **व्यवस्थितो** भवतीत्यर्थः ॥ ८ ॥

[1] समष्ट्यण्ड—उ १.

प्रणवस्वरूपम्

ओमित्येकाक्षरं ब्रह्म ध्येयं सर्वं मुमुक्षुभिः ।
पृथिव्यग्निश्च ऋग्वेदो भूरित्येव पितामहः ॥ ९ ॥
अकारे तु लयं प्राप्ते प्रथमे प्रणवांशके ।
अन्तरिक्ष यजुर्वायुर्भुवो विष्णुर्जनार्दनः ॥ १० ॥
उकारे तु लयं प्राप्ते द्वितीये प्रणवांशके ।
द्यौः सूर्यः सामवेदश्च स्वरित्येव महेश्वरः ॥ ११ ॥
मकारे तु लयं प्राप्ते तृतीये प्रणवांशके ।
अकारः पीतवर्णः स्याद्रजोगुण उदीरितः ॥ १२ ॥
उकारः सात्त्विकः शुक्लो मकारः कृष्णतामसः ।
अष्टाङ्गं च चतुष्पादं त्रिस्थानं पञ्चदैवतम् ॥ १३ ॥
ओंकारं यो न जानाति ब्राह्मणो न भवेत्तु सः ।

तदर्थं मुमुक्षुभिः किं ध्येयमित्यत आह—**ओमिति** । तस्य सर्वापवादाधिकरणतामाह—**पृथिवीति** ॥ ९ ॥ **प्राप्ते** इति सप्तमी प्रथमार्था । पृथिव्यादिः प्रणवप्रथमांशाकारे विलयं प्राप्तो भवतीत्युक्त्या सम्भूतिस्थितिरपि तत्रेति द्योत्यते । तथा च अन्तरिक्षादिः द्यौरादिश्च क्रमेण उकारे मकारे च संभूतिस्थितिप्रळयं प्राप्नोतीत्यर्थः,

अकारे लीयते ब्रह्मा उकारे लीयते हरिः ।
मकारे लीयते रुद्रः प्रणवो हि परः स्मृतः ॥

इत्यादि श्रुतेः ॥ १०–११ ॥ अकारादिप्रणवमात्राणां त्रिगुणान्वितत्वेन पीतादिवर्णवैशिष्ट्यमुच्यते—**अकार** इति ॥ १२ ॥ अङ्गपादस्थानदेवता-

विशिष्टप्रणवज्ञानाज्ञानाभ्यां ब्राह्मणानां ब्राह्मणत्वं भवेदित्याह—अष्टाङ्गमिति। अकारोकारमकारबिन्दुनादकलाकलातीततत्परभेदेनाष्टावङ्गानि यस्य तं, विश्वतैजसप्राज्ञतुरीयभेदेन व्यष्टौ, समष्टौ तु विराट्सूत्रबीजतुर्यभेदेन, व्यष्टिसमष्ट्यविभागे तु ओतानुज्ञात्रनुज्ञैकरसाविकल्पभेदेन चत्वारः पादा यस्य तं चतुष्पादं, जाग्रदाद्यवस्थात्रयं स्थूलादिदेहत्रयं सत्वादिगुणत्रयं क्रियाशक्त्यादि शक्तित्रयं भूतादिकालत्रयं वा यस्य स्थानमावसथं भवति तं त्रिस्थानं, ब्रह्मविष्णुरुद्रेश्वरसदाशिवा यदवयवाकारादिदेवभावं प्रपेदिरे तं पञ्चदैवतम् ॥ १३ ॥ इत्थंभूतमोङ्कारं यो जानाति स ब्राह्मणो ब्रह्मनिष्ठो जीवन्मुक्तो भवेत्। य एवं न जानाति स ब्राह्मणो न भवेदित्यर्थः ॥

प्रणवध्यानविधिः

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ॥ १४ ॥
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्।
निवर्तन्ते क्रियाः सर्वास्तस्मिन्दृष्टे परावरे ॥ १५ ॥
ओंकारप्रभवा देवा ओंकारप्रभवाः स्वराः।
ओंकारप्रभवं सर्वं त्रैलोक्यं सचराचरम् ॥ १६ ॥
ह्रस्वो दहति पापानि दीर्घः संपत्प्रदोऽव्ययः।
अर्धमात्रासमायुक्तः प्रणवो मोक्षदायकः ॥ १७ ॥
तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत्।
अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥ १८ ॥

यत एवमन्तःप्रणवो विशिष्टफलदः अतः तत्साधनेन ब्रह्म जानतस्तद्भावापत्तिः निरङ्कुशं भवेदित्याह—प्रणव इति। अष्टमात्रात्मकान्तःप्रणव एव धनुरिव धनुः शरस्थानीयान्तःकरणाधिकरणत्वात्। शरो ह्यात्मा मनः वेगवत्तरत्वाच्छरस्य। किं लक्ष्यमित्यत्र

ब्रह्म तल्लक्ष्यमुच्यते स्वात्मतया लक्ष्यमाणत्वात् ॥ १४ ॥ तदेतल्लक्ष्यं अप्रमत्तेन एकाग्रचित्तेन वेद्धव्यं अन्तःप्रणवार्थब्रह्मैवास्मीत्यनुसन्धानं कर्तव्यम् । एवं कृते यथा शरो लक्ष्यनिमग्नो भवति तथा तन्मयो ब्रह्मैव भवेत् । सक्रियस्य ब्रह्मभावापत्तिः कुत इत्यत आह—निवर्तन्त इति ॥ १५ ॥ परावग्प्रत्यगभिन्नब्रह्मदर्शनस्य सर्वव्यापृतिन्यासपूर्वकत्वात् ब्रह्मालम्बनोङ्कारस्य सर्वारोपाधिकरणतामाह—ओङ्कारेति ॥ १६ ॥ ह्रस्वदीर्घप्लुततया प्रणवजपफलमाह—ह्रस्व इति । "यदि [1]ह्रस्वो भवति सर्वं पाप्मानं दहति अमृतत्वं च गच्छति । यदि [2]दीर्घो भवति महतीं श्रियमाप्नोति अमृतत्वं च गच्छति । यदि [3]प्लुतो भवति ज्ञानवान् भवति अमृतत्वं च गच्छति" इति श्रुतेः ॥ १७ ॥ प्रणवाग्रज्ञानफलमाह—तैलेति ॥ १८ ॥

प्राणायामपूर्वक प्रणवध्यानम्

हृत्पद्मकर्णिकामध्ये स्थिरदीपनिभाकृतिम् ।
अङ्गुष्ठमात्रमचलं ध्यायेदोंकारमीश्वरम् ॥ १९ ॥
इडया वायुमापूर्य पूरयित्वोदरस्थितम् ।
ओंकारं देहमध्यस्थं ध्यायेज्ज्वालावलीवृतम् ॥ २० ॥
ब्रह्मा पूरक इत्युक्तो विष्णुः कुम्भक उच्यते ।
रेचो रुद्र इति प्रोक्तः प्राणायामस्य देवताः ॥ २१ ॥

कथमोङ्कारो ध्येय इत्यत आह—हृदिति ॥ १९ ॥ किं तूष्णीं ध्यातव्यमित्यत आह—इडयेति । "मूलाम्नावग्निरूपं प्रणवं सन्दध्यात्" इति श्रुत्यनुरोधेन मूलाधारत्रिकोणे जाज्वल्यमानतया प्रणवार्थेश्वरं कुम्भकेऽनुध्यायेत् ॥ २० ॥ प्राणायामावयवदेवतास्वरूपमाह—ब्रह्मेति । पूरकादिकाले ब्रह्मविष्णुरुद्रान् ध्यायेदित्यर्थः ॥ २१ ॥

[1] ह्रस्वा—उ १. [2] दीर्घा—उ १. [3] प्लुता—उ १.

प्रकारान्तरेण प्रणवध्यानम्

आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासा[1]देवं पश्येन्निगूढवत् ॥ २२ ॥
ओंकारध्वनिनादेन वायोः संहरणान्तिकम् ।
[2]यावद्बुलं समादध्यात्सम्यङ्नादलयावधि ॥ २३ ॥
गमागमस्थं गमनादिशून्यमोंकारमेकं रविकोटिदीप्तम् ।
पश्यन्ति ये सर्वजनान्तरस्थं हंसात्मकं ते विरजा भवन्ति ॥२४॥

विधान्तरेश्वरध्यानमाह—आत्मानमिति । आत्मानं अन्तःकरणं अधरारणिं कृत्वा प्रणवमुत्तरारणिं प्रणवोच्चारणपूर्वकं प्रणवार्थब्रह्माहमस्मीति पौनःपुन्येनानुसन्धानं ध्याननिर्मथनाभ्यासः तस्मात् निगूढकलशान्तरदीपवत् एवं आत्मानमयमहमस्मीति पश्येन् अवलोकयेदित्यर्थः ॥ २२ ॥ प्रणवोच्चारणप्रणवनादावसानविद्योतब्रह्मदर्शनफलमाह—ओङ्कारेति । यावद्बुलमोङ्कारोच्चारणप्रभवनादवायुविलयाधिकरणतया यत् विभाति तत् स्वाज्ञदृष्ट्या गमनागमनलक्षणनादरूपप्राणोपाधिस्थमिव भातमपि स्वज्ञदृष्ट्या गमनादिशून्यं अनन्तकोटिरविप्रभं सर्वान्तरं हंसात्मकं प्रत्यगभिन्नब्रह्मरूपं ये पश्यन्ति ते विरजाः कृतकृत्याः भवन्तीत्यर्थः ॥ २३–२४ ॥

सविशेषब्रह्मध्यानम्

यन्मनस्त्रिजगत्सृष्टिस्थिति[3]प्रलयकर्मकृत् ।
तन्मनो विलयं याति तद्विष्णोः परमं पदम् ॥ २५ ॥
अष्टपत्रं तु हृत्पद्मं द्वात्रिंशत्केसरान्वितम् ।
तस्य मध्यगतो भानुर्भानुमध्यगतः शशी ॥ २६ ॥

[1] देवं—अ, अ १. [2] यावद्बन्धः—अ २. [3] व्यसन—अ, अ १, अ २; क.

शशिमध्यगतो वह्निर्वह्निमध्यगता प्रभा ।
प्रभामध्यगतं पीठं नानारत्नप्रवेष्टितम् ॥ २७ ॥
तस्य मध्यगतं देवं वासुदेवं निरञ्जनम् ।
श्रीवत्सकौस्तुभोरस्कं मुक्तामणिविभूषितम् ॥ २८ ॥
शुद्धस्फटिकसंकाशं चन्द्रकोटिसमप्रभम् ।
एवं ध्यायेन्महाविष्णुमेवं वा विनयान्वितः ॥ २९ ॥

ब्रह्ममात्रावरणं मनः, तदपह्नवतो निष्प्रतियोगिकं ब्रह्ममात्रं प्रकाशते इत्याह—यदिति ॥ २५ ॥ एवं ध्यातुमशक्तस्य यथोक्तलक्षणहृत्कमले सविशेषब्रह्मध्यानप्रकारमाह—अष्टपत्रमिति ॥ २७-२८ ॥ एवं कल्पनासृष्टमित्यर्थः । एवं ध्यानं कृतं चेत् तत्प्रसादलब्धचित्तशुद्धिप्राप्यज्ञानद्वारा कृतकृत्यो भवेत् । एवं कर्तुमलसस्य एवं वा वक्ष्यमाणपूरकादौ त्रिमूर्तिध्यानमाह—एवमिति ॥ २९-३१ ॥

त्रिमूर्तिध्यानम्

अतसीपुष्पसंकाशं नाभिस्थाने प्रतिष्ठितम् ।
चतुर्भुजं महाविष्णुं पूरकेण विचिन्तयेत् ॥ ३० ॥
कुम्भकेन हृदि स्थाने चिन्तयेत्कमलासनम् ।
ब्रह्माणं रक्तगौराभं चतुर्वक्त्रं पितामहम् ॥ ३१ ॥
रेचकेन तु विद्यात्मा ललाटस्थं त्रिलोचनम् ।
शुद्धस्फटिकसंकाशं निष्कलं पापनाशनम् ॥ ३२ ॥

विद्यात्मा सगुणविद्याविशिष्टोपासकः । वस्तुतो निष्कलं ॥ ३२ ॥

हृदये ध्यानं तत्फलं च

अब्जपत्रमधःपुष्पमूर्ध्वनालमधोमुखम् ।
कदलीपुष्पसंकाशं [1]सर्ववेदमयं शिवम् ॥ ३३ ॥
शताब्दं शतपत्राढ्यं विप्रकीर्णाब्जकर्णिकम् ।
तत्रार्कचन्द्रवह्नीनामुपर्युपरि चिन्तयेत् ॥ ३४॥
पद्मस्योद्घाटनं कृत्वा [2]सूर्यचन्द्राग्निवर्चसः ।
तस्य हृद्बीजमाहृत्य आत्मानं चरते ध्रुवम् ॥ ३५ ॥
त्रिस्थानं च [3]त्रिमार्गं च त्रिब्रह्म च त्रयाक्षरम् ।
त्रिमात्रमर्धमात्रं वा यस्तं वेद स वेदवित् ॥ ३६ ॥
तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत् ।
[4]अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥ ३७ ॥

ध्यानाधारहृदयं विधान्तरेण वर्णयति--अब्जेति ॥ अब्जं अब्जातं अम्मयं शरीरं पितः त्रायत इति अब्जपत्रं हृत्कमलं, अधःपुष्पं अधोभागकुसुमितत्वात्, ऊर्ध्वनालमधोमुखं लम्बमानकदळीपुष्पसदृशं, सर्ववेदमयं वेदहेतुनादाधारत्वात्, अत एव शिवम् ॥ ३३ ॥ शताब्दं शतायुःपरिमितस्थितित्वात्, शतपत्राढ्यं शतपत्रकुशेशयोपमत्वात्, विप्रकीर्णाब्जकर्णिकं विकसितपद्मकर्णिकोपमं हृत्कमलं यदस्ति तस्य लम्बमानसूर्यचन्द्राग्निवर्चसः हृत्पद्मस्य प्रणवेनोद्घाटनं कृत्वा ऊर्ध्वमुखं विधाय तत्र अर्कचन्द्रवह्नीनां मण्डलं उपर्युपरि चिन्तयेत् भावयेत् । तस्य हृत्पद्मस्य

[1] सर्वदेव—अ २. सर्ववेदमवाङ्मुखं—अ, अ १.
[2] बोधचन्द्राग्निसूर्यकं—अ, अ १. [3] त्रिमात्रं—अ, अ १, अ २, क.
[4] बिन्दुनादकलातीतं—अ, अ १, अ २, क.

हृद्बीजमकाराख्यं तदाहृत्य गृहीत्वा तद्रूपं ध्रुवमात्मानं सम्भाव्य ततस्तत्राकारार्थो विष्णुश्चरते—पदव्यत्ययः—चरति ॥ ३४–३५ ॥ एवं चरन्तं हंसमात्मानं प्रणवत्वेन चिन्तयतः जीवन्मुक्तामाह—त्रिस्थानमिति । अवस्थात्रयादि-स्थानत्रयं यस्य तं, यद्याथात्म्यविदः [1]स्वज्ञानानुरोधेन धूमार्चिरगतिभेदेन यत् यान्ति तं त्रिमार्गं, विश्वविराडोतृब्रह्मादिभेदेन ब्रह्मत्रयं यदर्थभूतं तं त्रिब्रह्मात्मकं, अकारादित्रीण्यक्षराणि यदवयवतयोक्तानि तं त्रयाक्षरं, ह्रस्वदीर्घप्लुतभेदेन तिस्रो मात्रा यस्य तं त्रिमात्रमर्धमात्रं वा, यः तं वेद स वेदवित् जीवन्मुक्तो भवतीत्यर्थः ॥ ३६ ॥ "ओङ्काराग्रविद्योतं तुर्यतुरीयं" इति श्रुत्यनुरोधेन प्रणवाग्रदर्शनफलमाह—तैलेति ॥ ३७ ॥

ब्रह्मायतने प्राणविलापनम्

यथैवोत्पलनालेन तोयमाकर्षयेन्नरः ।
तथैवोत्कर्षयेद्वायुं योगी योगपथे स्थितः ॥ ३८ ॥
अर्धमात्रात्मकं कृत्वा कोशभूतं तु पङ्कजम् ।
कर्षयेन्नालमात्रेण भ्रुवोर्मध्ये लयं नयेत् ॥ ३९ ॥
भ्रूमध्ये तु ललाटे तु [2]नासिकायास्तु मूलतः ।
जानीयादमृतस्थानं तद्ब्रह्मायतनं महत् ॥ ४० ॥

परागवायुं प्रत्यङ्मुखं नीत्वा ब्रह्मायतने विलापयेदित्याह—यथेति । यथैव नरः उत्पलनालेन तोयमाकर्षयेत् तथैव योगी योगमार्गे तिष्ठन् मूलाधारात् अपानैक्यमापन्नप्राणवायुमूर्ध्वं उत्कर्षयेत् सुषुम्नायामूर्ध्वमुखं नयेत् ॥ ३८ ॥ पुनः स्थूलसूक्ष्मबीजभावमापन्नं दृष्टिमनोग्निभिरेकीभूतं कोशभूतं यत् हृदयपङ्कजं वर्तते तत्र अर्धमात्रात्मकं कृत्वा सुषुम्नामार्गेण भ्रुवोर्मध्ये लयं नयेत् विलयं प्रापयेत् ॥ ३९ ॥ प्राणलयाधिकरणं कीदृशमित्यत आह—

[1] सज्ञा—उ. [2] नासिकायां तु—अ, अ २.

भ्रूमध्ये त्विति । भ्रूमध्यस्य ब्रह्मोपलब्धिस्थानत्वात् । तुशब्दत्रयतः तस्मात् बहिर्निर्गतमपि तत्रैव पुनःपुनः लयं नयेदिति द्योत्यते ॥ ४० ॥

षडङ्गयोगः

आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥ ४१ ॥

अमृतस्थाने प्राणादिलयस्य सुषुम्नाद्वाग्कत्वात्, नहि सुषुम्नाप्रवेशः सर्वसाधारणो भवति, नहि योगाभ्यासं विना सुषुम्नामार्गः स्प्रष्टुं शक्यते, अतस्तदुपायत्वेन षडङ्गयोग उच्यते—**आसनमिति** ॥ ४१ ॥

आसनचतुष्टयम्

आसनानि च तावन्ति यावन्त्यो जीवजातयः ।
एतेषामतुलान्भेदान् विजानाति महेश्वरः ॥ ४२ ॥
सिद्धं भद्रं तथा सिंहं पद्मं चेति चतुष्टयम् ।

योगासनानामनेकत्वात् तत्र श्रेष्ठतया सिद्धाद्यासनचतुष्टयमुद्दिशति—**आसनानीति** । असंख्येयतया दुर्विज्ञेयत्वात् **एतेषामिति** ॥ ४२ ॥ तेषु मुख्यान्यासनचतुष्टयानीत्यत्र **सिद्धं** इति । तत्प्रतिपादकश्रुतयो लिख्यन्ते—

योनिं वामेन सम्पीड्य मेढ्रादुपरि दक्षिणम् ।
ऋजुकायः समासीनः सिद्धासनमिदं भवेत् ॥
गुल्फौ तु वृषणस्याधः सीविन्याः पार्श्वयोः क्षिपेत् ।
पार्श्वपादौ च पाणिभ्यां दृढं बध्वा सुनिश्चलम् ।
भद्रासनं भवेदेतद्विषरोगविनाशनम् ॥

सीविनीं गुल्फदेशाभ्यां निपीड्य व्युत्क्रमेण तु ।
प्रसार्यं जानुनोर्हस्तावासनं सिंहरूपकम् ॥
ऊर्वोरुपरि वै धत्ते यदा पादतले उभे ।
पद्मासनं भवेदेतत् सर्वव्याधिविषापहम् ॥

इति ॥

योनिस्थानम्

आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् ॥ ४३ ॥
योनिस्थानं तयोर्मध्ये कामरूपं निगद्यते ।
आधाराख्ये गुदस्थाने पङ्कजं यच्चतुर्दलम् ॥ ४४ ॥
तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता ।
योनिमध्ये स्थितं लिङ्गं पश्चिमाभिमुखं तथा ॥ ४५ ॥
मस्तके मणिवद्भिन्नं यो जानाति स योगवित् ।

ततो मूलाधारस्वाधिष्ठानमध्यगतव्यष्टिप्रपञ्चयोन्यादिज्ञानफलं षडाधार-स्वरूपं च विशदयति—**आधारमिति** ॥ ४३ ॥ मूलाधारस्वाधिष्ठानमध्ये योनिस्थानं वर्तते इत्युक्तम् । तत्र योनिः कीदृशीत्यत आह—**आधारेति** ॥ ४४ ॥ मूलाधारचतुर्दलमध्ये व्यष्टिसंसारप्रवृत्तिनिवृत्तिहेतुतया योगायोगसिद्धैरपि वन्दिता कामरूपिणी नाम काचन योनिः कुण्डलिनीशक्तिः विद्यते । तस्याः सिद्धासिद्धवन्दितत्वं कथमित्यत्र—यदि हृदयादूर्ध्वगामिनी स्यात्तदा निवृत्तिमार्गभूषणसिद्धसेव्या भवति । यदा पुनः स्वस्थानान्न चलति तदा प्रवृत्तिहेतुतया संसारिसेविता भवतीत्यर्थः । तादृशयोनिमध्ये कुण्डलिनीमध्यप्रदेशे मस्तकभागे **मणिवत् भिन्नं** स्वयं प्रकाशितं **पश्चिमाभिमुखं** प्रत्यगात्मलिङ्गं विद्यते । प्रवृत्तिनिवृत्तिप्रकाशकत्वात् तदस्मीति **यो जानाति स योगवित्** प्रत्यक्परैक्यज्ञो जीवन्मुक्तो भवतीत्यर्थः ॥ ४५–४६ ॥

मूलाधारादिचतुश्चक्रस्वरूपम्

तप्तचामीकराकारं तडिल्लेखेव विस्फुरत् ॥ ४६ ॥
चतुरस्रमुपर्यग्नेरधो मेढ्रात्प्रतिष्ठितम् ।
स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं तदाश्रयम् ॥ ४७ ॥
स्वाधिष्ठानं ततश्चक्रं मेढ्रमेव निगद्यते ।
मणिवत्तन्तुना यत्र वायुना पूरितं वपुः ॥ ४८ ॥
तन्नाभिमण्डलं चक्रं प्रोच्यते मणिपूरकम् ।
द्वादशारमहाचक्रे पुण्यपापनियन्त्रितः ॥ ४९ ॥
तावज्जीवो भ्रमत्येवं यावत्तत्त्वं न विन्दति ।

ततो मूलाधारस्वरूपमाह—तप्तेति । मूलाधारचक्रस्याग्निमण्डलमेढ्रमध्यगतत्वात् ॥ ४६–४७ ॥ स्वाधिष्ठानस्वरूपमाह—स्वेति । लिङ्गमूले षड्दळयुक्तं स्वाधिष्ठानमित्यर्थः ॥ ४७–४८ ॥ मणिपूरकं व्युत्पादयति- मणिवदिति । दशदळान्वितं मणिपूरकमित्यर्थः । तत अनाहतचक्रं द्वादशदळं षोडशदळं विशुद्धिचक्रं द्विदळमाज्ञाचक्रं तदुपरि चन्द्रसूर्यमण्डलं तदुपरि सहस्रारचक्रं विद्यते इति मन्तव्यम् ॥ ४८–४९ ॥ तत्रानाहतचक्रे जीवात्मस्वरूपमाह—द्वादशेति । तत्रत्यो जीवो यावत् स्वयाथात्म्यं न जानाति तावत् संसरति, स्वज्ञानेन स्वाज्ञाने नष्टे जीवस्य ब्रह्ममात्रत्वादित्यर्थः ॥ ४९–५० ॥

नाडीचक्रम्

ऊर्ध्वं मेढ्रादधो नाभेः कन्दो योऽस्ति खगाण्डवत् ॥ ५० ॥
तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः ।
तेषु नाडीसहस्रेषु द्विसप्ततिरुदा[1]हृता ॥ ५१ ॥

[1] हृताः-

प्रधानाः प्राणवाहिन्यो भूयस्तत्र दश स्मृताः ।
इडा च पिङ्गला चैव सुषुम्ना च तृतीयका ॥ ९२ ॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुसा कुहूरत्र शङ्खिनी दशमी स्मृता ॥ ९३ ॥
एवं नाडीमयं चक्रं विज्ञेयं योगिनां सदा ।
सततं प्राणवाहिन्यः सोमसूर्याग्निदेवताः ॥ ९४ ॥
इडापिङ्गलासुषुम्नास्तिस्रो नाड्यः प्रकीर्तिताः ।
इडा वामे स्थिता [1]नाडी पिङ्गला दक्षिणे स्थिता ॥ ९५ ॥
सुषुम्ना मध्य[2]देशस्था प्राणमार्गास्त्रयः स्मृताः ।

ततो नाडीकन्दस्थानं तदियत्तामधिदेवतासहितप्रधाननाडीस्वरूपं चाह— ऊर्ध्वमिति ॥ ९०–९३ ॥ योगिनां, तृतीयार्थे षष्ठी, योगिभिरित्यर्थः । एतत् सर्वं स्पष्टमिति न व्याख्यातम् ॥ ९४–९६ ॥

प्राणादिदशवायवः

प्राणोऽपानः समानश्चोदानो व्यानस्तथैव च ॥ ९६ ॥
नागः कूर्मः कृकरको देवदत्तो धनंजयः ।
प्राणाद्याः पञ्च विख्याता नागाद्याः पञ्च वायवः ॥ ९७ ॥
एते नाडीसहस्रेषु वर्तन्ते जीवरूपिणः ।

जीवाधिष्ठेयनाडीचरप्राणादिदशवायुनाम निर्दिशति—प्राण इति ॥ ९७ ॥ तत्र प्राणाद्याः पञ्च प्रधानतया विख्याताः नागाद्या वायवस्तु

[1] भागे—क, अ १, अ २. [2] देशे तु—अ १. देशस्थाः—अ २.

उपप्राणाः उच्यन्ते ॥ ५७ ॥ तेषां जीवरूपेण नाडीचरत्वं जीवस्य प्राणापानवशतः यातायातत्वमविश्रान्तमित्याह एत्त इति ॥ ५८ ॥

जीवस्य प्राणापानवशत्वम्

प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च धावति ॥ ५८ ॥
वामदक्षिणमार्गेण चञ्चलत्वान्न दृश्यते ।
आक्षिप्तो भुजदण्डेन यथोच्चलति कन्दुकः ॥ ५९ ॥
प्राणापानसमाक्षिप्तस्तद्वज्जीवो न विश्रमेत् ।

अविश्रान्तत्वे दृष्टान्तः आक्षिप्त इति ॥ ५९ ॥

योगकाले प्राणापानैक्यम्

अपानात्कर्षति प्राणोऽपानः प्राणाच्च कर्षति ॥ ६० ॥
खगरज्जुवदित्येतद्यो जानाति स योगवित् ।

योगकाले प्राणापानैक्यं तज्ज्ञानफलं चाह अपानादिति । प्राणादपानादिति पञ्चमी द्वितीयार्था ॥ ६० ॥

अजपाहंसविद्या

हकारेण बहिर्याति सकारेण विशेत्पुनः ॥ ६१ ॥
हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ।
शतानि षड् दिवारात्रं सहस्राण्येकविंशतिः ॥ ६२ ॥
एतत्संख्याऽन्वितं मन्त्रं जीवो जपति सर्वदा ।
अजपा नाम गायत्री योगिनां मोक्षदा सदा ॥ ६३ ॥

अस्याः संकल्पमात्रेण नरः पापैः प्रमुच्यते ।
अनया सदृशी विद्या अनया सदृशो जपः ॥ ६४ ॥
अनया सदृशं पुण्यं न भूतं न भविष्यति ।

अहोरात्रनिर्वर्त्योच्छ्वासनिःश्वासरूपहंसविद्याऽजपाम्बरूपमाह — **हकारेणेति** ॥ ६१ ॥ प्राणापानव्यापारोच्छ्वासनिःश्वासव्यापार एव हंसमनुः तं **हंसहंसेत्यमुं मन्त्रं** हंसमन्यावर्तनसंख्येयत्तामाह — **शनानीति** ॥ ६२ ॥ स्वयमजपन् तूष्णीं तिष्ठन्नपि एतत् इति । या अजपतो जपभावमेति सेयं **अजपा गायत्री** सदैवमनुसन्धानयोगिनां **मोक्षदा** भवति ॥ ६३ ॥ यतः एवं अतः **अस्याः** इति । अजपां स्तौति—**अनयेति** ॥ ६४ ॥

कुण्डलिनीबोधनेन मोक्षद्वारविभेदनम्

येन मार्गेण गन्तव्यं [1]ब्रह्मस्थानं निरामयम् ॥ ६५ ॥
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ।
प्रबुद्धा वह्नियोगेन मनसा मरुता सह ॥ ६६ ॥
सूचिवद्व्रणमादाय व्रजत्यूर्ध्वं सुषुम्नया ।
उद्घाटयेत्कपाटं तु यथा [2]कुञ्चिकया हठात् ॥ ६७ ॥
कुण्डलिन्या तथा योगी मोक्षद्वारं विभेदयेत् ॥ ६८ ॥
कृत्वा संपुटितौ करौ दृढतरं बध्वाऽथ पद्मासनं
गाढं वक्षसि सन्निधाय चुबुकं ध्यानं च तच्चेतसि ।
वारंवारमपानमूर्ध्वमनिलं प्रोच्चारयन्पूरितं
मुञ्चन्प्राणमुपैति बोध[3]मतुलं शक्ति[4]प्रभावान्नरः ॥ ६९ ॥

[1] ब्रह्मरन्ध्रं—क. ब्रह्मद्वारं—अ २. [2] कुञ्चितया—अ १, अ २.
[3] ममलं—क. [4] प्रवाहान्न—अ २ (पाठान्तरत्वेन).

कुण्डलिनीस्थितिमाह— येमेति । "तुरीयं मूर्ध्नि संस्थितं" इति श्रुत्यनुरोधेन सहस्रारचक्रं ब्रह्मस्थानं, तत्रैवोपलभ्यते हि ब्रह्म योगिनाम् । तत्र स्वातिरिक्तामयवैरळ्यात् निरामयम ॥ ६५ ॥ येन सुषुम्नामार्गेण तद्गन्तव्यं तद्द्वारं स्वमुखेन आच्छाद्य परमेश्वरी कुण्डलिनी प्राणिसामान्यजठरे प्रसुप्ता भवति । सा कदा प्रतिबुध्यते इत्यत्र योगिनः केवलकुम्भकावस्थायां मूलाधारस्थाग्निना मनसा मरुता च सह प्रबुद्धा सती ॥ ६६ ॥ सूक्ष्मसूचिवत् गुणं भोगमादाय सुषुम्नयोर्ध्वं ब्रह्मस्थानं सहस्रारं व्रजति । कुण्डलिन्या सुषुम्नावदनं विभेदयेदित्याह—उद्घाटयेदिति । यथा नरो हठात् कुञ्चिकाप्रयत्नेन कवाटमुद्घाटयेत् तथैव योगी कुण्डलिन्या मोक्षहेतुसुषुम्नाद्वारं विभेदयेदित्यर्थः ॥ ६७–६८ ॥ सुषुम्नामार्गभेदोपायमाह— कृत्वेति । आदौ योगी पद्मासनं बद्ध्वा अथ स्वकरौ संपुटितौ कृत्वा वक्षसि चुबुकं चेतसि स्वस्वरूपध्यानं च सन्निधाय वारंवारमपानानिलमूर्ध्वं प्रोद्धारयन् आकुञ्चयन् एवं पूरितं प्राणं सुषुम्नायां मुञ्चन् नरो योगी सुषुम्नां प्रविष्टकुण्डलिनीशक्तिप्रभावात् निरुपमं अतुलं निरतिशयं ब्रह्माहं अहमेव ब्रह्मेति ब्रह्मात्मबोधमुपैति ॥ ६९ ॥

ब्रह्मचर्यादिना कुण्डलिनीबोधः

पद्मासनस्थितो योगी नाडीद्वारेषु पूरयन् ।
मारुतं कुम्भयन्यस्तु स मुक्तो नात्र संशयः ॥ ७० ॥
अङ्गानां मर्दनं कृत्वा श्रमजातेन वारिणा ।
कटुम्ललवणत्यागी क्षीरपानरतः सुखी ॥ ७१ ॥
ब्रह्मचारी मिताहारी योगी योगपरायणः ।
अब्दादूर्ध्वं भवेत्सिद्धो नात्र कार्या विचारणा ॥ ७२ ॥
[1]कन्दोर्ध्वकुण्डलीशक्तिः स योगी सिद्धिभाजनम् ।

[1] कन्दोर्ध्वे—उ.

एवं सुषुम्नाकुम्भकान्मुक्तो भवतीत्याह पद्मेति । यस्तु पुनः योगी पद्मासने स्थित्वा बाह्यं वायुमिडया आकृष्य नाडीद्वारेषु पूरयन् पूरितं मारुतं कुम्भयन् सुषुम्नां प्रापयित्वा यदा योगी ब्रह्मरन्ध्रं भिनत्ति सोऽयं योगी ततो ब्रह्मरन्ध्रं भित्त्वा यत्प्राप्यं तत् प्राप्य मुक्तो भवतीत्यत्र न हि संशयोऽस्तीत्यर्थः ॥ ७० ॥ तत्रोपायमाह —अङ्गानामिति । अभ्यासदशाया-मादौ प्राणायामकाले स्वेदो जायते । तेन सर्वाङ्गानां मर्दनं कृत्वा दृढकायो भूत्वा तदानीं कटूम्ललवणत्यागी क्षीरपानरतः सुखी ॥ ७१ ॥ एवं ब्रह्मचर्यादिनियमसम्पन्नो भूत्वा संवत्सरादूर्ध्वं सिद्धो भवति ॥ ७२ ॥ यस्य नाडीकन्दोर्ध्वभागे सुषुम्नायां कुण्डलिनीशक्तिः स्यात् सोऽयं योगी योगसिद्धिभाजनं भवति ॥

बन्धत्रयम्

अपानप्राणयोरैक्यं [1]क्षयान्मूत्रपुरीषयोः ॥ ७३ ॥
युवा भवति वृद्धोऽपि सततं मूलबन्धनात् ।
पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेद्गुदम् ॥ ७४ ॥
अपानमूर्ध्वमुत्कृष्य मूलबन्धोऽयमुच्यते ।
उड्याणं कुरुते यस्मादविश्रान्तमहाखगः ॥ ७५ ॥
उड्डियाणं तदेव स्यात्तत्र बन्धो विधीयते ।
उदरे पश्चिमं ताणं नाभेरूर्ध्वं तु कारयेत् ॥ ७६ ॥
उड्डियाणोऽप्ययं बन्धो मृत्युमातङ्गकेसरी ।
बध्नाति हि शिरोजातमधोगामिनभोजलम् ॥ ७७ ॥
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः ।
जालन्धरे कृते बन्धे कण्ठ[2]संकोचलक्षणे ॥ ७८ ॥

[1] क्षयोमू—अ १. [2] दुःखौघल—अ २.

तदङ्गत्वेन बन्धत्रयं तत्फलं चाचष्टे—अपानेति ॥ ७३–७५ ॥ उदरसङ्कोचनं पश्चिमं ताणमित्यर्थः ॥ ७६ ॥ अयमुड्डियाणबन्धः शिरोनभोजातं सहस्रारनभोविद्यमानं सर्वरोगाकरं कफजलं बध्नाति शुष्कं करोतीत्यर्थः ॥ ७७–७८ ॥

खेचरीमुद्राऽभ्यासः

न पीयूषं पतत्यग्नौ न च वायुः प्रधावति ।
कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ॥ ७९ ॥
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ।
न रोगो मरणं तस्य न निद्रा न क्षुधा तृषा ॥ ८० ॥
न च मूर्च्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ।
पीड्यते न च रोगेण लिप्यते न च कर्मणा ॥ ८१ ॥
बध्यते न च कालेन यस्य मुद्राऽस्ति खेचरी ।
चित्तं चरति खे यस्माज्जिह्वा भवति खेगता ॥ ८२ ॥
तेनैषा खेचरी नाम मुद्रा सिद्धनमस्कृता ।

योगाङ्गतया बन्धत्रयमुक्त्वाऽथ खेचरीमुद्रां तदभ्याससिद्धफलं चाह—कपालेति ॥ ७९ ॥ तदभ्यासान्तगळिकफलं तु न रोग इति ॥ ८०–८२ ॥

खेचर्यभ्यासेन वज्रोलिसिद्धिः

खेचर्या मुद्रया यस्य विवरं [1]लम्बिकोर्ध्वतः ॥ ८३ ॥
[2]बिन्दुः क्षरति नो यस्य कामिन्यालिङ्गितस्य च ।
यावद्बिन्दुः स्थितो देहे तावन्मृत्युभयं कुतः ॥ ८४ ॥

[1] बन्धि—अ २. [2] बीजं—अ २.

यावद्बद्धा नभोमुद्रा तावद्बिन्दुर्न गच्छति ।
गलितोऽपि यदा बिन्दुः संप्राप्तो योनिमण्डले ॥ ८९ ॥
व्रजत्यूर्ध्वं हठाच्छक्त्या निबद्धो योनिमुद्रया ।

खेचरीमुद्रारूढस्य जीवनहेतुबिन्दुस्थैर्यं वज्रोळिसिद्धिरपि भवतीत्याह— खेचर्येति । खेचर्या मुद्रया यस्य जिह्वा लम्बिकायाः अन्तर्जिह्वाया ऊर्ध्वतः तद्विवरं प्रविशति ॥ ८३ ॥ यच्छब्दस्तच्छब्दार्थः । अप्यर्थः चकारः । कामिन्यालिङ्गितस्यापि यस्य तस्य नैव बिन्दुः शुक्रं क्षरति । यावद्बिन्दुस्थैर्यं जायते तावत्तस्य मृत्युभयं कुतः संभवति ॥ ८४ ॥ यावत्खेचरीमुद्रा बद्धा भवेत् तावद्बिन्दुः न गच्छति । यदा गलितोऽपि बिन्दुः योनिमण्डले संप्राप्तोऽपि ॥ ८९ ॥ तदा वज्रोळिसंस्कृतयोनिमुद्रया हठाच्छक्त्या ऊर्ध्वं व्रजति ॥

द्विविधबिन्दैक्यबोधतो जीवन्मुक्तत्वम्

स एव द्विविधो बिन्दुः पाण्डरो लोहितस्तथा ॥ ८६ ॥
पाण्डरं शुक्रमित्याहुर्लोहिताख्यं महारजः ।
विद्रुमद्रुमसंकाशं योनिस्थाने स्थितं रजः ॥ ८७ ॥
शशिस्थाने वसेद्बिन्दुस्तयोरैक्यं सुदुर्लभम् ।
बिन्दुः शिवो रजः शक्तिर्बिन्दुरिन्दू रजो रविः ॥ ८८ ॥
उभयोः संगमादेव प्राप्यते परमं वपुः ।
वायुना शक्ति[1]चालेन प्रेरितं खे यथा रजः ॥ ८९ ॥
रविणैकत्वमायाति भवेद्दिव्यवपु[2]स्तदा ।
शुक्रं चन्द्रेण संयुक्तं रजः सूर्यसमन्वितम् ॥ ९० ॥
द्वयोः समरसीभावं यो जानाति स योगवित् ।

[1] जालेन—अ १. [2] स्तथा—क, अ १.

बिन्दोर्द्वैविध्यं तयोरैक्यप्रबोधतो जीवन्मुक्तत्वं चाह—स एवेति ॥ ८६ ॥ मूलाधारस्थं योनिस्थानं तत्र रजो देवीतत्त्वं जीवाख्यं वा भवति ॥ ८७ ॥ भ्रूमध्यसहस्रारमध्यं शशिस्थानं, तत्र बिन्दुः शिवतत्त्वं वर्तते । तयोः शिवशक्त्योः जीवपरयोर्वा ऐक्यं योगिनो विना यस्य कस्यापि दुर्लभं भवेत् ॥ ८८–९० ॥ शुक्रजोरूपभ्रूसहस्रारमध्यस्थसोमसूर्यैक्यं यो जानाति स योगवित् ब्रह्मवित् भवतीत्यर्थः ॥

महामुद्राऽभ्यासः

शोधनं मलजालानां घटनं चन्द्रसूर्ययोः ॥ ९१ ॥
रसानां शोषणं सम्यङ् महामुद्राऽभिधीयते ॥ ९२ ॥
वक्षोन्यस्तहनुर्निपीड्य सुषिरं योनेश्च वामाङ्घ्रिणा
हस्ताभ्यामनुधारयन् प्रविततं पादं तथा दक्षिणम् ।
आपूर्य श्वसनेन कुक्षियुगलं बध्वा शनै रेचये-
देषा पातक[1]नाशिनी ननु महामुद्रा नृणां प्रोच्यते ॥९३॥

महामुद्रालक्षणमुच्यते – शोधनमिति । नानासाधनसिद्धरेचकपूरक-कुम्भकात्मकप्राणायामशुद्धोदकेन नाडीगतमलजातशोधनं चन्द्रसूर्ययोरैक्यं वातपित्तादिरसानां शोषणं च यया भवति सेयं महामुद्रेत्यभिधीयते ॥ ९१–९२ ॥ महामुद्राभ्याममाह · वक्ष इति । आदौ योगी जालन्ध-रबन्धमारोप्य वामाङ्घ्रिणा योनिसुषिरं निपीडय प्रसारितदक्षिणपादं हस्ताभ्यां धारयन् कुक्षियुगलं श्वसनेनापूर्य कुम्भयित्वाऽथ शनैरिडया रेचयेत् । सैषा रीतिः सर्वपातकनाशिनी नृणां योगिनां योगविघ्ननाशिनी महामुद्रेति प्रोच्यते ॥ एवं प्राणायाम · उक्तः । अनात्मदेहादि[2]गताहंभावं [वस्य] प्रतीचि प्रत्याहरणं

[1] नाशनी—उ, मु. [2] गतं भा—उ १.

प्रत्याहारः । प्रत्यगेव ब्रह्मेति निश्चयो धारणा भवति । अहं ब्रह्माऽस्मि ब्रह्मैवाऽहमस्मि इति दृढभावना ध्यानम् । ध्यानादित्रिपुटीविकल्पलयो निर्विकल्पसमाधिः । "षडङ्गो योग उच्यते" इति प्रतिज्ञातत्वात् तदनुरोधेन प्रतिवचनाभावेऽप्येवं प्रत्याहारादि ऊह्यमित्यर्थः ॥ ९३ ॥

हृदये आत्मसाक्षात्कारः

अथात्मनिर्णयं व्याख्यास्ये—हृदि स्थाने अष्टदलपद्मं वर्तते तन्मध्ये रेखावलयं कृत्वा जीवात्मरूपं ज्योतीरूपमणुमात्रं वर्तते । तस्मिन्सर्वं प्रतिष्ठितं भवति सर्वं जानाति सर्वं करोति सर्वमेतच्चरितमहं कर्ताऽहं भोक्ता सुखी दुःखी काणः खञ्जो बधिरो मूकः कृशः स्थूलोऽनेन प्रकारेण स्वतन्त्रवादेन वर्तते ॥ ९३–१ ॥ पूर्वदले विश्रमते पूर्वदलं श्वेतवर्णं तदा भक्तिपुरःसरं धर्मे मतिर्भवति ॥ ९३–२ ॥ यदाऽऽग्नेयदले विश्रमते तदाग्नेयदलं रक्तवर्णं तदा निद्रालस्यमतिर्भवति ॥ ९३–३ ॥ यदा दक्षिणदले विश्रमते तद्दक्षिणदलं कृष्णवर्णं तदा द्वेषकोपमतिर्भवति ॥ ९३–४ ॥ यदा नैर्ऋतदले विश्रमते तन्नैर्ऋतदलं नीलवर्णं तदा पापकर्महिंसामतिर्भवति ॥ ९३–५ ॥ यदा पश्चिमदले विश्रमते तत्पश्चिमदलं स्फटिकवर्णं तदा क्रीडा[1]विनोदमतिर्भवति ॥ ९३–६ ॥ यदा वायव्यदले विश्रमते वायव्यदलं माणिक्यवर्णं तदा गमन[2]चालनवैराग्यमतिर्भवति ॥ ९३–७ ॥ यदोत्तरदले विश्रमते तदुत्तरदलं पीतवर्णं तदा सुखशृङ्गारमतिर्भवति ॥ ९३–८ ॥ यदेशानदले

[1] विनोदे—क, अ १, अ २. [2] चलन—क, अ २.

विश्रमते तदीशानदलं वैडूर्यवर्णं तदा दानादिकृपामतिर्भवति ॥ ९३–९ ॥ यदा संधिसंधिषु मतिर्भववि तदा वातपित्तश्लेष्म-महाव्याधिप्रकोपो भवति ॥ ९३–१० ॥ यदा मध्ये तिष्ठति तदा सर्वं जानाति गायति नृत्यति पठत्यानन्दं करोति ॥ ९३–११ ॥ यदा नेत्रश्रमो भवति श्रमनिर्हरणार्थं प्रथमरेखावलयं कृत्वा मध्ये निमज्जनं कुरुते प्रथमरेखा बन्धूकपुष्पवर्णं तदा निद्रावस्था भवति । निद्रावस्थामध्ये स्वप्नावस्था भवति । स्वप्नावस्थामध्ये दृष्टं श्रुतमनुमानसंभववार्ता इत्यादिकल्पनां करोति [1]तदादिश्रमो भवति ॥ ९३–१२ ॥ श्रमनिर्हरणार्थं द्वितीयरेखावलयं कृत्वा मध्ये निमज्जनं कुरुते द्वितीयरेखा इन्द्रकोपवर्णं तदा सुषुप्त्यवस्था भवति सुषुप्तौ केवलपरमेश्वरसंबन्धिनी बुद्धिर्भवति नित्यबोधस्वरूपा भवति पश्चात्परमेश्वर[2]रूपेण प्राप्तिर्भवति ॥ ९३–१३ ॥ तृतियरेखावलयं कृत्वा मध्ये निमज्जनं कुरुते तृतीयरेखा पद्मरागवर्णं तदा तुरीयावस्था भवति तुरीये केवलपर[3]मात्म[4]संबन्धिनी मतिर्भवति नित्यबोधस्वरूपो भवति तदा

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।

आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥९३–१४॥

तदा प्राणापानयोरैक्यं कृत्वा सर्वं विश्वमात्मस्वरूपेण लक्ष्यं धारयति यदा तुरीयातीतावस्था तदा सर्वेषामानन्दस्वरूपो भवति द्वन्द्वातीतो भवति यावद्देहधारणा वर्तते तावत्तिष्ठति पश्चात्परमात्म-

[1] तदाति—क.
[2] स्वरूपे—क, अ १, अ २.
[3] मात्मनिसं—अ २.
[4] संबन्धिनी भवति—क, अ १, अ २.

स्वरूपेण प्राप्तिर्भवति इत्यनेन प्रकारेण मोक्षो भवतीदमेवात्मदर्शनोपायं भवति ॥ ९३–१९ ॥

चतुष्पथसमायुक्तमहाद्वारगवायुना ।
सहस्थित[1]त्रिकोणोर्ध्वगमनं दृश्यतेऽच्युतः ॥ ९४ ॥

ध्येयनिर्णयः कथं स्यादित्याशङ्क्य सोपायं परमात्मनिर्णयमाचष्टे—अथेति । अथ यथोक्ताधिकारिलाभानन्तरं आत्मयाथात्म्यं सोपायं व्याख्यास्य इति परमदयावती श्रुतिः एवमाह—हृदीति । हृदयाष्टदलमध्ये रेखावलयं कृत्वा वृत्ताकारं विभाव्य तन्मध्ये प्राणाधारं हंसज्योतीरूपं जीवात्मरूपं अणुमात्रं वर्तते । य एवं वर्तते तस्मिन् सर्वं प्रतिष्ठितं भवति तस्य सर्वाधिकरणत्वात् । स हि सर्वं जानाति सर्वं करोति यत् कर्तव्यं तत् कृतमेव सर्वं अहं कर्ता इत्याद्यभिमानी सन् वर्तते इत्यर्थः ॥ ९३-१ ॥ तस्य पूर्वादिदलयोगतो धर्मादिवृत्तिमत्त्वमाह—पूर्वेति । सोऽयं जीवाख्योऽहं हंसः यदा पूर्वदले ॥ ९३-२–९३-१३ ॥ यत एवं अतः पूर्वदलादिद्वितीयरेखान्तं विहाय तृतीयरेखामवलम्ब्य तुर्यस्वरूपं तुर्यादिविश्रान्तगतहेयांशापह्नवसिद्धं तुर्यातीतं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति तन्मात्रतयाऽवशिष्टो भवतीत्याह—तदा शनैः-शनैरिति ॥ ९३-१४ ॥ यदि स्वातिरिक्तवृत्त्युदयो भवति तदा प्राणापानयोरैक्यमित्यादि । सर्वं विश्वमात्मस्वरूपेण लक्ष्यं धारयति, विश्वगतहेयांशापह्नवसिद्धब्रह्मणः स्वावशेषतया लक्षितत्वात् । यदैवमवस्था लक्ष्यते तदा सेयं तुरीयावस्था । यावद्देहधारणा . . . प्राप्तिर्भवति—यावत्प्रातिभासिकतयाऽपि देहोऽस्मीति ज्ञानं तावज्जीवन्मुक्तिदशामवलम्ब्य पश्चात् स्वातिरिक्तं न किञ्चिदस्तीति प्रबोधानन्तरं परमात्मैव भवतीत्यर्थः । जीवताया अनेन प्रकारेण मोक्षो भवति । इदमेवात्मदर्शनोपायं नेतरदित्यर्थः ॥ ९३–१९ ॥ मन्दानामात्मदर्शनोपायमाह—चतुष्पथेति ।

[1] त्रिकोणार्ध—क, अ २. त्रिकोणार्थ—अ १.

चतुष्पथो जालन्धरबन्धः तेन समायुक्तं महाद्वारं सुषुम्नारन्ध्रं गच्छतीति महाद्वारगः सचाऽसौ वायुश्चेति महाद्वारगवायुः तेन महाद्वारगवायुना सह स्थितमूलाधारत्रिकोणस्योर्ध्वमूलाधारगमनो मूलाधारस्थसुषुम्नायां दक्प्राणाग्निमनः-कुण्डलिनीप्रवेशमात्रेण स्वमात्राच्युतः परमात्मा दृश्यते साक्षात्क्रियते इत्यर्थः ॥ ९४ ॥

नादानुसन्धानतः आत्मदर्शनम्

पूर्वोक्तत्रिकोणस्थानादुपरि पृथिव्यादिपञ्चवर्णकं ध्येयम् ।
प्राणादिपञ्चवायुश्च बीजं वर्णं च स्थानकम् ।
यकारं प्राणबीजं च नीलजीमूतसन्निभम् ।
रकारमग्निबीजं च अपानादित्यसंनिभम् ॥ ९५ ॥
लकारं पृथिवीरूपं व्यानं बन्धूकसंनिभम् ।
वकारं जीवबीजं च उदानं शङ्खवर्णकम् ॥ ९६ ॥
हकारं वियत्स्वरूपं च समानं स्फटिकप्रभम् ।
हृन्नाभि[1]नासिकाकण्ठपादाङ्गुष्ठादिसंस्थितः ॥ ९७ ॥
द्विसप्ततिसहस्राणि नाडिमार्गेषु वर्तते ।
अष्टाविंशतिकोटीषु रोमकूपेषु संस्थितः ॥ ९८ ॥
समानप्राण एकस्तु [2]जीवः स एक एव हि ।
रेचकादित्रयं कुर्याद्दृढचित्तः समाहितः ॥ ९९ ॥
शनैः समस्तमाकृष्य हृत्सरोरुहकोटरे ।
प्राणापानौ च बध्वा तु प्रणवेन समुच्चरेत् ॥ १०० ॥

[1] नासिकर्ण च—क, अ १, अ २.
[2] जीवस्थो—क. जीवस्सो—अ १, अ २.

[1]कण्ठसंकोचनं कृत्वा लिङ्गसंकोचनं तथा ।
मूलाधारात्सुषुम्ना च [2]बिसतन्तुनिभा शुभा ॥ १०१ ॥
अमूर्तो [3]वर्तते नादो वीणादण्डसमुत्थितः ।
शङ्खनादादिभिश्चैव मध्यमेव ध्वनिर्यथा ॥ १०२ ॥
व्योमरन्ध्रगतो नादो मायूरं [4]नादमेव च ।
कपालकुहरे मध्ये चतुर्द्वारस्य मध्यमे ॥ १०३ ॥
तदात्मा राजते तत्र यथा व्योम्नि दिवाकरः ।
कोदण्डद्वयमध्ये तु ब्रह्मरन्ध्रेषु शक्ति च ॥ १०४ ॥
स्वात्मानं पुरुषं पश्येन्मनस्तत्र लयं गतम् ।
रत्नानि ज्योत्स्निनादं तु बिन्दु माहेश्वरं पदम् ॥ १०५ ॥
य एवं वेद पुरुषः स कैवल्यं समश्नुते ॥ १०६ ॥

इत्युपनिषत् ॥

एवमकृतसाक्षात्काराणां नादानुसन्धानोपायतः तत्पदार्सिं प्रकटयन्नुपसंहरति—पूर्वेति ॥ ध्येयम्—किं तत्? प्राणादि । यद्येवमपक्वचित्तः कश्चित् तेन पूर्वोक्तमूलाधारत्रिकोणाग्निमण्डलादुपरि प्राणादिवायुजातं पृथिव्यादिपञ्चवर्णयुक्तं ध्येयम् । यकारादिबीजं नीलजीमूतादिवर्णं हृदयादिस्थानविशिष्टं ध्येयमिति पूर्वेणान्वयः । आदौ हृदि यकारं प्राणबीजं विद्यात् नीलजीमूततुल्यवर्णविशिष्टं प्राणं जानीयादित्यध्याहार्यम् । गुदे रेफमग्निबीजमपानमादित्यसन्निभं विद्यात् ॥ ९५ ॥ पृथिवीबीजं लकारं बन्धूकसन्निभं व्यानं कृत्स्नशरीरव्यापकं विद्यात् । कण्ठदेशे वकारं जीवबीजमुदानं शङ्खवर्णविशिष्टं विद्यात् ॥ ९६ ॥ हकारं वियद्बीजं समानं नाभ्यासनं स्फटिकप्रभं च विद्यात् । एवं प्राणपञ्चकं

[1] कर्ण—क, अ १.
[2] पद्म—क, अ १, अ २.
[3] दश्यते—उ.
[4] नाद एव—उ.

हृन्नाभिनासिकाकण्ठपादाङ्गुष्ठादिषु संस्थितं विद्यात् ॥ ९७ ॥ तत्र समानवायुस्तु द्विसप्ततिसहस्रनाडीमार्गेषु सदा सञ्चरन् वर्तते अष्टाविंशतिकोटिरोमकूपेषु व्याप्य स्थितो भवति ॥ ९८ ॥ विचार्यमाणे एकस्तु—तुशब्दोऽवधारणार्थः—समानादिप्राणान्तवायुभेदः एक एव । य एवं पञ्चप्राणाधारः सोऽयं जीव एक एव । हिशब्दः प्रसिद्धिद्योतकः । एवं ज्ञात्वा ततः परं रेचकादि इति । एवं यथोक्तपञ्चप्राणारूढजीवस्वरूपं ज्ञात्वा ततो दृढचित्तो योगी समाहितो भूत्वा रेचकाद्यवयवत्रयविशिष्टप्राणायामत्रयं कुर्यात् ॥ ९९ ॥ शनैः स्वान्तःकरणवृत्तिसहस्रं हृत्सरोरुहकोटरे समाकृष्य तत्रैव प्राणापानौ च बद्ध्वा प्रणवेन तु प्रणवेनैव प्रणवेनाऽऽज्ञासहस्रारचक्रं प्रत्युच्चरेत् ऊर्ध्वं नयेत् ॥ १०० ॥ तदुपायतया कण्ठलिङ्गसङ्कोचनग्रहणं बन्धत्रयोपलक्षणार्थम् । तथा बन्धत्रयं कृत्वा मूलाधारात् मूलाधारमारभ्य पद्मतन्तुनिभा शुभा सुषुम्ना—चशब्दात् तदन्तःकैवल्यनाडी च—प्रतिष्ठिता भवतीति द्योत्यते ॥ १०१ ॥ तत्र सुषुम्नाश्रयवीणादण्डे समुत्थितः सन् अमूर्तो नादो वर्तते । अत एव वीणादण्डमध्यमेव नादोत्पत्तिस्थानं यथा शङ्खनादादिभिश्चैव ॥ १०२ ॥ हृद्ग्रथोमरन्ध्रगतो नादोऽभिव्यक्तो भवति । यदाऽयं नादो मायूरं नादमेवानुकरोति तदा इडापिङ्गळासुषुम्नाग्रन्थिकाभेदेन चतुर्द्वारस्य मध्यमे कपालकुहरमध्ये ॥ १०३ ॥ तत्र यथा व्योम्नि दिवाकरः तथा परमात्मा राजते सम्यगभिव्यक्तो भवति । यत्र मनउपलक्षितदृष्टिर्वाय्वग्निकुण्डल्यादिकं लयं गतं तत्र मूलाधारादिब्रह्मोपलब्धिरन्ध्रेषु कोदण्डद्वयमध्ये तु—तुशब्दार्थः—यथाशक्ति यथाबलं ॥ १०४ ॥ स्वात्मानं पुरुषं पश्येत् । किंविशेषणविशिष्टमित्यत्र, "वज्रदण्डसमुद्भूताः मणयश्चैकविंशतिः" इति श्रुत्यनुरोधेन विश्वतुर्यमित्याद्यविकल्पानुज्ञैकरसान्तानि एकविंशतितुरीयरत्नानि तेषां ज्योतिस्त्व ज्योतिष्मदधिकरणं जाग्रज्जाग्रदादिचतुष्पञ्चदशविकल्पं न ददातीति नदं तदेव नादं तुर्यतुर्यं बिन्दु निर्विशेषरूपं महांश्चासौ निष्प्रतियोगिकब्रह्ममात्रतयाऽवस्थातुमीश्वरश्चेति महेश्वरः तद्भावो माहेश्वरं स्वमात्रतया पद्यते इति पदं विद्वान् पश्येदिति पूर्वेणान्वयः ॥ १०५ ॥ विद्याफलं वदन्नुपसंहरति—य

इति । विद्वान् वेदनसमकालं कैवल्यरूपेण अवशिष्यते इत्यत्र, "ब्रह्म वेद ब्रह्मैव भवति" इति ज्ञानसमकालमेव ब्रह्ममात्रभावापत्तिश्रुतेः । इत्युपनिषच्छब्दोऽयं ध्यानबिन्दूपनिषत्समाप्त्यर्थः ॥ १०६ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं ध्यानबिन्दोः स्फुटं लघु ॥
ध्यानबिन्दुविवरणं त्रिंशदधिशतत्रयम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकोनचत्वारिंशत्संख्यापूरकं ध्यानबिन्दूपनिषद्विवरणं सम्पूर्णम्

# नादबिन्दूपनिषत्

वाङ्मे मनसि—इति शान्तिः

वैराजप्रणवस्वरूपम्

अकारो दक्षिणः पक्ष उकारस्तूत्तरः स्मृतः ।
मकारं पुच्छमित्याहुरर्धमात्रा तु मस्तकम् ॥ १ ॥
पादादिकं गुणास्तस्य शरीरं तत्त्वमुच्यते ।
धर्मोऽस्य दक्षिणश्चक्षुरधर्मो योऽपरः स्मृतः ॥ २ ॥
भूर्लोकः पादयोस्तस्य भुवर्लोकस्तु जानुनि ।
सुवर्लोकः कटीदेशे नाभिदेशे महर्जगत् ॥ ३ ॥
जनोलोकस्तु हृद्देशे कण्ठे लोकस्तपस्ततः ।
भ्रुवोर्ललाटमध्ये तु सत्यलोको व्यवस्थितः ॥ ४ ॥

वैराजात्मोपासनया सञ्जातज्ञानवह्निना ।
दग्ध्वा कर्मत्रयं योगी यत्पदं याति तद्भजे ॥

इह खलु ऋग्वेदप्रविभक्तेयं नादबिन्दूपनिषत् विराट्प्रणवप्रकटनपूर्वकं तद्गतसविशेषब्रह्मविदां स्वात्तज्ञानानुरोधेन सविशेषब्रह्मात्तिमभिधाय निर्विशेषब्रह्म-

याथात्म्यप्रकटनपूर्वकं तज्ज्ञानान्नादोपायसाधनसम्पन्नानां कर्मत्रयभङ्गप्रभा[भ]वविकळेबरैकवल्यं प्रकटयन्ती विजृम्भते स्वयमवान्तरूपेण । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । श्रुतिस्तु-- अकारइत्यादिना । अन्तर्विराट्प्रणवावेर्कीकृत्य द्वादशमात्रात्मको महावैराजप्रणव उच्यते । तद्भावापत्तये महाविराजः सुपर्णतयोक्तिः । सुपर्णभावमापन्नमहाविराजः स्थूलप्रपञ्चाभिधायकोऽयमकारो दक्षिणः पक्षः । तस्योत्तरपक्षस्तु सूक्ष्मप्रपञ्चाभिधायक उकारः स्मृतः । तस्य पुच्छं बीजप्रपञ्चाभिधायकं मकारमिति ब्रह्मविद आहुः । अर्धमात्रा तु तन्मस्तकभावं गतेत्यामनन्ति ॥ १ ॥ तस्य पादादिकं सत्वादिगुणा भवन्ति । तस्य विशिष्टावयवसम्पन्नं शरीरं तु वराहोपनिषदुक्तषण्णवतितत्त्वजातमुच्यते । अस्य दक्षिणोत्तरचक्षुषी धर्माधर्मौ भवतः । दक्षिणश्चक्षुरिति लिङ्गव्यत्ययः ॥ २ ॥ तस्य पादजानुकटिनाभिहृदयकण्ठभ्रूमध्येषु भूरादिसप्तलोकाः प्रतिष्ठिताः इत्यर्थः । पादयोरिति सप्तमीद्विवचनम् ॥ ३-४ ॥

### वैराजविद्याफलम्

सहस्राणमती वाऽत्र मन्त्र एष प्रदर्शितः ।
एवमेतां समारूढो हंसयोगविचक्षणः ॥ ५ ॥
न भिद्यते कर्मचारैः पापकोटिशतैरपि ।

एवंविशेषणविशिष्टो वैराजप्रणव उक्तः इत्याह—सहस्रेति । सहस्राणमि[र्णमती]ति लिङ्गव्यत्ययः । प्रणवाद्य[द्या]वयवाकारस्य सहस्रावयवत्वं श्रूयते, "अकारः सहस्रावयवान्वितः" इति । अत्र अस्मिन् महावैराजप्रणवात्मनि सहस्राणाख्यावयवविशिष्टाकारान्वितोऽयमेष ओङ्कारो मन्त्र अभिधानतया स्थितः इति श्रुतिभिः प्रदर्शित इत्यर्थः । वाशब्दः अवधारणे । इत्थं वक्ष्यमाणद्वादशमात्रात्मकप्रणवार्थमहाविराडस्मि इत्यनुसन्धानं हंसयोगः, तद्वतः पापाद्यभेद्यतामाह—एवमिति । स्वतत्त्वज्ञानेन स्वातिरिक्तकलनां हन्तीति

हंसः । स एवास्मीत्यनुसन्धानं हंसयोगः । तद्विचक्षणः तदभिज्ञो योगी ॥ ९ ॥ एवमुक्तलक्षणां महावैराजविद्यां समारूढो यदा तदनुसन्धानपरो भवति तदा स्वकृतकर्मचारैः कर्मप्रभवैः पापकोटिशतैरपि न कदाऽपि भिद्यते— इति वक्ष्यमाणविद्याफलं दर्शयति ॥

प्रणवस्य प्रधानमात्राचतुष्टयस्वरूपम्

आग्नेयी प्रथमा मात्रा वायव्येषा तथा परा ॥ ६ ॥
भानुमण्डलसंकाशा भवेन्मात्रा तथोत्तरा ।
परमा चार्धमात्रा या वारुणीं तां विदुर्बुधाः ॥ ७ ॥
कालत्रयेऽपि [1]यत्रेमा मात्रा नूनं प्रतिष्ठिताः ।
एष ओंकार आख्यातो धारणाभिर्निबोधत ॥ ८ ॥

प्रधानमात्राचतुष्टयस्वरूपमाह—आग्नेयीति । अग्निः वैश्वानरः तत्सम्बन्धिनी आग्नेयी वैराज्यकाराभिधाना प्रथमा मात्रा भवति । तथा वायुशब्देन सूत्रात्मोच्यते, "वायुर्वै गौतम तत्सूत्रं" इति श्रुतेः । तत्सम्बन्धिनी वायवी एषा परा उकाररूपिणी द्वितीया मात्रा भवति ॥ ६ ॥ भानुमण्डलवत् सम्यक् काशत इति बीजात्मा भानुमण्डलसङ्काशः तदभिधानमकारात्मिका भानुमण्डलसङ्काशा परा तृतीयमात्रा भवेत् । या च पुनः मात्रात्रयापेक्षया अर्धमात्रा परमा सर्वोत्कृष्टा भवति बुधाः तामेतां स्वविकल्पितभेदजातं स्वेन रूपेण वारयति व्याप्नोतीति वरुणः तुर्यः तद्रूपिणीं वारुणीं चतुर्थमात्रात्मिकां विदुः ॥ ७ ॥ यत्र प्रणवे भूतादिकालत्रयेऽपि इमाः मात्राः प्रतिष्ठिताः एषः ओङ्कारः एवं श्रुतिभिराख्यातो भवति । हे स्वाङ्गलोकाः यूयं वक्ष्यमाणघटिकापञ्चककालात्मकघोषिण्यादिमात्रा धारणाभिः निबोधत जानथेत्यर्थः ॥ ८ ॥

[1] यस्ये—क, अ २.

प्रणवस्य व्यष्टिसमष्ट्यात्मकद्वादशमात्राभेदविवरणम्

● घोषिणी प्रथमा मात्रा विद्युन्मात्रा तथा परा ।
पतङ्गिनी तृतीया स्याच्चतुर्थी वायुवेगिनी ॥ ९ ॥
पञ्चमी नामधेया तु षष्ठी चैन्द्र्यभिधीयते ।
सप्तमी वैष्णवी नाम अष्टमी शांकरीति च ॥ १० ॥
नवमी महती नाम धृतिस्तु दशमी मता ।
एकादशी भवेन्नारी ब्राह्मी तु द्वादशी परा ॥ ११ ॥

व्यष्टिसमष्ट्यात्मकद्वादशमात्राभेदं विवृणोति—घोषिणीति ॥ ९ ॥ अन्तःप्रणवमात्रा अकारायाः पञ्चब्रह्मवाचका ज्ञेयाः ॥ १० ॥ समष्ट्यकारायाः [अ]ण्डविराडादिवाचका भवन्ति ॥ ११ ॥

उपासकानां तत्तन्मात्राकालोत्क्रमणफलम्

प्रथमायां तु मात्रायां यदि प्राणैर्वियुज्यते ।
भरते वर्षराजाऽसौ सार्वभौमः प्रजायते ॥ १२ ॥
द्वितीयायां समुत्क्रान्तो भवेद्यक्षो महात्मवान् ।
विद्याधरस्तृतीयायां गान्धर्वस्तु चतुर्थिका ॥ १३ ॥
पञ्चम्यामथ मात्रायां यदि प्राणैर्वियुज्यते ।
उषितः सह देवत्वं सोमलोके महीयते ॥ १४ ॥
[1]षष्ठ्यामिन्द्रस्य सायुज्यं सप्तम्यां वैष्णवं पदम् ।
अष्टम्यां व्रजते रुद्रं पशूनां च पतिं तथा ॥ १५ ॥

[1] षष्ठ्यांमित्रस्य-

नवम्यां तु महर्लोकं दशम्यां तु जनं व्रजेत् ।
एकादश्यां तपोलोकं द्वादश्यां ब्रह्म शाश्वतम् ॥ १६ ॥

षष्टिघटिकास्वेवं द्वादशमात्राद्दष्टिं कृत्वा उपासनां कुर्वतः तत्तन्मात्राकालोत्क्रमणफलमाह—प्रथमायामिति । चतुर्मुखदैवत्यघोषिण्याख्याकारभिधानोदयादिपञ्चघटिकाकालपरिमितायां प्रथमायां तु मात्रायां यश्चेवमुपासकः प्राणैः वियुज्यते सोऽसौ योगी भरते वर्षे राजा सार्वभौमः सन् प्रजायते ॥ १२ ॥ तथा च द्वितीयायाम् । सप्तम्यर्थे चतुर्थिकेति । प्रथमपर्यायवदेकादशपर्यायोऽप्यूह्यः ॥ १३–१६ ॥

निर्विशेषब्रह्मस्वरूपं, तज्ज्ञानफलं च

ततः परतरं शुद्धं व्यापकं निर्मलं [1]शिवम् ।
सदोदितं परं ब्रह्म ज्योतिषामुदयो यतः ॥ १७ ॥
अतीन्द्रियं गुणातीतं मनो लीनं यदा भवेत् ।
अनूपमं शिवं शान्तं [2]योगयुक्तः सदा विशेत् ॥ १८ ॥
तद्युक्तस्तन्मयो जन्तुः शनैर्मुञ्चेत् [3]कुले चिरम् ।
संस्थितो योगचारेण सर्वसङ्गविवर्जितः ॥ १९ ॥
ततो विलीनपाशोऽसौ विमलः कमलाप्रभुः ।
तेनैव ब्रह्मभावेन परमानन्दमश्नुते ॥ २० ॥

सविशेषब्रह्मविदामेवं फलतारतम्यमुक्त्वा निर्विशेषब्रह्मस्वरूपं तज्ज्ञानफलं चाह—तत इति । ततः—"अकारो दक्षिणः पक्षः" इत्यारभ्य महावैराजाभिधानं सविशेषं ब्रह्म तदुपासकानां तत्फलं चाभिहितं, ततः परतरं महावैराजगतहेयां-

[1] परं—क, अ २. [2] योगयुक्तं—अ २. [3] कलेबरं—उ (पाठान्तरं), मु.

शापह्नवसिद्धं अत एव शुद्धं, स्वाज्ञदृष्ट्या व्याप्यमलाशिवप्रसक्तौ व्यापकं निर्मलं शिवं, यतः सूर्यादिज्योतिषामुदयो भवति तदेतत् ब्रह्म सदोदितम् ॥ १७ ॥ करणग्रामतद्धेतुत्रिगुणप्रसक्तौ अनीन्द्रियं गुणातीतं निर्गुणं, यदा स्वातिरिक्तकलनोज्जीवकमनो लीनं भवेत्तदा तदनूपमं निरुपमं, चिन्मात्रत्वात् शिवं, शान्तस्वातिरिक्तं यत् ब्रह्म अवशिष्यते सदा तन्निर्विकल्पकयोगयुक्तो विशेत् ॥ १८ ॥ तद्योगयुक्तो जन्तुः तन्मयो भूत्वा स्वकारणभूते कुले स्वाविद्याद्वयतत्कार्ये शनैःशनैः मुञ्चेन अथ यच्चिरं चिन्मात्रं भवेत् । कोऽयं एवमधिकारीत्याह— संस्थित इति । योगचारेण योगाभ्यासेन सम्यक् स्थितः । अन्तर्बाह्यकलनासङ्गिनो योगाभ्यासेच्छा कुत इत्यत आह— सर्वसङ्गविवर्जितः इति ॥ १९ ॥ अतो योगी विमलान्तरो भूत्वा विलीन-स्वबन्धनहेतुस्वातिरिक्तपाशः सन् विदेहकैवल्यकमलया प्रभवतीति प्रभुः परमानन्दं यः स्वेन अनुष्ठितः तेनैव ब्रह्मभावेन सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति ज्ञानयोगेन अश्नुते, कृतकृत्यो भवतीत्यर्थः ॥ २० ॥

ज्ञानिनः प्रारब्धकर्मभावाभावविचारः

आत्मानं सततं ज्ञात्वा कालं नय महामते ।
प्रारब्धमखिलं भुञ्जन्नोद्वेगं कर्तुमर्हसि ॥ २१ ॥
उत्पन्ने चात्मविज्ञाने प्रारब्धं नैव मुञ्चति ।
तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ॥ २२ ॥
देहादीनामसत्त्वात्तु यथा [1]स्वप्नो विबोधतः ।
कर्म जन्मान्तरीयं यत्प्रारब्धमिति कीर्तितम् ॥ २३ ॥
यत्तु जन्मान्तराभावात्पुंसो नैवास्ति कर्हिचित् ।
स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहकः ॥ २४ ॥

[1] स्वप्ने—क, अ १, अ २.

अध्यस्तस्य कुतो जन्म जन्माभावे कुतः स्थितिः ।
उपादानं प्रपञ्चस्य मृद्भाण्डस्येव पश्यति ॥ २५ ॥[1]
अज्ञानं चेति वेदान्तैस्तस्मिन्नष्टे क्व विश्वता ।
यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ॥ २६ ॥
तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ।
रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति ॥ २७ ॥
अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते ।
देहस्यापि प्रपञ्चत्वात्प्रारब्धावस्थितिः कुतः ॥ २८ ॥
अज्ञानजनबोधार्थं प्रारब्धमिति चोच्यते ।
ततः कालवशादेव प्रारब्धे तु क्षयं गते ॥ २९ ॥
ब्रह्मप्रणवसंधाननादो ज्योतिर्मयः शिवः ।
स्वयमाविर्भवेदात्मा मेघापायेंऽशुमानिव ॥ ३० ॥

कंचनापक्वज्ञानिनमुद्दिश्येदमाह—आत्मानमिति । सततं श्रुत्याचार्यप्रसादलब्धश्रवणादिसाधनेन स्वात्मानं ब्रह्मेति ज्ञात्वा हे महामते आयुःशेषकालं नय इच्छाऽनिच्छापरेच्छाप्रभवसुखदुःखतन्मिश्रप्रारब्धमखिलं भुञ्जन् नोद्वेगं सन्तापं कर्तुं अर्हसि ॥ २१ ॥ तव एवं उत्पन्ने चात्मविज्ञाने नैव प्रारब्धं त्वां मुञ्चति । यदि ते ब्रह्ममात्रतत्त्वज्ञानं जायते तदा न हि ते प्रारब्धं कर्म अस्तीत्याह—तत्त्वज्ञानेति ॥ २२ ॥ प्रारब्धसम्भवे हेतुमाचष्टे—देहादीनामिति । यत् जन्मान्तरीयं कर्म सुखादिभोगप्रदं प्रारब्धं तत्तु प्रबोधात् स्वप्नवत् तत्त्वज्ञानेन नश्यत्येव । तत्र हेतुः—वस्तुतो देहादीनामसत्त्वात् ॥ २३ ॥ एवं देहादीनामसत्त्वे पुंसो जन्मान्तराभावात् यत् प्रारब्धमिति मन्यसे तत्तु

१, अ २.

कर्हिचिदपि नैवास्तीति निश्चिन्वित्यर्थः । प्राग्ध्वायत्तदेहस्यासत्त्वं स्फुटयति सदृष्टान्तं -ह्नवेति ॥ २४–२९ ॥ स्वाज्ञानं अध्यासहेतुः । तस्मिन् वेदान्तैः तत्प्रभवज्ञानविज्ञानसम्यज्ज्ञानैः अभावपदं गते क तत्कार्यविश्वता सेद्धुं पारयति, देहादेः विश्वान्तःपातित्वात् । न कदाऽपि प्राग्ध्वादिकर्मत्रयं विद्यते इत्यर्थः । शिष्टं स्पष्टम् ॥ २६–२८ ॥ तथा चेत् कथं प्राग्ध्वकल्पनेत्यत आह—अज्ञानेति । स्वज्ञानेन स्वाज्ञानतत्कार्ये नष्टे कथं ते देहो विद्यत इति स्वाज्ञानानुरोधमाक्षिपन्ति, तद्वाग्बन्धनायेयं प्राग्ध्वकल्पनेत्यर्थः । ततः किमित्यत आह—तत इति । ततः सम्यज्ज्ञानादूर्ध्वं कालवशात् ईश्वरप्रसादादेव प्रारब्धकर्मोपलक्षितस्वातिरिक्तास्तित्वभ्रमे क्षयं अपह्नवं गते सति ॥ २९ ॥ अथ पुरा ब्रह्मप्रणवानुसन्धानप्रभवप्रबोधः पुनः स्वातिरिक्तास्तित्वभ्रमं न ददाति, ज्योतिर्मयः शिवो नादः तुर्यतुर्यो भूत्वा मेघापाये अंशुमानिव स्वयं आविर्भवेत् आत्मा स्वमात्रमवशिष्यत इत्यर्थः ॥ ३० ॥

### तुरीयतुरीयाधिगमोपायभूतं नादानुसन्धानम्

सिद्धासनस्थितो योगी मुद्रां संधाय वैष्णवीम् ।
शृणुयाद्दक्षिणे कर्णे नादमन्तर्गतं सदा ॥ ३१ ॥
अभ्यस्यमानो नादोऽयं बाह्यमावृणुते [1]ध्वनिम् ।
पक्षाद्विपक्षमखिलं जित्वा तुर्यपदं व्रजेत् ॥ ३२ ॥
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् ।
वर्धमानस्तथाऽभ्यासे श्रूयते सूक्ष्मसूक्ष्मतः ॥ ३३ ॥
आदौ जलधिजीमूतभेरीनिर्झरसंभवः ।
मध्ये मर्दलशब्दाभो घण्टाकाहलजस्तथा ॥ ३४ ॥

[1] ध्वनिः—क, अ १, अ २.

अन्ते तु किंकिणीवंशवीणाभ्रमरनिस्वनः ।
इति नानाविधा नादाः श्रूयन्ते सूक्ष्मसूक्ष्मतः ॥ ३५ ॥
महति श्रूयमाणे तु महाभेर्यादिकध्वनौ ।
तत्र सूक्ष्मं सूक्ष्मतरं नादमेव परामृशेत् ॥ ३६ ॥
घनमुत्सृज्य वा सूक्ष्मे सूक्ष्ममुत्सृज्य वा घने ।
रममाणमपि [1]क्षिप्तं मनो नान्यत्र चालयेत् ॥ ३७ ॥
यत्र कुत्रापि वा नादे लगति प्रथमं मनः ।
तत्र तत्र स्थिरीभूत्वा तेन सार्धं विलीयते ॥ ३८ ॥
विस्मृत्य सकलं बाह्यं नादे दुग्धाम्बुवन्मनः ।
एकीभूयाथ सहसा चिदाकाशे विलीयते ॥ ३९ ॥
उदासीनस्ततो भूत्वा सदाऽभ्यासेन संयमी ।
उन्मनीकारकं सद्यो नादमेवावधारयेत् ॥ ४० ॥
सर्वचिन्तां समुत्सृज्य सर्वचेष्टाविवर्जितः ।
नादमेवानुसंदध्यान्नादे चित्तं विलीयते ॥ ४१ ॥

ब्रह्मप्रणवार्थतुर्यतुर्याधिगमोपायतया नादानुसन्धानप्रकारमाह—**सिद्धासनेति** ॥

गुदं वामेन सम्पीड्य मेढ्रादुपरि दक्षिणम् ।
ऋजुकायस्त्रिबन्धाभ्यां सिद्धासनमिदं भवेत् ॥

**इति योगशास्त्रप्रसिद्धसिद्धासने स्थितो योगी**

[1] कूल्लं— अ २.

अन्तर्लक्ष्यं बहिर्दृष्टिः निमेषोन्मेषवर्जिता ।
एषा सा वैष्णवी मुद्रा सर्वतन्त्रेषु गोपिता ॥

इति श्रुतिसिद्धवैष्णवीं मुद्रामनुसन्धाय स्वान्तरनाहतगतं नादं दक्षिणकर्णे सदा शृणुयात् ॥ ३१ ॥ एवं नादश्रवणतः किं स्यादित्यत आह— अभ्यस्यमान इति । एवं अभ्यस्तो नादः स्ववाग्कबाह्यशब्दादिकमावृत्य पक्षमात्रेण स्वविपक्षभूतस्वातिरिक्तास्तित्वं निर्मूल्य नादसाधनो योगी तुर्यतुर्यपदं स्वमात्रमिति व्रजेत् ॥ ३२ ॥ नादेयत्तां तदभ्यासानुभवं च प्रकटयति— श्रूयत इति ॥ ३३ ॥ कथं? आदौ ॥ ३४–३५ ॥ तत् किं ग्राह्यमित्यत आह—महतीति ॥ ३६ ॥ यथाकथंचित् नादात् मनो न चालयेदित्याह— घनमिति ॥ ३७ ॥ जलध्यादिभ्रमरनिस्वनान्तनादेषु यत्र कुत्र वा मनः स्थिरीभवेत् तेन नादेन साकं चिदाकाशे विलीयत इत्याह—यत्रेति ॥ ३८–३९ ॥ तदितरकार्येषु उदासीनः ॥ ४० ॥ यतो नादाभ्यासः क्षिप्रफलदः अत एव सर्वचिन्ताम् ॥ ४१ ॥

### नादस्य मनोनियमनसामर्थ्यम्

मकरन्दं पिबन्भृङ्गो गन्धान् [1]नापेक्षते यथा ।
नादासक्तं सदा चित्तं विषयं न हि काङ्क्षते ॥ ४२ ॥
बद्धः सुनादगन्धेन सद्यःसंत्यक्त[2]चापलम् ।
नादग्रहणतश्चित्तमन्तरङ्ग[3]भुजङ्गमम् ॥ ४३ ॥
विस्मृत्य विश्व[4]मेकाग्रं कुत्रचिन्न हि धावति ।
[5]मनोन्मत्तगजेन्द्रस्य विषयोद्यानचारिणः ॥ ४४ ॥

[1] नाक्षेपते—उ, अ १. [2] चापलः—क, अ १, अ २, मु.
[3] भुजंगमः—मु. [4] मेकाग्रः—मु. [5] मनोम—क, अ १.

नियामनसमर्थोऽयं निनादो निशिताङ्कुशः ।
नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते ॥ ४५ ॥
अन्तरङ्ग[1]तरङ्गस्य रोधे वेलायतेऽपि च ।

नादासक्तं चित्तं तदतिरिक्तविषयं न काङ्क्षतीति सदृष्टान्तमाह—मकरन्दमिति ॥ ४२ ॥ नादपाशनिरुच्छ्वासबद्धं चित्तं अचलं सत् स्वबाह्याभ्यन्तरं विस्मृत्य स्तब्धीभवतीत्याह—बद्ध इति ॥ ४३ ॥ स्वान्तर्बाह्यं विस्मृत्य स्वस्मिन्नेव स्थिरं सत् न कुत्रचिन् परिधावतीत्यर्थः । नादाङ्कुशो मनोगजनियमनदक्ष इत्याह—मन इति ॥ ४४ ॥ नादोन्तरङ्गविहङ्गमतरङ्गरोधनजालवेलेव दक्ष इत्याह—नाद इति ॥ ४५ ॥

उपेयनादस्वरूपम्

ब्रह्मप्रणवसंलग्ननादो ज्योतिर्मयात्मकः ॥ ४६ ॥
मनस्तत्र लयं याति तद्विष्णोः परमं पदम् ।
तावदाकाशसंकल्पो यावच्छब्दः प्रवर्तते ॥ ४७ ॥
निःशब्दं तत्परं ब्रह्म परमात्मा [2]समीर्यते ।
नादो यावन्मनस्तावन्नादान्ते तु मनोन्मनी ॥ ४८ ॥
सशब्दश्चाक्षरे क्षीणे निःशब्दं परमं पदम् ।
सदा नादानुसंधानात्संक्षीणा वासना [3]भवेत् ॥ ४९ ॥
निरञ्जने विलीयेते मनोवायू न संशयः ।
नादकोटिसहस्राणि बिन्दुकोटिशतानि च ॥ ५० ॥
सर्वे तत्र लयं यान्ति ब्रह्मप्रणव[4]नादके ।

[1] समुद्रस्य—क, अ २.
[2] समीयते—अ १, अ २.
[3] तुया—क, अ १, अ २.
[4] नादकः—उ.

उपायनादस्वरूपमुक्त्वा फलात्मकोपेयनादस्वरूपं तज्ज्ञानफलं च प्रकटयति—ब्रह्मेति । अकारस्थूलांशादिप्रविभक्तजाग्रज्जाग्रदाद्यविकल्पानुक्रैकरसान्तकलनोपबृंहणात् ब्रह्म यस्मिन् षोडशमात्रात्मकप्रणवे विराजते स ब्रह्मप्रणवः तत्संलग्नः तदभिन्नः सचाऽसौ स्वज्ञानां पराग्भावं न ददातीति नदः स एव नादः प्रत्यगात्मा स्वयंप्रकाशकतया ज्योतिर्मयात्मको भवति ॥ ४६ ॥ यन्मनः पराक्प्रत्यग्विभागहेतुः तत्र प्रत्यगभिन्नपरब्रह्मणि लयं याति, मनउपलक्षितस्वाविद्यापदाधिकरणं यत् तस्य विष्णोः तद्विष्णोः व्याप्यसापेक्षव्यापनशीलस्य व्याप्यसापेक्षव्यापकताऽभावे यद्व्याप्यव्यापककलनाविगळमवशिष्यते, तदेव परमं निष्प्रतियोगिकनिर्विशेषं तन्मात्रतया पद्यत इति पदं विकळेबरकैवल्यमित्यर्थः । किं सदा ब्रह्मप्रणवानुसन्धानं कर्तव्यमित्यवधिमाह—तावदिति । यावद्वाह्यान्तःशब्दकामादिप्रतीतिः तावदाकाशसङ्कल्पः स्वातिरिक्तशब्दादिप्रपञ्चोऽस्ति नास्तीति विभ्रमसङ्कल्पविगळो भवेत् ॥ ४७ ॥ ततोऽयं निःशब्दतया विभाति परमात्मेति सम्यगीर्यते । नादानुसन्धानावधि तत्फलं चाह—नाद इति ॥ ४८–४९ ॥ ब्रह्मप्रणवनादस्य सर्वापवादाधिकरणतामाह—नादेति । नादस्य सर्वसाक्षिणोऽधिगमे यान्युपायतया कोटिसहस्राणि साधनानि सन्ति यानि बिन्दोः ईश्वरस्य अधिगमे सालोक्यादितत्पदाप्तिसाधनानि कोटिशतानि सन्ति तानि सर्वाणि ॥ ५० ॥ चशब्दात् ये ये स्वाज्ञविकल्पिताः विकाराः सन्ति ते सर्वे तत्र ब्रह्मप्रणवनादके प्रत्यगभिन्ने ब्रह्मणि लयं यान्ति । ततः प्रत्यगभिन्नं ब्रह्म स्वाधिष्ठेयाभावात् निरधिष्ठानं सत् स्वमात्रमवशिष्यत इति भावः ॥

नादारूढयोगिनां विदेहमुक्तिलाभः

सर्वावस्थाविनिर्मुक्तः सर्वचिन्ताविवर्जितः ॥ ५१ ॥
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः ।
शङ्खदुन्दुभिनादं च न शृणोति कदाचन ॥ ५२ ॥
काष्ठवज्ज्ञायते देह उन्मन्यावस्थया ध्रुवम् ।
न जानाति स शीतोष्णं न दुःखं न सुखं तथा ॥ ५३ ॥

न मानं नावमानं च संत्यक्त्वा तु समाधिना ।
अवस्थात्रयमन्वेति न चित्तं योगिनः सदा ॥ ९४ ॥
जाग्रन्निद्राविनिर्मुक्तः स्वरूपावस्थतामियात् ॥ ९५ ॥
दृष्टिः स्थिरा यस्य विना सदृश्यं
वायुः स्थिरो [1]यस्य विना प्रयत्नम् ।
चित्तं स्थिरं यस्य विनाऽवलम्बं
स ब्रह्मतारान्तरनादरूपः ॥ ९६ ॥

इत्युपनिषत् ॥

एवं ब्रह्मप्रणवनादारूढयोगिनां स्थितिं तत्कृतकृत्यतां विशदीकरोति—सर्वेति ॥ ९१–९२ ॥ ब्रह्ममात्रभावमापन्नो योगी ब्रह्मातिरिक्तकलनां न जानाति ब्रह्मातिरिक्तयोः निष्प्रतियोगिकभावाभावरूपत्वात् इत्यर्थः ॥ ९३–९५ ॥ तस्य ब्रह्मप्रणवनादरूपतां दर्शयन् उपसंहरति—दृष्टिरिति । यस्य दृष्टिवायुचित्तानि दृश्यप्रयत्नावलम्बकलनां विना स्थिरीभूत्वा ब्रह्मप्रणवपर्यवसन्ना भवन्ति सोऽयं विद्वान् ब्रह्मतारान्तरतुर्यतुर्याभिधाननादरूपतया अवशिष्यते, विदेहमुक्तो भवतीत्यर्थः ॥ ९६ ॥ इत्युपनिषच्छब्दौ नादबिन्दूपनिषत्समाप्त्यर्थौ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं नादबिन्दोः स्फुटं लघु ।
नादबिन्दुविवरणं पञ्चाशदधिकं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टत्रिंशत्सङ्ख्यापूरकं नादबिन्दूपनिषद्विवरणं सम्पूर्णम्

[1] यत्र—उ १.

# पाशुपतब्रह्मोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

## पूर्वकाण्डः

जगन्नियन्तृविषयाः सप्तप्रश्नाः

अथ ह वै स्वयंभूर्ब्रह्मा प्रजाः सृजानीति कामकामो जायते कामेश्वरो वैश्रवणः ॥ १ ॥ वैश्रवणो ब्रह्मपुत्रो वालखिल्यः स्वयंभुवं परिपृच्छति—जगतां का विद्या का देवता जाग्रत्तुरीययोरस्य को देवो [1]यानि कस्य वशानि कालाः कियत्प्रमाणाः कस्याज्ञया रवि-चन्द्रग्रहादयो भासन्ते कस्य महिमा गगनस्वरूप एतदहं श्रोतु-मिच्छामि नान्यो जानाति त्वं ब्रूहि ब्रह्मन् ॥ २ ॥

पाशुपतब्रह्मविद्यासंवेद्यं परमाक्षरम् ।
परमानन्दसम्पूर्णं रामचन्द्रपदं भजे ॥

इह खलु अथर्वणवेदप्रविभक्तेयं पाशुपतब्रह्मोपनिषत् हंससूत्रस्वरूप-प्रकटनव्यग्रा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः सङ्क्षेपतो

[1] युगानि—अ.

विवरणमारभ्यते । वालखिल्यस्वयम्भूप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—अथेति । अथ प्राण्यदृष्टपरिपाकानन्तरम् । हवा इति वृत्तार्थस्मरणार्थौ निपातौ । स्वयमेव भवतीति स्वयम्भूः ब्रह्मा तस्य प्रजाः सृजेयमिति कामं कामः कामकामो जायते प्रादुर्बभूव । तत्सङ्कल्पानुरोधेन कामेश्वरो रुद्रः, "ललाटात् क्रोधजो रुद्रोऽजायत" इति श्रुतेः, वैश्रवणश्च ॥ १ ॥ वैश्रवणोनामकः ब्रह्मपुत्रः वालखिल्यो ऋषिपूगश्च स्वयम्भुवं *परिपृच्छति । किमिति? जगतां का विद्येत्यादि समधा प्रश्नः कृतः ।* एतदहं त्वत्तः सकाशात् श्रोतुमिच्छामि । *त्वदितरेणैतदुक्ता न हि कोऽपि विद्यते ।* अतो ब्रह्मन् त्वं ब्रूहि ॥ २ ॥

सप्तप्रश्नानामुत्तराणि

स्वयंभूरुवाच—[1]कृत्स्नजगतां मातृका विद्या ॥ ३ ॥ द्वित्रिवर्णसहिता द्विवर्णमाता त्रिवर्णसहिता चतुर्मात्रात्मकोङ्कारो मम प्राणात्मिका देवता ॥ ४ ॥ अहमेव जगत्त्रयस्यैकः पतिः ॥ ५ ॥ मम वशानि सर्वाणि युगान्यपि [2]च ॥ ६ ॥ अहो[3]रात्रादिमतिसंवर्धिताः कालाः ॥ ७ ॥ मम रूपा रवेस्तेजश्चन्द्रनक्षत्र[4]ग्रहतेजांसि ॥ ८ ॥ गगनो मम त्रिशक्तिमायास्वरूपः नान्यो मदस्ति ॥ ९ ॥ तमोमायात्मको रुद्रः सात्विकमायात्मको विष्णू राजसमायात्मको ब्रह्मा । इन्द्रादयस्तामसराज[5]सात्मिका न सात्विकः कोऽपि अघोरः [6]साधारणस्वरूपः ॥ १० ॥

[1] कृत्स्नं—अ १, अ २, क. [2] "च" लुप्तम्—क, अ २.
[3] रात्रामति सं—क, अ १, अ २, उ १. रात्रादयः मत्सं—अ.
[4] ग्रहास्ते—अ, अ १, अ २. [5] ससात्विका [6] सर्वसाधा—क, अ २.

इति पृष्टो भगवान् स्वयम्भूरुवाच । किमिति? 'जगतां का विद्या' इत्याद्यप्रश्नमपाकरोति—कृत्स्नजगतां मातृका अकारादिक्षकारान्तरूपिणी विद्या, तस्या वैखरीप्रपञ्चनिर्वाहकत्वात् ॥ ३ ॥ 'का देवता' इति द्वितीय-प्रश्नमपाकरोति—द्वित्रिवर्णेति । पदरूपेण द्वित्रिवर्णसहिता स्वयमकारो-काराख्यद्विवर्णतो मीयत इति द्विवर्णमाता मकारेण सह त्रिवर्णसहिता "स्थूलमेतद्ह्रस्वदीर्घप्लुतम्" इति श्रुत्यनुरोधेन य ओङ्कारः चतुर्मात्रात्मको भवति सोऽयं मम प्राणात्मिका देवता ॥ ४ ॥ 'जाग्रत्तुरीययोरस्य को देवः' इति प्रश्नमपाकरोति—अहमेवेति । अस्य जाग्रदादितुरीयान्तकलनाकलितस्य जगत्त्रयस्य अहमेक एव देवः, मम सूत्रादिरूपेण जगन्त्रयचालकत्वात् ॥ ५ ॥ 'यानि कस्य वशानि' इति प्रश्नमपाकरोति—ममेति । कृतादियुगानि, अपिच-शब्दाभ्यां स्थावरजङ्गमात्मकं जगच्च मदृशे वर्तत इत्यर्थः ॥ ६ ॥ 'कालाः कियत्प्रमाणाः' इति प्रश्नमपाकरोति—अहोरात्रेति । निमेषाहोरात्रादिमत्या संवर्धिताः कल्पावसानाः कालाः ॥ ७ ॥ 'कस्याज्ञया रविचन्द्रग्रहादयो भासन्ते' इति प्रश्नमपाकरोति—मम रूपा इति ।

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥

इति स्मृतेः ॥ ८ ॥ 'कस्य महिमा गगनस्वरूपः' इति चरमप्रश्नमपाकरोति—गगन इति । गगनः गगनम् । क्रियाज्ञानेच्छारूपेण दुर्गालक्ष्मीसरस्वतीरूपेण वा मायामयाः तिस्रः शक्तयः तत्कार्यजातं च मन्महिमास्वरूपमित्यर्थः । अहं एतादृशः परमेश्वरः, मदतिरेकेण न किञ्चिदस्तीत्याह—नान्य इति ॥ ९ ॥ रुद्रादयः किंगुणविशिष्टाः इत्यत आह—तम इति । तस्य सर्वसंहारकतया तामसगुणोपाधित्वात् । विष्ण्वतिरेकेण न सात्त्विकः कोऽपि, तस्य सर्वमर्यादापालकतया शुद्धसत्त्वरूपत्वात् । अत एवाऽयं अघोरः सर्वसाधारणस्वरूपः सत्त्वगुणावष्टम्भतः शान्तरूपेण भक्तकोटिसाधारणत्वात् ॥ १० ॥

सृष्टियज्ञे कर्त्रादिनिरूपणम्

समस्तयागानां रुद्रः [1]पशुकर्ता रुद्रो यागदेवो विष्णु-
रध्वर्युर्होतेन्द्रो देवता यज्ञभुङ् मानसं ब्रह्म महेश्वरं ब्रह्म ॥ ११ ॥

सृष्टियज्ञे रुद्रादयः कीदृशाः सन्तः किं कुर्वन्ति इत्यत आह—समस्तेति । तत्र रुद्रस्तु अग्निष्टोमादिवाजिमेधान्तसमस्तयागानां विशसनकर्मणि पशून् करोतीति पशुकर्ता यागसामान्यस्य पशुप्रधानत्वात् रुद्रः । यागदेवः, यागप्रधानाहुतिद्रव्यस्य विष्ण्वायत्तत्वात्, विष्णुः अध्वर्युः अन्यूनाधिकतया तत् पालयन् । चालकत्वात् होता इन्द्रः, स्तुतशस्त्रकृत्त्वात् । तत्तद्देवतारूपेण पशुपतिरेव यज्ञभुक् । मानसं ब्रह्म—वाङ्मौनपूर्वं मानसं मनसा सर्वर्त्विङ्निर्वर्त्यप्रयोगद्रष्टृत्वेन यज्ञोपबृंहणात् —महेश्वरं ब्रह्म ब्रह्मणः सर्वद्रष्टृतया ब्रह्म ब्रह्माणं महेश्वरं विद्धि ॥ ११ ॥

नादानुसन्धानयज्ञः

मानसो हंसः [2]सोऽहं हंस इति तन्मयं यज्ञो नादानुसंधानम् ।
तन्मयविकारो जीवः ॥ १२ ॥

कोऽयं यज्ञ इत्यत्र नादानुसन्धानं इत्याह—मानस इति । हंसः-सोऽहमिति चिरभावनातः तन्मयं तद्भावसाधनं यत् नादानुसन्धानं तदेव मानसो यज्ञो भवतीत्यर्थः । एवं अनुसन्धाता जीवस्तु उच्छ्वासनिःश्वासवद्यन्मनः तन्मयविकारः । जीवस्य प्राणमनउपाधिकत्वात् तद्विकारत्वं युज्यत इत्यर्थः ॥ १२ ॥

परमात्मनो हंसत्वनिरूपणम्

परमात्मस्वरूपो हंसः । अन्तर्बहिश्चरति हंसः । अन्तर्गतो-
ऽनवकाशान्तर्गतसुपर्णस्वरूपो हंसः ॥ १३ ॥

[1] पशुपतिः कर्ता—अ. [2] सोहमिति—अ.

हंसस्तु स्वतत्त्वज्ञानेन स्वातिरिक्तभ्रमं हन्ति अपह्नवं करोतीति हंसः परमात्मा भवति। स कुत्र आसनमर्हतीत्यत्र—सोऽयं हंसः प्राणापानोपाधियोगात् अन्तर्बहिश्चरति। यद्वा—सर्वप्राण्यन्तर्बहिश्चरति प्रत्यगभिन्नब्रह्मरूपेण उपलभ्यते, "अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेः। सर्वप्राण्यन्तः कामादयो वर्तन्ते, बाह्ये शब्दादिविषयाश्च, तथा सति स्वव्याप्तेः अनवकाशात् कथं अन्तर्गतो बहिर्गतो वा भवितुमर्हतीत्यत्र—सर्वप्राण्यन्तर्बाह्यगतकामशब्दादिविषसर्पग्राससुपर्णस्वरूपो हंसः। प्रत्यगभिन्नं ब्रह्मास्मीति सम्यज्ज्ञानस्य स्वान्तर्बाह्यकलनाविलयपूर्वकत्वात् हंसः स्वान्तर्बहिः व्याप्य परिपूर्णो भवतीत्यर्थः। तथाच स्मृतिः—

विषया बाह्यदेशस्था देहस्यान्तर्ग्रहङ्कृतिः।
सर्वग्रहोपसंशान्तौ स्वयमेवावशिष्यते॥

इति॥ १३॥

यज्ञसूत्रब्रह्मसूत्रयोः साम्यम्

षण्णवतितत्त्वतन्तुवद्व्यक्तं चित्सूत्रत्रयचिन्मयलक्षणं नवतत्त्वत्रिरावृतं ब्रह्मविष्णुमहेश्वरात्मकमग्नित्रयकलोपेतं चिद्ग्रन्थिबन्धनम् अद्वैतद्ग्रन्थिः॥ १४॥ यज्ञसाधारणाङ्गं बहिरन्तर्ज्वलनं यज्ञाङ्गलक्षणब्रह्मस्वरूपो हंसः॥ १५॥

बाह्यान्तर्भासमानयज्ञब्रह्मसूत्रयोः साम्यमाह—षण्णवतीति। चतुरङ्गुलमानेन षण्णवतिसङ्ख्याविशिष्टं यज्ञसूत्रं यथा व्यक्तं भवति तथा षण्णवतितत्त्वतन्तुविशिष्टं ब्रह्मसूत्रं व्यक्तं भवति। यज्ञसूत्रं तु सूत्रत्रयविशिष्टतन्तुलक्षणं, ब्रह्मसूत्रं तु द्वितुर्यांविकल्पात्मना चित्सूत्रत्रयचिन्मयलक्षणं भवति। यथा यज्ञसूत्रं सूत्रत्रयं त्रिरावृतं यदि तदा नवसूत्रं भवति तथा ब्रह्मसूत्रमपि द्वितुर्यांविकल्पत्रयं त्रिरावृतं चेत् नवमहातत्त्वात्मकं भवति। यद्वा—तुर्यविश्वविराडोत्रादिभेदेन नवतत्त्वं तुर्यप्राज्ञबीजानुज्ञैकरसात्मना त्रिरावृतं तृतीयपाद-

पर्यवसन्नं भवति । यद्वा—नवतत्त्वत्रिरावृतं ब्रह्मसूत्रं ब्रह्मविष्णुमहेश्वरात्मकं गार्हपत्याद्यग्नित्रयकळोपेतं वा भवति । एवं त्रिधाभिन्नब्रह्मसूत्रैक्योपायस्तु चिन्मात्रादतिरिक्तं त्रिधा विभक्तं न किञ्चिदस्तीति चिद्ग्रन्थिबन्धनम् । व्यष्टिसमष्टितदैक्यावभासकचितामैक्यं ग्रन्थिबन्धनतः कथमित्यत्र—अद्वैतग्रन्थिः तदैक्यग्रन्थेः तद्भेदग्रासत्वात् अद्वैतग्रन्थिः अद्वितीयपरमात्मा भवतीत्यर्थः । यथा यज्ञसूत्रब्रह्मग्रन्थिः तदैक्यहेतुः तथा अत्रापीत्यर्थः ॥ १४ ॥ बाह्यान्तः-सूत्रयोः सामानाधिकरण्यमाह—यज्ञेति । यज्ञसूत्रं बहिः ज्वलतीति यथा बाह्ययज्ञसाधारणाङ्गं भवति तथा ब्रह्मसूत्रं अन्तर्ज्वलतीत्यन्तर्यज्ञसाधारणाङ्गं भवतीति ज्ञेयम् । हंसस्तु अन्तर्यज्ञाङ्गलक्षणब्रह्मस्वरूपो भवति ॥ १५ ॥

ब्रह्मयज्ञो ब्राह्मणाधिकारिकः

उपवीतलक्षणसूत्र[1]ब्रह्मगा यज्ञाः । ब्रह्माङ्गलक्षणयुक्तो यज्ञसूत्रम् । तद्ब्रह्मसूत्रम् । यज्ञसूत्रसंबन्धी ब्रह्मयज्ञः तत्स्वरूपः ॥१६॥

बाह्ययज्ञास्तु उपवीतलक्षणसूत्रवद्ब्रह्मगा ब्राह्मणाश्रया भवन्ति । यज्ञसूत्रं ब्रह्माङ्गलक्षणयुक्तो वेदाङ्गलक्षणयुक्तो ब्राह्मणो भजति । तत् ब्रह्मसूत्रमपि स एव भजति । तत् कथं इत्यत्र—यज्ञसूत्रवद्ब्राह्मणसम्बन्धी ब्रह्मयज्ञः, ब्रह्मनिष्ठाया ब्राह्मणनिर्वर्त्यत्वात् । यो यन्निष्ठः स तत्स्वरूपो भवति ॥ १६ ॥

प्रणवहसस्य ब्रह्मयज्ञत्वम्

अङ्गानि मात्राणि । मनोयज्ञस्य हंसो यज्ञसूत्रम् । प्रणवं ब्रह्मसूत्रं ब्रह्मयज्ञमयम् । प्रणवान्तर्वर्ती हंसो ब्रह्मसूत्रम् । तदेव ब्रह्मयज्ञमयं मोक्षक्रमम् ॥ १७ ॥

[1] ब्रह्मसूत्रगा—क.

यत्प्रणवनिष्ठः प्रणवो भवति तदङ्गानि कानीत्यत्र—मात्राणि अकारादि-मात्राः। अङ्गिप्रणवस्वरूपं कीदृशं इत्यत्र—मनोयज्ञस्य अन्तर्यज्ञस्य फलत्वेन यो विराजते हंसः तत्स्वरूपमेव यज्ञसूत्रम्। प्रणवं प्रणवः ब्रह्मसूत्रमयं ब्रह्मयज्ञश्च। यत एवं अतो हंस एव सर्वं, तदतिरिक्तं न किञ्चिदस्ति इत्यर्थः। यो हंसः प्रणवार्थतया प्रणवान्तरुपलभ्यते स एव ब्रह्मसूत्रम्। प्रत्यगभिन्नं ब्रह्म यत् ब्रह्मसूत्रं तदेव ब्रह्मयज्ञमयं निर्विशेषब्रह्मज्ञानम्। तदेव मोक्षक्रमं स्वातिरिक्तभ्रममोक्षणस्य स्वमात्रज्ञानमेव साधनं, तदतिरिक्तसाधनजालस्य तन्मोक्षणेऽकिञ्चित्करत्वात्। अयमेव हि क्रमः, "नान्यः पन्था अयनाय विद्यते" इति श्रुतेः ॥ १७ ॥

ब्रह्मसन्ध्याक्रियारूपो मनोयागः

**ब्रह्मसंध्याक्रिया मनोयागः। संध्याक्रिया मनोयागस्य लक्षणम् ॥ १८ ॥**

मनोयागः कीदृशः इत्यत आह—ब्रह्मेति। "तत् त्वमसि," "अहं ब्रह्मास्मि" इति प्रत्यक्परब्रह्मणोरैक्यमेव सन्ध्याक्रिया मनोयागः उच्यते। तयोः सन्ध्याक्रिया हि मनोयागस्य लक्षणं इत्यत्र—जीवात्मपरमात्मनोः एकत्वज्ञानेन तयोः भेद एव विभ्रमः, सा सन्ध्येति—

नोदकैर्जायते सन्ध्या न मन्त्रोच्चारणेन तु।
सन्धौ जीवात्मनोरैक्यं सा सन्ध्या सद्भिरुच्यते ॥

इति श्रुतेः स्मृतेश्च ॥ १८ ॥

हंसप्रणवाभेदानुसन्धानं अन्तर्यागः

**यज्ञ[1]सूत्रं प्रणवम्। ब्रह्मयज्ञक्रियायुक्तो ब्राह्मणः। ब्रह्मचर्येण चरन्ति देवाः। हंससूत्रचर्या यज्ञाः। हंसप्रणवयोरभेदः ॥ १९ ॥**

[1] सूत्रप्रणवब्र—अ.

**हंसस्य प्रार्थनास्त्रिकालाः । त्रिकालास्त्रिवर्णाः । त्रेताभ्यनुसंधानो यागः । त्रेताभ्यात्माकृतिवर्णोङ्कारहंसानुसंधानोऽन्तर्यागः ॥ २० ॥ चित्स्वरूपवत्तन्मयं तुरीयस्वरूपम् । अन्तरादित्ये ज्योतिःस्वरूपो हंसः ॥ २१ ॥ यज्ञाङ्गं ब्रह्मसंपत्तिः । ब्रह्म[1]प्रवृत्तितत्प्रणवहंससूत्रेणैव ध्यानमाचरन्ति ॥ २२ ॥**

हंसप्रणवयोः अभेदं वक्तुं भूमिकां करोति—**यज्ञसूत्रमिति** । यज्ञत्वेन सूचनात् **यज्ञसूत्रं** ब्रह्मप्रणवं प्रणवः, यज्ञस्य विष्णोः प्रणवार्थत्वात् **ब्रह्मयज्ञक्रिया** निष्कामकर्मानुष्ठानसहकृतध्यानसमाधिः, तदनुष्ठाता **ब्राह्मणः**, तस्य परापरब्रह्मवित्त्वात् । "ब्रह्मभावे मनश्चारो ब्रह्मचर्यं विदुर्बुधाः" इति श्रुत्यनुरोधेन **देवा** इन्द्रादयोऽपि सदा **ब्रह्मचर्येण चरन्ति**, तेषां प्रजापतिशिष्यत्वेन ब्रह्मवित्त्वात् । **यज्ञा** अपि **हंससूत्रचर्याः** अन्तर्यज्ञानां प्रत्याहारधारणाध्यानसमाधीनां हंससूत्रचर्याविर्भावहेतुत्वात् । "आत्ममन्त्रस्य हंसस्य परस्परसमन्वयात्" इति स्मृतिसिद्धः **हंसप्रणवयोरभेदः**, वाच्यवाचकयोरैकत्वात् ॥ १९ ॥ हंसप्रणवयोरैकत्वं कथमित्यत्राह—**हंसस्येति** । प्रत्यगभिन्नपरमात्मनो **हंसस्य** आप्त्युपायभूताः **प्रार्थनाः** श्रवणादयः । ते **त्रिकालाः**, श्रवणादीनां कालपरिच्छेद्यत्वात् । भूतादित्रिकाला एव अकारादित्रिवर्णाः । विश्वविराडोत्रादि**त्रेताभ्यनुसन्धानोऽनुसन्धानमन्तर्यागः** । तत् कथं इत्यत्र—विश्वादित्रेताभ्यात्मनां द्वितुर्यांविकल्पपर्यवसन्नानां व्यष्टिसमष्टितदुभयैक्याकाराद्याकृतिवर्णवदोङ्कारार्थनिष्प्रतियोगिकतुर्यतुर्यहंसः स्वमात्रमित्यनुसन्धानोऽनुसन्धानमन्तर्यागः ॥ २० ॥ विश्वविराडोत्रादिचित्स्वरूपवत्तन्मयं तद्वतहेयांशापायसिद्धं तुर्यप्रविभक्ततुरीयस्वरूपम् । तद्विकल्पितान्तरादित्ये स्वान्तःकामादिवृत्त्यवभासकप्रत्यक्सूर्ये तदभेदेन विद्योतमानज्योतिःस्वरूपो हंसः परमात्मा ॥ २१ ॥ तदनुसन्धानात्मकान्तर्यज्ञाभिधानाङ्गं सम्यज्ज्ञानमङ्गिब्रह्मसम्पत्तिहेतुः, स्वाप्तेः

[1] प्रवृत्तौ—अ.

स्वातिरिक्तासम्भवसिद्धस्वज्ञानपूर्वकत्वात् । अत एव ब्रह्मविदादयः पराक्प्रवृत्ति-निरसनपूर्वकं प्रत्यगभिन्नब्रह्मगोचरा प्रवृत्तिः तदालम्बनभूतः प्रणवः तदर्थभूतप्रत्यक्परविभागैक्यासहतुर्यतुर्यहंसरूपेण तुरीयोङ्कारात्प्रविद्योतं तुर्यतुर्यं "ब्रह्ममात्रमसन्न हि" इत्यादिश्रुतिततिसूचनात् हंससूत्रं "मद्व्यतिरिक्तमणुमात्रं न विद्यते" इति निर्विशेषब्रह्मज्ञानं तेनैव हंसः स्वमात्रमिति ध्यानमाचरन्ति । एवंनिष्ठाः तत्स्वरूपा एव भवन्तीत्यर्थः ॥ २२ ॥

षण्णवतिहंससूत्राणि

प्रोवाच पुनः स्वयंभुवं प्रतिजानीते ब्रह्मपुत्रो ऋषिर्वाल-खिल्यः । हंससूत्राणि कतिसंख्यानि कियद्वा प्रमाणम् ॥ २३ ॥

हृदादित्यमरीचीनां पदं षण्णवतिः । [1]चित्सूत्राघ्राणयोः स्वर्निर्गता प्रणवाधारा षडङ्गुल्यदशाशीतिः ॥ २४ ॥

वालखिल्यः स्वयम्भूमुखात् एवमवगम्य पुनः स्वावगतिदार्ढ्याय ब्रह्मयज्ञसूत्रेयत्तां पृच्छतीत्याह—प्रोवाचेति । वालखिल्यो मुनिः पुनः स्वयम्भुवं प्रति हे भगवन्—भवान् सर्वं प्रतिजानीते, तव निरङ्कुशसर्वज्ञत्वात्—हंसस्य परमात्मनः प्रापकतया सूचनात् सूत्राणि कतिसङ्ख्याकानि कियद्वा तत्प्रमाणं तदियत्तेति तद्बुभुत्सया प्रोवाच पृष्टवान् ॥ २३ ॥ प्रश्नोत्तरं भगवानाह—हृदीति । हृदि विलसितकामादिवृत्तिसहस्रभावाभावप्रकाशचि-दादित्यमरीचीनां तत्त्वकिरणानां वराहोपनिषत्प्रकाशितानां पदं स्वरूपं षण्णवतिः, कार्पासकयज्ञसूत्रषण्णवतितुल्यमित्यर्थः । षण्णवतिसङ्ख्याक-चित्तत्वमरीचयः क्व आविर्भूता इत्यत्र—चित्सूत्रोपलब्धिहेतुहृदयाद्याघ्राणयोः विश्वकायविराड्दृदये तत्सङ्कल्पत आविर्भूय—आघ्राण इत्यत्राकारः छान्दसः—घ्राणयोः घ्राणाभ्यां अकारादिस्वरात्मकोच्छ्वासरूपेण बहिर्निर्गतानि तत्त्वानि

[1] चित्सूत्रघ्रा—क, अ.

तेषां भेदाः । किमाधारा इत्यत्र परापरब्रह्माधिष्ठितप्रणवाधाराः सन्तः अद्यापि वर्तन्ते । कतिविधा इत्यत्र षडङ्गुलदशाशीतिः षण्णवतिविधा भवन्ति । यद्वा—षण्णवत्यङ्गुलपरिमितषण्णवतितत्त्वात्मका भवन्ति ॥ २४ ॥

हंसात्मविद्यैव मुक्तिः

वाम[1]बाहुदक्षिणकट्योरन्तश्चरति हंसः परमात्मा ब्रह्मगुह्यप्रकारो नान्यत्र विदितः ॥ २५ ॥ ये जानन्ति तेऽमृतफलकाः । सर्वकालं [2]हंसं न प्रकाशकम् । प्रणवहंसान्त[3]र्ध्यान[4]प्रकृतिं विना न मुक्तिः ॥ २६ ॥

इत्थंभूतविराट्छरीरवामबाहुदक्षिणकटयोरन्तश्चरति हंसः परमात्मा यथा यज्ञसूत्रं वामबाहुदक्षिणकट्यन्तं विराजते तथा वामबाहुदक्षिणकटयुपलक्षितसर्वाङ्गं स्वाविद्यापदतत्कार्यजातं तदन्तर्बहिश्च विश्वविश्वाद्यविकल्पानुञ्छंकरसान्तभेदेन चरति । वस्तुतस्तु हंसः तत्सर्वापह्नवसिद्धपरमात्मरूपेण अवशिष्यत इति योऽर्थः सोऽयमर्थो ब्रह्मगुह्यप्रकारः नान्यत्र विदितः, अत्रैव विशेषतः प्रकटितत्वात् ॥ २५ ॥ विद्याफलमाह—य इति । किं सर्वेऽप्येवं हंसं आत्मतया विदित्वा तद्वेदनफलं अमृतत्वं नाप्नुयुः इत्यत आह—सर्वेति ।

श्रुतिः स्मृतिः ममैवाज्ञा यस्तामुल्लङ्घ्य वर्तते ।
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ॥

इति स्मृतिसिद्धस्वाज्ञारूपश्रुतिस्मृतिमार्गोल्लङ्घकानां निष्प्रतियोगिकब्रह्ममात्रं भावरूपं ब्रह्मातिरिक्ताविद्यापदतत्कार्यजातमपि निष्प्रतियोगिकाभावरूपं नानयोः वाच्यवाचककार्यकारणाधाराधेयत्वं अस्तीति सर्वकालं सदा न प्रकाशकं

[1] वामबाह्वोर्द—उ, उ १, अ १.
[2] हंसप्र—अ.
[3] र्धान—क, अ १.
[4] प्रकृतिर्वि—क, अ १, अ २, उ.

हंसमात्मानं, विद्धीति शेषः । तेषां स्वापराधदोषावृतत्वात् दिवाभीतसूर्यवदात्मा स्वरूपप्रकाशको न भवतीत्यर्थः । सत्त्वप्रकृतेः मुक्तिः भेतरस्येत्याह—प्रणवेति । प्रणवहंसः स्वान्तःप्रणवार्थतुर्यतुर्यहंसः सोऽहमिति ध्यानप्रकृतिः ध्यानशीलो जीवन्मुक्तः । तस्य मुक्तिः करस्था । तं विना न कस्यापि मुक्तिरस्ति ॥ २६ ॥

बाह्यापेक्षया आन्तरयागस्य श्रेष्ठत्वम्

नवसूत्रान्परिचर्चितान् । तेऽपि यद्ब्रह्म चरन्ति । अन्तरादित्यं न ज्ञातं मनुष्याणाम् ॥ २७ ॥ जगदादित्यो रोचत इति ज्ञात्वा ते मर्त्या विबुधास्तपनप्रार्थनायुक्ता आचरन्ति ॥ २८ ॥ वाजपेयः पशुहर्ता अध्वर्युरिन्द्रो देवता अहिंसा धर्मयागः परमहंसोऽध्वर्युः परमात्मा देवता पशुपतिः ॥ २९ ॥ ब्रह्मोपनिषदो ब्रह्म । स्वाध्याययुक्ता ब्राह्मणाश्चरन्ति ॥ ३० ॥

ये तु पुनः विश्वविराडोत्रादिप्राज्ञबीजानुज्ञंकरसान्ततया मिथो भिदाचर्चितान् परस्परभेदेन व्याहृतान् नवसूत्रान् आत्मेति भजन्ति तेऽपि यत् ब्रह्मेति वदन्ति तदेव चरन्ति भजन्ति, विश्वादिनवकगतहेयांशापाये तेषामपि ब्रह्मरूपत्वात् । तथाऽपि ते यथावत् न जानन्तीत्याह—अन्तरिति । मनुष्याणां मनुष्यैः स्वान्तर्विलसितचिदादित्यस्वरूपं न ज्ञातं, तेषां स्वाज्ञानावृतत्वात् ॥ २७ ॥ तेषां कुत्र रुचिः? जगदात्मकादित्यो रोचते, तेषां नामरूपमोहितदृष्टित्वात् । ते परमार्थात् हीयन्त इत्यर्थः । केचन एवं ज्ञात्वा मर्त्या विबुधाश्च स्वाज्ञानजस्वातिरिक्तध्वान्तग्रासचित्तपनप्रार्थनायुक्ताः चिदादित्योऽस्मीति नित्यानुसन्धानशीलाः परमार्थतत्त्वमाचरन्ति ॥ २८ ॥ किमाचरन्तीत्यत्र अन्तर्यागमित्याह—वाजपेय इति । वाजं स्वातिरिक्तान्नरसं

पिबतीति वाजपेयो निर्विशेषज्ञानयज्ञः । देहादावात्मात्मीयाभिमतिपशुं हरतीति पशुहर्ता । य इन्द्रः परमेश्वरो देवतात्वेन अभिमतः स एव अध्वर्युः भूत्वा ज्ञानयज्ञचालको भवति । बाह्ययज्ञापेक्षया अस्य श्रैष्ठ्ये हेतुः अहिंसात्मकोऽयं मोक्षधर्मयागः । ज्ञानयागनिर्वाहकोऽध्वर्युः परमहंसपरिव्राजक एव । यज्ञदेवता तु पशुपतिः परमात्मैव देवता ॥ २९ ॥ इत्थंभूतब्रह्मोपनिषदः परमतात्पर्यार्थस्तु ब्रह्मैव नेतरत्, ब्रह्मणो वेदवेदान्तार्थत्वात् । के एवं आचरन्तीत्यत्र—स्वाध्याययुक्ता वेदवेदान्तार्थपारीणाः ब्राह्मणाः आचरन्ति, तेषां ज्ञानयज्ञे मुख्याधिकारित्वात् ॥ ३० ॥

ज्ञानयज्ञरूपोऽश्वमेधः

अश्वमेधो महायज्ञकथा । तद्राज्ञा ब्रह्मचर्यमाचरन्ति । सर्वेषां पूर्वोक्तब्रह्मयज्ञक्रमं मुक्तिक्रममिति ॥ ३१ ॥

महायज्ञकथा कीदृशी इत्यत्र—स्वातिरिक्तप्रपञ्चपशुमेधनं विशसनं अपह्नवः, श्वः परश्वो वा भवत्विति विश्वासानर्होऽश्वमेधः स्वज्ञानसमकालमेव स्वातिरिक्तसामान्यस्य अपह्नोतुं युक्तत्वात् । इयमेव हि निर्विशेषमहाज्ञानयज्ञकथा ख्यातिरित्यर्थः । तादृशाश्वमेधमहायज्ञे निष्प्रतियोगिकस्वमात्रतया राजत इति तद्राजा तेन तद्राज्ञा स्वकृतसाधनानुष्ठानेन ये अनुगृहीताः कृतार्था भवन्त्विति ते हि द्विविधब्रह्मचर्यमाचरन्ति ब्रह्मचर्यस्य तत्प्रसादबहिर्भूतानां सुदुर्लभत्वात् इति यत् तत् सर्वेषां मुमुक्षूणां यो ब्रह्मप्रापकमार्गोऽस्ति तं पूर्वोक्तब्रह्मयज्ञक्रमं मुक्तिक्रमं चेति विद्धि ॥ ३१ ॥

तारकहंसज्योतिः

ब्रह्मपुत्रः प्रोवाच । उदितो हंस ऋषिः । स्वयंभूस्तिरोदधे । [1]रुद्रो ब्रह्मोपनिषदो हंसज्योतिः पशुपतिः प्रणवस्तारकः स एवं वेद ॥ ३२ ॥

[1] ख्रोप—क, अ २.

इति स्वयम्भुवा अनुगृहीतः ब्रह्मपुत्रः वालखिल्यगणः प्रोवाच । किमिति ? भगवदुपदेशमहिम्ना उदितो हंस ऋषिः सर्वोपह्ववसिद्धनिष्प्रतियोगिक-स्वमात्रतया हंसः परमात्मा प्रादुर्भूतः, तेन अहं कृतकृत्योऽस्मीति शिष्योक्ति-माकर्ण्य अतीव हर्षितः सन् स्वयम्भूस्तिरोदधे । स्वस्वरूपं गतवानित्यर्थः । रुद्रो वैश्रवणोऽप्येवं वेदेत्याह—रुद्र इति । वैश्रवणेन साकं रुद्रोऽपि स्वयम्भूमुखतः ब्रह्मोपनिषदः परमाशयो ब्रह्मतारकार्थः पशुपतिः हंसज्योति-रस्मीत्येवं विदितवानित्यर्थः ॥ ३२ ॥

# उत्तरकाण्डः

अखण्डवृत्त्या ब्रह्मसम्पत्तिः

हंसात्ममालिका[1]वर्णब्रह्मकाल्प्रचोदिता ।
परमात्मा पुमानिति ब्रह्मसंपत्तिकारिणी ॥ १ ॥
अध्यात्मब्रह्मकल्पस्य आकृतिः कीदृशी कथा ।

कथं एवं विदितवानित्यत आह—हंसेति । अभिधेयरूपस्य हंसात्मनो मालिकावर्णोऽभिधानात्मकोऽयमोङ्कारः तदर्थरूपं ब्रह्मैव कालेश्वरस्वरूपमासाद्य एवं कर्तव्यं एवमकर्तव्यमिति सर्वप्राणिहिताहितविषयप्रचोदिता प्रचोदयिता प्रेरको भवति । स्वेन रूपेण पुमान् ईश्वरः स्वगतविशेषापाये निष्प्रतियोगिक-परमात्मा स्वमात्रमवशिष्यत इति या संविदखण्डाकारवृत्तिरुदेति सेयं ब्रह्म-सम्पत्तिं करोतीति ब्रह्मसम्पत्तिकारिणी भवति ॥ १ ॥ इति या "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिवेदान्तप्रसिद्धा सैवाध्यात्मब्रह्मकल्पस्यासावाकृतिः निरङ्कुशोपायभूतेत्यर्थः । उक्तार्थदार्ढ्याय चोदयत्येवम्—कीदृशी कथेति ॥

[1] वर्णा—उ, उ १.

परमात्मनि जगदाविर्भावो मायिकः

ब्रह्मज्ञानप्रभा सन्ध्या कालो गच्छति धीमताम् ।
हंसाख्यो देवमात्माख्यमात्मतत्त्वप्रजा कथम् ॥ २ ॥
[1]अन्तःप्रणवनादाख्यो [2]हंसः प्रत्ययबोधकः ।
अन्तर्गतप्रभा[3]गूढं [4]ज्ञाननालं विराजितम् ॥ ३ ॥
शिव[5]शक्त्यात्मकं रूपं चिन्मयानन्दवेदितम् ।
नादबिन्दुकला [6]त्रीणि नेत्र विश्वविचेष्टितम् ॥ ४ ॥
[7]त्रियङ्गानि शिखा त्रीणि [8]द्वित्रीणि संख्यमाकृतिः ।
अन्तर्गूढप्रभा हंसः [9]प्रमाणान्निर्गतं बहिः ॥ ५ ॥

ब्रह्माकारवृत्तिकथा कीदृशी इत्यत्र—**ब्रह्मज्ञानसूर्यप्रभा** प्रत्यक्परचित्सिद्धिमैक्यं करोतीति **सन्ध्येत्युच्यते** । तथा हि खलु **धीमतां** जीवन्मुक्तानां **कालो** गच्छति, जीवन्मुक्तानां निर्विशेषब्रह्मसमाधिक्षपितकालत्वात् । स्वातिरिक्तपराक्प्रपञ्चग्रासहंसाख्यः प्रत्यग्देवं स्वप्रकाशचिन्मात्रं परमात्मानं भजति चेत् तदा **स्वात्मतत्त्वे कथं** विश्वविराडोत्रादिप्रजा जायते ॥ २ ॥ इत्यत्र—परमार्थतः स्वातिरेकेण कापि प्रजा न जायते, मायया पुनः प्रत्यगादिभावमेत्य यदा भासते तदा तद्ग्रास्यवर्गोऽपि जात इव लक्ष्यत इत्याह—**अन्तरिति** । नारदपरिव्राजकोपनिषद्यष्टमात्रात्मकोऽन्तःप्रणवः सम्यक् प्रपञ्चितः । तत्रान्तःप्रणवनादावभासकः प्रत्यक् **हंसः** स्वान्तर्बाह्यविकल्पितपराक्प्रत्ययकदम्बबोधकोऽवभासको भवति । तथा चेत् किं तत् प्रत्यक्तत्त्वं न दृश्यते इत्यत्र—पराग्दृशामन्तर्गतप्रभया **गूढं** भाति

[1] अतः—अ. [2] हंसप्रत्ययरो—क. [3] रूढम्—उ. [4] ज्ञानं—उ, क.
[5] तत्वा—क. [6] तीतनेत्रं—उ १. [7] क्रियांगानि.—अ २, क.
[8] द्वित्राणांसांख्य—अ. द्वित्रीणिस्संख्य—क, अ १, अ २. द्वित्रिणीसं—उ १.
[9] प्रमाणं नि—अ, अ १. प्रमाणाग्नि—उ.

तद्दृष्ट्या ज्ञाननाळं सर्वप्रकाशकज्ञानप्रत्यग्रूपेण प्रकाशितुं नाळं नालं, समर्थमिव न हि स्थितमित्यर्थः । किं तदप्रकाशात्मकं ? इत्यत्र—स्वेन रूपेण विराजितं तस्य स्वयंप्रकाशत्वेन सर्वप्रकाशकत्वात् ॥ ३ ॥ कैः एवं विदितं इत्यत्र—प्रत्यग्दृष्टिभिः यत् शिवशक्त्यात्मकं शवळरूपं तदेव स्वगतविशेषांशापायतः सच्चिदानन्दोऽस्मीति वेदितं भवतीत्यत्र

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥

इति श्रुतेः । पुनः स्वाज्ञदृष्ट्या नादबिन्दुकळा इति प्रणवावयवाः तत्कार्याणि अनुग्रहोपसंहारतिरोधानानि त्रीणि सदाशिवाद्यधिष्ठितानि एतद्विकल्पजातं "दक्षिणाक्षिमुखे विश्व" इति, "नेत्रस्थं जागरितं विद्यात्" इति च, श्रुतिसिद्धनेत्रादिचतुर्दशकरणनिर्वर्त्यजाग्रदवस्थाभिमानिविश्वविचेष्टितं विकल्पितमित्यर्थः ॥ ४ ॥ विश्वेन कानि कानि विकल्पितानीत्यत्र स्थूलसूक्ष्मकारणभेदेन त्र्यङ्गानि शरीराणि तदारूढविश्वतैजसप्राज्ञाख्यशिखारूपाणि त्रीणि द्वित्रीणि पञ्चभूततत्कार्यभौतिकानि सङ्ख्यं सङ्ख्यानि यानि सङ्ख्यावाचकानि सर्वत्र आकृतिः नामरूपविकृतिश्च उक्तानि अनुक्तानि च सर्वाणि विश्वस्वाज्ञानविकल्पितानीत्यर्थः । एवंविकल्पकविश्वगतविकल्पापाये स एव प्रत्यक् भवतीत्याह- अन्तरिति । यः पुरा सर्वप्राण्यन्तर्गूढप्रमारूपेण हंसो वर्तते "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतिप्रमाणात् प्रत्यगभिन्नब्रह्मतत्त्वं बहिर्निर्गतं प्रकाशितं भवति । यदेवं श्रुतिप्रमाणसिद्धं तदेव सच्चिदानन्दमात्मानमद्वितीयं ब्रह्म भावयेत् ॥ ५ ॥

हंसार्कप्रणवध्यानविधिः

ब्रह्मसूत्रपदं ज्ञेयं ब्राह्मचं विध्युक्तलक्षणम् ।
हंसार्कप्रणवध्यानमित्युक्तो ज्ञानसागरे ॥ ६ ॥
एतद्विज्ञानमात्रेण ज्ञानसागरपारगः ।

"आत्मानमेवावेदहं ब्रह्मास्मि" इति विधिच्छायापह्नव[पन्न]वाक्योक्तलक्षणं ग्राह्यार्थं ब्रह्ममात्रतया सूचनात् ब्रह्मसूत्रं स्वावशेषतया पद्यत इति पदं सदैकरूपेण विजृम्भत इति ज्ञेयम् । एवं हंसार्कप्रणवध्यानं यः करोति सोऽयं ज्ञानसागरे ब्रह्मणि समासो भवेदित्युक्तो भवति ॥ ६ ॥ यः कोऽपि मुमुक्षुः एतदुक्तलक्षणं ब्रह्माहमस्मीति विज्ञानमात्रेण स्वान्तर्बाह्यविजृम्भितस्वातिरिक्तज्ञानाज्ञानतत्कार्यभ्रमसागरपारनिष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणविकळेबरकैवल्यतो भवतीत्यर्थः ॥

परचित एव करणप्रेरकत्वम्

स्वतः शिवः पशुपतिः साक्षी सर्वस्य सर्वदा ॥ ७ ॥
सर्वेषां तु मनस्तेन प्रेरितं नियमेन तु ।
विषये गच्छति प्राणश्चेष्टते वाग्वदत्यपि ॥ ८ ॥
चक्षुः पश्यति रूपाणि श्रोत्रं सर्वं शृणोत्यपि ।
अन्यानि स्वानि सर्वाणि तेनैव प्रेरितानि तु ॥ ९ ॥
स्वं स्वं विषयमुद्दिश्य प्रवर्तन्ते निरन्तरम् ।
प्रवर्तकत्वं चाप्यस्य मायया न स्वभावतः ॥ १० ॥
श्रोत्रमात्मनि चाध्यस्तं स्वयं पशुपतिः पुमान् ।
अनुप्रविश्य श्रोत्रस्य ददाति श्रोत्रतां शिवः ॥ ११ ॥
मनः स्वात्मनि चाध्यस्तं प्रविश्य परमेश्वरः ।
मनस्त्वं तस्य सत्त्वस्थो ददाति नियमेन तु ॥ १२ ॥
म एव विदितादन्यस्तथैवाविदितादपि ।
अन्येषामिन्द्रियाणां तु कल्पितानामपीश्वरः ॥ १३ ॥
तत्तद्रूपमनुप्राप्य ददाति नियमेन तु ।

स्वाज्ञविकल्पितकरणग्रामसत्त्वे तच्चालकः कः? इत्यत आह—स्वत इति ॥ ७ ॥ स्वस्वविषये ॥ ८–९ ॥ न स्वभावतः, स्वतो निर्विकारत्वात् ॥ १०–१२ ॥ स्वस्यैव करणत्वं करणग्रामचालकत्वं यदि तदा अयं संसारी स्यादित्याशङ्क्य तत्रात्मात्मीयाभिमानाभावात् तद्विलक्षणतो न संसारीत्याह—स एवेति । यः करणजातस्वरूपी मन् तच्चालकोऽपि भवति स एव ॥ १३–१४ ॥

आत्मान्यस्य मायाकल्पितत्वम्

ततश्चक्षुश्च वाक्चैव मनश्चान्यानि खानि च ॥ १४ ॥
न गच्छन्ति स्वयंज्योतिःस्वभावे परमात्मनि ।
[1]अकर्तृविषयप्रत्यक्प्रकाशं स्वात्मनैव तु ॥ १५ ॥
विना तर्कप्रमाणाभ्यां ब्रह्म यो वेद वेद सः ।

इत्यादि केनोपनिषदि सम्यक् प्रपञ्चितमित्यर्थः । समानप्रकरणत्वात् प्रत्यक्त्वमपि मायिकमित्यत्राह—अकर्तृविषयेति ॥ १५ ॥

वस्तुतः स्वात्मनि मायाऽसम्भवः

प्रत्यगात्मा परं ज्योतिर्माया सा तु महत्तमः ॥ १६ ॥
तथा सति कथं मायासंभवः प्रत्यगात्मनि ।
तस्मात्तर्कप्रमाणाभ्यां स्वानुभूत्या च चिद्घने ॥ १७ ॥
स्वप्रकाशैकसंसिद्धे नास्ति माया परात्मनि ।
व्यावहारिकदृष्टयेयं विद्याऽविद्या न चान्यथा ॥ १८ ॥

[1] अकर्त्रवि—क, अ १, अ २.

तत्त्वदृष्ट्या तु नास्त्येव तत्त्वमेवास्ति केवलम् ।
व्यावहारिकदृष्टिस्तु प्रकाशाव्यभिचारतः ॥ १९ ॥८
प्रकाश एव सततं तस्माद्द्वैत एव हि ।
अद्वैतमिति चोक्तिश्च प्रकाशाव्यभिचारतः ॥ २० ॥
प्रकाश एव सततं तस्मान्मौनं हि युज्यते ।

वस्तुतः स्वात्मनि मायाऽसम्भवमाह—**प्रत्यगिति** ॥ १६ ॥ यस्मादेवं **तस्मान** ॥ १७–१८ ॥ स्वातिरेकेण व्यावहारिकदृष्टिरपि नास्तीत्याह—**व्यावहारिकेति** ॥ १९ ॥ अद्वैतमित्युक्तिरपि न तात्त्विकीत्याह—**अद्वैतमिति** । तद्द्वैतसापेक्षा अद्वैतमिति चोक्तिः ॥ २० ॥

आत्मज्ञानिनः ब्रह्मात्मत्वम्

अयमर्थो महान्यस्य स्वयमेव प्रकाशितः ॥ २१ ॥
न स जीवो न च [1]ब्रह्मा न चान्यदपि किंचन ।
न तस्य वर्णा विद्यन्ते नाश्रमाश्च तथैव च ॥ २२ ॥
न तस्य धर्मोऽधर्मश्च न निषेधो विधिर्न च ।
यदा ब्रह्मात्मकं सर्वं विभाति स्वत एव तु ॥ २३ ॥
तदा दुःखादिभेदोऽयमाभासोऽपि न भासते ।
जगज्जीवादिरूपेण पश्यन्नपि परात्मवित् ॥ २४ ॥
न तत्पश्यति चिद्रूपं ब्रह्मवस्त्वेव पश्यति ।
धर्मधर्मित्ववार्ता च भेदे सति हि भिद्यते ॥ २५ ॥

[1] ब्रह्म—क, अ, अ २.

भेदा[दोऽ]भेदस्तथा [1]भेदाभेदः साक्षात्परात्मनः ।
नास्ति स्वात्मातिरेकेण स्वयमेवास्ति सर्वदा ॥ २६ ॥
ब्रह्मैव विद्यते साक्षाद्वस्तुतोऽवस्तुतोऽपि च ।
तथैव ब्रह्मविज्ज्ञानी किं गृह्णाति जहाति किम् ॥ २७ ॥
अधिष्ठानमनौपम्यमवाङ्मनसगोचरम् ।
यत्तद्द्रेश्यमग्राह्यमगोत्रं रूपवर्जितम् ॥ २८ ॥
अचक्षुःश्रोत्रमत्यर्थं तदपाणिपदं तथा ।
नित्यं विभुं सर्वगतं सुसूक्ष्मं च तदव्ययम् ॥ २९ ॥
ब्रह्मैवेदममृतं तत्पुरस्ता-
द्ब्रह्मानन्दं परमं चैव पश्चात् ।
ब्रह्मानन्दं परमं दक्षिणे च
ब्रह्मानन्दं परमं चोत्तरं च ॥ ३० ॥
स्वात्मन्येव स्वयं सर्वं सदा पश्यति निर्भयः ।
तदा मुक्तो न मुक्तश्च [2]बद्धस्यैव विमुक्तता ॥ ३१ ॥

एवंज्ञानी शिव एवेत्याह—अयमिति ॥ २१ ॥ ब्रह्मा चतुर्मुखः ॥ २२–२५ ॥ भेदाभेदः साक्षात् परात्मनः—सापेक्षभेदाभेदयोः सविशेषत्वात्—नास्ति ॥ २६–२८ ॥ तदपाणिपदं तथा इत्यादि मुण्डकोपनिषत्समानप्रकरणमित्यर्थः ॥ २९–३५ ॥

सत्यादि परविद्यासाधनम्

एवंरूपा परा विद्या सत्येन तपसाऽपि च ।
ब्रह्मचर्यादिभिर्धर्मैर्लभ्या वेदान्तवर्त्मना ॥ ३२ ॥

[1] भेदाद् भे—क. [2] बन्धस्यैव विमुक्तिता—क.

स्वशरीरे स्वयंज्योतिःस्वरूपं पारमार्थिकम् ।
क्षीणदोषाः प्रपश्यन्ति नेतरे माययाऽऽवृताः ॥ ३३ ॥

स्वज्ञस्य क्वचित् गमनाभावः

एवं स्वरूपविज्ञानं यस्य कस्यास्ति योगिनः ।
कुत्रचिद्गमनं नास्ति तस्य संपूर्णरूपिणः ॥ ३४ ॥
आकाशमेकं संपूर्णं कुत्रचिन्न हि गच्छति ।
तद्वद्ब्रह्मात्मविच्छ्रेष्ठः कुत्रचिन्नैव गच्छति ॥ ३५ ॥

ब्रह्मज्ञानिनः अभक्ष्याभावः

अभक्ष्यस्य निवृत्त्या तु विशुद्धं हृदयं भवेत् ।
आहारशुद्धौ चित्तस्य विशुद्धिर्भवति स्वतः ॥ ३६ ॥
[1]चित्ते शुद्धे क्रमाज्ज्ञानं वृत्त्यन्ते ग्रन्थयः स्फुटम् ।
अभक्ष्यं ब्रह्मविज्ञानविहीनस्यैव देहिनः ॥ ३७ ॥
न सम्यज्ज्ञानिनस्तद्वत्स्वरूपं सकलं खलु ।
अहमन्नं सदाऽन्नाद इति हि ब्रह्मवेदनम् ॥ ३८ ॥
ब्रह्मविद्भ्रमति ज्ञानात्सर्वं ब्रह्मात्मनैव तु ।
ब्रह्मक्षत्रादिकं सर्वं यस्य स्यादोदनं सदा ॥ ३९ ॥
यस्योपसेचनं मृत्युस्तज्ज्ञानी तादृशः खलु ।
ब्रह्मस्वरूपविज्ञानाज्जगद्भोज्यं भवेत्खलु ॥ ४० ॥

जगदात्मतया भाति यदा भोज्यं भवेत्तदा ।
ब्रह्म[1]स्वात्मतया नित्यं भक्षितं सकलं तदा ॥ ४१ ॥
यदा[2]भानेन रूपेण जगद्भोज्यं भवेत्तु तत् ।
मानतः स्वात्मना भातं भक्षितं भवति ध्रुवम् ॥ ४२ ॥
स्वस्वरूपं स्वयं भुङ्क्ते नास्ति भोज्यं पृथक् स्वतः ।
अस्ति चेदस्तितारूपं ब्रह्मैवास्तित्वलक्षणम् ॥ ४३ ॥

आहारशुद्धिः चित्तशुद्धिद्वारा ज्ञानहेतुः स्वाज्ञानाम् । स्वज्ञानां तु स्वातिरिक्तं सर्वं स्वमात्रतया प्रसर्तीत्याह अभक्ष्यस्येति ॥ ३६ ॥ ज्ञानं जायते तेन मुच्यन्ते ॥ ३७–४५ ॥

ज्ञानिनः स्वसर्वात्मत्वदर्शनम्

अस्तितालक्षणा सत्ता सत्ता ब्रह्म न चापरा ।
नास्ति सत्ताऽतिरेकेण नास्ति माया च वस्तुतः ॥ ४४ ॥
योगिनामात्मनिष्ठानां माया ह्यात्मनि कल्पिता ।
साक्षिरूपतया भाति ब्रह्मज्ञानेन बाधिता ॥ ४५ ॥
ब्रह्मविज्ञानसंपन्नः प्रतीतमखिलं जगत् ।
पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथक् ॥ ४६ ॥

इत्युपनिषत् ॥

सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकं स्वमात्रमवशिष्यते न कदाचित् तदतिरिक्तमस्तीति ब्रह्मविज्ञानसम्पन्नो योगी स्वाज्ञदृष्टिप्रतीतं अखिलं जगत्

[1] सात्म—क. [2] भासेन—मु.

मरुमरीचितुल्यतया कदाचित् **पश्यन्नपि सदा** तत् **स्वात्मनः पृथक् नैव पश्यति** । ब्रह्ममात्रस्य निरूप्रतियोगिकत्वेन ब्रह्मातिरिक्तं अस्ति नास्तीति नहि विभ्रमावकाशोऽस्तीत्यर्थः ॥ ४६ ॥ **इत्युपनिषच्छब्दः** प्रकृतोपनिषत्समाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
पाशुपतोपनिषदो व्याख्यानं लिखितं लघु ।
पाशुपतीयविवृतिः द्विशतग्रन्थभूषिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तसप्ततिसङ्ख्यापूरकं
पाशुपतब्रह्मोपनिषद्विवरणं सम्पूर्णम्

# ब्रह्मविद्योपनिषत्

सह नाववतु—इति शान्तिः

ब्रह्मविद्यारहस्यार्थप्रणवब्रह्मसूचनम्

अथ ब्रह्मविद्योपनिषदुच्यते—

प्रसादाद्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः ।
रहस्यं ब्रह्मविद्यायां [1]ध्रुवाग्निः संप्रचक्षते ॥ १ ॥
ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः ।
शरीरं तस्य वक्ष्यामि स्थानं कालत्रयं तथा ॥ २ ॥
तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः ।
तिस्रो मात्रार्धमात्रा च त्र्यक्षरस्य शिवस्य तु ॥ ३ ॥

स्वाविद्यातत्कार्यजातं यद्विद्यापह्नवं गतम् ।
तद्धंसविद्यानिष्पन्नं रामचन्द्रपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं ब्रह्मविद्योपनिषत् प्रणवहंसविद्यातद्वेद्य-ब्रह्मानुभूतिं प्रकटयन्ती ब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो

[1] ध्रुवाग्निं—क, अ १, अ २.

विवरणमारभ्यते । उपोद्घातादिकमस्याः कठवल्ल्यादिसमम् । ब्रह्मविष्णुप्रसादलभ्येयमिति विद्या स्तूयते । श्रुतिरेव स्वाज्ञजनान् प्रत्येवमाह— अथेत्यादिना । अथ स्वाज्ञानां ब्रह्मविद्योचितसाधनसम्पत्त्यनन्तरं इयं ब्रह्मविद्योपनिषदुच्यते । तत् कथं? यः सर्वलोकस्रष्टा पालयिता च भवति तस्य ब्रह्मणः अघटितघटनाघटनपटुतरशक्तेरद्भुतकर्मणो विष्णोश्च प्रसादात् ब्रह्मविद्यायां यत् रहस्यं, अनधिकारिणे गोपनीयत्वात्, स्वाज्ञानतत्कार्यस्वातिरिक्तप्रपञ्चतूलाचलभस्मीकरणपटुत्वात् ध्रुवाग्निः प्रत्यक् तदभिन्नः परमात्मेति सम्यक् प्रचक्षते ॥ १ ॥ किं तत्स्वरूपमित्याकांक्षायां—

सर्वे वेदा यत्पदमामनन्ति
तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥

इत्यादिश्रुत्यनुरोधेन सप्रकारं ब्रह्मालम्बनभूतप्रणवस्वरूपं विशदीकरोति— ओमिति ॥ २–३ ॥

प्रणवमात्राचतुष्टयप्रपञ्चनम्

ऋग्वेदो गार्हपत्यं च पृथिवी ब्रह्म एव च ।
अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः ॥ ४ ॥
यजुर्वेदोऽन्तरिक्षं च दक्षिणाग्निस्तथैव च ।
विष्णुश्च भगवान्देव उकारः परिकीर्तितः ॥ ५ ॥
सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च ।
ईश्वरः परमो देवो मकारः परिकीर्तितः ॥ ६ ॥
सूर्यमण्डलमध्येऽथ ह्यकारः शङ्खमध्यगः ।
उकारश्चन्द्रसंकाशस्तस्य मध्ये व्यवस्थितः ॥ ७ ॥

मकारस्त्वग्निसंकाशो विधूमो विद्युतोपमः ।
तिस्रो मात्रास्तथा ज्ञेयाः सोमसूर्याग्निरूपिणः ॥ ८ ॥
शिखा तु दीपसंकाशा तस्मिन्नुपरि वर्तते ।
अर्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता ॥ ९ ॥

सूत्रार्थं व्याकरोति—ऋग्वेद इति । ब्रह्म एव च, ब्रह्मा इत्यर्थः ॥ ४–६ ॥ अकारादेः स्थानं वर्णं चाह—सूर्येति ॥ ७–८ ॥ एवं मात्रात्रयं प्रपञ्चयित्वा अथ अर्धमात्रां प्रपञ्चयति—शिखादिति । यथा दीपे दीपशिखा वर्तते तथा प्रणवोपरि अर्धमात्रा वर्तत इत्यर्थः ॥ ९ ॥

सुषुम्नायोगेन नाडीसूर्ययोः भेदनम्

पद्मसूत्रनिभा सूक्ष्मा शिखा सा दृश्यते परा ।
सा नाडी सूर्यसंकाशा सूर्यं भित्त्वा तथा परा ॥ १० ॥
द्विसप्ततिसहस्राणि नाडीं भित्त्वा च मूर्धनि ।
[1]वरदा सर्वभूतानां सर्वं व्याप्येव तिष्ठति ॥ ११ ॥

सुषुम्नास्वरूपकथनं प्रणवानुसन्धानविधानं तत्सर्वापवादाधिकरण-ब्रह्मज्ञानफलं चाह—पद्मेति । सुषुम्नायाः सूर्यनाडित्वेन तद्द्वारोत्क्रान्तस्य मूर्ध्नि ब्रह्मरन्ध्रे लक्ष्यानुसन्धानं कुर्वतः द्विसप्ततिसहस्रनाडीभेदनं सूर्यमण्डलभेदनं च उपपद्यत इत्यर्थः ॥ १०–११ ॥

प्रणवनादलयेन मोक्षप्राप्तिः

कांस्यघण्टानिनादस्तु यथा लीयति शान्तये ।
ओङ्कारस्तु तथा योज्यः शान्तये सर्वमिच्छता ॥ १२ ॥

[1] वरदः-

यस्मिन्स लीयते शब्दस्तत्परं ब्रह्म गीयते ।
धियं हि लीयते ब्रह्म सोऽमृतत्वाय कल्पते ॥ १३ ॥

एवं योगाभ्यासमकुर्वतोऽपि प्रणवालम्बनेन तत्फलं प्राप्तुं शक्यमित्याह—कांस्येति। हेममूलिकाषोडशवारसंस्कृतकांस्यघण्टानादशान्तिवत् षोडशमात्राकालोच्चारितप्रणवनादलयकृत् योगी य एवं प्रणवजपं करोति ॥ १२ ॥ यस्य—धियमिति विभक्तिव्यत्ययः, प्रथमार्थे द्वितीया—धीः अन्तःकरणं प्रणवनादेन साकं विलीयते सोऽयं योगी तल्ल्याधिकरणब्रह्मभूयाय अमृतत्वाय स्वातिरिक्तास्तित्वभ्रममोक्षाय कल्पते ॥ १३ ॥

### जीवस्वरूपनिरूपणम्

[1]वायुस्तेजस्तथाकाशस्त्रिविधो जीवसंज्ञकः ।
स जीवः प्राण इत्युक्तो वालाग्रशतकल्पितः ॥ १४ ॥
नाभिस्थाने स्थितं विश्वं शुद्धतत्त्वं सुनिर्मलम् ।
आदित्यमिव दीप्यन्तं रश्मिभिश्चाखिलं शिवम् ॥ १५ ॥

हंसविद्याप्रकटनाय तद्विद्याऽनुष्ठातारं जीवं निरूपयति—वायुरिति ॥ १४ ॥ तस्य स्थानं निर्दिशति—नाभीति । विश्वं वैश्वानरांशं वस्तुतः स्वगतहेयांशापाये शुद्धतत्त्वम् । शिवं प्रत्यञ्चमात्मानं अन्तःकरणयोगतो जीवं पश्यन्ति ॥ १५ ॥

### बन्धमोक्षकारणनिरूपणम्

सकारं च हकारं च जीवो जपति सर्वदा ।
नाभि[2]देशाद्विनिष्क्रान्तं विषयव्याप्तिवर्जितम् ॥ १६ ॥

[1] वायुःप्राण—क, अ २. [2] रन्ध्रा—अ १, अ २, क.

तेनेदं निष्कलं विद्यात्क्षीरात्सर्पिर्यथा तथा ।
कारणेनात्मना युक्तः प्राणायामैश्च पञ्चभिः ॥ १७ ॥
चतुष्कलासमायुक्तो भ्राम्यते च हृदि स्थितः ।
गोलकस्तु [1]यदा देहे क्षीरदण्डेन वाऽ[2]हतः ॥ १८ ॥
एतस्मिन् [3]वसते शीघ्रमवि[4]श्रामं महाखगः ।
यावन्निश्वसितो जीवस्तावन्निष्कलतां गतः ॥ १९ ॥
नभस्स्थं निष्कलं ध्यात्वा मुच्यते भवबन्धनात् ।
अनाहतध्वनियुतं हंसं यो वेद हृद्गतम् ॥ २० ॥
स्वप्रकाशचिदानन्दं स हंस इति गीयते ।

सोऽयं जीवः उच्छ्वासनिःश्वासच्छलेन सकारं च । निष्क्रमणवेळायां विषयव्याप्तिवर्जितम् ॥ १६ ॥ येन हेतुना विषयविरळः स्यात् तेनेदं निष्कलम् । यथा क्षीरात् कारणात् सर्पिः कार्यतो भिन्नमपि कारणावस्थायां क्षीरमेव भवति तथा अयं सर्पिःस्थानीयो जीवः क्षीरस्थानीयकारणेनात्मना युक्तो भवति । स्वकारणभावापत्तिसाधनं किमित्यत्र—प्राणायामैश्च पञ्चभिः प्राणायामप्रत्याहारधारणाध्यानसमाधिभिः ॥ १७ ॥ विश्वतैजसप्राज्ञतुर्यभेदेन चतुष्कळासमायुक्तो भवति । एवं हृदि स्थितः सन् बन्धमोक्षतत्कार्यकलनासु भ्राम्यते चेत्यर्थः । यावत् ब्रह्मनाडीं न प्रविशति तावत् अविश्रान्तं संसरतीत्याह—गोळकस्त्विति । यदा यस्मिन् काले स्थूलदेहे विद्यमान-मूलाधारत्रिकोणाग्रविलसत्सुषुम्नागोळकस्तु क्षीरदण्डेन क्षीरवद्भवळदण्डवत् भोगविशिष्टकुण्डलीशक्तितत्त्वेन प्राणेन वा यावत् अहत अनाक्रान्तो भवति ॥ १८ ॥ तदा एतस्मिन देहे महाखगो हंसः प्राणाधारो जीवः अविश्रामं

[1] यथा—अ १.
[2] हतं—क, अ १, अ २.
[3] वहते—अ १.
[4] श्रान्तं—अ १, उ.

अविश्रान्तं यथा भवति तथा यत् स्वज्ञाननाश्यं शीघ्रं स्वाज्ञानमवलम्ब्य वसते वसति, आभूतसंप्लवं स्वज्ञानावधि संसरतीत्यर्थः । कदा तत्संसृतिनिवृत्तिरित्यत आह—यावदिति । अयं जीवः प्राणादिवृत्तिमवष्टभ्य यावन्निश्वसितो न श्वसितः प्राणनादिव्यापारविरळो भवति तावत्सर्वकरणव्यापृत्युपरमणलक्षणनिर्विकल्पकावस्थायां निष्कळतां गतो भवति ॥ १९ ॥ हृदयनभसि तिष्ठति उपलभ्यत इति नभस्स्थं प्राणादिनामान्तकलाभावात् निष्कळमात्मानं ध्यात्वा भवबन्धनात् मुच्यते निवृत्तसंसारः कृतकृत्यो भवतीत्यर्थः । हंसज्ञानी हंस एवेत्याह - अनाहतेति । अनाहतध्वनियुतं हृदयविभातनादोपाधिकमित्यर्थः ॥ २० ॥

हंसविद्ययैव परमेश्वरप्राप्तिः

रेचकं पूरकं मुक्त्वा कुम्भकेन स्थितः सुधीः ॥ २१ ॥
नाभिकन्दे [1]समं कृत्वा प्राणापानौ समाहितः ।
मस्तकस्थामृताम्वादं पीत्वा ध्यानेन सादरम् ॥ २२ ॥
दीपाकारं महादेवं ज्वलन्तं नाभिमध्यमे ।
अभिषिच्यामृतेनैव हंसहंसेति यो जपेत् ॥ २३ ॥
जरामरणरोगादि न तस्य भुवि विद्यते ।
एवं दिनेदिने कुर्यादणिमादिविभूतये ॥ २४ ॥
ईश्वरत्वमवाप्नोति सदाऽभ्यासरतः पुमान् ।
बहवो नैकमार्गेण प्राप्ता नित्यत्वमागताः ॥ २५ ॥
हंसविद्यामृते लोके नास्ति नित्यत्वसाधनम् ।

केवलकुम्भके परमेश्वरं ध्यायतः तदाप्तिमाह—रेचकमिति २१–२४ ॥ हंसविद्यामृते मुक्तिसाधनं न किञ्चिदस्तीति विद्यां स्तौति—बहव इति ॥ २५ ॥

[1] समौ—क, अ १.

हंसविद्यागुरुभक्तिविधिः

यो ददाति महाविद्यां हंसाख्यां [1]पावनीं पराम् ॥ २६ ॥
तस्य दास्यं सदा कुर्यात् [2]प्रज्ञया परया सह ।
शुभं वाऽशुभमन्यद्वा यदुक्तं गुरुणा भुवि ॥ २७ ॥
तत्कुर्यादविचारेण शिष्यः संतोषसंयुतः ।
हंसविद्यामिमां लब्ध्वा गुरुशुश्रूषया नरः ॥ २८ ॥
आत्मानमात्मना साक्षाद्ब्रह्म [3]बुद्ध्वा सुनिश्चलम् ।
देहजात्यादिसंबन्धान्वर्णाश्रमसमन्वितान् ॥ २९ ॥
वेदशास्त्राणि चान्यानि पदपांसुमिव त्यजेत् ।
गुरुभक्तिं सदा कुर्याच्छ्रेयसे भूयसे नरः ॥ ३० ॥
गुरुरेव हरिः साक्षान्नान्य इत्यब्रवीच्छ्रुतिः ॥ ३१ ॥

हंसविद्योपदेष्टारं ईश्वरं मत्वा तदाज्ञाऽनुवर्ती योगी तत्प्रसादतः प्रत्यगभिन्नं ब्रह्मास्मीति निश्चित्य स्वातिरिक्तमखिलं त्यक्त्वा यावदुपाधि गुरुदेवतैक्य भावयेदित्याह—यो ददातीति ॥ २६–२९ ॥ "यावदुपाधिपर्यन्तं तावच्छुश्रूषयेत् गुरून्" इति श्रुत्यनुरोधेन गुरुभक्तिं सदा कुर्यात् ॥ ३० ॥ "गुरुः साक्षात् आदिनारायण एव" इति श्रुतिः ॥ ३१ ॥

आत्मनः श्रुत्याचार्यैकगम्यत्वम्

श्रुत्या यदुक्तं परमार्थ[4]मेतत्
तत्संशयो नात्र ततः समस्तम् ।

[1] पारमेश्वरीम्—अ १, अ २, क.
[2] श्रद्धया—अ १.
[3] बुद्धया—क.
[4] मेव—क, अ १, अ २.

श्रुत्या विरोधे न भवेत्प्रमाणं
भवेदनर्थाय विना प्रमाणम् ॥ ३२ ॥
देहस्थः सकलो ज्ञेयो निष्कलो देहवर्जितः ।
आप्तोपदेशगम्योऽसौ सर्वतः किमवस्थितः ॥ ३३ ॥
हंसहंसेति यो ब्रूयाद्धंसो ब्रह्मा हरिः शिवः ।
गुरुवक्त्रात्तु लभ्येत प्रत्यक्षं सर्वतोमुखम् ॥ ३४ ॥
तिलेषु च यथा तैलं पुष्पे गन्ध [1]इवास्थितः ।
पुरुषस्य शरीरेऽस्मिन् स बाह्याभ्यन्तरे [2]स्थितः ॥ ३५ ॥

श्रुत्युक्तं प्रमाणम् । तदतिरिक्तं अप्रमाणम् । प्रमाणाप्रमाणानुष्ठानतः स्वार्थानर्थौ स्यातामित्याह---श्रुत्येति ॥ ३२ ॥ देहयोगायोगाभ्यां सकळत्व-निष्कळत्वं निष्कळस्य देशिकोपदेशगम्यत्वं चाह---देहस्थ इति। सर्वव्यापकोऽपि निष्कळः स्वाचार्योपदेशेन गम्यः नान्यथेत्यर्थः ॥ ३३ ॥ आचार्यः क इत्यत आह—हंसेति । उक्तार्थमेतत् ॥ ३४ ॥ हंसस्य सदृष्टान्तं सर्वव्यापकता-माह—तिलेष्विति ॥ ३५ ॥

सकलनिष्कलदेवताविवेकः

उल्काहस्तो यथा[3]कश्चित् द्रव्यमालोक्य तां त्यजेत् ।
ज्ञानेन ज्ञेयमालोक्य पश्चाज्ज्ञानं परित्यजेत् ॥ ३६ ॥
पुष्पवत्सकलं विद्याद्गन्धस्तस्य तु निष्कलः ।
वृक्षस्तु सकलं विद्याच्छाया तस्य तु निष्कला ॥ ३७ ॥

[1] इवाश्रितः—क, अ २. [2] तथा—क, अ २.
[3] लोके—क, अ २.

निष्कलः सकलो भावः सर्वत्रैव व्यवस्थितः ।
उपायः सकलस्तद्वदुपेयश्चैव निष्कलः ॥ ३८ ॥
सकले सकलो भावो निष्कले निष्कलस्तथा ।
एकमात्रो द्विमात्रश्च त्रिमात्रश्चैव भेदतः ॥ ३९ ॥
अर्धमात्रा परा ज्ञेया तत ऊर्ध्वं परात्परम् ।
पञ्चधा पञ्चदैवत्यं सकलं परिपठ्यते ॥ ४० ॥
ब्रह्मणो हृदयस्थानं कण्ठे विष्णुः समाश्रितः ।
तालुमध्ये स्थितो रुद्रो ललाटस्थो महेश्वरः ॥ ४१ ॥
नासाग्रे अच्युतं विद्यात्तस्यान्ते तु परं पदम् ।
परत्वात्तु परं नास्तीत्येवं शास्त्रस्य निर्णयः ॥ ४२ ॥
देहातीतं तु तं विद्यान्नासाग्रे द्वादशाङ्गुलम् ।
तदन्तं तं विजानीयात्तत्रस्थो व्यापयेत्प्रभुः ॥ ४३ ॥

कैवल्याप्तावपि तदुपकारकज्ञानं न त्याज्यमित्यत्राह—उल्केति ॥ ३६ ॥ दृश्यादृश्ययोः सकलनिष्कलत्वं चाह—पुष्पवदिति । वृक्षः स्वाविद्यापादः । स्वज्ञानवह्न्यनात् वृक्षत्वं, तद्धेतुमायायाः तच्छादकत्वात् छायात्वं इत्यर्थः ॥ ३७ ॥ एवं निष्कलसकलभावः सर्वत्र वर्तत इत्याह—निष्कल इति । स्वातिरिक्तकलाविशिष्टस्वाविद्यापदे सकलभावः । तदपवादाधिकरणे निष्कले सकलसापेक्षतः सप्रतियोगिकनिष्कले सापेक्षप्रभवसप्रतियोगिकनिष्कलगतसविशेषापह्नवात् निष्प्रतियोगिकनिष्कलात्मा अवशिष्यते इत्यर्थः ॥ ३८ ॥ अकारादिमात्राचतुष्टयात् परं ब्रह्मेत्याह—एकमात्र इति ॥ ३९ ॥ अकारादिमात्रात्रयापेक्षया अर्धमात्रा । हृदयादिपञ्चस्थानासनपञ्चब्रह्मातीतं परं ब्रह्मैव, तस्य सर्वपरत्वेन तत्परं नास्तीत्याह—पञ्चधेति ॥ ४०–४१ ॥ अच्युतं सदाशिवम् ॥ ४२ ॥

तस्य देहातीतत्वं व्यापकत्वं चाह—देहेति । प्राणलयस्थानं नासाग्रद्वादशाङ्गुलं यः तल्लयाधारः तं देहातीतं प्रत्यगात्मानं विद्यात् । यः प्रत्यग्भावविरळः तदन्तं तं परमात्मानं जानीयात् । सोऽयं परमात्मा प्रभुः तत्रस्थः सर्वातीतपदे स्थितोऽपि स्वविकल्पितं विश्वं विश्वविराडोत्राद्यात्मना व्यापयेत् ॥ ४३ ॥

योगस्य परमगोप्यत्वम्, उत्तमाधिकारिण एव दातव्यत्वं च

मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम् ।
तथाऽपि योगिनां योगो ह्यविच्छिन्नः प्रवर्तते ॥ ४४ ॥
एतत्तु परमं गुह्यमेतत्तु परमं शुभम् ।
नातः परतरं किंचिन्नातः परतरं शुभम् ॥ ४५ ॥
शुद्धज्ञानामृतं प्राप्य परमाक्षरनिर्णयम् ।
गुह्याद्गुह्यतमं गोप्यं ग्रहणीयं प्रयत्नतः ॥ ४६ ॥
नापुत्राय प्रदातव्यं नाशिष्याय कदाचन ।
गुरुदेवाय भक्ताय नित्यं भक्तिपराय च ॥ ४७ ॥
प्रदातव्यमिदं शास्त्रं नेतरेभ्यः प्रदापयेत् ।
दाताऽस्य नरकं याति सिध्यते न कदाचन ॥ ४८ ॥

योगिनां करणग्रामस्य स्वस्वव्यापारव्यग्रत्वेन योगविच्छित्तिः स्यादित्याह—मनोऽपीति । मनस्तु स्वात्मनोऽन्यत्र नादे निक्षिप्तं तथा चक्षुरपि नासाग्रे पातितं सङ्कल्परूपादिविषयादुपरतम् । स्वान्तर्बाह्ययोगविघ्नाभावात् योगियोगस्य अविच्छिन्नत्वं युज्यत इत्यर्थः ॥ ४४ ॥ यत् योगमुख्यफलं तदतिरिक्तरहस्यं नास्तीत्याह—एतदिति ॥ ४५ ॥ सर्वमन्यत् परित्यज्य

परमाक्षरज्ञानमेव सदा ग्राह्यं इत्याह—शुद्धेति ॥ परमाक्षरनिर्णयात्मकं ज्ञानं प्रयत्नादेशिकमुखेन ग्रहणीयं ग्राह्यम् ॥ ४६ ॥ यदेवं गुह्यतमं तत् उत्तमाधिकारिणे दातव्यं तदितरेभ्यो न दातव्यम्। यदि दद्यात् तदा दातुः नरकपातः स्यादित्याह—नेति ॥ ४७–४८ ॥

केवलशास्त्रज्ञानवतोऽपि पापपुण्यलेपाभावः

गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथ भिक्षुकः ।
यत्र तत्र स्थितो ज्ञानी परमाक्षरवित्सदा ॥ ४९ ॥
विषयी विषयासक्तो याति [1]देहान्तरे शुभम् ।
ज्ञानादेवास्य शास्त्रस्य सर्वावस्थोऽपि मानवः ॥ ५० ॥
ब्रह्महत्याश्वमेधाद्यैः पुण्य[2]पापैर्न लिप्यते ।

यः कोऽपि वा वृत्त्यादिज्ञानादेव कृतार्थो भवति तस्य न पुण्यपापलेपोऽस्तीत्याह—गृहस्थ इति । आभासतोऽपि विषयासक्तिदर्शनात् अयं सविशेषज्ञानी ॥ ४९ ॥ तस्य देहावसानसमये विषयासक्तिवैगल्यात् शुभप्राप्तिरिष्यत इत्यर्थः । केवलशास्त्रजन्यज्ञानात् आगामिपुण्यपापालेपो भवतीत्यर्थः ॥ ५० ॥

त्रिविधा आचार्याः

चोदको बोधकश्चैव मोक्षदश्च परः स्मृतः ॥ ५१ ॥
इत्येषां त्रिविधो ज्ञेय आचार्यस्तु महीतले ।
चोदको दर्शयेन्मार्गं बोधकः स्थान[3]मादिशेत् ॥ ५२ ॥
मोक्षदस्तु परं तत्त्वं यज्ज्ञात्वाऽमृतमश्नुते ।

[1] देहान्तरं—उ. [2] पापैः प्रमुच्यते—क.
[3] माचरेत्—अ २.

चोदकादिभेदेन देशिकत्रैविध्यं तज्ज्ञानतः कृतकृत्यतां चाह— **चोदक** इति ॥ ९१ ॥ "अहं ब्रह्मास्मि" इत्यनुसन्धानं कुर्यादिति स्वाङ्गं ब्रह्माभिमुख्येन चोदयतीति **चोदको** वेदान्तः, मार्गदर्शकत्वात् । "तत् त्वमेव त्वमेव तत्" इति स्वाङ्गं बोधयतीति **बोधको** देशिकः, ब्रह्मप्रापकत्वात् ॥ ९२ ॥ मत्स्वरूपमेव सर्वं मामेव प्राप्स्यसि, मद्व्यतिरिक्तमणुमात्रं न विद्यते इति परमोपदेशेन स्वातिरिक्तभ्रममोक्षं ददातीति **मोक्षदः** परमेश्वरः, **परतत्त्वस्वरूपत्वात्** । यज्ज्ञानात् मुमुक्षुः अमृतो भवति सोऽयं ईश्वर इत्यर्थः ॥

प्रणवहंसानुसन्धानात्मकं प्रत्यक्षयजनम्

**प्रत्यक्षयजनं देहे संक्षेपाच्छृणु गौतम ॥ ९३ ॥**
**तेनेष्ट्वा स नरो याति शाश्वतं पदमव्ययम् ।**
**स्वयमेव [1]कृतः पश्येद्देहे बिन्दुं च निष्कलम् ॥ ९४ ॥**
**अयने द्वे च विषुवे [2]सदा पश्यति मार्गवित् ।**
**कृत्वा यामं पुरा वत्स रेचपूरककुम्भकान् ॥ ९५ ॥**
**पूर्वं चोभयमुच्चार्य अर्चयेत्तु यथाक्रमम् ।**
**नमस्कारेण योगेन मुद्रयाऽऽरभ्य चार्चयेत् ॥ ९६ ॥**
**सूर्यस्य ग्रहणं वत्स प्रत्यक्षयजनं स्मृतम् ।**

किं तत् प्रत्यक्षयजनं इत्यत्र शृण्वेतत् इत्याह—**प्रत्यक्षेति** ॥ ९३ ॥ यदा प्राणः पिंगळ्या कुण्डलिनीस्थानं प्रविशति तदेव सूर्यग्रहणं, येनेष्ट्वा मुनिः ब्रह्मपदं एति तत् प्रत्यक्षयजनमित्याह—**स्वयमेवेति** । इडापिंगळ्योः पिंगळेडयोः क्रमणं उत्तरायणदक्षिणायने भवतः । तथा मूलाधारे मूर्धनि च

[1] तुसंप—अ, अ २, क. [2] तदा—उ.

यदा प्राणः प्रविशति तदा द्वे विषुवे भवतः । एवं अयनविषुवद्वये च प्राणमार्गेविन् स्वयमेव देहे विन्दुं सकलं निष्कलं च सदा पश्येत् पश्यति । हे वत्स पुरा आदौ रेचपूरककुम्भकान् सहितान् केवलान् वा अहरहः याममात्रं कृत्वा ॥ ९४–९५ ॥ ओं इति हंस इति च यन्मन्त्रद्वयं पूर्वमुक्तं तदुभयं चार्थानुसन्धानपूर्वकं उच्चार्य यः प्रणवार्थी हंसः सोऽहमित्यनुसन्धानं नमस्कार्योगः, ऐक्यानुसन्धानस्य नमस्कार्योगत्वात् "नमस्त्वैक्यं प्रवदेत्" इति श्रुतेः । तेन नमस्कार्योगेन स्वातिरिक्तं नेति चिन्मुद्रया शाम्भवीखेचरीमुद्रया वा युक्तः सन् यथाक्रमं आत्मानं अर्चयेत्, सदा सोऽहमस्मीति ध्यायेत्, "सोऽहंभावेन पूजयेत्" इति श्रुतेः ॥ ९६ ॥ इदमेव हि प्रत्यक्षयजनं विज्ञेयम् ॥

हंसयोगलब्धज्ञानात् सायुज्यप्राप्तिः

ज्ञानात्सायुज्यमेवोक्तं तोये तोयं यथा तथा ॥ ९७ ॥
एते गुणाः प्रवर्तन्ते [1]योगमार्गकृतश्रमैः ।
यस्माद्योगं समादाय सर्वदुःखबहिष्कृतः ॥ ९८ ॥
योगध्यानं सदा कृत्वा ज्ञानं तन्मयतां व्रजेत् ।
ज्ञानात्स्वरूपं परमं हंसमन्त्रं समुच्चरेत् ॥ ९९ ॥

ब्रह्मज्ञानात् जले जलयोगवत् सायुज्यं प्रत्यक्परैक्यमुक्तं योगिभिः ॥ ९७ ॥ एवं जीवन्मुक्तगुणाः प्रवर्तन्ते । यस्मात् एवं योगाभ्यासतः सर्वदुःखबहिष्कृतो भवति तस्मात् योगध्यानं सदा कृत्वा तत्प्रभवविज्ञानमवाप्य ज्ञानसमकालं ब्रह्ममात्रतामियादित्यर्थः ॥ ९८ ॥ यद्यत् अन्तर्बाह्यविलसितं तत्तत् हंस एव, हंसातिरिक्तं न किञ्चिदस्तीति ज्ञानी परमहंसः परमात्मा भवतीत्याह—ज्ञानादिति । हंसः सोऽहमिति यः सदा हंसमन्त्रमुच्चरेत् सोऽयं

[1] योगाभ्यास—क, अ १, अ २.

सोऽहमिति ज्ञानात् हंसस्य यत् परमं स्वरूपं यत् निष्प्रतियोगिकम्त्वमात्रं अवशिष्यते तदेव भवतीत्यर्थः ॥ ५९. ॥

हंसोपलब्धिस्थानम्

प्राणिनां देहमध्ये तु स्थितो हंसः सदाऽच्युतः ।
हंस एव परं सत्यं हंस एव तु [1]सत्यकम् ॥ ६० ॥
हंस एव परं वाक्यं हंस एव तु वैदिकम् ।
हंस एव परो रुद्रो हंस एव परात्परम् ॥ ६१ ॥
सर्वदेवस्य मध्यस्थो हंस एव महेश्वरः ।
पृथिव्यादिशिवान्तं तु अकाराद्याश्च वर्णकाः ॥ ६२ ॥
कूटान्ता हंस एव स्यान्मातृकेति व्यवस्थिताः ।

स कुत्रोपलभ्यत इत्यत आह--प्राणिनामिति । नित्यानुसन्धानात् स्वमात्राच्युतो हंसः हृद्येवोपलभ्यते इत्यर्थः । हंसस्य सार्वात्म्यमाह---हंस एवेति । अक्षाक्षाधिपान्तर्यामित्वात् ॥ ६०–६१ ॥ अभिधेयं अभिधानं च हंस एवेत्याह---पृथिव्यादीति ॥ ६२ ॥ कूटशब्देन क्षकार उच्यते ॥

हंसमन्त्रानुस्मरणपूर्वकसमाध्यभ्यासः

मातृकारहितं मन्त्रमादिश्यन्ते न कुत्रचित् ॥ ६३ ॥
हंसज्योतिरनूपम्यं देवमध्ये व्यवस्थितम् ।
दक्षिणामुखमाश्रित्य ज्ञानमुद्रां प्रकल्पयेत् ॥ ६४ ॥

[1] शक्तिदं—अ २. शक्तिकं—अ १, क.

मदा समाधिं कुर्वीत हंसमन्त्रमनुस्मरन् ।
निर्मलस्फटिकाकारं दिव्यरूपमनूपमम् ॥ ६५ ॥
मध्यदेशे परं हंसं ज्ञानमुद्राऽऽत्मरूपकम् ।

मातृकामन्त्रयोरैक्यं हंसज्योतिरवगम्य ज्ञानमुद्रामावध्य स्वात्ममन्त्रं स्मरन् सदा समाधिं कुर्वीतेत्याह— मातृकेति । अनूपम्यं अनूपमं निरुपमं सर्वदेवमध्ये दक्षिणाभिमुखं देवमाश्रित्य ॥ ६३–६४ ॥ देवं कीदृशमित्यत्र निर्मलेति ॥ ६५ ॥

हंसस्यासननिरूपणम्

प्राणापानसमानाश्चोदानव्यानौ च वायवः ॥ ६६ ॥
पञ्चकर्मेन्द्रियैर्युक्ताः क्रियाशक्तिबलोद्यताः ।
नागः कूर्मश्च कृकरो देवदत्तो धनंजयः ॥ ६७ ॥
पञ्चज्ञानेन्द्रियैर्युक्ता ज्ञानशक्तिबलोद्यताः ।
पावकः शक्तिमध्ये तु नाभिचक्रे रविः स्थितः ॥ ६८ ॥
[1]बद्धमुद्रा कृता येन नासाग्रे तु स्वलोचनं ।

हंसः क आसनमर्हतीत्यत्र नाभिचक्रे नासाग्रे नेत्रयोश्च व्यवस्थित इत्याह—प्राणेति ॥ ६६–६७ ॥ शक्तिद्वयमध्ये मूलाधारस्थपावकरूपेण हंस एव स्थितः । येन नासाग्रे स्वलोचने च बद्धखेचरीमुद्रा कृता सोऽयं हंसो रविर्भूत्वा नाभिचक्रे नासाग्रे लोचनयोश्च स्थित इत्यर्थः ॥ ६८ ॥

हंसयोगाभ्यासक्रमः

अकारे वह्निरित्याहुरुकारे हृदि संस्थितः ॥ ६९ ॥

[1] बन्धमुद्रा—मु. बध्व—उ.

मकारे च भ्रुवो[1]र्मध्ये प्राणशक्त्या प्रबोधयेत् ।
ब्रह्मग्रन्थिरकारे च विष्णुग्रन्थिर्हृदि स्थितः ॥ ७० ॥
रुद्रग्रन्थिर्भ्रुवोर्मध्ये भिद्यतेऽक्षरवायुना ।
अकारे संस्थितो ब्रह्मा उकारे विष्णुरास्थितः ॥ ७१ ॥
मकारे संस्थितो रुद्रस्ततोऽभ्यान्तः परात्परः ।
कण्ठं संकुच्य नाड्यादौ स्तम्भितं येन शक्तितः ॥ ७२ ॥
रसना पीड्यमानेयं षोडशीवोर्ध्वगामिनी ।
त्रिकूटं [2]त्रिविधं चैव गोलाखं निखरं तथा ॥ ७३ ॥
त्रिशङ्खं वज्रमोंकारमूर्ध्वनालं भ्रुवोर्मुखम् ।
कुण्डलीं चालयन्प्राणान्भेदयन्शशिमण्डलम् ॥ ७४ ॥
साधयन्वज्रकुम्भानि नव द्वाराणि बन्धयेत् ।
सुमनःपवनारूढः सरागो निर्गुणस्तथा ॥ ७५ ॥
ब्रह्मस्थाने तु नादः स्याच्छंकि[3]न्यमृतवर्षिणी ।
षट्चक्रमण्डलोद्धारं ज्ञानदीपं प्रकाशयेत् ॥ ७६ ॥
सर्वभूतस्थितं देवं सर्वेशं नित्यमर्चयेत् ।
आत्मरूपं तमालोक्य ज्ञानरूपं निरामयम् ॥ ७७ ॥
दृश्यं तं दिव्यरूपेण सर्वव्यापी निरञ्जनः ।
हंस हंस वदेद्वाक्यं प्राणिनां देहमाश्रितः ।
स प्राणापानयोर्ग्रन्थिरजपेत्यभिधीयते ॥ ७८ ॥

[1] मध्यं—अ १. [2] त्रिविधा—अ १, अ २, क.
[3] न्यामृ—क, अ १, अ २.

सहस्रमेकं द्ययुतं षट् शतं चैव सर्वदा ।
उच्चरन्पतितो हंसः सोऽहमित्यभिधीयते ॥ ७९ ॥
पूर्वभागे ह्यधोलिङ्गं शिखिन्यां चैव पश्चिमम् ।
ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत्सदा यतिः ॥ ८० ॥

विराडादिरूपेणाकारादिमात्रात्रये यो वसेत् तं प्राणशक्त्या बोधयेदित्याह—**अकार** इति । **अकारे** मूलाधारे च **वह्निः** वैश्वानरो वर्तत **इत्याहुः** । शिष्टं स्पष्टम् ॥ ६९ ॥ यथोक्तस्थानविशिष्टाकारादिमात्रात्रये यत् विद्यते ग्रन्थित्रयं तद्भंसज्ञानवायुना भिद्यते । तत अकारादौ ब्रह्मादयः प्रकाशन्ते । तद्देहकलनापाये निर्विशेषपरमात्मा स्वमात्रं प्रकाशते इत्याह—**ब्रह्मेति** ॥ ७०–७१ ॥ तद्दर्शनग्रन्थित्रयभेदनोपायतया योगमुपदिशति—**कण्ठमिति** । जालन्धरबन्धेन **कण्ठं सङ्कुच्य** सिद्धासनारूढेन **येन** योगिना **नाडयादौ** सुषुम्नामूले कुण्डलिनीशक्तितः कुण्डलिनीशक्त्या सह दृष्टिप्राणादौ **स्तम्भिते** सति ॥ ७२ ॥ अथ "ऊर्ध्वमुन्नमत इत्योङ्कारः" इति श्रुत्यनुरोधेनाकारादिपरान्तषोडशावयवा यस्य सः **षोडशीप्रणव इव ऊर्ध्वगामिनी** घण्टिकाकुहरगामिनी **इयं** जिह्वा **पीड्यमाना** भवति तनुतामेत्य ब्रह्मबिलं प्रविशति । तदा तिस्रो नाडयो यत्रैक्यं भजन्ति तं **त्रिकूटं** भ्रूमध्यं मूलाधारविशुद्ध्यादिभेदेन तत् **त्रिविधं** विराजते । तत्र गोशब्देन पृथिव्यादिभूतपञ्चकतत्कार्यमुच्यते, तन्नित्यादिप्रलये यदात्मना लीयते सेयं गोला अव्यक्तशक्तिः, तदात्मकं खं **गोलाखं** अव्याकृताकाशं यस्मात् निर्गतं व्याकृताव्याकृताकाशादिपृथिव्यन्तं **तन्निखरं** चिदाकाशं योगिरमणस्थानं ब्रह्म च विद्यत इत्यर्थः । यद्वा—गोशब्देन जिह्वोच्यते । तथा च हठतन्त्रे आम्नायते—"गोमांसं भक्षयेत्" इत्यंशविवरणे "गोशब्देनेरिता जिह्वा" इत्युक्तत्वात् । शिष्टं समानम् ॥ ७३ ॥ पुनः त्रिकूटविशेषणमेतत्—इच्छानिच्छापरेच्छाप्रभवस्वान्तरुपलभ्यमानं त्रिशं सुखदुःखत्रयं खादतीति **त्रिशङ्कं**, अयोगिभिः

कदाऽपि दुर्भेद्यत्वात् **वज्रं, ओङ्कारं** अकारादिमात्रात्रयावसानस्थानत्वात्, **ऊर्ध्वनाळं भ्रुवोर्मुखं** भ्रूमध्यम्। यदि तत्र योगी ज्योतिर्लिङ्गं द्रष्टुमिच्छति तदा शक्तिचालनाद्युपायतो ज्ञानदीपं पश्यतीत्याह—**कुण्डलीमिति** ॥ ७४ ॥ सूर्योज्जायीशीतळ्यादीनि **वज्रकुम्भकानि,** तेषां ग्रन्थित्रयभेदनपटुत्वात्। ततो नादः आविर्भवतीत्याह—**सुमन** इति। **सुमनः** मनोज्ञत्वात् **पवनारूढः** प्राणोपाधिकत्वात् **सरागो** नैसर्गिकत्वात् तथा **निर्गुणः** तमआदिगुणत्रया-स्पृष्टत्वात् ॥ ७५ ॥ "दहरं पुण्डरीकं वेश्म" इति श्रुतिसिद्धब्रह्मस्थाने **नादाविर्भावः** स्यात्। शं सुधां किरतीति **शङ्किनी** चान्द्री कला **अमृतवर्षिणी** भवति। ततो योगी प्रत्यग्रूपेण प्रकाशयेदित्याह—**षडिति**। मूलाधारादि-षट्चक्रमण्डलं अधोमुखं ऊर्ध्वं धरतीति **षट्चक्रमण्डलोद्धारं** ज्ञानाज्ञानवृत्ति दीपयतीति **ज्ञानदीपं** प्रत्यक्त्वं, तद्रूपेण विद्वान् **प्रकाशयेदित्यर्थः** ॥ ७६ ॥ प्रत्यञ्चं सर्वान्तरत्वेन भावयेदित्याह—**सर्वेति**। ततः प्रत्यगभिन्नपरं ब्रह्मास्मीति ध्यायेदित्याह—**आत्मेति** ॥ ७७ ॥ ज्ञानिभिः **दिव्यरूपेण दृश्यं** तं परमात्मानं प्रत्यगभेदेन यो जानाति सोऽयं मुनिः **सर्वव्यापी निरञ्जनो** भूत्वा। हंसहंसेति वीप्सया "हंसः सोऽहं" इति **वाक्यं वदेदिति** द्योत्यते। योऽयं हंसानुसन्धानव्यापारः **सः** ॥ ७८ ॥ अजपाजपसङ्ख्येयत्तामाह—**सहस्रमिति** ॥ ७९ ॥ एवं हंसयोगिना यतिना प्रत्यहं यत् कर्तव्यं तदाह—**पूर्वेति**। सुषुम्नायाः **पूर्वभागे** मूलाधारचक्रे **ह्यधोलिङ्गं** वैराजतत्त्वं ध्यायेत्। "तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः" इति श्रुत्यनुरोधेन अनाहतस्थशिखिन्यां पावकज्वालायां **पश्चिमं** सौम्यं प्रत्यगात्मलिङ्गं वा अहमस्मीति ध्यायेत्। **भ्रुवोराज्ञाचक्रमध्ये** तु ब्रह्ममात्रभावापत्तौ यतत इति **यतिः** मुनिः **ज्योतिरैश्वरं नित्यं** निष्प्रतियोगिक-**ब्रह्ममात्रलिङ्गं** वा **सदा ध्यायेत्** अहमस्मीत्यनुसन्धानं कुर्यादित्यर्थः ॥ ८० ॥

हंसयोगिना अनुसन्धेयं आत्मस्वरूपम्

अच्युतोऽहमचिन्त्योऽहमतर्क्योऽहमजोऽस्म्यहम् ।
अव्रणोऽहमकायोह[1]मनङ्गोऽस्म्यभयोऽस्म्यहम् ॥ ८१ ॥
अशब्दोऽहमरूपोऽहमस्पर्शोऽस्म्यहमद्वयः ।
अरसोऽहमगन्धोऽहमनादिरमृतोऽस्म्यहम् ॥ ८२ ॥
अक्षयोऽहमलिङ्गोहमजरोऽस्म्यकलोऽस्म्यहम् ।
अप्राणोऽहममूर्कोऽहमचिन्त्योऽस्म्यकृतोऽस्म्यहम् ॥ ८३ ॥
अन्तर्याम्यहमग्राह्योऽनिर्देश्योऽहमलक्षणः ।
अगोत्रोऽहमगात्रोऽहमचक्षुष्कोऽस्म्यवागहम् ॥ ८४ ॥
[2]अद्रेश्योऽहमवर्णोऽहमखण्डोऽस्म्यहमद्भुतः ।
अश्रुतोऽहमदृष्टोऽहमन्वेष्टव्योऽमरोऽस्म्यहम् ॥ ८५ ॥
अवायुरप्यनाकाशोऽतेजसोऽप्यभिचार्यहम् ।
अमतोऽहमजातोऽहमतिसूक्ष्मोऽविकार्यहम् ॥ ८६ ॥
अरजस्कोऽतमस्कोऽहमसत्त्वोस्म्यगुणोऽस्म्यहम् ।
अमायोऽनुभवात्माऽहमनन्योऽविषयोऽस्म्यहम् ॥ ८७ ॥
अद्वैतोऽहमपूर्णोऽहमबाध्योऽहमनन्तरः ।
अश्रोत्रोऽहमदीर्घोऽहमव्यक्तोऽहमनामयः ॥ ८८ ॥
अद्वयानन्दविज्ञानघनोऽस्म्यहमविक्रियः ।
अनिच्छोऽहमलेपोऽहमकर्ताऽस्म्यहमद्वयः ॥ ८९ ॥

[1] मसङ्गो—क. [2] अद्—क, अ १, अ २.

अविद्याकार्यहीनोऽहमवाङ्मनसगोचरः ।
अनल्पोऽहमशोकोऽहमविकल्पोऽस्म्यविज्वलन् ॥ ९० ॥
आदिमध्यान्तहीनोऽहमाकाशसदृशोऽस्म्यहम् ।
आत्मचैतन्यरूपोऽहमहमानन्दचिद्घनः ॥ ९१ ॥
आनन्दामृतरूपोऽहमात्मसंस्थोऽहमन्तरः ।
आत्मकामोऽहमाकाशात्परमात्मेश्वरोऽस्म्यहम् ॥ ९२ ॥
ईशानोऽस्म्यहमीड्योऽहमहमुत्तमपूरुषः ।
उत्कृष्टोऽहमुपद्रष्टाऽहमुत्तरतरोऽस्म्यहम् ॥ ९३ ॥
केवलोऽहं कविः कर्माध्यक्षोऽहं करणाधिपः ।
गुहाशयोऽहं गोप्ताऽहं चक्षुषश्चक्षुरस्म्यहम् ॥ ९४ ॥
चिदानन्दोऽस्म्यहं चेताश्चिद्घनश्चिन्मयोऽस्म्यहम् ।
ज्योतिर्मयोऽस्म्यहं ज्यायान् ज्योतिषां ज्योतिरस्म्यहम् ॥९५॥
तमसः साक्ष्यहं तुर्युतुर्योऽहं तमसः परः ।
दिव्यो देवोऽस्मि दुर्दर्शो दृष्टाध्यायो ध्रुवोऽस्म्यहम् ॥ ९६ ॥
नित्योऽहं निरवद्योऽहं निष्क्रियोऽस्मि निरञ्जनः ।
निर्मलो निर्विकल्पोऽहं निराख्यातोऽस्मि निश्चलः ॥ ९७ ॥
निर्विकारो नित्यपूतो निर्गुणो निस्स्पृहोऽस्म्यहम् ।
निरिन्द्रियो नियन्ताऽहं निरपेक्षोऽस्मि निष्कलः ॥ ९८ ॥
पुरुषः परमात्माऽहं पुराणः परमोऽस्म्यहम् ।
परावरोऽस्म्यहं प्राज्ञः प्रपञ्चोपशमोऽस्म्यहम् ॥ ९९ ॥

परामृतोऽस्म्यहं पूर्णः प्रभुरस्मि पुरातनः ।
पूर्णानन्दैकबोधोऽहं प्रत्यगेकरसोऽस्म्यहम् ॥ १०० ॥
प्रज्ञातोऽहं प्रशान्तोऽहं प्रकाशः परमेश्वरः ।
एकधा चिन्त्यमानोऽहं द्वैताद्वैतविलक्षणः ॥ १०१ ॥
बुद्धोऽहं भूतपालोऽहं भारूपो भगवानहम् ।
महादेवो महानस्मि महाज्ञेयो महेश्वरः ॥ १०२ ॥
विमुक्तोऽहं विभुरहं वरेण्यो व्यापकोऽस्म्यहम् ।
वैश्वानरो वासुदेवो विश्वतश्चक्षुरस्म्यहम् ॥ १०३ ॥
विश्वाधिकोऽहं विशदो विष्णुर्विश्वकृदस्म्यहम् ।
शुद्धोऽस्मि शुक्रः शान्तोऽस्मि शाश्वतोऽस्मि शिवोऽस्म्यहम् ॥
सर्वभूतान्तरात्माऽहमहमस्मि सनातनः ।
अहं सकृद्विभातोऽस्मि स्वे महिम्नि सदा स्थितः ॥ १०५ ॥
सर्वान्तरः स्वयंज्योतिः सर्वाधिपतिरस्म्यहम् ।
सर्वभूताधिवासोऽहं सर्वव्यापी स्वराडहम् ॥ १०६ ॥
समस्तसाक्षी सर्वात्मा सर्वभूतगुहाशयः ।
सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः ॥ १०७ ॥
स्थानत्रयव्यतीतोऽहं सर्वानुग्राहकोऽस्म्यहम् ।
सच्चिदानन्दपूर्णात्मा सर्वप्रेमास्पदोऽस्म्यहम् ॥ १०८ ॥
सच्चिदानन्दमात्रोऽहं स्वप्रकाशोऽस्मि चिद्घनः ।
सत्त्वस्वरूपसन्मात्रसिद्धसर्वात्मकोऽस्म्यहम् ॥ १०९ ॥

सर्वाधिष्ठानसन्मा[1]त्रः सर्वबन्धहरोऽस्म्यहम् ।
सर्वग्रासोऽस्म्यहं सर्वद्रष्टा सर्वानुभूरहम् ॥ ११० ॥
एवं यो वेद तत्त्वेन स वै पुरुष उच्यते ॥ इत्युपनिषत् ॥

यथायथा यतिभिः अनुसन्धेयं तदेवाह—**अच्युतोऽहमित्यादिना** । **अच्युतोऽहं**, अच्युतस्वभावात्, **अचिन्त्यः** चित्तवृत्त्यभावात्, **अतर्क्यः** अनिर्वाच्यत्वात्, **अजः** जन्माद्यभावात् । **अव्रण** इत्यादिविशेषणत्रयं शरीरत्रयप्रतिषेधार्थम् । **अभयः**, भयहेतुद्वैताभावात् ॥ ८१ ॥ किं च— **अशब्दोऽहमित्यादि** । पञ्चतन्मात्रवैरळ्यात् शब्दादिप्रतिषेधसिद्धोऽस्मि । **अद्वयः**, द्वैताभावात् । **अनादिरमृतः**, सम्भूतिप्रळयाभावात् ॥ ८२ ॥ किं च—**अक्षयोऽहमित्यादि** । **अक्षयोऽहं**, क्षयिष्णुस्थूलशरीराभावात् । **अलिङ्गः**, अचिह्नत्वात् । **अजरः**, जरादिषड्धर्म्यभावात् । **अप्राणोऽहममूकोऽहं** सप्राणवागिन्द्रियाभावात् । **अकृतः**, कृतिहेत्वभावात् ॥ ८३ ॥ किं च— **अन्तर्याम्यहमित्यादि** । **अन्तर्यामी**, सर्वान्तरत्वात् । **अग्राह्यः** करणैः । **अनिर्देश्यः** अनिदंस्वरूपत्वात् । **अलक्षणः**, लक्षणात्रयाभावात् । **अगोत्रः**, कुलगोत्रविवर्जितत्वात् । **अचक्षुष्कः**, ज्ञानाक्षाभावात् । **अवाक्**, कर्माक्षाभावात् ॥ ८४ ॥ किं च—**अद्रेश्योऽहमित्यादि** । दृश्याभावात् **अद्रेश्यः** । **अवर्णः** वर्णाश्रमाभावात् । **अखण्डः** पूर्णत्वात् । **अद्भुतः**— स्वस्य निष्प्रतियोगिकस्वमात्रत्वेऽपि स्वाज्ञादिदृष्ट्यनुरोधेन जाग्रज्जाग्रदाद्य-विकल्पानुङ्कारसान्तवत् भानात् अद्भुतत्वं युज्यते । वेदान्तवाक्येषु मुमुक्षुभिः **अन्वेष्टव्यः** । **अमरः** पारमार्थिकनित्यत्वात् ॥ ८५ ॥ किं च— **अवायुरित्यादि** । वाय्वाकाशतेजोग्रहणं जलपृथिव्युपलक्षणम् । **अतेजस** इति षष्ठी प्रथमार्था । **अव्यभिचारी** सदेकरूपत्वात् । अन्तःकरणवृत्तिभिः **अमतः** । **अजातः** अजत्वात् । **अतिसूक्ष्मः** केशकोटयंशैकभागसूक्ष्माव्यक्तादपि

[1] त्रस्वात्मब—क, अ १, अ २.

सूक्ष्मत्वात् । **अविकारी** विकारकलनावैरळ्यात् ॥ ८६ ॥ किं च—**अरजस्क** इत्यादि । गुणत्रयगुणसाम्याभावतो निर्गुणत्वात् । **अमायः** निर्मायत्वात् । **अनुभवात्मा** विज्ञानगम्यत्वात् । **अनन्यः** ब्रह्माभिन्नत्वात् । **अविषयः** निर्विषयत्वात् ॥ ८७ ॥ **अद्वैतः** निष्प्रतियोगिकत्वात् । **अपूर्णः** जीवात्मना परिच्छिन्नदृष्टित्वात् । यद्वा—अकारवाच्यविष्ण्वात्मना सर्वत्र पूर्णत्वात् । **अबाह्योऽहमनन्तरः** स्वबाह्यान्तःकलनावैरळ्यात् । अकरणत्वात् परिमाणाभावात् अदृश्यत्वात् अन्नाविग्त्वाच्च **अश्रोत्रादिविशेषणचतुष्टयमुपपद्यते** ॥ ८८ ॥ किं च—**अद्रयेति** । पूर्णानन्दबोधस्वरूपत्वात् **अनिच्छः** ॥ ८९ ॥ **अनल्पः** अपरिच्छिन्नत्वात् । **अशोकोऽहं** निरहङ्कृतित्वात् । **अविकल्पः** निर्विकल्पत्वात् । **अविज्वलन्** निरग्नित्वात् ॥ ९० ॥ **आदिमध्यान्तशून्यः** उत्पत्तिस्थितिप्रळयाभावात् । **आकाशसदृशः** चिदाकाशत्वात् ॥ ९१ ॥ **आत्मसंस्थः** स्वे माहिम्नि स्थितत्वात् । **अन्तरः** सर्वान्तरत्वात् ॥ ९२ ॥ **उत्तमपूरुषः** क्षराक्षराकलनाविरळपुरुषोत्तमत्वात्, "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इति स्मृतेः । सर्वस्मात् **उत्कृष्टः** । **उपद्रष्टा** सर्वसाक्षिस्वरूपत्वात् । **उत्तरतरः** सर्वोत्तरत्वात् ॥ ९३ ॥ **केवलः** अशेषविशेषाभावात् । **कविः** क्रान्तदर्शित्वात् । **कर्माध्यक्षः** कर्मिणां कर्मफलदातृत्वात् । **करणाधिपः** दिग्वातादिरूपत्वात् । **गुहाशयः** सर्वप्रत्यक्स्वरूपत्वात् । **गोप्ता** विष्णुत्वात् । **चक्षुषश्चक्षुः** चक्षुरादीन्द्रियप्रवृत्तिनिमित्तत्वात् ॥ ९४ ॥ अचेतनचेतयितृत्वात् **चेताः** । **ज्यायान्** पृथिव्यादेः । **ज्योतिषां ज्योतिः** सूर्यादिप्रकाशकत्वात् ॥ ९५ ॥ **ध्रुवः** शाश्वतत्वात् ॥ ९६ ॥ **निरञ्जनः** अमङ्गत्वात् ॥ ९७–१०० ॥ **एकधा चिन्त्यमानोऽहं** सर्वापह्नवसिद्धं ब्रह्म, निष्प्रतियोगिकैकरूपेण चिन्तनीयत्वात् । सापेक्षद्वैताद्वैतविलक्षणः निष्प्रतियोगिकपरमाद्वैतरूपत्वात् ॥ १०१–१०३ ॥ **शिवः** स्वातिरिक्ताशिवग्रासत्वात् ॥ १०४ ॥ **सकृद्विभातः** निरावृतप्रकाशः ॥ १०५ ॥ **स्वराट्** स्वमात्रतया राजमानत्वात् ॥ १०६ ॥ **सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः**, स्वाङ्गस्वङ्गदृष्टिभ्यामित्यर्थः ॥ १०७ ॥ **जाग्रदादिस्थानत्रयव्यतीतोऽहम्** ॥ १०८–११० ॥

विद्याफलमाह—एवमिति । अच्युतोऽहमित्यादिसर्वानुभूरित्यन्तस्वानुभूतिवाक्यानि स्वानुभूतिमहावाक्यरत्नावलीप्रभालोचने प्रायशो व्याख्यातानीत्यर्थः । इत्युपनिषच्छब्दः ब्रह्मविद्योपनिषत्समाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
ब्रह्मविद्योपनिषदो व्याख्येयं लिखिता लघु ।
प्रकृतोपनिषद्व्याख्या सप्तत्यधिशतद्वयम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चत्वारिंशत्संख्यापूरकं ब्रह्मविद्योपनिषद्विवरणं सम्पूर्णम्

# मण्डलब्राह्मणोपनिषत्

पूर्णमदः—इति शान्तिः

## प्रथमं ब्राह्मणम्

### आत्मतत्त्वजिज्ञासा

याज्ञवल्क्यो ह वै महामुनिरादित्यलोकं जगाम । तमादित्यं नत्वा भो भगवन्नादित्यात्मतत्त्वमनुब्रूहीति ॥ १ ॥

बाह्यान्तस्तारकाकारं व्योमपञ्चकविग्रहम् ।
राजयोगैकसंसिद्धं रामचन्द्रमुपास्महे ॥

अथ खलु शुक्लयजुर्वेदप्रविभक्तेयं मण्डलब्राह्मणोपनिषत् सूक्ष्माष्टांगयोग-प्रकटनपूर्वकं लक्ष्यत्रयव्योमपञ्चकतारकद्वयादिप्रकाशकराजयोगसर्वस्वं प्रकाशयन्ती विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । याज्ञवल्क्यादित्यप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—याज्ञवल्क्य इति ॥ १ ॥

### सूक्ष्माष्टाङ्गयोगप्रतिज्ञा

स होवाच नारायणः । ज्ञान[1]सहितयमाद्यष्टाङ्गयोग उच्यते ॥२॥

[1] युक्तय—अ, अ १, अ २, क.

याज्ञवल्क्येन एवं पृष्टः तत्प्रश्नमंगीकृत्य **स होवाच**। आदित्यमण्डलान्तर्वर्ती सर्वलोकपरायणरूपोऽसौ याज्ञवल्क्यप्रश्नोत्तरमाहेत्यर्थः। किं तदित्याकांक्षायां तत्पृष्टात्मतत्त्वोपायतया यमाद्यष्टांगयोगमादावाह—**ज्ञानेति**। "ब्रह्मैव सर्वं, ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति **ज्ञानं** उपेयं तत्सहितः तद्गर्भित इत्यर्थः॥ २॥

चतुर्विधयमः

**शीतोष्णाहारनिद्राविजयः सर्वदा शान्तिर्निश्चलत्वं विषयेन्द्रियनिग्रहश्चैते यमाः॥ ३॥**

अष्टांगेषु चतुर्धा भिन्नयमलक्षणमाह—**शीतेति**। देहादावात्मात्मीयाभिमानत्यागतः शीतादिविनिवृत्तिः भवति। स्वाप्राप्तं वस्तु नेतीति ज्ञानात् **सर्वदा शान्तिः** भवति। स्वाभिलषितलक्ष्ये मनसो **निश्चलत्वम्**। इन्द्रियेन्द्रियार्थेषु वस्तुचिन्तनं **इन्द्रियेन्द्रियार्थनिग्रहो** भवति। **च**शब्दः समुच्चयार्थः। **एते** चतुष्प्रकारा **यमा** इत्यर्थः॥ ३॥

नवविधनियमः

**गुरुभक्तिः सत्यमार्गानुरक्तिः सुखागतवस्त्वनुभवश्च तद्वस्त्वनुभवेन तुष्टिर्निःसङ्गता एकान्तवासो मनोनिवृत्तिः फलानभिलाषो वैराग्यभावश्च नियमाः॥ ४॥**

नवधा भिन्ननियम उच्यते—**गुर्विति**। नित्यं अमायया स्वाज्ञानमोचकगुरुभजनं **गुरुभक्तिः**, "गुरुभक्तिं सदा कुर्यात् श्रेयसे" इति श्रुतेः। **सत्यं** ब्रह्म तत्प्रापकमार्गः तद्बोधः **तत्रानुरक्तिः** आसक्तिः। निरतिशयसुखरूपतया श्रुत्याचार्यप्रसादादागतब्रह्मवस्त्वनुभवश्च। **तद्वस्त्वनुभवेनैव तुष्टिः** न बाह्यविषयानुभवतः। तुष्टावपि **निस्सङ्गता**। सदा आदिमध्यान्तभेदेन **एकान्तत्रये वासः**—विजने प्रयत्नपूर्वकं मनोनियमनं आद्यैकान्तं, विजने

सजने वाऽपि प्रयत्नपूर्वकमनोनियमनं मध्यैकान्तं, विजने सजने वा प्रदेशे अप्रयत्नेन मनोनियमनं अन्तैकान्तं, यस्य येन यदा एकान्तं साधितं स तत्रैव वसेदित्यर्थः । स्वातिरेकेण मनो नास्तीति दृढाभिसन्धिः **मनोनिवृत्तिः** । स्वानुष्ठितकर्मफलानभिलाषः । स्वातिरिक्तविषयसामान्ये वान्ताशनमूत्र-पुरीषवदिच्छारहित्यं सर्वत्र **वैराग्यभावश्च** । सर्वत्र समुच्चयार्थं चशब्दद्वयम् । एते नियमा नवविधाः ॥ ४ ॥

आसनादिषडङ्गविवरणम्

**सुखासनवृत्तिश्चिरवासश्चैवमासननियमो भवति ॥ ५ ॥ पूरककुम्भकरेचकैः षोडशचतुष्षष्टिद्वात्रिंशत्संख्यया यथाक्रमं प्राणा-यामः ॥ ६ ॥ विषयेभ्य इन्द्रियार्थेभ्यो मनोनिरोधनं प्रत्याहारः ॥ ७ ॥ विषयव्यावर्तनपूर्वकं चैतन्ये चेतस्स्थापनं धारणं भवति ॥ ८ ॥ सर्वशरीरेषु चैतन्यैकतानता ध्यानम् ॥ ९ ॥ ध्यानविस्मृतिः समाधिः ॥ १० ॥**

आसननियम उच्यते—**सुखेति** । यत्र सुखेनाखण्डाकारात्मिका वृत्तिरुदेति सा **सुखासनवृत्तिः** । निरायासेन यत्र चिरं वसति स **चिरासनवासः** ॥ ५ ॥ प्राणायामलक्षणमाह—**पूरकेति** । षोडशमात्राकालपरिमितं **पूरकं**, **कुम्भकं** तच्चतुर्गुणितं, **रेचकं** तदर्धमित्यर्थः ॥ ६ ॥ प्रत्याहारलक्षणमाह—**विषयेभ्य** इति ॥ ७ ॥ धारणाध्यानसमाधिलक्षणमाह—**विषयेति** । सर्वत्र **विषयेति** ॥ ८ ॥ अनेकघटशरावादिषु भिद्यमानेष्वपि यथा तदवच्छिन्नव्योम्न एकत्वं तथेत्यर्थः ॥९॥ **समाधिः** निर्विकल्पकसमाधिः त्रिपुटीप्रासत्वात् ॥१०॥

सूक्ष्मयोगाष्टाङ्गज्ञानफलम्

**एवं सूक्ष्माङ्गानि । य एवं वेद स मुक्तिभाग्भवति ॥ ११ ॥**

एवं अष्टांगयोगज्ञानफलमाह---एवमिति । सूक्ष्म-अष्ट-अङ्गानि । स्वात्तज्ञानानुरोधेन स मुक्तिभाग्भवति ॥ ११ ॥

इति प्रथमः खण्डः

### देहपञ्चदोषनिरसनम्

देहस्य पञ्च दोषा भवन्ति कामक्रोधनिश्वासभयनिद्राः ॥१॥

तन्निरासस्तु निःसंकल्पक्षमालघ्वाहाराप्रमादतातत्त्वसेवनम् ॥ २ ॥

पञ्चदोषवद्देहावच्छिन्नस्य मुक्तिभाक्त्वं कथमित्याशङ्क्य तन्निरसनोपायसत्त्वात् तत्सिद्धिः स्यादित्याह---देहस्येति । के ते इत्यत्र---कामेति ॥ १ ॥ क्रमेण तन्निरासस्तु । निस्सङ्कल्पतः कामादिनिवृत्तिः, क्षमातः क्रोधनिवृत्तिः, लघ्वाहारोपलक्षितप्राणायामतः श्वासस्थिरत्वं, सर्वत्र द्वैतधीत्यागतो भयनिवृत्तिः, परमार्थतत्त्वसेवनतः स्वाज्ञाननिद्रानिवृत्तिः । एवं पञ्चदोषशान्तितो मुक्तिभाक्त्वं स्यादित्यर्थः ॥ २ ॥

### तारकावलोकनं तत्फलं च

[1]निद्राभयसरीसृपं हिंसादितरङ्गं तृष्णावर्तं दारपङ्कं संसारवार्धिं तर्तुं सूक्ष्ममार्गमवलम्ब्य सत्त्वादिगुणानतिक्रम्य तारकमवलोकयेत् ॥ ३ ॥ भ्रूमध्ये सच्चिदानन्दतेजःकूटरूपं तारकं ब्रह्म ॥ ४ ॥

अपारदुस्तारसंसारवारिधेः सत्त्वात् तत्तरणोपायो नास्तीत्याशङ्क्य लक्ष्यत्रयगोचरतारकनौकासत्त्वात् तदाश्रित्य तद्वारिधिः तरितुं शक्यः इत्याह---

[1] निद्रासरी---उ.

निद्रेति । संसृतेः सागरत्वं कथमित्यत्र निद्रेत्यादि । उक्तविशेषणविशिष्टं संसारवार्धिं तर्तुं तरितुं वक्ष्यमाणसूक्ष्ममार्गम् ॥ ३ ॥ कितत्तारकमित्यत्र भ्रूमध्य इति । नासाग्रदर्शिनो भ्रूमध्ये ज्योतिर्दृश्यते, सच्चिदानन्दस्य सर्वव्यापकत्वेन चक्षुर्मनोविकल्पिततेजःकूटरूपेऽपि व्याप्तत्वात् । भ्रूमध्यविलसितसच्चिदानन्दतेजः-कूटरूपस्य परमेश्वररूपत्वेन स्वभजद्भक्तपटलस्वातिरिक्तास्तित्वलक्षणसंसारसागर-सन्तारणात् तारकत्वम् । वस्तुतः स्वमात्रतया बृंहणात् तारकं ब्रह्मेति व्यपदिश्यते ॥ ४ ॥

लक्ष्यत्रयावलोकनेन तारकप्राप्तिः

[1]तदाप्युपायं लक्ष्यत्रयावलोकनम् ॥ ५ ॥

तदुपायः कः इत्यपेक्षायामाह—तदाप्युपायमिति । विद्धि इत्यर्थः ॥ ५ ॥

अन्तर्लक्ष्यदर्शनम्

मूलाधारादा ब्रह्मरन्ध्रपर्यन्तं सुषुम्ना सूर्याभा । तन्मध्ये तटित्कोटिसमा मृणालतन्तुसूक्ष्मा कुण्डलिनी । [2]तत्र तमोनिवृत्तिः । तद्दर्शनात्सर्वपापनिवृत्तिः ॥ ६ ॥ तर्जन्यग्रोन्मीलित[3]कर्णरन्ध्रद्वये फूत्कारशब्दो जायते । तत्र स्थिते मनसि चक्षु[4]र्मध्यनीलज्योतिः पश्यति । एवं हृदयेऽपि ॥ ७ ॥

लक्ष्यत्रयं किं इत्यत्र अन्तर्बाह्यमध्यभेदेन तत् त्रिविधम् । तत्र अन्तर्लक्ष्यलक्षणं तत्फलं चाह—मूलेति । वीणादण्डमाश्रित्य सुषुम्ना वर्तते । तटित्कोटिसमाभा कुण्डलिनीशक्तिरस्ति । तत्र मनसि स्थिरीभूते स्वाज्ञान-तमोनिवृत्तिः । कुण्डलिनीमध्ये यदाकाशं विद्यते तद्दर्शनात् सर्वपापनिवृत्तिः

[1] तदुपायं—क, अ १.
[2] "तत्र" इत्येतत्लुप्तम्—अ, उ.
[3] कर्णद्वये—क. अ २.
[4] र्मध्यं—अ, अ १.

*भवति ॥ ६ ॥ कर्णद्वयान्तः तर्जनीद्वयप्रवेशो मुकुन्दमुद्रा, तया तर्जनीति।* तर्जनीभ्यां कर्णद्वयपिधानात् तत्र फूत्कारादिनादः उदेति। तत्र स्थिते मनसि साधकः चक्षुरित्यादि। न केवलं नादे, किं तु एवं हृदयेऽपि पश्यति ॥ ७ ॥

### बहिर्लक्ष्यदर्शनम्

बहिर्लक्ष्यं तु नासाग्रे चतुःषडष्टदशद्वादशाङ्गुलीभिः क्रमान्नीलद्युतिश्यामत्वसदृग्रक्तभङ्गीस्फुरत्पीतवर्णद्वयोपेतं व्योमत्वं पश्यति स तु योगी ॥ ८ ॥ चलदृष्ट्या व्योमभागवीक्षितुः पुरुषस्य दृष्टयग्रे ज्योतिर्मयूखा वर्तन्ते। तद्दृष्टिः स्थिरा भवति ॥ ९ ॥ शीर्षोपरि द्वादशाङ्गुलिमानज्योतिः पश्यति तदाऽमृतत्वमेति ॥१०॥

अन्तर्लक्ष्येयत्तामुक्त्वा बहिर्लक्ष्येयत्तामनुक्रामति—बहिरिति। योगी स्वदृष्टी समे कृत्वा स्वनासाग्रे स्वकृताभ्यासानुरोधेन क्रमाच्चतुरादिद्वादशांगुलिपर्यन्तं व्योमत्वं व्योमभावं पश्यति। किंविशिष्टं व्योमेत्यत्र दृश्यमाननीलद्युतिः ईषच्छ्यामत्वगुणसदृशा आपाततो रक्तभङ्गी च स्फुरत्पीतवर्णविशिष्टा। तत्र नीलपीतवर्णौ प्रधानौ। श्यामादिवर्णस्तु उपसर्जनभूतः। एवं वर्णद्वयविशिष्टं व्योमेत्यर्थः। यदा एवं पश्यति तदा अयं योगी भवति ॥ ८ ॥ एवं दर्शनान्मनो[1]नुगृहीतदृष्टिः स्थिरा भवतीत्याह—चलेति। स्वदृष्टयग्रे। मयूखाः किरणाः। यद्दृष्टिः तत्र समारोपिता तद्दृष्टिः ॥ ९ ॥ मस्तकोपरि ज्योतिर्दर्शनं अमृतत्वफलकमित्याह—शीर्षेति। यदा अयं योगी शीर्षोपरि ॥ १० ॥

### मध्यलक्ष्यदर्शनम्

मध्यलक्ष्यं तु प्रातश्चित्रादिवर्णसूर्यचन्द्रवह्निज्वालावलीवत्तद्विहीनान्तरिक्षवत्पश्यति ॥ ११ ॥ तदाकाराकारी भवति ॥ १२ ॥

[1] निगृहीत—उ.

अभ्यासान्निर्विकारं गुणरहिताकाशं भवति । विस्फुरत्तारकाका-[1]रगाद्वत्तमोपमं [2]पराकाशं भवति । कालानलसमद्योतमानं महाकाशं भवति । सर्वोत्कृष्टप[3]रमाद्वितीयप्रद्योतमानं तत्त्वाकाशं भवति । कोटिसूर्य[4]प्रकाशसंकाशं सूर्याकाशं भवति ॥ १३ ॥ एवमभ्यासात्तन्मयो भवति । य एवं वेद ॥ १४ ॥

अन्तर्बाह्यलक्ष्यलक्षणमुक्त्वा मध्यलक्ष्यलक्षणं प्रकटयति—मध्येति । योगी नातिदूरदेशपुरोभागान्तरिक्षे प्रातरित्यादि ॥ ११ ॥ एवं दर्शनतः किं स्यादित्याशङ्क्य तन्मयत्वं व्योमपञ्चकदर्शनं तद्भावापत्तिरपि स्यादित्याह—तदाकारेति ॥ १२–१३ ॥ अभ्यासज्ञानफलमाह—एवमिति ॥ १४ ॥

इति द्वितीयः खण्डः

तारकामनस्कभेदेन द्विविधो योगः

तद्योगं च द्विधा विद्धि पूर्वोत्तर[5]विधानतः ।
पूर्वं तु तारकं विद्यादमनस्कं तदुत्तरमिति ॥

तारकं द्विविधम् । मूर्तितारकममूर्तितारकमिति । यदिन्द्रियान्तं तन्मूर्तितारकम् । यद्भ्रूयुगातीतं तदमूर्तितारकमिति ॥ १ ॥

व्योमपञ्चकाभ्यासतः किं स्यादित्यत्र पर्यवसाने तारकामनस्कसिद्धिः स्यादित्याह—तदिति । यद्व्योमपञ्चकाभ्यासयोगः उक्तः पर्यवसाने तद्योगम् ।

[1] रं गा—अ. रा गा—अ १.
[2] परमाका—अ.
[3] रमद्युतिप्र—अ, अ १.
[4] प्रकाशं सू—अ १, अ२, क.
[5] विभागतः—अ, अ १, अ २, क.

किं मूर्तितारकं किं अमूर्तितारकं इत्यत्र मूलाधारमारभ्याज्ञाचक्रपर्यन्तं मूर्तितारकं, आज्ञाचक्रमारभ्य सहस्रारान्तं अमूर्तितारकमित्याह—यदिति ॥ १ ॥

मनोयोगविधिः

उभयमपि मनोयुक्तमभ्यसेत् । मनो[1]युक्तान्तरदृष्टिस्तारक-प्रकाशाय भवति ॥ २ ॥

लक्ष्यदर्शनस्य चक्षुरधीनत्वात् किं मनसेत्याशङ्क्य मनोनुगृहीतदृष्टिः अन्तर्दृष्टिर्भूत्वा तारकग्राही भवति न केवलदृष्टिरित्याह—मन इति ॥ २ ॥

पूर्वतारकम्

भ्रूयुगमध्यबिले तेजस आविर्भावः । एतत्पूर्वतारकम् ॥ ३ ॥

पूर्वतारकस्वरूपमाह—भ्रूयुगेति ॥ ३ ॥

उत्तरतारकम्

उत्तरं त्वमनस्कम् । तालुमूलोर्ध्वभागे महज्ज्योतिर्विद्यते । तद्दर्शनादणिमादिसिद्धिः ॥ ४ ॥

सफलोत्तरतारकस्वरूपमाह—उत्तरं त्विति । सिद्धिः भवति ॥ ४ ॥

उत्तरतारकस्य शाम्भवीपर्यवसानम्

लक्ष्येऽ[2]न्तर्बाह्यायां दृष्टौ निमेषोन्मेषवर्जितायां च इयं शाम्भवी मुद्रा भवति । सर्वतन्त्रेषु गोप्या महाविद्या भवति । तज्ज्ञानेन संसारनिवृत्तिः । तत्पूजनं मोक्षफलदम् ॥ ५ ॥

[1] युक्तान्तद—उ. [2] न्तस्थया—अ, अ १.

उत्तरतारकमेव पर्यवसाने मुक्तिफलप्रदशाम्भवीमुद्रा भवतीत्याह—लक्ष्य इति। तथा च श्रुत्यन्तरम्—

अन्तर्लक्ष्यं बहिर्दृष्टिः निमेषोन्मेषवर्जिता।
एषा सा शाम्भवीमुद्रा सर्वतन्त्रेषु गोपिता॥

इति। शांभवीज्ञानं संसारनिवर्तकं, तद्योगिपूजनं मुक्तिफलदं भवेदित्याह—तदिति॥ ९॥

अन्तर्लक्ष्यलक्षणम्

अन्तर्लक्ष्यं [1]जलज्योतिस्स्वरूपं भवति महर्षिवेद्यं अन्तर्बाह्येन्द्रियैरदृश्यम्॥ ६॥

किं पुनः अन्तर्लक्ष्यमित्यत्र यत्करणग्रामागोचरं तदेव अन्तर्लक्ष्यमित्याह—अन्तरिति॥

इति तृतीयः खण्डः

अन्तर्लक्ष्ये वादिविप्रतिपत्तिः

सहस्रारे [1]जलज्योतिरन्तर्लक्ष्यम्। बुद्धिगुहायां सर्वाङ्गसुन्दरं पुरुषरूपमन्तर्लक्ष्यमित्यपरे। शीर्षान्तर्गतमण्डलमध्यगं पञ्चवक्त्रमुमासहायं नीलकण्ठं प्रशान्तमन्तर्लक्ष्यमिति केचित्। अङ्गुष्ठमात्रः पुरुषोऽन्तर्लक्ष्यमित्येके॥ १॥

[1] ज्वल—अ २.

अन्तर्लक्ष्यविषये वादिविप्रतिपत्तिं परमार्थदृष्ट्या सर्ववादिविकल्पगोचर-लक्ष्यस्यैकत्वं तद्दर्शनतो ब्रह्मनिष्ठत्वं चाह—**सहस्रार** इति । योगिनः बुद्धिगुहायां, अपरे वैष्णवाः । केचित् शैवाः । एके दहरविद्योपासकाः ॥ १ ॥

सर्वलक्ष्यानुस्यूतात्मदर्शनविधिः

**उक्तविकल्पं सर्वमात्मैव । तल्लक्ष्यं शुद्धात्मदृष्ट्या वा यः पश्यति स एव ब्रह्मनिष्ठो भवति ॥ २ ॥**

परमार्थदृष्ट्या योग्यादिभिः उक्तेति । एवमन्तर्लक्ष्यैक्यदर्शी ब्रह्मनिष्ठः इत्याह—**तल्लक्ष्यमिति** ॥ २ ॥

आत्मनिष्ठस्य ब्रह्मभावप्राप्तिः

**जीवः पञ्चविंशकः स्वकल्पितचतुर्विंशतितत्त्वं परित्यज्य षड्विंशकः परमात्माऽहमिति निश्चयाज्जीवन्मुक्तो भवति ॥ ३ ॥ एवमन्तर्लक्ष्यदर्शनेन जीवन्मुक्तिदशायां स्वयमन्तर्लक्ष्यो भूत्वा परमाकाशाखण्डमण्डलो भवति ॥ ४ ॥**

स्वतत्त्वे स्थितो जीवः स्वन्यूनतत्त्वं परित्यज्य स्वाधिकतत्त्ववेदनान्मुक्तो भवतीत्याह—**जीव** इति । ज्ञानकर्माक्षप्राणभूतपञ्चकानि विंशतिः अन्तःकरण-चतुष्टयं चेति चतुर्विंशतितत्त्वानि । तदुपाधिको **जीवः पञ्चविंशकः**, "पञ्चविंश आत्मा भवति" इति श्रुतेः । तत्सर्वोपाधिसम्बन्धरहितः **षड्विंशक** इत्यर्थः ॥ ३ ॥ जीवन्मुक्तः कां गतिं भजतीत्याशङ्क्य जीवन्मुक्ता-भिमतित्यागानन्तरं ब्रह्मैव भवतीत्याह—**एवमिति** । **भूत्वा** तदभिमतित्यागसम-कालम् **भवति**, परमात्मैव भवतीत्यर्थः ॥

इति चतुर्थः खण्डः

**इति प्रथमं ब्राह्मणम्**

# द्वितीयं ब्राह्मणम्

### सर्वाधारज्योतिरात्मनःअन्तर्लक्ष्यत्वम्

अथ ह याज्ञवल्क्य आदित्यमण्डलपुरुषं पप्रच्छ । भगवन्नन्तर्लक्ष्यादिकं बहुधोक्तम् । मया तन्न ज्ञातम् । तद्ब्रूहि मह्यम् ॥ १ ॥ तदु होवाच पञ्चभूतकारणं तटित्कूटाभं तद्वच्चतुःपीठम् । तन्मध्ये [1]तत्त्वप्रकाशो भवति । सोऽतिगूढ अव्यक्तश्च ॥ २ ॥

जानन्नपि याज्ञवल्क्यो मन्दबुद्धयारोहाय पुनरन्तर्लक्ष्येयत्तां पृच्छतीत्याह—अथेति । किमिति? भगवन्निति । यथावत् मया ॥ १ ॥ तत्प्रश्नोत्तरं भगवानुवाच । किमिति? पञ्चेति । अन्तर्लक्ष्यात्मनः पञ्चभूतहेतुत्वात्, "आत्मन आकाशः सम्भूतः" इति श्रुतेः । तटित्कूटाभं, तेजःपुञ्जरूपत्वात् । तद्वत्तेजोवदात्मनः स्वाज्ञादिदृष्टयनुरोधेन तमोरजःसत्वगुणसाम्यरूपेण जाग्रदाद्यवस्थाचतुष्टयभेदेन स्वाविद्यापदस्थूलादिचतुरंशभेदेन वा चत्वारि पीठस्थानानि यस्य तत् तद्वत् चतुष्पीठं, जाग्रदादेः विश्वविराडोत्राद्यासनत्वात् । स्वाधिष्ठिताविद्यापादप्रकाशकः स्वयमेवेत्याह—तदिति । तस्य अविद्यापादस्य मध्ये तद्गतविशेषजातं ग्रसित्वा तत्त्वप्रकाशः तुर्यतुर्यज्योतिः सदा भवति । तादृशश्चेत्प्रकाशः किं न दृश्यत इत्यत आह—स इति । स्वावृत्यावृतदृष्टेः सोऽतिगूढ अव्यक्तश्च भवति ॥ २ ॥

### ज्योतिरात्मज्ञानफलम्

तज्ज्ञानप्लवाधिरूढेन ज्ञेयम् । तद्बाह्याभ्यन्तर्लक्ष्यम् ॥ ३ ॥ तन्मध्ये जगल्लीनम् । तन्नादबिन्दुकलाऽतीतमखण्डमण्डलम् । [2]सगुणनिर्गुणस्वरूपम् । तद्वेत्ता विमुक्तः ॥ ४ ॥

[1] तत्प्र—क. [2] तत्सगु—अ, अ १, अ २, क.

तत् केन वा ज्ञातुं शक्यते इत्यत आह—**तदिति** । **ज्ञानप्लवाधिरूढेन** स्वाज्ञानसागरं तीर्त्वा तत्पारं यत् **तत्** स्वमात्रमिति **ज्ञेयम्** । तत् कीदृशमित्यत्र **तत् बाह्याभ्यन्तर्लक्ष्यं**, बाह्याभ्यन्तःकलनाऽऽरोपापवादाधिकरणतया लक्षितत्वात् ॥ ३ ॥ अत एव **तन्मध्ये जगल्लीनं**, लयाधारत्वात् । लयाधारत्वे सविशेषता स्यादित्यत आह – **तदिति** । यत् सर्वाधिकरणं **तन्नादेति** । नादादि-विशेषापह्नवसिद्धं निष्प्रतियोगिकाखण्डैकरसचिन्मात्रमित्यर्थः । सविशेषं तद्भिन्नमित्यत आह—**सगुणेति** । तद्गतविशेषाविशेषत्वं स्वाज्ञादिदृष्टिनिष्ठं न स्वनिष्ठमिति । वेदनफलमाह –**तद्वेत्तेति** ॥ ४ ॥

शाम्भव्या तदधिगमः

आदावग्निमण्डलम् । तदुपरि सूर्यमण्डलम् । तन्मध्ये सुधा[1]चन्द्रमण्डलम् । तन्मध्येऽखण्डब्रह्मतेजोमण्डलम् । तद्विद्युल्लेखाव-च्छुक्लभास्वरम् । तदेव शाम्भवीलक्षणम् ॥ ५ ॥

यद्वेत्ता मुक्तो भवति तदधिगमोपायमाह– –**आदाविति** । सिद्धासनमारुह्य षण्मुखीमुद्राऽभ्यासयोगिनः वह्निमण्डलादि क्रमेण दृश्यते । पर्यवसाने तदेवोन्मन्यवस्थाजनकशाम्भवी भवतीत्यर्थः ॥ ५ ॥

पूर्णिमादृष्टिविधिः

तद्दर्शनं त्रयो दृष्टय अमा प्रतिपत्पूर्णिमा चेति । निमीलि-तदर्शनममादृष्टिः । अर्धोन्मीलितं प्रतिपत् । सर्वोन्मीलनं पूर्णिमा भवति । तासु पूर्णिमाऽभ्यासः कर्तव्यः ॥ ६ ॥ तल्लक्ष्यं नासाग्रम् । तदा तालुमूले गाढतमो दृश्यते । तदभ्यासादखण्डमण्डलाकारज्योति-र्दृश्यते । तदेव सच्चिदानन्दं ब्रह्म भवति ॥ ७ ॥

[1] चक्रम—क.

तद्दर्शनोपायमाह—तद्दर्शन इति । कथं दृष्टेः त्रैविध्यमित्यत्र अमेति । तत्र निमीलितेति ॥ ६ ॥ दृष्टित्रयलक्ष्यं किमित्यत्र—तल्लक्ष्यमिति । नासाग्रावलोकिनतः किं दृश्यते इत्यत्र—तदेति । एवं तदभ्यासात् । तद्दृष्ट्या तदेव । सच्चिदानन्दब्रह्मातिरिक्तस्य मृग्यत्वात् सहजानन्दरूपं तदेवेत्यर्थः ॥ ७ ॥

पूर्णिमादृष्टेः शाम्भवीपर्यवसानम्

एवं सहजानन्दे यदा मनो लीयते तदा शांभवी भवति ।
तामेव खेचरीमाहुः ॥ ८ ॥

तत्र मनोलय एव शाम्भवीत्याह—एवमिति । पर्यवसाने शाम्भवी-खेचर्योः एकलक्ष्यसमाप्तत्वात् ॥ ८ ॥

मुद्रासिद्धिः तच्चिह्नानि च

तदभ्यासान्मनःस्थैर्यम् । ततो [1]बुद्धिस्थैर्यम् ॥ ९ ॥ तच्चिह्नानि । आदौ तारकवद्दृश्यते । ततो वज्रदर्पणम् । [2]ततः परिपूर्णचन्द्रमण्डलम् । [3]ततो रत्नप्रभामण्डलम् । ततो मध्याह्नार्कमण्डलम् । ततो वह्निशिखामण्डलं क्रमाद्दृश्यते ॥ १० ॥

मुद्राऽभ्यासेन किं स्यादित्यत आह—तदिति ॥ ९ ॥ तच्चिह्नानि तत्सिद्धिचिह्नानि । कानीत्यत आह—आदाविति । तारकवत् नक्षत्रवत् । परिष्कृतवज्रवत् दर्पणवच्चेत्यर्थः । तथा च श्रुतिः—

नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनाम् ।
एतानि रूपाणि पुरस्सराणि ब्रह्मण्यभिव्यक्तिकराणि योगे ॥ इति ॥ १० ॥

इति प्रथमः खण्डः

[1] वायुस्थै—अ, अ १, अ २, क. [2] ततउपरि—क. ततःपू—अ, अ १.
[3] ततो नवर—क, अ २.

प्रणवस्वरूपप्रत्यक्प्रकाशानुभवः, तच्चिह्नानि च

तदा पश्चिमाभिमुखप्रकाशः स्फटिकधूम्रबिन्दुनादकला-नक्षत्रखद्योतदीपनेत्रसुवर्णनवरत्नादिप्रभा दृश्यन्ते । तदेव [1]प्रणवरूपम् ॥ १ ॥

यदैवं चिह्नानि दृष्टानि तदा प्रत्यक्प्रकाशानुभवो भवति । ततः कानि चिह्नानि दृश्यन्ते इत्यत्र—स्फटिकेति । दृश्यन्ते प्रणवानुसन्धानं कुर्वतः । बिन्दुशब्देन मनस्तत्त्वं, नादशब्देन बुद्धितत्त्वं, कलाशब्देन महत्तत्त्वं, शिष्टं स्पष्टम् । यदेतदेवं दृष्टं तत् सर्वं प्रणवरूपमित्याह—तदिति ॥ १ ॥

षण्मुख्या प्रणवाधिगमः

प्राणापानयोरैक्यं कृत्वा धृत[2]कुम्भको नासाग्रदर्शनदृढभावनया द्विकराङ्गुलिभिः षण्मुखीकरणेन [3]प्रणवादिध्वनिं निशाम्य मनस्तत्र लीनं भवति ॥ २ ॥

षण्मुख्युपायपूर्वकं मनस्तत्कार्यलयाधिकरणं प्रणवार्थं ब्रह्मेत्याह—प्राणेति । हठयोगरीत्या प्राणेति । धृतकुम्भको योगी । तत्र नादावसाने ब्रह्मणि ॥ २ ॥

प्रणवविदः कर्मलेपाभावः

तस्य न कर्मलेपः । रवेरुदयास्तमययोः किल कर्म कर्तव्यम् । एवं [4]विदश्चिदादित्यस्योदयास्तमयाभावात्सर्वकर्माभावः ॥ ३ ॥

[1] प्रणवस्वरूपं—क, अ २.
[2] कुम्भके—अ २.
[3] प्रणवध्व—क, अ २.
[4] विदिचि—अ.

यस्य मनो ब्रह्मणि लीयते तस्य न कर्मलेपः, योगिनो निर्लिप्तत्वात्। कर्तव्यकर्मसु सत्सु कथं तत्र निर्लेपतेत्याशङ्क्य कर्मणामादित्योदयास्तमयनिमित्तत्वेन योग्यात्मादित्यस्योदयास्तमयाभावात्तन्निमित्तकर्माभावतो निर्लिप्तोऽयमित्युक्तिरपि गौणीत्याह—रवेरिति।

कर्मणा बध्यते जन्तुः विद्ययाऽमृतमश्नुते।
तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः॥

इति श्रुतेः॥ ३॥

उन्मन्यवस्थाद्वारा अमनस्कसिद्धिः

शब्दकाललयेन दिवारात्र्यतीतो भूत्वा सर्वपरिपूर्णज्ञानेनोन्मन्यवस्थावशेन ब्रह्मैक्यं भवति। उन्मन्या अमनस्कं भवति॥ ४॥

एवं प्रणवनादलयतः किं स्यादित्यत्र सर्वकलनाविरलब्रह्मैक्यं भवतीत्याह—शब्देति। अभिधानाभिधेयात्मकशब्दकाललयेन—शब्दः अभिधानप्रपञ्चः, अभिधेयकलनात्मकः कालः, तयोः श्रावणज्ञानतो मिथ्यादृष्ट्या सत्ताबाध एव लयः। ततो विज्ञानं जायते। तेन ब्रह्मातिरेकेण दिवारात्र्युपलक्षितावस्थात्रयं नास्तीति निश्चयज्ञानतः तदतीतो भूत्वा ततो ब्रह्मातिरिक्तसामान्यासम्भवपरिपूर्णसम्यज्ज्ञानेन उन्मन्यवस्था जायते। उन्मनी नाम तत्त्वज्ञानम्। तेन सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति ब्रह्मैक्यं भवति। न हि पृथग्भावं गतजीवेशयोरेकत्वमित्यर्थः। उन्मन्या किं जायते इत्यत आह—उन्मन्येति। "अमनस्कं स्वरूपं तन्न तत्र कलनामलं" इति श्रुत्या ब्रह्मैव अमनस्कशब्दार्थः॥ ४॥

अमनस्कपूजाप्रकारः

तस्य निश्चिन्ता ध्यानम्। सर्वकर्मनिराकरणमावाहनम्। निश्चयज्ञानमासनम्। उन्मनीभावः पाद्यम्। सदाऽमनस्कमर्घ्यम्।

सदा दीप्ति[1]रपारामृतवृत्तिः स्नानम्। [2]सर्वत्र भावना गन्धः। दृक्स्वरूपावस्थानमक्षताः। चिदाप्तिः पुष्पम्। चिदग्निस्वरूपंc धूपः। चिदादित्यस्वरूपं दीपः। परिपूर्णचन्द्रामृतस्यैकीकरणं नैवेद्यम्। निश्चलत्वं प्रदक्षिणम्। सोऽहंभावो नमस्कारः। मौनं स्तुतिः। सर्वसंतोषो विसर्जनमिति। य एवं वेद ॥ ९ ॥

यदमनस्कं ब्रह्म तस्य ध्यानाद्युपचारः कथमित्याशङ्क्य "सोऽहंभावेन पूजयेत्" इति श्रुत्यनुरोधेन तदस्मीत्यनुसन्धानमेव तत्पूजेत्याह—तस्येति। दीप्तिमद्ब्रह्मगोचराखण्डाकारवृत्तिरेव स्नानमित्यर्थः। सर्वत्र ब्रह्मेति भावना। भ्रूमध्यसहस्रारान्तरगळविलसत्परिपूर्णचन्द्रमण्डलनिस्सृतामृतस्य एकीकरणं अमृतसागररूपं नैवेद्यम्। सर्वदा संतोषः। सोऽयमेवं ब्रह्मानुसन्धानतो ब्रह्मैव भवतीत्यर्थः ॥ ९ ॥

इति द्वितीयः खण्डः

---

ब्रह्मानुसन्धानेन कैवल्यप्राप्तिः

एवं त्रिपुट्यां निरस्तायां निस्तरङ्गसमुद्रवन्निवातस्थितदीपवदचलसंपूर्णभावाभावविहीनकैवल्यज्योतिर्भवति ॥ १ ॥

ब्रह्मानुसन्धानस्य त्रिपुटीकबळितत्वेन कथं योगी ब्रह्मभावमेतीत्याशङ्क्य सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्यनुसन्धानात्मकसम्यज्ज्ञानस्य ध्यात्रादित्रिपुटीग्रासत्वात् ब्रह्मभावापत्तिरिष्यते इत्याह—एवमिति। स्वातिरिक्तमस्ति नास्तीति भावाभावकलनासम्भवप्रबोधसिद्धं कैवल्यज्योतिः स्वमात्रमवशिष्यते विद्वानित्यर्थः ॥ १ ॥

[1] स्वारा—अ. [2] सर्वात्म—अ, अ १.

ब्रह्मवित्स्वरूपम्

•जाग्रन्निद्राऽन्तपरिज्ञानेन ब्रह्मविद्भवति ॥ २ ॥

तस्य ब्रह्मत्वं विना ब्रह्मवित्त्वं कुत इत्यत्र कृत्स्नब्रह्मवेदनतः ब्रह्मत्वं सिद्धमेव । अकृत्स्नब्रह्मज्ञानतो ब्रह्मवित्त्वं स्यादित्याह—जाग्रदिति ॥ २ ॥

सुषुप्तिसमाध्योः भेदः

सुषुप्तिसमाध्योर्मनोलयाविशेषेऽपि महदन्तर्भेदस्तमसि लीनत्वान्मुक्तिहेतुत्वाभावाच्च ॥ ३ ॥ समाधौ मृदितमोविकारस्य तदाकाराकारिताखण्डाकारवृत्त्यात्मकसाक्षिचैतन्ये प्रपञ्चलयः संपद्यते प्रपञ्चस्य मनःकल्पितत्वात् ॥ ४ ॥

सुषुप्तिसमाध्योः मनोलयसाम्यतः बन्धमुक्तिहेतुत्वं उभयमपि स्यादित्यत आह—सुषुप्तीति । तत् कथं? तमसीति ॥ ३ ॥ तत् कथं? प्रपञ्चस्येति ॥ ४ ॥

ब्रह्मविदो ब्रह्मभावः

ततो भेदाभावात् कदाचिद्बहिर्गतेऽपि मिथ्यात्व[1]भानात् । सकृद्विभातसदानन्दानुभवैकगोचरो ब्रह्मवि[2]त्तदेव भवति ॥ ५ ॥

मनस्तत्कार्याभावे तत्तदनुस्यूतचैतन्यस्य यत एकत्वं ततः बहिर्गतेऽपि मनसि तद्विकल्पितप्रपञ्चस्य मिथ्यात्वभानात् । सर्वप्रकारेण ब्रह्मवित् ब्रह्मैव भवतीत्याह—सकृदिति । सदाद्यावृतित्रयानावृतसकृदित्यादि ॥ ५ ॥

[1] हानात्—अ. [2] त्तदैव—अ.

सङ्कल्पत्यागपूर्वकपरमात्मध्यानेन मुक्तिसिद्धिः

यस्य संकल्पनाशः स्यात्तस्य मुक्तिः करे स्थिता । तस्माद्भावा[1]भावौ परित्यज्य परमात्मध्यानेन मुक्तो भवति ॥ ६ ॥ पुनःपुनः सर्वावस्थासु ज्ञानज्ञेयौ ध्यानध्येयौ लक्ष्यालक्ष्ये दृश्यादृश्ये चोहापोहादि परित्यज्य जीवन्मुक्तो [2]भवति । य एवं वेद ॥ ७ ॥

सङ्कल्पभावाभावौ बन्धमुक्तिहेतू स्यातामित्याह—यस्येति । यस्मादेवं तस्मात् । सङ्कल्पोऽस्ति नास्तीति तद्भावाभावौ । निष्प्रतियोगिकपरमात्मा स्वमात्रमिति ज्ञानाविर्भूतपरमात्मध्यानेन ॥ ६ ॥ इत्थंभूतज्ञानफलमाह—पुनरिति । स्वावशेषधिया ब्रह्मणि ज्ञातेऽपि स्वातिरिक्तधिया यदि ज्ञानज्ञेयादिवृत्तिरुदेति तदा पुनःपुनरिति । तत्त्यागाधिकरणं ब्रह्मास्मीति य एवं वेद स विद्वान् जीवन्मुक्तो भवेदित्यर्थः ॥ ७ ॥

इति तृतीयः खण्डः

जाग्रदादिपञ्चावस्थाः

पञ्चावस्थाः जाग्रत्स्वप्नसुषुप्तितुरीयतुरीयातीताः ॥ १ ॥

बन्धमोक्षहेतुः कः? इत्यत आह—पञ्चेति । कास्ता इति?—जाग्रदिति । पञ्चावस्था इत्यर्थः ॥ १ ॥

प्रवृत्तिसङ्कल्पः

जाग्रति प्रवृत्तो जीवः प्रवृत्तिमार्गासक्तः पापफलनरकादिमाऽस्तु शुभकर्मस्वर्गफलमस्त्विति काङ्क्षते ॥ २ ॥

[1] भावं—उ. भावे—क. [2] भवेत्—अ २.

तत्र जीवप्रवृत्तिनिवृत्तिसङ्कल्पौ प्रतिपादयति—जाग्रतीति । शुभकर्मज-स्वर्गफलम् । एवं कांक्षन् स्वाज्ञः संसारबद्धो भवति ॥ २ ॥

निवृत्तिसङ्कल्पः

एवं स एव स्वीकृतवैराग्यात्कर्मफलजन्मालं संसारबन्धनमल-मिति विमुक्त्यभिमुखनिवृत्तिमार्गप्रवृत्तो भवति ॥ ३ ॥

एवं स्थितेष्वनेकेषु कश्चिदनन्तकोटिजन्मस्वनुष्ठितकर्मफलार्पणसन्तुष्ट-श्वरप्रसादतः निवृत्तिमार्गप्रवृत्तो भवतीत्याह—एवमिति । य एवंविधसंसार-निर्विण्णो भवति सः । इतः कर्मफलजन्म ॥ ३ ॥

ससारतरणमागः

स एव संसारतारणाय गुरुमाश्रित्य कामादि त्यक्त्वा विहितकर्माचरन् साधनचतुष्टयसंपन्नो हृदयकमलमध्ये भगवत्सत्ता-मात्रान्तर्लक्ष्यरूपमासाद्य सुषुप्त्यवस्थायामुक्तब्रह्मानन्दस्मृतिं लब्ध्वा एक एवाहमद्वितीयः कंचित्कालमज्ञानवृत्त्या विस्मृतजाग्द्वास-नाऽनुफलेन तैजसोऽस्मीति तदुभयनिवृत्त्या प्राज्ञ इदानीम-स्म्यहमेक एव स्थानभेदादवस्थाभेदस्य परं तु न हि मदन्यदिति [1]जातिविवेकः शुद्धाद्वैतब्रह्माहमिति भिदागन्धं निरस्य स्वान्तर्वि-जृम्भितभानुमण्डलध्यानतदाकाराकारित[2]परंब्रह्माकारितमुक्ति[3]मार्गमा-रूढः परिपक्वो भवति ॥ ४ ॥

[1] जातवि—अ १. [2] परब्रह्माकारमु—अ, अ १. परब्रह्माका—क.
[3] मार्गारू—उ.

कामादि परागभावप्रवृत्तिं त्यक्त्वा । पुरा स्वाज्ञदशायां कंचित् कालम् । तैजसोऽस्मीति विश्वभावग्रासतैजसभावमेत्य तद्भोगक्षयतो यत् जाग्रत्स्वप्नकलनान्वितं तदुभयेति । जाग्रदादिस्थानभेदात् अवस्थाभेदस्य स्वाज्ञानविकल्पितस्य स्वज्ञानतः प्रळयात् यदवशिष्यते तत् परं तु ब्रह्म न हि मदन्यदिति जातिविवेकः—ब्रह्मातिरेकेण जायते इति जातिः जन्मादि न कदाऽपि मेऽस्तीति विवेकः --उदेति । ततः किमित्यत आह—शुद्धेति । ब्रह्माहमिति विज्ञानेन व्यावहारिकभिदागन्धम् । यदा विज्ञानेन भिदागन्धनिरासो भवति तदा स्वान्तःप्रत्यग्भानुमण्डलसाक्षात्कारो भवति । तद्ध्यानाभ्यासतः ब्रह्माकाराकारितो यो मुक्तिमार्गः सम्यज्ज्ञानाख्यः तमवष्टभ्य परिपक्वः कृतकृत्यो भवतीत्यर्थः ॥ ४ ॥

मनसो बन्धमोक्षहेतुत्वनिरूपणम्

संकल्पादिकं मनो बन्धहेतुः । तद्वियुक्तं मनो मोक्षाय भवति ॥ ५ ॥ तद्वांश्चक्षुरादिबाह्यप्रपञ्चोपरतो विगतप्रपञ्चगन्धः सर्वं जगदात्मत्वेन पश्यंस्त्यक्ताहंकारो ब्रह्माहमस्मीति चिन्तयन्निदं सर्वं यदयमात्मेति भावयन् कृतकृत्यो भवति ॥ ६ ॥

स्वाज्ञादिदशाविजृम्भितबन्धमोक्षहेतुः मन एवेत्याह—सङ्कल्पादिकमिति ॥ ५ ॥ एवं निस्सङ्कल्पान्तगे योगी स्वातिरिक्तास्तित्वभ्रमविरळो भूत्वा ब्रह्ममात्रं निष्प्रतियोगिकमिति वेदनसमकालं कृतकृत्यो योगी भवतीत्याह—तद्वानिति । निर्विकल्पकवृत्तिमान् ज्ञानी तद्वान् । "ब्रह्मैवेदं सर्वं" इति श्रुत्यनुरोधेन सर्वं भावयन् ज्ञानसहितभावनातः ॥ ६ ॥

इति चतुर्थः खण्डः

निर्विकल्पकसमाध्यभ्यासेन ब्रह्मविद्वरत्वप्राप्तिः

सर्वपरिपूर्णतुरीयातीतब्रह्म[1]भूतो योगी भवति । वं ब्रह्मेति स्तुवन्ति ॥ १ ॥ सर्वलोकस्तुति[2]पात्रं [3]सर्वलोकसंचारशीलः परमात्मगगने बिन्दुं निक्षिप्य शुद्धाद्वैताजाड्यसहजामनस्कयोगनिद्राऽखण्डानन्दपदानुवृत्त्या जीवन्मुक्तो भवति ॥ २ ॥

ब्रह्मभूतः भूत्वा ब्रह्ममात्रयोगी । ब्रह्मविदो य एवं विद्वान् तम् ॥ १ ॥ उक्तविशेषणविशिष्टो योगी परमात्मगगने बिन्दुं निक्षिप्य चिदाकाशे मनोविलयं कृत्वा तद्विलयाधिकरणशुद्धाद्वैतेति । मनोलयाधारशुद्धाद्वैते ब्रह्मणि जाड्यजाग्रदाद्यवस्थावैगळयात् अजाड्यसहजामनस्कयोगनिद्रा निर्विकल्पसमाधिः तत्राखण्डानन्दतया पद्यत इत्यखण्डानन्दपदं तदनुवृत्त्या अनवरतानुसन्धानात् ब्रह्मविद्वरो भवतीत्यर्थः ॥ २ ॥

अपरिच्छिन्नानन्दरूपब्रह्मावाप्तिः

तच्चानन्दसमुद्रमग्ना योगिनो भवन्ति ॥ ३ ॥ तदपेक्षया इन्द्रादयः स्वल्पानन्दाः । एवं प्राप्तानन्दः परमयोगी भवतीत्युपनिषत् ॥ ४ ॥

यद्ब्रह्म निस्तरंगानन्दसमुद्रतया विख्यातं तच्च ॥ ३ ॥ इन्द्रादिरस्मीत्यभिमानात् परिच्छिन्नानन्दत्वं, तद्विपरीत्येन अपरिच्छिन्नब्रह्मभावारूढतया एवम् ॥४॥

इति पञ्चमः खण्डः

इति द्वितीयं ब्राह्मणम्

[1] भूतयो—क, अ २. [2] पात्रः—अ, अ १, अ २, क.
[3] सर्वदेश—अ, अ १, अ २, क.

# तृतीयं ब्राह्मणम्

शाम्भवीमुद्राऽन्वितं अमनस्कम्

याज्ञवल्क्यो महामुनिर्मण्डलपुरुषं पप्रच्छ स्वामिन्नमनस्कलक्षणमुक्तमपि विस्मृतं पुनस्तल्लक्षणं ब्रूहीति ॥ १ ॥ तथेति मण्डलपुरुषोऽब्रवीत् । इदममन[1]स्कमतिरहस्यम् । यज्ज्ञानेन कृतार्थो भवति तन्नित्यं शांभवीमुद्राऽन्वितम् ॥ २ ॥

याज्ञवल्क्यो मन्दबुद्धिर्वैशद्यार्थं अमनस्कलक्षणमादित्यं पृच्छतीत्याह—**याज्ञवल्क्य** इति । किमिति? **स्वामिन्निति** ॥ १ ॥ तत्प्रश्नमंगीकृत्य तदुत्तरं भगवानाह—**तथेति** । किं तदित्यत्र वक्ष्यमाणविद्यां स्तौति—**इदमिति** । मनो यत्र विलीयते अमनीभावमेति **इदम्** । योगी **यज्ज्ञानेन** ॥ २ ॥

परमात्मप्रत्ययलक्ष्यदर्शनेन अमनस्कप्राप्तिः

परमात्मदृष्ट्या तत्प्रत्ययलक्ष्याणि दृष्ट्वा तदनु सर्वेशमप्रमेयमजं शिवं पराकाशं निरालम्बमद्वयं ब्रह्मविष्णुरुद्रादीनामेकलक्ष्यं सर्वकारणं परं ब्रह्मात्मन्येव पश्यमानो गुहाविहरणमेवं निश्चयेन ज्ञात्वा भावाभावादिद्वन्द्वातीतः संविदितमनोन्मन्य[2]नुभवस्तदनन्तरमखिलेन्द्रियक्षयवशादमनस्कसुखब्रह्मानन्दसमुद्रे मनःप्रवाहयोगरूपनिवातस्थितदीपवदचलं परं ब्रह्म प्राप्नोति ॥ ३ ॥

शाम्भवीमुद्रोपायसिद्धं तुर्यचैतन्यं **परमात्मदृष्ट्या** । **ब्रह्मविष्णुरुद्रादीनामिति** तृतीयार्थे षष्ठी, तैः सर्वात्मैक्यधिया लक्षितत्वात् ।

[1] स्कलक्षणमति—अ. [2] न्यवस्थस्त—अ.

गुहाशब्देन बुद्धिगुहोच्यते । तत्र तद्वृत्तिभासकप्रत्यग्रूपेण विहरणात् गुहाविहरणं मनो यत्र उन्मनीभावं निस्सङ्कल्पतामेति तादृशं ब्रह्मास्मीत्यनुभवो मनोन्मन्यनुभवः । शिष्टं स्पष्टं तत्र तत्र व्याख्यातं च ॥ ३ ॥

ततः संसारनिवृत्तिः

ततः शुष्कवृक्षवन्मूर्च्छानिद्रामयनिश्वासोच्छ्वासाभावान्नष्ट-द्वन्द्वः सदाऽचञ्चलगात्रः परमशान्तिं स्वीकृत्य मनः प्रचारशून्यं परमात्मनि लीनं भवति ॥ ४ ॥

योगी स्वात्मानं एवं ज्ञात्वा परब्रह्म प्राप्नोतीत्युक्तम् । ततः परं योगी पूर्ववत् किं संसरतीत्याशङ्क्य संसारकलनानिर्वाहकमानसाभावात् ब्रह्मैव भवतीत्याह—तत इति । प्राणान्तःकरणसरूपविलयो मूर्च्छा निद्राऽवस्थेत्यर्थः । तन्मयः तद्विकारः मूर्च्छास्वापयोरिव निश्वासोच्छ्वासकामसङ्कल्पादिव्यापृत्यभावात् नष्टद्वन्द्वः । बाह्यान्तर्व्यापारोपरमात् परमशान्तिं स्वीकृत्य ब्रह्मभूतो विजयते दीर्घनिर्विकल्पकसमाधिपरवशो भवति । तदा तत् मनः । शून्यं सत् ॥ ४ ॥

तारकमार्गेण करणविलयद्वारा मनोनाशः

पयःस्रावानन्तरं धेनुस्तनक्षीरमिव सर्वेन्द्रियवर्गे परिनष्टे मनोनाशं भवति तदेवामनस्कम् ॥ ५ ॥ तदनु नित्यशुद्धः परमात्माऽहमेवेति तत्त्वमसीत्युपदेशेन त्वमेवाहमहमेव त्वमिति तारकयोगमार्गेणाखण्डानन्दपूर्णः कृतार्थो भवति ॥ ६ ॥

समाधिस्थयोगिनः इन्द्रियग्रामे सति कथं मनोनाश उपपद्यते इत्यत आह—पय इति । भवति इति यत् तदेव ॥ ५ ॥ यदि कदाचित्

विरूपलयमप्राप्य सरूपलयमेत्य तन्मनो बहिः निस्सरति तदा तदनु । तारकयोगमार्गेण योगी करणग्रामविरूपविलयमेव भजति । ततो योगी अखण्डेति । ब्रह्मैव भवतीत्यर्थः ॥ ६ ॥

इति प्रथमः खण्डः

---

उन्मनीप्राप्त्या योगिनो ब्रह्मात्मभवनम्

परिपूर्ण[1]परमाकाशमग्नमनाः प्राप्तोन्मन्यवस्थः संन्यस्तसर्वेन्द्रियवर्गः अनेकजन्मार्जितपुण्यपुञ्जपक्वकैवल्यफलोऽखण्डानन्दनिरस्तसर्वक्लेशकश्मलो ब्रह्माहमस्मीति कृतकृत्यो भवति ॥ १ ॥

त्वमेवाहं न भेदोऽस्ति पूर्णत्वात्परमात्मनः ।
इत्युच्चरन्त्समालिङ्ग्य शिष्यं ज्ञप्तिमनीनयत् ॥ २ ॥

कथं पुनः योगी कृतार्थो भवतीत्यत आह—**परिपूर्णेति** । **प्राप्तोन्मन्यवस्थः** संप्राप्तदीर्घनिर्विकल्पकावस्थः ॥ १ ॥ ब्राह्मणोक्तार्थं मन्त्रोऽपि अनुवदति—**त्वमेवेति** । मण्डलपुरुषो याज्ञवल्क्यं प्रति हे याज्ञवल्क्य परमात्मनो मम पूर्णरूपत्वात् **त्वमेवाहं** नावयोः **भेदोऽस्ति इत्युच्चरन्** स्वशिष्यं याज्ञवल्क्यं गाढं **समालिङ्ग्य** स्वीयां **ज्ञप्तिं** ब्रह्मैव अस्मीति **प्रज्ञामनीनयत्** ॥ २ ॥

इति द्वितीयः खण्डः

**इति तृतीयं ब्राह्मणम्**

---

[1] पराका—अ १, क.

# चतुर्थं ब्राह्मणम्

व्योमपञ्चकज्ञानं तत्फलं च

अथ ह याज्ञवल्क्यो मण्डलपुरुषं पप्रच्छ व्योमपञ्चकलक्षणं विस्तरेणानुब्रूहीति ॥ १ ॥ स होवाचाकाशं पराकाशं महाकाशं सूर्याकाशं परमाकाशमिति पञ्च भवन्ति ॥ २ ॥ सबाह्याभ्यन्तरमन्धकारमयमाकाशम् । सबाह्याभ्यन्तरे कालानलसदृशं पराकाशम् । सबाह्याभ्यन्तरेऽपरिमितद्युतिनिभं तत्त्वं महाकाशम् । सबाह्याभ्यन्तरे सूर्यनिभं सूर्याकाशम् । अनिर्वचनीयज्योतिः सर्वव्यापकं निरतिशयानन्दलक्षणं परमाकाशम् ॥ ३ ॥ एवमन्तर्लक्ष्यदर्शना[1]त्तद्रूपो भवति ॥ ४ ॥

पुनः याज्ञवल्क्यो मन्दबुद्ध्यनुकम्पया व्योमपञ्चकलक्षणं पृच्छतीत्याह—अथेति । किमिति? व्योमेति ॥ १ ॥ स होवाच किं तदिति—आकाशमित्यादि ॥ २ ॥ तत्र आकाशं कीदृशमित्यत्र जडभूतिरित्याह—सबाह्येति । पराकाशं किमित्यत्र जडभूतिग्रासमोहभूतिरित्याह—सबाह्येति । मोहभूतेः कृत्स्नजडभूतिव्यापकत्वेन तत्परतया च काशमानत्वात् पराकाशत्वम् । महाकाशं किमित्यत्र जडमोहभूतिग्रासलीलाभूतिरित्याह—सबाह्येति । लीलाभूतेः जडमोहभूतिभ्यां व्यापकत्वेन तदपेक्षया अपरिमितद्युतिनिभतत्त्वरूपेण काशमानत्वात् । सूर्याकाशं किमित्यत्र जडादिभूतित्रयग्रासनित्यभूतिरित्याह—सबाह्येति । नित्यविभूतेः लीलादिभूतित्रयव्यापकत्वेन सर्वावभासकसूर्यवत् काशमानत्वात् । परमाकाशस्वरूपं किमित्यत्र नित्यभूत्यादिव्यापकत्वेन अनिर्वचनीयेति । त्रिपाद्भूतेः नित्यादिभूतिचतुष्टयगतहेयांशापह्नवसिद्धत्वात्

[1] एवं तत्तल्लक्ष्यदर्शनात् तत्तद्रूपो—अ १, अ २, क. एवमन्तर्लक्ष्यमर्दनात्त—उ.

निरतिशयादिविशेषणता उपपद्यते इत्यर्थः ॥ ३ ॥ व्योमपञ्चकात्मकभूतिपञ्चक-ज्ञानफलमाह—एवमिति ॥ ४ ॥

राजयोगसर्वस्वक्रोडीकरणम्

नवचक्रं षडाधारं त्रिलक्ष्यं व्योमपञ्चकम् ।
सम्यगेतन्न जानाति स योगी नामतो भवेत् ॥ ५ ॥

राजयोगसर्वस्वं क्रोडीकृत्योपसंहरति—नवचक्रमिति । मूलाधारादि-षट्चक्रं ताल्वाकाशभ्रूचक्रभेदात् चक्रत्रयं आहृत्य **नवचक्रम्** । लक्ष्यत्रयं व्योमपञ्चकं च व्याख्यातम् । **सम्यगेतत्** सर्वं यो **न जानाति** तद्याथात्म्याज्ञानात् केवलग्रन्थार्थज्ञानमात्रतो **नाममात्रयोगी** भवति । यस्तु यथावत् जानाति स योगी कृतकृत्यो भवतीत्यर्थः ॥ ५ ॥

इति चतुर्थं ब्राह्मणम्

---

## पञ्चमं ब्राह्मणम्

परमात्मनि मनोलयाभ्यासविधिः

सविषयं मनो बन्धाय निर्विषयं मुक्तये भवति ॥ १ ॥ अतः [1]सर्वं चित्तगोचरम् । तदेव चित्तं निराश्रयं [2]मनोन्मन्यवस्थापरिपक्वं लययोग्यं भवति ॥ २ ॥ तल्लयं परिपूर्णे मयि समभ्यसेत् । मनोलयकारणमहमेव ॥ ३ ॥

[1] सर्वं जगच्चित्त—अ, अ १, अ २, क. [2] उन्म—उ.

अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः ।
ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः ॥ ४ ॥
यन्मनस्त्रिजगत्सृष्टिस्थितिव्यसनकर्मकृत् ।
तन्मनो विलयं याति तद्विष्णोः परमं पदम् ॥ ५ ॥

बन्धमोक्षहेतुः किमित्याशङ्क्य विषयसंगासंगमन एवेत्याह—**सविषयमिति** ॥ १ ॥ यतः एवं **अतः** । **यच्चित्तं** योगाभ्यासतः शुद्धं भवति **तदेव निराश्रयं** विषयसंबन्धविगळम् ॥ २ ॥ लयाधिकरणं किमित्यत्र **तल्लयमिति** ॥ ३ ॥ यत् सर्वलयास्पदं आधेयसापेक्षाधाराग्गतविशेषापाये तदेव निर्विशेषपरमपदमित्याह—**अनाहतस्येति** । अनाहतभवनादान्तर्गतप्रत्यग्ज्योतिर्विकल्पितं स्वातिरिक्तसृष्टि-स्थितिनाशनिर्वर्तकं मनो यत्र विलीयते तत् लयाधिकरणं परमार्थदृष्ट्या निरधिकरणवैष्णवपदरूपेण अवशिष्यते इत्यर्थः ॥ ४–५ ॥

अमनस्काभ्यासेन ब्रह्मावस्थानसिद्धिः

तल्लयाच्छुद्धाद्वैतसिद्धिर्भेदाभावात् । एतदेव परमतत्त्वम् ॥ ६ ॥ [1]स तज्ज्ञो बालोन्मत्तपिशाचवज्जडवृत्त्या लोकमाचरेत् ॥ ७ ॥ एवममनस्काभ्यासेनैव नित्यतृप्तिरल्पमूत्रपुरीषमितभोजनदृढाङ्गाजाड्यनिद्रादृग्वायुचलनाभावब्रह्मदर्श[2]नाज्ञातसुखस्वरूपसिद्धिर्भवति ॥ ८ ॥

यन्मनो द्वैतहेतुः **तल्लयात्** । तदा प्रत्यक्परयोः **भेदाभावात्** । यत् त्वया परमतत्त्वमनुब्रूहीति पृष्टं **एतदेव** ॥ ६ ॥ मदुक्तप्रकारेण य एवं परमतत्त्वं जानाति **स तज्ज्ञः** । **आचरेत्** स्वमाहात्म्यख्यापनप्रयोजनाभावात् ॥ ७ ॥

[1] "स" इत्येतन्न—अ, अ १.  [2] नाज्ञा—अ, अ २, क.

एवममनस्काभ्यासतः का सिद्धिरुदेतीत्यत आह—एवमिति । यदा योगी निर्विकल्पकसमाध्यारूढो भवति तदा अतृप्तिहेतुवृत्त्यनुदयात् नित्यतृप्तिः, समाधितो व्युत्थानेऽपि केवलकुम्भकतो मूत्रपुरीषादेः शोषितत्वात् मूत्रादेरल्पत्वं, उदरे निरवकाशतोऽल्पभोजनं, तथाऽपि योगमहिम्ना दृढाङ्गत्वं, पदे पदे जाड्यनिद्राऽभावाद्जाडयनिद्रो निर्विकल्पकसमाधिः । तत्र दृग्वायुचलनाभावतो निश्चलब्रह्मादर्शनसञ्जातं अवाङ्मानसगोचरतया अज्ञातसुखस्वरूपब्रह्ममात्रावस्थानरूपिणी सिद्धिः भवति । विद्वान् तद्रूपेण अवशिष्यते इत्यर्थः ॥ ८ ॥

अमनस्कसिद्धस्य महिमा

एवं चिरसमाधिजनितब्रह्मामृतपानपरायणोऽसौ संन्यासी परमहंस अवधूतो भवति । तद्दर्शनेन सकलं जगत्पवित्रं भवति । तत्सेवापरोऽज्ञोऽपि मुक्तो भवति । तत्कुलमेकोत्तरशतं तारयति । तन्मातृपितृजायाऽपत्यवर्गं च मुक्तं भवतीत्युपनिषत् ॥ ९ ॥

यः एवंवित् स एव मुख्यावधूतः, तद्दृष्टिपथं गतं अखिलं अखिलतामेति, तत्सेवया अज्ञोऽपि मुच्यते, तत्कुलमपि कृतार्थत्वं भजतीति शास्त्रमुपसंहरति—एवमिति । इत्युपनिच्छब्दः प्रकृतोपनिषत्समाप्त्यर्थः ॥ ९ ॥

इति पञ्चमं ब्राह्मणम्

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
मण्डलब्राह्मणव्याख्या लिखिता ब्रह्मगोचरा ।
मण्डलब्राह्मणव्याख्याग्रन्थस्तु त्रिशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टचत्वारिंशत्संख्यापूरकं मण्डलब्राह्मणोपनिषद्विवरणं सम्पूर्णम्

# महावाक्योपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

अपरोक्षानुभवोपदंशाधिकारी

अथ होवाच भगवान्ब्रह्माऽपरोक्षानुभवपरोपनिषदं व्याख्यास्यामः ॥ १ ॥ गुह्याद्गुह्य[1]तरमेषा न प्राकृतायोपदेष्टव्या । सात्त्विकायान्तर्मुखाय परिशुश्रूषवे ॥ २ ॥

यन्महावाक्यसिद्धान्तमहाविद्याकळेबरम् ।
विकळेबरकैवल्यरामचन्द्रपदं भजे ॥

इह खलु अथर्वणवेदप्रविभक्तेयं महावाक्योपनिषत् स्वातिरिक्तप्रपञ्चतदसम्भवप्रबोधसिद्धब्रह्ममात्रप्रपञ्चनपूर्वकं विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । उत्तमाधिकारिपुरुषानुपलभ्य ब्रह्मा स्वानुभवं प्रकटयतीत्याह—अथेति । किमिति? अपरोक्षेति ॥ १ ॥ आदौ वक्ष्यमाणोपनिषदो गृह्यार्थतया गोप्यतामाह—गुह्यादिति । प्राकृताय यथोक्तसाधनविकलाय । कस्मा उपदेष्टव्येत्यत्र सात्त्विकायेति । केवलसत्त्ववृत्तिमत्प्रत्यङ्मुखाय स्वाचार्यशुश्रूषाऽऽदिसाधनसम्पन्नाय उपदेष्टव्येत्यर्थः ॥ २ ॥

[1] तरेषा—अ.

विद्याऽविद्ययोः स्वरूपं कार्यं च

**अथ संसृतिबन्धमोक्षयोर्विद्याऽविद्ये चक्षुषी उपसंहृत्य विज्ञायाविद्या[1]लोकाण्डस्तमोदृक् ॥ ३ ॥ तमो हि शारीरप्रपञ्चमाब्रह्मस्थावरान्तमनन्ताखिलाजाण्डभूतम् । निखिलनिगमोदितसकामकर्मव्यवहारो लोकः ॥ ४ ॥**

केयमुपनिषदित्यत्र तामेव विशिनष्टि--**अथेति** । **अथ** यथोक्तसाधनसम्पत्त्यनन्तरं मुमुक्षुः स्वातिरिक्तास्तितारूपेयं संसृतिः तदस्तीति प्रवृत्तिमार्गो बन्धः तन्नास्तीति निवृत्तिमार्गो मोक्षः । तयोः **संसृतिमोक्षबन्धयोः** हेतू कावित्यत्र--विद्याचक्षुः संसारनिवर्तकतया मोक्षहेतुः । अविद्याचक्षुस्तु संसारोऽस्तीति प्रवर्तकतया बन्धहेतुः । ते उभे संसारो नास्त्यस्तीति वेदनरूपे **विद्याऽविद्ये चक्षुषी** ब्रह्मातिरिक्तवस्तुसामान्यासम्भवप्रबोधतः **उपसंहृत्य** अपह्नवं कृत्वा तदपह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति **विज्ञाय** । सम्यज्ज्ञानसमकालं विद्वान् विदेहमुक्तो भवतीति वाक्यशेषः । अविद्याचक्षुः कीदृशमित्यत्राह--**अविद्येति** । ब्रह्मातिरेकेण कालत्रयेऽपि या अविद्यमाना सेयमविद्या तया सत्यवल्लोक्यते इत्यविद्यालोकः स **एवाण्डः** अण्डमविद्यापदं तदेव **तमोदृष्टिः** स्वमात्रावारकत्वात् ॥ ३ ॥ किं तत् स्वावारकं तम इत्यत आह--**तमो हीति** । **तमो हि शारीरप्रपञ्चं** प्रपञ्चः स्वज्ञानतः कालतो वा शीर्यत इति शरीरं तदेव शारीरं अविद्यापदं तत्कार्यं **आब्रह्मस्थावरान्तं**, तस्य निष्प्रतियोगिकब्रह्ममात्रावरणतया प्रपञ्चनात् प्रपञ्च इति व्यवहरणात् प्रतीतिकालमात्रस्थायिवत् [2]भानाद्वा व्यावहारिकत्वं प्रातिभासिकत्वं च ज्ञेयम् । किं तद्व्यावहारिकत्वं प्रातिभासिकत्वं च अर्हतीत्यत्र--यावत् स्वाज्ञानं तावदनन्ततया अखिलाण्डवत् अनन्तकोटिब्रह्माण्डवत् भवतीत्यनन्ताखिलाजाण्डभूतम् । स्वाज्ञलोकस्तु "वायव्यं श्वेतमालभेत भूतिकामः," "चित्रया

[1] लोकान्ध —अ २. लोकाण्डं ततोदृक्—अ. [2] भानाद्व्याव—उ १.

यजेत पशुकामः," "अपाम सोममभूता अभूम," इत्यादिनिखिलनिगमोदितसकामकर्मव्यवहारो व्यवहारवान् भवति ॥ ४ ॥

हंसविद्याऽभ्यासेन परमात्माविर्भावः

नैषोऽन्धकारोऽयमात्मा । विद्या हि काण्डान्तरादित्यो ज्योतिर्मण्डलं ग्राह्यं नापरम् ॥ ५ ॥ असावादित्यो ब्रह्मेत्यजपयोपहितं हंसः सोऽहम् । प्राणापानाभ्यां प्रतिलोमानुलोमाभ्यां समुपलभ्यैवं सा चिरं लब्ध्वा त्रिवृदात्मनि ब्रह्मण्यभिध्यायमाने सच्चिदानन्दः परमात्माऽऽविर्भवति ॥ ६ ॥

स्वात्माऽप्येवं संसरतीत्यत आह—नैषोऽन्धकारोऽयमात्मा । योऽनात्मप्रपञ्चापह्नवसिद्ध एषोऽयमात्मा नान्धकारो भवति, स्वस्य प्रत्यक्प्रकाशाभिन्नपरप्रकाशमात्रत्वात् । यावदेवं स्वात्मा नोपलभ्यते तावन्मुमुक्षुणा विद्याऽभ्यासः कर्तव्य इत्याह—विद्या हीति । स्वातिरिक्तगन्धासहं ब्रह्म निष्प्रतियोगिकस्वमात्रतया विद्यत इति ज्ञानविज्ञानसम्यज्ज्ञानतत्त्वज्ञानवृत्तिः विद्या हि काण्डान्तरादित्यः कुत्सितस्वाविद्यापदाण्डान्तर्बाह्यावभासकचिदादित्यपर्यवसन्नेति चिदादित्य इत्युक्ता । सैव चिन्मात्रज्योतिर्मण्डलं, तत्प्रभापुञ्जं निर्विशेषब्रह्ममात्रगोचरतत्त्वज्ञानमेव ग्राह्यं, तस्य चरमसाक्षात्कारहेतुत्वात् ब्रह्ममात्रपर्यवसन्नत्वाच्च । तदेव ग्राह्यं नापरमपरब्रह्मगोचरं सविशेषज्ञानं, कालविळम्बफलदत्वात् । तीव्रतममुमुक्षुणैतन्न ग्राह्यमित्यर्थः ॥ ५ ॥ तथाविधतत्त्वज्ञानप्राप्यपरमात्माविर्भावोपायतत्त्वज्ञानाधिगमहेतुज्ञानविज्ञानादिसाधनं किमित्यत आह—असाविति । "स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् ।" इत्यादिश्रुत्यनुरोधेन अस्मद्दृष्टिगोचरोऽसावादित्यो ब्रह्म, स्वगतविशेषांशापाये तस्यैव ब्रह्मत्वात् । सोऽयमसावादित्यः नाडीद्वारा प्रतिशरीरं समुपलभ्य उच्छ्वासनिश्वासव्यापारतः प्रतिलोमानुलोमाभ्यां प्राणापानाभ्यां हंसः सूर्यः सोऽहमिति सहजयाऽप्रयत्ननिष्पन्नयाऽजपयोपहितम् ।

एवमजपाऽनुसन्धाननिष्पन्नं ज्ञानं विज्ञानं सम्यज्ज्ञानं वा चिरं चिरकालसाध्यं असौ विद्वान् लब्ध्वाऽथ व्यष्टिसमष्टितदैक्यप्रपञ्चानुवृत्तविश्वविराडोत्रादिद्वितुर्या-विकल्पभेदेन त्रिवृदात्मनि ब्रह्मणि व्यष्ट्यादिविभागमूलस्वाज्ञानतत्कार्यनामरूपा-पह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रावशेषतया अभिध्यायमाने सति अथ अनृतजडदुःखासम्भवप्रबोधसिद्धसच्चिदानन्दः परमात्मा आविर्भवति स्वमात्रमवशिष्यत इत्यर्थः ॥ ६ ॥

तत्त्वज्ञानवृत्तिस्वरूपम्

सहस्रभानुमच्छुरिता पूरित[1]त्वादलीया पारावारपूर इव । [2]नैषा समाधिः । [2]नैषा योगसिद्धिः । [2]नैषा मनोलयः । ब्रह्मैक्यं तत् ॥ ७ ॥ आदित्यवर्ण तमसस्तु पारे । सर्वाणि [3]रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्यदास्ते ॥ ८ ॥ धाता पुरस्ताद्य-मुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥ ९ ॥ यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥ १० ॥

इत्थंभूतब्रह्ममात्रपर्यवसन्नतत्त्वज्ञानवृत्तिस्तु युगपदुदितसहस्रोपलक्षिता-नन्तकोटिभानुमत्प्रत्यक्प्रकाशाभिन्नपरप्रकाशात्मना छुरिता स्फुरिता । पारावारपूर इव निस्तरंगसमुद्रवत् ब्रह्ममात्ररूपेण पूरितत्वात् पूर्णत्वात् न हि लीयते इत्यलीया ब्रह्मरूपत्वात् । नह्येषा वृत्तिः समाधिः योगसिद्धिः मनोलयो वा भवितुमर्हति । किं तु प्रत्यग्ब्रह्मैक्यं तत् ॥ ७ ॥ किं तत्प्रत्यग्ब्रह्मैक्यं इत्यत आह—आदित्येति । यत् पराक्सापेक्षप्रत्यक्परचिदैक्य-

[1] स्वानिलीयः—अ. त्वानिलीयः—अ १.
[2] सैषा—अ, अ १. [3] भूतानि—क, अ २.

गतसविशेषापह्नवसिद्धं तत् स्वातिरिक्ततमसस्तु पारे विद्योतमानमुदयास्तमनकल-नाविगळचिदादित्यवर्ण चिदादित्यस्वरूपं सच्चिदानन्दरूपेण सर्वत्र पूर्णमवशिष्यते। धीरो विद्वान् स्वातिरिक्ताविद्यापदतत्कार्यगोचररूपाणि नामानि च विचित्य मिथ्येति विचिन्त्य अपह्नवं कृत्वा ब्रह्मातिरिक्तं न किञ्चिदस्तीति यदभिवदन्नास्ते तन्मात्रमवशिष्यते, "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति," "य एवं निर्बीजं वेद निर्बीज एव स भवति," इति वेदनसम-कालब्रह्मभावापत्तिश्रुतेः ॥ ८ ॥ तथा च धाता ब्रह्मा पुरस्तादेव अमुमर्थ-मुदाजहार, पूर्वाग्नेयादिचतस्रो दिशः प्रदिशश्च ब्रह्मवित्त्वेन विख्यातकीर्तिः प्रविद्वान शक्रोऽपि "प्राणोऽस्मि प्रज्ञाऽऽत्मा तं मामायुरमृतमित्युपास्स्व" इति, वेदनफलं तु "विपापो विरजो ब्रह्मविद्वान् ब्रह्मैवाभिप्रैति" इति यमर्थमुदाजहार तं परमात्मानं निष्प्रतियोगिकस्वमात्रमिति एवं विद्वान् वेदनसमकालं अमृतः परमात्मेह भवति, "ज्ञानसमकालमेव मुक्तः कैवल्यं याति" इति श्रुतेः। स्वाज्ञानप्रभवोऽयं बन्धः स्वज्ञानान्मोक्षः। अयमेवाव्याहतः पन्थाः। अयनाय मोक्षाय ब्रह्मज्ञानादृते अन्यः पन्था न विद्यते ॥ ९ ॥ एवं देवाः इन्द्रादयोऽपि ब्रह्म निष्प्रतियोगिकस्वमात्रमवशिष्यते ब्रह्मातिरिक्तं न किञ्चिदस्तीति ज्ञानयज्ञेन यज्ञं विष्ण्वाख्यं ब्रह्मायजन्त, ब्रह्माहमस्मीति भावयन्ते जीवन्मुक्ता महीयन्ते। तेषां जीवन्मुक्तपदारूढानां देवानां तानि धर्माणि प्रथमान्यासन् ते जीवन्मुक्तधर्माः अमानित्वादयः मैत्र्यादयश्च प्रथमाः प्रधाना आसन् बभूवुः। य एवं महिमानो देवा यत्र पूर्वे साध्या देवविशेषा जीवन्मुक्ताः सन्ति तन्नाकं सच(क)न्ते तं स्वर्गं प्राप्य प्रकाशन्ते ॥ १० ॥

### प्रणवहंसज्योतिर्ध्यानम्

सोऽह[1]मर्कः परं ज्योतिरर्कज्योतिरहं शिवः।
आत्मज्योतिरहं शुक्रः सर्वज्योतिरसावहोम् ॥ ११ ॥

[1] मेकः—अ.

तत्र देवाः किं कुर्वन्तो वर्तन्ते इत्यत्र प्रत्यक्परचितोरैक्यानुसन्धानं कुर्वन्तो वर्तन्ते इत्याह—**सोऽहमिति** । **यः परंज्योतिः सोऽहं चिदर्कः योऽर्कज्योतिरहं शिवः** योऽहं शिवार्कज्योतिः **अहं शुक्रः** प्रत्यगभिन्नपरमात्मा **सर्वज्योतिरसावहोम्** । एवं व्यतिहारेण प्रत्यक्प्रकाशाभिन्नपरप्रकाशोऽहमों ओङ्कारार्थप्रत्यक्परविभागैक्यासहतुरीयतुरीयं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्येवं ध्यायन्तोऽद्यापि महीयन्त इत्यर्थः ॥ ११ ॥

हंसज्योतिर्विद्याफलम्

**एतदथर्वशिरोऽधीते । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । तत्सायं प्रातः प्रयुञ्जानः पापोऽपापो भवति । माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात्प्रमुच्यते । सर्ववेदपारायणपुण्यं लभते । श्रीमहाविष्णुसायुज्यमवाप्नोतीत्युपनिषत् ॥ १२ ॥**

विद्याफलमाह—एतदिति । किं बहुना—**श्रीमहाविष्णुसायुज्यमवाप्नोति । इत्युपनिषच्छब्दः** महावाक्योपनिषत्समाप्त्यर्थः ॥ १२ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
महावाक्योपनिषदो व्याख्यानं लिखितं लघु ।
महावाक्यविवृतिस्तु द्विषष्टिः ग्रन्थतो भवेत् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्विनवतिसङ्ख्यापूरकं महावाक्योपनिषद्विवरणं सम्पूर्णम्

# योगकुण्डल्युपनिषत्

सह नाववतु—इति शान्तिः

## प्रथमोऽध्यायः

### वायुजयोपायत्रयम्

हेतुद्वयं हि चित्तस्य वासना च समीरणः ।
तयोर्विनष्ट एकस्मिं[1]स्तद्वावपि विनश्यतः ॥ १ ॥
तयोरादौ समीरस्य जयं कुर्यान्नरः सदा ।
मिताहारश्चासनं च शक्तिचालस्तृतीयकः ॥ २ ॥

योगकुण्डल्युपनिषद्योगसिद्धह्रदासनम् ।
निर्विशेषब्रह्मतत्त्वं स्वमात्रमिति चिन्तये ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं योगकुण्डल्युपनिषत् हठलम्बिकायोग-प्रकटनव्यग्रा निर्विशेषब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः संक्षेपतो विवरण-मारभ्यते । आदाववान्तरवाक्यरूपेण हठयोगमवतारयति—हेतुद्वयमित्यादिना । वासनाप्राणरोधाभ्यां चित्तचलनाचलने भवतः । एतदन्यतररोधेऽपि द्वयमपि निरुद्धं भवतीत्यर्थः ॥ १ ॥ तदुपायतया मिताहारः इत्यादि ॥ २ ॥

[1] स्तेद्वा—अ १.

मिताहारः

एतेषां लक्षणं वक्ष्ये शृणु गौतम सादरम् ।
सुस्निग्धमधुराहारश्चतुर्थांशावशेषकः[1] ॥ ३ ॥
भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते ।

तत्र सुस्निग्धेति ॥ ३–४ ॥

पद्मवज्रासन

आसनं द्विविधं प्रोक्तं पद्मं वज्रासनं तथा ॥ ४ ॥
ऊर्वोरुपरि चेद्धत्ते उभे पादतले यथा ।
पद्मासनं भवेदेतत्सर्वपापप्रणाशनम् ॥ ५ ॥
वामाङ्घ्रि[2]मूलं कन्दाधः अन्यं तदुपरि क्षिपेत् ।
समग्रीवशिरःकायो वज्रासनमितीरितम् ॥ ६ ॥

तत्र पद्मासनलक्षणं तु ऊर्वोरिति ॥ ५–६ ॥

शक्तिचालनं तत्साधनद्वयं च

कुण्डल्येव भवेच्छक्तिस्तां तु संचालयेद्बुधः ।
स्वस्थानादाभ्रुवोर्मध्यं शक्तिचालनमुच्यते ॥ ७ ॥
तत्साधने द्वयं मुख्यं सरस्वत्यास्तु चालनम् ।
प्राणरोधमथाभ्यासादृज्वी कुण्डलिनी भवेत् ॥ ८ ॥

[1] शविवर्जितः—क, अ १, अ २. [2] मूल—अ १.

किं तच्छक्तिचालनमित्यत्र कुण्डल्येव ॥ ७ ॥ तत्साधनं किमित्यत्र तत्साधने इति ॥ ८–१४ ॥

### सरस्वतीचालनम्

तयोरादौ सरस्वत्याश्चालनं कथयामि ते ।
अरुन्धत्यैव कथिता पुराविद्भिः सरस्वती ॥ ९ ॥
यस्याः संचालने[1] नैव स्वयं चलति कुण्डली ।
इडायां वहति प्राणे बद्ध्वा पद्मासनं दृढम् ॥ १० ॥
द्वादशाङ्गुलदैर्घ्यं च अम्बरं चतुरङ्गुलम् ।
विस्तीर्य तेन तन्नाडीं वेष्टयित्वा ततः सुधीः ॥ ११ ॥
अङ्गुष्ठतर्जनीभ्यां तु हस्ताभ्यां धारयेद्दृढम् ।
स्वशक्त्या चालयेद्वामे दक्षिणेन पुनःपुनः ॥ १२ ॥
मुहूर्तद्वयपर्यन्तं निर्भयाच्चालयेत्सुधीः ।
ऊर्ध्वमाकर्षयेत्किंचित्सुषुम्नां कुण्डलीगता ॥ १३ ॥
तेन कुण्डलिनी तस्याः सुषुम्नाया मुखं व्रजेत् ।
जहाति तस्मात्प्राणोऽयं सुषुम्नां व्रजति स्वतः ॥ १४ ॥
तुन्दे तु ताणं कुर्याच्च कण्ठसंकोचने कृते ।
सरस्वत्याश्चालनेन वक्षः स्यादूर्ध्वगो मरुत् ॥ १५ ॥
सूर्येण रेचयेद्वायुं सरस्वत्यास्तु चालने ।
कण्ठसंकोचनं कृत्वा वक्षः स्यादूर्ध्वगो मरुत् ॥ १६ ॥

[1] चैव—क.

तस्मात्संचालयेन्नित्यं शब्दगर्भां सरस्वतीम् ।
यस्याः संचालनेनैव योगी रोगैः प्रमुच्यते ॥ १७ ॥
गुल्मं जलोदरप्लीहो ये चान्ये तुन्दमध्यगाः ।
सर्वे ते शक्तिचालेन रोगा नश्यन्ति निश्चयम् ॥ १८ ॥

मूलादिबन्धत्रयपूर्वकं सरस्वतीचालनतः वक्षः वक्षसः ऊर्ध्वगो मरुत् स्यात् ॥ १५ ॥ उक्तार्थमेतत् ॥ १६ ॥ यस्मादेवं तस्मात् ॥ १७–२४ ॥

प्राणायामभेदाः

प्राणरोधमथेदानीं प्रवक्ष्यामि समासतः ।
प्राणश्च देहगो वायुरायामः कुम्भकः स्मृतः ॥ १९ ॥
स एव द्विविधः प्रोक्तः सहितः केवलस्तथा ।
यावत्केवलसिद्धिः स्यात्तावत्सहितमभ्यसेत् ॥ २० ॥
सूर्योज्जायी शीतली च भस्त्री चैव चतुर्थिका ।
भेदैरेव समं कुम्भो यः स्यात्सहितकुम्भकः ॥ २१ ॥

पवित्रे निर्जने देशे शर्करादिविवर्जिते ।
धनुःप्रमाणपर्यन्तं शीताग्निजलवर्जिते ॥ २२ ॥
पवित्रे नात्युच्चनीचे ह्यासने सुखदे सुखे ।
बद्धपद्मासनं कृत्वा सरस्वत्यास्तु चालनम् ॥ २३ ॥

दक्षनाड्या समाकृष्य बहिष्ठं पवनं शनैः ।
यथेष्टं पूरयेद्वायुं रेचयेदिडया ततः ॥ २४ ॥
कपालशोधनं वाऽपि रेचयेत्पवनं शनैः ।
चतुष्कं वातदोषं तु कृमिदोषं निहन्ति च ॥ २५ ॥
पुनः पुनरिदं कार्यं सूर्यभेदमुदाहृतम् ।

चतुष्कं चतुर्विधम् ॥ २५–४२ ॥

उज्जायीकुम्भकः

मुखं संयम्य नाडीभ्यामाकृष्य पवनं शनैः ॥ २६ ॥
यथा लगति कण्ठात्तु हृदयावधि सस्वनम् ।
पूर्ववत्कुम्भयेत्प्राणं रेचयेदिडया ततः ॥ २७ ॥
शीर्षोदित[1]नलहरं गलश्लेष्महरं परम् ।
सर्वरोगहरं पुण्यं देहानलविवर्धनम् ॥ २८ ॥
नाडीजलोदरं धातुगतदोषविनाशनम् ।
गच्छतस्तिष्ठतः कार्यमुज्जाय्याख्यं तु कुम्भकम् ॥ २९ ॥

शीतलीकुम्भकः

जिह्वया वायुमाकृष्य पूर्ववत्कुम्भकादनु ।
शनैस्तु घ्राणरन्ध्राभ्यां रेचयेदनिलं सुधीः ॥ ३० ॥
गुल्मप्लीहादि[2]का दोषाः क्षयं पित्तं ज्वरं तृषाम् ।
विषाणि शीतली नाम कुम्भकोऽयं निहन्ति च ॥ ३१ ॥

[1] निल—क. [2] कान् दोषान्—क, अ १, अ २.

भस्त्रकुम्भकः

ततः पद्मासनं बद्ध्वा समग्रीवोदरः सुधीः ।
मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत् ॥ ३२ ॥
यथा लगति कण्ठात्तु कपाले सस्वनं ततः ।
वेगेन पूरयेत् किंचिद्धृत्पद्मावधि मारुतम् ॥ ३३ ॥
पुनर्विरेचयेत्तद्वत्पूरयेच्च पुनः पुनः ।
यथैव लोहकारांणां भस्त्रा वेगेन चाल्यते ॥ ३४ ॥
तथैव स्वशरीरस्थं चालयेत्पवनं शनैः ।
यथा श्रमो भवेद्देहे तथा सूर्येण [1]रेचयेत् ॥ ३५ ॥
यथोदरं भवेत्पूर्णं पवनेन तथा लघु ।
धारयन्नासिकामध्यं तर्जनीभ्यां विना दृढम् ॥ ३६ ॥
कुम्भकं पूर्ववत्कृत्वा रेचयेदिडयाऽनिलम् ।
कण्ठोत्थितानलहरं शरीराग्निविवर्धनम् ॥ ३७ ॥
कुण्डलीबोधकं पुण्यं पापघ्नं शुभदं सुखम् ।
ब्रह्मनाडीमुखान्तस्थकफाद्यर्गलनाशनम् ॥ ३८ ॥
गुणत्रयसमुद्भूतग्रन्थित्रयविभेदकम् ।
विशेषेणैव कर्तव्यं भस्त्राख्यं कुम्भकं त्विदम् ॥ ३९ ॥

बन्धत्रयविधिः

चतुर्णामपि भेदानां कुम्भके समुपस्थिते ।
बन्धत्रयमिदं कार्यं योगिभिर्वीतकल्मषैः ॥ ४० ॥

[1] पूर—क, अ १, अ २.

प्रथमो मूलबन्धस्तु द्वितीयोड्डीयणाभिधः ।
जालन्धरस्तृतीयस्तु तेषां लक्षणमुच्यते ॥ ४१-॥

मूलबन्धः

अधोगतिमपानं वै ऊर्ध्वगं कुरुते बलात् ।
आकुञ्चनेन तं प्राहुर्मूलबन्धोऽयमुच्यते ॥ ४२ ॥
अपाने चोर्ध्वगे याते संप्राप्ते वह्निमण्डले ।
ततोऽनलशिखा दीर्घा वर्धते वायुना हता ॥ ४३ ॥
ततो यातौ वह्न्यपानौ प्राणमुष्णस्वरूपकम् ।
तेनात्यन्तप्रदीप्तेन ज्वलनो देहजस्तथा ॥ ४४ ॥
तेन कुण्डलिनी सुप्ता संतप्ता संप्रबुध्यते ।
दण्डाहतभुजङ्गीव निश्वस्य ऋजुतां व्रजेत् ॥ ४५ ॥
बिलप्रवेशतो यत्र ब्रह्मनाड्यन्तरं व्रजेत् ।
तस्मान्नित्यं मूलबन्धः कर्तव्यो योगिभिः सदा ॥ ४६ ॥

हता चलिता ॥ ४३–६२ ॥

उड्डियाणबन्धः

कुम्भकान्ते रेचकादौ कर्तव्यस्तूड्डियाणकः ।
बन्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः ॥ ४७ ॥
तस्मादुड्डीयणाख्योऽयं योगिभिः समुदाहृतः ।
सति वज्रासने पादौ कराभ्यां धारयेद्दृढम् ॥ ४८ ॥

गुल्फदेशसमीपे च कन्दं तत्र प्रपीडयेत् ।
पश्चिमं ताणमुदरे धारयेद्धृदये गले ॥ ४९ ॥
शनैः शनैर्यदा प्राणस्तुन्दसन्धिं निगच्छति ।
तुन्ददोषं विनिर्धूय कर्तव्यं सततं शनैः ॥ ५० ॥

जालन्धरबन्धः

पूरकान्ते तु कर्तव्यो बन्धो जालन्धराभिधः ।
कण्ठसंकोचरूपोऽसौ वायुमार्गनिरोधकः ॥ ५१ ॥
अधस्तात्कुञ्चनेनाशु कण्ठसंकोचनं कृते ।
मध्ये पश्चिमताणेन स्यात्प्राणो ब्रह्मनाडिगः ॥ ५२ ॥
पूर्वोक्तेन क्रमेणैव सम्यगासनमास्थितः ।
चालनं तु सरस्वत्याः कृत्वा [1]प्राणं निरोधयेत् ॥ ५३ ॥

अभ्यासकुम्भकसंख्यानियमः

प्रथमे दिवसे कार्यं कुम्भकानां चतुष्टयम् ।
प्रत्येकं दशसंख्याकं द्वितीये पञ्चभिस्तथा ॥ ५४ ॥
विंशत्यलं तृतीयेऽह्नि पञ्चवृद्ध्या दिने दिने ।
कर्तव्यः कुम्भको नित्यं बन्धत्रयसमन्वितः ॥ ५५ ॥

योगाभ्यासविघ्नाः, तत्त्यागश्च

दिवा [2]सुप्तिर्निशायां तु जागरादतिमैथुनात् ।
बहुसंक्रमणं नित्यं रोधान्मूत्रपुरीषयोः ॥ ५६ ॥

[1] प्राणान्—उ १. [2] प्तिनि—अ १.

विषमासनदोषाश्च प्रयासप्राणचिन्तनात् ।
शीघ्रमुत्पद्यते रोगः स्तम्भयेद्यदि संयमी ॥ ५७ ॥
योगाभ्यासेन मे रोग उत्पन्न इति कथ्यते ।
ततोऽभ्यासं त्यजेदेवं प्रथमं विघ्नमुच्यते ॥ ५८ ॥
द्वितीयं संशयाख्यं च तृतीयं च प्रमत्तता ।
आलस्याख्यं चतुर्थं च निद्रारूपं तु पञ्चमम् ॥ ५९ ॥
षष्ठं तु विरतिर्भ्रान्तिः सप्तमं परिकीर्तितम् ।
विषयं चाष्टमं चैव अनाख्यं नवमं स्मृतम् ॥ ६० ॥
अलब्धियोगतत्त्वस्य दशमं प्रोच्यते बुधैः ।
इत्येतद्विघ्नदशकं विचारेण त्यजेद्बुधः ॥ ६१ ॥

योगाभ्यासेन कुण्डलिनीबोधः

प्राणाभ्यासस्ततः कार्यो नित्यं सत्त्वास्थया धिया ।
सुषुम्ना लीयते चित्तं न च वायुः प्रधावति ॥ ६२ ॥
शुष्के मले [1]तु योगी [2]च स्याद्गतिश्चालिता ततः ।
अधोगतिमपानं वै ऊर्ध्वगं कुरुते बलात् ॥ ६३ ॥
आकुञ्चनेन तं प्राहुर्मूलबन्धोऽयमुच्यते ।
अपानश्चोर्ध्वगो भूत्वा वह्निना सह गच्छति ॥ ६४ ॥
प्राणस्थानं ततो वह्निः प्राणापानौ च सत्वरम् ।
मिलित्वा कुण्डलीं याति प्रसुप्ता कुण्डलाकृतिः ॥ ६५ ॥

[1] चा—अ १. [2] स्यादगति—क.

तेनाग्निना च संतप्ता पवनेनैव चालिता ।
प्रसार्य स्वशरीरं तु सुषुम्नावदनान्तरे ॥ ६६ ॥

एवं सत्वास्थया प्राणायामं कुर्वतः चित्तादिकं न चलति । न च कदाऽपि वायुः प्रधावति । केवलकुम्भकतो नाडीगतमले शुष्के सत्यथ सुषुम्नायां प्राणगतिः चालिता स्तम्भिता यदि तदा ततोऽयं योगी स्यादित्यर्थः ॥ ६३–६४ ॥ याति यातः ॥ ६५ ॥ चालिता कुण्डलिनी ॥ ६६–६७ ॥

ग्रन्थित्रयभेदेन कुण्डलिन्याः सहस्रारगमनम्

ब्रह्मग्रन्थिं ततो भित्त्वा रजोगुणसमुद्भवम् ।
सुषुम्नावदने शीघ्रं विद्युल्लेखेव संस्फुरेत् ॥ ६७ ॥
विष्णुग्रन्थिं प्रयात्युच्चैः सत्वरं हृदि संस्थिता ।
ऊर्ध्वं गच्छति यच्चास्ते रुद्रग्रन्थिं तदुद्भ[1]वम् ॥ ६८ ॥
भ्रुवोर्मध्यं तु संभिद्य याति शीतांशुमण्डलम् ।
अनाहताख्यं यच्चक्रं दलैः षोडशभिर्युतम् ॥ ६९ ॥
तत्र शीतांशुसंजातं द्रवं शोषयति स्वयम् ।
चलिते प्राणवेगेन रक्तं पित्तं [2]रविर्ग्रहात् ॥ ७० ॥
यातेन्दुचक्रं यत्रास्ते शुद्धश्लेष्मद्रवात्मकम् ।
(तत्र सिक्तं ग्रसत्युष्णं कथं शीतस्वभावकम्) ॥ ७१ ॥
तथैव रभसा शुक्रं चन्द्ररूपं हि तप्यते ।
ऊर्ध्वं प्रवहति [3]क्षुब्धा तदैवं [4]स्रवतेतराम् ॥ ७२ ॥

[1] वाम्—उ १. [2] रविग्र—क, अ १, अ २.
[3] क्षुब्धं—क, अ २. क्षुब्ध—अ १. [4] भ्रमते—क, अ १, अ २.

तस्यास्वादवशाच्चित्तं बहिष्ठं विषमेषु यत् ।
• तदेव परमं भुक्त्वा स्वस्थस्यात्मरतो युवा ॥ ७२ ॥

तदुद्भवं आज्ञाचक्रमूलोद्भवं रुद्रग्रन्थिम् ॥ ६८ ॥ दलैः षोडशभिर्युतम्—प्रधानदळान्यष्टौ, तथा उपदळानि, आहत्य षोडश ॥ ६९ ॥ यदा प्राणो हृदये शीतांशुजं द्रवं शोषयति तदा तत्रत्यरक्तादौ प्राणवेगेन चलिते सति रविः रक्तपित्तादिकं ग्रहान् ग्रसंत् शोषयेदित्यर्थः ॥ ७० ॥ ततः प्राणे यातेन्दुचक्रमिति ॥ ७१ ॥ स्रवतंततरां—अमृतधारेत्यर्थः ॥ ७२ ॥ अस्या अमृतधारायाः आस्वादवशात् यच्चित्तं विषमेषु विषयेषु उदासीनतया बहिष्ठं बहिर्भूतं भवति तद्धानात्मरतो मुनिः तदेव परमं अमृताख्यं हविर्भुक्त्वा स्वस्थः स्यात् । स्वस्थस्यात्मरत इत्यत्र [1]विसर्गतकाराकाराणां लोपः ॥ ७३ ॥

प्राणादिविलयः, विलीनानां बहिःप्रसरश्च

प्रकृत्यष्टकरूपं च स्थानं गच्छति कुण्डली ।
क्रोडीकृत्य शिवं याति क्रोडीकृत्य विलीयते ॥ ७४ ॥
इत्यधोर्ध्वरजः [2]शुक्ले शिवे तदनु मारुतः ।
प्राणापानौ समौ याति [3]सह जातौ तथैव च ॥ ७५ ॥
भूतेऽल्पे [4]च मनोल्पे वा वाचके त्वतिवर्धते ।
[5]धावयत्यखिला वाता अग्निमूषाहिरण्यवत् ॥ ७६ ॥

[1] तकारलोपः—उ १. [2] शुक्लं—क, अ १, अ २.
[3] सदा जातौ—सर्वकोशेषु. "सहजातौ" इति पाठस्तु व्याख्यानुसारी.
[4] चमनल्पेत्वं वा च—क, अ १, अ २. चमनल्पेत्व—उ १. चाप्यनल्पेवा वा च—मु. [5] धावयन्त्य—उ.

ततः किमित्यत आह—**प्रकृतीति** ।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

इति स्मृत्यनुरोधेन हित्वा स्वात्तप्रकृत्यष्टकरूपम् । **सहस्रारस्थानम्** । दृश्यनः-प्राणादिकं **क्रोडीकृत्य** ॥ ७४ ॥ यदा कुण्डलिनी सर्वं क्रोडीकृत्य सहस्रारे विलीयते [1]**इत्यथोर्ध्वरजःशुक्रे शिवे** इत्यत्र कुण्डलिनीविलयादथोर्ध्वक्षणं सौरं प्राकृतं जीवतत्त्वं रजश्च चान्द्रं ऐश्वरं शुक्रं च रजःशुक्रे सहस्रारालङ्कारे स्वातिरिक्ताशिवग्रासे **शिवे** परमात्मनि विलीयेते **तदनु** तदुत्तरक्षणं **मारुतोऽपि** विलीयते । सहजप्राणादेः कथं विलय इत्यत्र यथा अहोरात्रे सहजे सन्ध्ययोः समे भवतः **तथैव सहजातौ** सहजौ तुर्यस्वरूपावस्थानलक्षणनिर्विकल्पकावस्थायां प्राणापानौ **समौ** ऊर्ध्वाधोगतिविरळौ निर्व्यापारतां **याति** यातः । अयमेव प्राणादिविलय इत्यर्थः ॥ ७५ ॥ एवं विलीनप्राणमनोवागादिः कथमन्तर्बाह्ये प्रसरतीत्यत्र बाह्ये स्वातिरेकेण घटाद्यल्पं भवतीति भूतमल्पं तस्मिन् भूते अल्पे च स्मृते प्राणः प्रसरति । स्वातिरेकेण अल्पं वा किञ्चिदस्तीति यन्मनुते तन्मनल्पं मनोल्पं तस्मिन् **मनोल्पे** सङ्कल्पिते सङ्कल्पविकल्पात्मकं मनः प्रसरति । स्वातिरेकेण वाचके तु स्मृते तदा वाग्वृत्तिः प्रसरति । एवं प्राणमनोवागादिरुत्पन्नः सन् **वर्धते** । एवं प्राणादिनिष्पत्तौ सत्यां मूषानिषिक्तद्रुतसुवर्णवदापादमस्तकमखिलाः प्राणादिवाता धावयति धावन्ति आपादमस्तकं व्याप्य वर्तन्ते इत्यर्थः ॥ ७६ ॥

समाधौ सर्वस्य चिन्मात्रत्वानुभवः

**आधिभौतिकदेहं तु आधिदैविकविग्रहे ।**
**देहोऽतिविमलं याति चातिवाहिकतामियात् ॥ ७७ ॥**

[1] इत्यत्र यत्तथो—उ.

जाड्यभावविनिर्मुक्तममलं चिन्मयात्मकम् ।
तस्यातिवाहिकं मुख्यं सर्वेषां तु मदात्मकम् ॥ ७८ ॥
जायाभवविनिर्मुक्तिः कालरूपस्य विभ्रमः ।
इति [1]तं स्वस्वरूपा हि मती रज्जुभुजङ्गवत् ॥ ७९ ॥
मृषैवोदेति सकलं मृषैव प्रविलीयते ।
रौप्यबुद्धिः शुक्तिकायां स्त्रीपुंमोर्भ्रमतो यथा ॥ ८० ॥
पिण्डब्रह्माण्डयोरैक्यं लिङ्गसूत्रात्मनोरपि ।
स्वापाव्याकृतयोरैक्यं स्वप्रकाशचिदात्मनोः ॥ ८१ ॥

पुनः समाहितावस्थायां एतत् सर्वं चिन्मात्रपर्यवसन्नं भवतीत्याह— **आधिभौतिकेति** । स्वाज्ञविकल्पितभौतिकदेहमधिकृत्य भवतीत्याधिभौतिकदेहः तं तु **आधिभौतिकदेहं** आत्मानं प्रत्यञ्चं देवमधिकृत्य भवतीत्याधिदैविकविग्रहः तस्मिन् **आधिदैविकविग्रहे** प्रत्यगभिन्नपरमात्मनि तन्मात्रतया प्रविलापयेत् । ततः पूर्वाधिष्ठितदेहः मलवद्देहादिभावं विहाय विमलब्रह्मभानमेव **याति** स्वाज्ञविकल्पितप्रपञ्चाधारतया समन्ताद्वहतीत्यातिवाहिकतां ब्रह्मतामियादित्यर्थः ॥ ७७ ॥ यत् स्वातिरिक्तजडशरीरादिकमनुभूतं तत् सर्वं **जाड्यभाव-विनिर्मुक्तममलं चिन्मयात्मकम्** । यत् **सर्वेषां** देहादीनां अधिष्ठेयानां आरोपापवादाधिष्ठानं **मदात्मकं** अस्मत्प्रत्ययालम्बनभूतप्रत्यगभिन्नं ब्रह्म **तस्यातिवाहिकत्वमेव मुख्यं** वास्तवमित्यर्थः ॥ ७८ ॥ यदि ते पराक्सापेक्ष-प्रत्यगभिन्ने ब्रह्मणि सविशेषधीः जायते तदा जनित्वा भवतीति **तज्जायाभावः** सविशेषत्वस्फूर्तिः । तदपह्नवसिद्धिः **तद्विनिर्मुक्तिः** । एवं सविशेषापह्नवोक्तिरपि **कालरूपस्य** ब्रह्मणो **ज्ञानविभ्रमः** सर्वापह्नवसिद्धब्रह्ममात्रस्य निष्प्रतियोगिकत्वेन स्वातिरिक्तमस्ति नास्तीति विभ्रमापह्नवोक्तिरप्यपह्नवतां अर्हतीति भावः ।

[1] तुस्व . . . . मति—उ १.

इत्येवं योऽवशिष्यते तं स्वावशेषधिया विदित्वा वेदनसमकालं या हि स्वस्वरूपावस्थितिः, तन्मतिरेव मुक्तिः ॥ ७९ ॥ तदतिरेकेण स्वाज्ञदशायां यद्यदनुभूतं रज्जुभुजङ्गवत्, शुक्तिकायां यथा अनुभूतं इदं रजतमिति विपरीतभ्रमतः स्त्रीपुंसोः रौप्यबुद्धिवच्च, मृषैवोदेति सकलं मृषैव प्रविलीयते । वस्तुतः स्वाज्ञादिदृष्टिमोहे सत्यसति ब्रह्ममात्रं निष्प्रतियोगिकमवशिष्यत इति फलितोऽर्थः ॥ ८० ॥ कथं पुनः ब्रह्ममात्रमवशिष्यत इत्युक्तम् ? व्यष्टिसमष्टिविभागसिद्धविश्वादिजीवत्रयविराडादीश्वरत्रयभेदसत्त्वादित्याशङ्क्य, यदि सर्वत्र भेदं मन्यसे तदा व्यष्टिसमष्टिप्रपञ्चतदारोपापवादाधारविश्वादितुरीयान्तस्य विराडादितुर्यान्तैक्यं विचिन्तयेदित्याह—पिण्डेति । ऐक्यं विश्वविराडैक्योपलक्षणार्थम् । भेदसापेक्षतदैक्यगतसविशेषताऽपाये ब्रह्म निष्प्रतियोगिकत्वमात्रमवशिष्यते इत्यर्थः ॥ ८१ ॥

समाधियोगः

शक्तिः कुण्डलिनी नाम बिसतन्तुनिभा शुभा ।
मूलकन्दं फणाग्रेण दष्ट्वा कमलकन्दवत् ॥ ८२ ॥
मुखेन पुच्छं संगृह्य ब्रह्मरन्ध्रसमन्विता ।
पद्मासनगतः स्वस्थो गुदमाकुञ्च्य साधकः ॥ ८३ ॥
वायुमूर्ध्वगतं कुर्वन् कुम्भकाविष्टमानसः ।
वाय्वाघातवशादग्निः स्वाधिष्ठानगतो ज्वलन् ॥ ८४ ॥
ज्वलनाघातपवना[1]घातोरुन्निद्रितोऽहिराट् ।
ब्रह्मग्रन्थिं ततो भित्त्वा विष्णुग्रन्थिं भिनत्त्यतः ॥ ८५ ॥

[1] घातोरु—बहुकोशेषु.

रुद्रग्रन्थिं च भित्त्वैव कमलानि भिनत्ति षट् ।
• सहस्रकमले शक्तिः शिवेन सह मोदते ॥ ८६ ॥
सैवावस्था परा ज्ञेया सैव निर्वृतिकारणा ॥ ८७ ॥
इति ॥

इत्थंभूतज्ञानोपायतया समाधियोगमाचष्टे—शक्तिरिति ॥ ८२–८४ ॥ घातेनेत्यत्र घातोरिति छान्दसः ॥ ८५ ॥ षट्चक्रालङ्कारग्रन्थित्रयभेदनानन्तरं इयं कुण्डलिनीशक्तिः शिवेन सह सहस्रारे मोदते ॥ ८६ ॥ स्वविकल्पित-भेदप्रपञ्चं ग्रसित्वा निर्विशेषब्रह्मविद्यारूपमासाद्य स्वयमपि निष्प्रतियोगिकब्रह्ममात्र-पर्यवसन्नेति याऽवस्थोक्ता सैवावस्था परा विदेहमुक्तिरिति ज्ञेया । सैव निर्वृतिकारणा, तस्याः परमानन्दाविर्भावहेतुत्वात् । इतिशब्दो हठयोगसमाप्त्यर्थोऽध्यायपरिसमाप्त्यर्थश्च ॥ ८७ ॥

इति प्रथमोऽध्यायः

# द्वितीयोऽध्यायः

## खेचरीविद्या

अथाहं संप्रवक्ष्यामि विद्यां खेचरिसंज्ञिकाम् ।
यथा [1]विज्ञातवानस्य लोकेऽस्मिन्नजरामरः ॥ १ ॥
मृत्युव्याधिजराग्रस्तो दृष्ट्वा विद्यामिमां मुने ।
बुद्धिं दृढतरां कृत्वा खेचरीं तु समभ्यसेत् ॥ २ ॥

[1] विज्ञान—अ २.

जरामृत्यु[1]गदघ्नो यः खेचरीं वेत्ति भूतले ।
ग्रन्थतश्चार्थतश्चैव तदभ्यासप्रयोगतः ॥ ३ ॥
तं मुने सर्वभावेन गुरुं मत्वा समाश्रयेत् ।
दुर्लभा खेचरी विद्या तदभ्यासोऽपि दुर्लभः ॥ ४ ॥
अभ्यासं मेलनं चैव युगपन्नैव सिध्यति ।
अभ्यासमात्रनिरता न विन्दन्ते ह मेलनम् ॥ ५ ॥
अभ्यासं लभते ब्रह्मन् जन्मजन्मान्तरे क्वचित् ।
मेलनं जन्मनां तत्तु शतान्तेऽपि न लभ्यते ॥ ६ ॥
अभ्यासं बहुजन्मान्ते कृत्वा तद्भावसाधितम् ।
मेलनं लभते कश्चिद्योगी जन्मान्तरे क्वचित् ॥ ७ ॥
यदा तु मेलनं योगी लभते गुरुवक्त्रतः ।
तदा तत्सिद्धिमाप्नोति [2]यदुक्ता शास्त्रसंततौ ॥ ८ ॥
ग्रन्थतश्चार्थतश्चैव मेलनं लभते यदा ।
तदा शिवत्वमाप्नोति निर्मुक्तः सर्वसंसृतेः ॥ ९ ॥
शास्त्रं विनाऽपि संबोद्धुं गुरवोऽपि न शक्नुयुः ।
तस्मात्सुदुर्लभतरं [3]लभ्यं शास्त्रमिदं मुने ॥ १० ॥
यावन्न लभ्यते शास्त्रं तावद्वां पर्यटेद्यतिः ।
यदा संलभ्यते शास्त्रं तदा सिद्धिः करे स्थिता ॥ ११ ॥

[1] गदा—उ, उ १. [2] यदुक्तं—उ, उ १. [3] लभ्य—उ, उ १.

न शास्त्रेण विना सिद्धिर्दृष्टा चैव जगत्त्रये ।
तस्मान्मेलनदातारं शास्त्रदातारमच्युतम् ॥ १२ ॥
तदभ्यासप्रदातारं शिवं मत्वा समाश्रयेत् ।
लब्ध्वा शास्त्रमिदं [1]मह्यमन्येषां न प्रकाशयेत् ॥ १३ ॥
तस्मात्सर्वप्रयत्नेन गोपनीयं विजानता ।
यत्रास्ते च गुरुर्ब्रह्मन्दिव्ययोगप्रदायकः ॥ १४ ॥
तत्र गत्वा च [2]तेनोक्तविद्यां संगृह्य खेचरीम् ।
[3]तेनोक्तः सम्यगभ्यासं कुर्यादादावतन्द्रितः ॥ १५ ॥
अनया विद्यया योगी खेचरीसिद्धिभाग्भवेत् ।
खेचर्या खेचरीं युञ्जन् खेचरीबीजपूरया ॥ १६ ॥
खेचराधिपतिर्भूत्वा खेचरेषु सदा वसेत् ।

ज्ञानसहितहठयोगसर्वस्वं प्रतिपाद्य सप्रपञ्चं लम्बिकायोगमाचष्टे—अथेति । यथा यथावत् ॥ १–१२ ॥ मह्यं मत्तः ॥ १३–१५ ॥ ह्रीमित्यादिखेचरीबीजपूरया

अन्तर्लक्ष्यविलीनचित्तपवनो योगी सदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः पश्यन्नपश्यन्नपि ।
मुद्रेयं खलु खेचरी भवति सा लक्ष्यैकताना शिवा
शून्याशून्यविवर्जितं स्फुरति सा तत्त्वं पदं वैष्णवि ॥

इति श्रुतिसिद्धखेचरीमुद्रया खेचरीयोगं युञ्जन् यः कालं नयति ॥ १६ ॥ स योगी देहान्ते खेचराधिपतिः सूर्यो भूत्वा खेचरेषु खेचरणीयलोकेषु सदा वसेत् ॥

[1] गुह्य—क [2] तेनोक्तं—क, अ १, अ २, उ १. [3] तेनोक्त—अ १.

खेचरीमन्त्रराजोद्धारः

खेचरावसथं वह्निमम्बुमण्डलभूषितम् ॥ १७ ॥
आख्यातं खेचरीबीजं तेन योगः प्रसिध्यति ।
सोमांशनवकं वर्णं प्रतिलोमेन चोद्धरेत् ॥ १८ ॥
तस्मात् त्र्यं[1]शकमाख्यातमक्षरं चन्द्ररूपकम् ।
तस्मादप्यष्टमं वर्णं विलोमेनापरं मुने ॥ १९ ॥
[2]तथा तत्परमं विद्धि तदादिरपि पञ्चमा ।
इन्दोश्च बहुभिन्नं च कूटोऽयं परिकीर्तितः ॥ २० ॥

मेळनमन्त्रराजमुद्धरति—**खेचरेति** । खवाचकतया चरतीति **खेचरः** हकारः **आवसथमिति** धारणाशक्तिरीकारः रेति **वह्निः अम्बुमण्डलमिति** बिन्दुः । एतत् सर्वं मिळित्वा **भूषितं** ह्रीमिति ॥ १७ ॥ **खेचरीबीजं आख्यातम्** । **तेनैव** लम्बिकायोगः **प्रसिध्यति** । शिष्टबीजषट्कमप्यम्बुमण्डल-भूषितमिति ज्ञेयम् । **सोमांशः** सकारः चन्द्रबीजं **तत्प्रतिलोमेन तन्नवकं वर्णमुद्धरेत्** भमिति ॥ १८ ॥ **तस्मात्** भकारादनुलोमेन **त्रित्र्यंशकं** चन्द्रबीज-**माख्यातं** समिति । **तस्मात्** सकारात् **विलोमेन अपरमष्टमं वर्णमुद्धरेत्** [3]मिति ॥ १९ ॥ तथा मकारात् विलोमेन अपरं पञ्चमवर्ण[4]मिति **विद्धि** । पुनरिन्दोश्च बीजं समित्युद्धरेत् । बहुभिः ककारषकारबिन्दुभिः युक्तोऽयं **कूटः** क्षमिति । आहत्य बीजानि सप्त—ह्रीं, भं, सं, मं, पं, सं, क्षं, इति ॥ २०–२१ ॥

मन्त्रजपात् खेचरीसिद्धिः

गुरूपदेशलभ्यं च सर्वयोगप्रसिद्धिदम् ।
*यत्तस्य देहजा माया निरुद्धकरणाश्रया ॥ २१ ॥*

[1] वक—क. [2] तदा—क, अ १, अ २, उ १. [3] ध—उ १. [4] ध—उ १.

स्वप्नेऽपि न लभेत्तस्य नित्यं द्वादशजप्यतः ।
य इमां पञ्च लक्षाणि जपेदपि सुयन्त्रितः ॥ २२ ॥
तस्य श्रीखेचरीसिद्धिः स्वयमेव प्रवर्तते ।
नश्यन्ति सर्वविघ्नानि प्रसीदन्ति च देवताः ॥ २३ ॥
वलीपलितनाशश्च भविष्यति न संशयः ।
एवं लब्ध्वा महाविद्यामभ्यासं कारयेत्ततः ॥ २४ ॥
अन्यथा क्लिश्यते [1]ब्रह्मन्न सिद्धिः खेचरीपथे ।
यदभ्यासविधौ विद्यां न लभेद्यः सुधामयीम् ॥ २५ ॥
ततः संमेलकादौ च लब्ध्वा विद्यां सदा जपेत् ।
नान्यथा रहितो ब्रह्मन्न किंचित्सिद्धिभाग्भवेत् ॥ २६ ॥
[2]यदिदं लभ्यते शास्त्रं तदा विद्यां समाश्रयेत् ।
ततस्तदोदितां सिद्धिमाशु तां लभते मुनिः ॥ २७ ॥

नित्यं द्वादशवारं यो जपति स मायातीतो भवतीत्यर्थः ॥ २२–२७ ॥

खचयभ्यासक्रमः

तालुमूलं समुत्कृष्य सप्तवासरमात्मवित् ।
स्वगुरूक्तप्रकारेण मलं सर्वं विशोधयेत् ॥ २८ ॥
स्नुहिपत्रनिभं शस्त्रं सुतीक्ष्णं स्निग्धनिर्मलम् ।
समादाय ततस्तेन लोममात्रं समुच्छिनेत् ॥ २९ ॥

[1] ब्रह्म न—क. [2] यदि तं—अ १.

हित्वा सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत् ।
पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥ ३० ॥
एवं क्रमेण षाण्मासं नित्योद्युक्तः समाचरेत् ।
षाण्मासाद्रसनामूलं सिराबन्धं प्रणश्यति ॥ ३१ ॥
अथ वागीश्वरीधाम शिरो वस्त्रेण वेष्टयेत् ।
शनैरुत्कर्षयेद्योगी कालवेलाविधानवित् ॥ ३२ ॥
पुनः षाण्मासमात्रेण नित्यं संघर्षणान्मुने ।
भ्रूमध्यावधि चाप्येति तिर्यक्कर्णबिलावधि ॥ ३३ ॥
अधश्च चुबुकं मूलं प्रयाति क्रम[1]चारिता ।
पुनः संवत्सराणां तु तृतीयादेव लीलया ॥ ३४ ॥
केशान्तमूर्ध्वं क्रमति तिर्यक्शाखाऽवधिर्मुने ।
अधस्तात्कण्ठकूपान्तं पुनर्वर्षत्रयेण तु ॥ ३५ ॥
ब्रह्मरन्ध्रं समावृत्य तिष्ठेदेव न संशयः ।
तिर्यक् चूलितलं याति अधः कण्ठबिलावधिः ॥ ३६ ॥
शनैः शनैर्मस्तकाच्च महावज्रकवाटभित् ।
पूर्वं बीजयुता विद्या ह्याख्याता याति दुर्लभाम् ॥ ३७ ॥
तस्याः षडङ्गं कुर्वीत तया षट्स्वरभिन्नया ।
कुर्यादेवं करन्यासं सर्वसिद्ध्यादिहेतवे ॥ ३८ ॥
शनैरेवं प्रकर्तव्यमभ्यासं युगपन्न हि ।
युगपद्वर्तते यस्य शरीरं विलयं व्रजेत् ॥ ३९ ॥

[1] चारितां—क. चारितः—अ १, अ २.

तस्माच्छनैः शनैः कार्यमभ्यासं मुनिपुङ्गव ।
यदा च बाह्यमार्गेण जिह्वा ब्रह्मबिलं व्रजेत् ॥ ४० ॥
तदा ब्रह्मार्गलं ब्रह्मन्दुर्भेद्यं त्रिदशैरपि ।
अङ्गुल्यग्रेण संघृष्य जिह्वामात्रं निवेशयेत् ॥ ४१ ॥
एवं वर्षत्रयं कृत्वा ब्रह्मद्वारं [1]प्रविश्यति ।
ब्रह्मद्वारे प्रविष्टे तु सम्यङ्मथनमाचरेत् ॥ ४२ ॥
मथनेन विना केचित्साधयन्ति विपश्चितः ।
खेचरीमन्त्रसिद्धस्य सिध्यते मथनं विना ॥ ४३ ॥
जपं च मथनं चैव कृत्वा शीघ्रं फलं लभेत् ।
स्वर्णजां रौप्यजां वाऽपि लोहजां वा शलाकिकाम् ॥ ४४ ॥
नियोज्य नासिकारन्ध्रं दुग्धसिक्तेन तन्तुना ।
[2]प्राणान्निरुध्य हृदये सुखमासनमात्मनः ॥ ४५ ॥
शनैः सुमथनं कुर्याद्भ्रूमध्ये न्यस्तचक्षुषि ।
[3]षाण्मासान्मथनावस्थाभावेनैव प्रजायते ॥ ४६ ॥
यथा सुषुप्तिर्बालानां यथा भावस्तथा भवेत् ।
न सदा मथनं शस्तं मासे मासे समाचरेत् ॥ ४७ ॥
सदा रसनया योगी मार्गं न परिसंक्रमेत् ।
एवं द्वादशवर्षान्ते संसिद्धिर्भवति [4]ध्रुवा ॥ ४८ ॥

[1] प्रप—क.
[2] प्राणं नि—क, अ १, अ २.
[3] षाण्मासं म—क, अ २.
[4] ध्रुवं—अ २.

शरीरे सकलं विश्वं पश्यत्यात्माविभेदतः ।

ब्रह्माण्डोऽयं महामार्गो राजदन्तोर्ध्वकुण्डली ॥ ४९ ॥

इति ॥

अभ्यासक्रममाह—ताल्विति ॥ २८–२९ ॥ कार्यान्तरं हित्वेति । हरीतकी पथ्याशब्दार्थः ॥ ३०–३१ ॥ वागीश्वरीधामशिरः जिह्वाग्रम् ॥ ३२–३४ ॥ तिर्यक्च्छाखावधिः शिखामूलमित्यर्थः ॥ ३५—३६ ॥ दुर्लभां दुर्लभताम् ॥ ३७ ॥ षट्स्वरभिन्नया ह्रां ह्रीं इत्यादिनेत्यर्थः ॥ ३८–४० ॥ ब्रह्मार्गलं अन्तर्जिह्वासुषिरम् ॥ ४१–४७ ॥ एवं गुरुमुखात् लम्बिकाविद्यां अभ्यस्य द्वादशवर्षानुष्ठानात् लम्बिकायोगसिद्धिः भवति ॥ ४८ ॥ शरीरे सकलं विश्वं पश्यतीत्यनेन विराट्सूत्रबीजतुर्यरूपं क्रमेण प्रतिपद्यते । यत्र सहस्रारे राजदन्तोर्ध्वकुण्डली जिह्वा प्रसरति सोऽयं मार्गः ब्रह्माण्डनिभो भवति, सुपथत्वात् । इतिशब्दः लम्बिकायोगसमाप्त्यर्थः, द्वितीयाध्यायसमाप्त्यर्थश्च भवति ॥ ४९ ॥

इति द्वितीयोऽध्यायः

# तृतीयोऽध्यायः

मेळनमन्त्रः

ह्रीं [1]भं सं [2]मं [3]पं सं क्षम् ।

मेळनमनुं कण्ठतः पठति—ह्रीमिति ।

[1] हं—अ २. [2] षं—उ १.

[3] फं—उ १. वं—अ १. यं—अ २.

अमावास्याप्रतिपत्पूर्णिमाभेदेन दृष्टिभेदः

पद्मज उवाच—

अमावास्या च प्रतिपत्पौर्णमासी च शंकर ।
अस्याः का वर्ण्यते संज्ञा एतदाख्याहि तत्त्वतः ॥ १ ॥
प्रतिपद्दिनतोऽकाले अमा[1]वास्या तथैव च ।
पौर्णमास्यां स्थिरीकुर्यात्स च पन्था हि नान्यथा ॥ २ ॥

दृष्टित्रयतल्लक्ष्ययाथार्थ्यबुभुत्सया शिवं प्रति ब्रह्मा पृच्छतीत्याह—**पद्मज** इति ॥ १ ॥ प्रश्नोत्तरं भगवानाह—**प्रतिपदिति** । बाह्यमध्यान्तर्लक्ष्यदर्शनकरणं मनस्सहकृतदृष्टिः । अमादिभेदेन सेयं त्रिधा भिद्यते । तत्र गाढनिर्मीलनदृष्टिरमा, अर्धोन्मीलनदृष्टिः प्रतिपत्, सर्वोन्मीलनदृष्टिः पूर्णिमा भवति । लक्ष्यदर्शने पूर्णिमादृष्टिः प्रशस्यते । अभ्यासकाले यदि नेत्रश्रमो भवति तदा **प्रतिपद्दिनतोऽकाले** प्रतिपद्दृष्ट्याऽवलोकयेत् अमादृष्ट्या वा । यदा जितश्रमो भवति तदा पूर्णिमादृष्टिमेव **स्थिरीकुर्यात्**,

कदाचित् पूर्णिमादृष्ट्या कदाचित् प्रतिपद्दृशा ।
अमादृष्ट्या कदाचिच्च निर्विघ्नेनावलोकयेत् ॥

इति ब्रह्मप्रणवोक्तेः । प्राणापाना[णायामा]द्यपेक्षया अयमेव पन्थाः वरीयानित्यर्थः ॥ २ ॥

पूर्णिमादृष्टिविधिः

कामेन विषयाकाङ्क्षी विषयात्काममोहितः ।
द्वावेव संत्यजेन्नित्यं निरञ्जनमुपाश्रयेत् ॥ ३ ॥

[1] वास्यां—अ १.

अपरं संत्यजेत्सर्वं यदिच्छेदात्मनो हितम् ।
शक्तिमध्ये मनः कृत्वा मनः शक्तेश्च मध्यगम् ॥ ४ ॥
मनसा मन आलोक्य तत्त्यजेत्परमं पदम् ।
मन एव हि बिन्दुश्च उत्पत्तिस्थितिकारणम् ॥ ५ ॥
मनसोत्पद्यते बिन्दुर्यथा क्षीरं घृतात्मकम् ।
न च बन्धनमध्यस्थं तद्वै [1]कारणमा[2]नसम् ॥ ६ ॥
चन्द्रार्कमध्यमा शक्तिर्यत्रस्था तत्र बन्धनम् ।
ज्ञात्वा सुषुम्ना तद्भेदं कृत्वा वायुं च मध्यगम् ॥ ७ ॥
[3]स्थित्वाऽसौ बैन्दवस्थाने घ्राणरन्ध्रे निरोधयेत् ।
वायुं बिन्दुं समाख्यातं सत्वं प्रकृतिमेव च ॥ ८ ॥
षट् चक्राणि परिज्ञात्वा प्रविशेत्सुखमण्डलम् ।
मूलाधारं स्वाधिष्ठानं मणिपूरं तृतीयकम् ॥ ९ ॥
अनाहतं विशुद्धिं च आज्ञाचक्रं च षष्ठकम् ।
आधारं गुदमित्युक्तं स्वाधिष्ठानं तु लैङ्गिकम् ॥ १० ॥
मणिपूरं नाभिदेशं हृदयस्थमनाहतम् ।
विशुद्धिः कण्ठमूले च आज्ञाचक्रं च मस्तकम् ॥ ११ ॥

विषयविषयिकलनात्यागपूर्वकं पूर्णमाद्दृष्ट्या ब्रह्माहमिति लक्षयेत् इत्याह—कामेनेति ॥ ३ ॥ किंच—शक्तिमध्ये । कुण्डलिनीशक्तिमध्ये पूर्णमाद्दृष्टिकलितं मनः कृत्वा पुनः शक्तेश्च मध्यगं मनोऽपि कृत्वा

[1] करण—क, अ १, अ २. [2] सनं—क.
[3] स्थित्वा तु—उ, उ १.

ब्रह्माकारपरिणतमनसा मनस्तत्कार्यापवादाधिकरणं ब्रह्मास्मीत्यालोक्य एवमालोकनवृत्तिमपि सन्त्यजेदिति यत् तदैव हि परमं पदं कैवल्यमित्यर्थः ॥ ४ ॥ किं तन्मनः इत्यत आह—मन इति । मनसः व्यष्टिप्रपञ्चोत्पत्त्यादिकारणत्वात् तदेव बिन्दुरीश्वरः, "बिन्दुरीश्वरसंज्ञः" इति श्रुतेः ॥ ५ ॥ यद्वा—मनसोत्पद्यते बिन्दुः बिन्दादिकल्पनाया मनोहेतुकत्वात् मनःकार्यत्वं, "सेशं मया कल्पितं" इति भगवत्पादाचार्योक्तेः । यथा क्षीरं घृतात्मकं तथा बिन्दुः मनआत्मकमित्यर्थः । मनोबद्धमीश्वरतत्त्वं इत्यत्राह—नचेति । स्वसङ्कल्पतो बन्धनमेतीति बन्धनं मनः नच बिन्दुतत्त्वं बन्धनमध्यस्थं मनसो मृषात्वात् । नापि तद्वै तदेव स्वकारणमानसवत् भवति, मानसापाये बिन्दोः ईश्वरस्य निर्विशेषब्रह्ममात्रत्वात् ॥ ६ ॥ ईश्वरादतिरिक्तमेव बन्धनमित्याह—चन्द्रेति । ब्रह्मरन्ध्रमूलाधारासनचन्द्रार्कमध्यमा शक्तिः कुण्डलिनी यत्र तिष्ठति तत्र बन्धनं मनोऽस्तीति ज्ञात्वा । स्वातिरिक्तकुण्डलीकार्यं मनोबन्धनमिति ज्ञात्वा तदुन्मूलनाय यत् सुषुम्नायां ग्रन्थित्रयं विद्यते तद्भेदं कृत्वा प्राणादिकमपि तत्सुषुम्ना मध्यगं कृत्वा ॥ ७ ॥ बैन्दवस्थाने भ्रूमध्यादौ बिन्दाख्येश्वरोऽस्मीति स्थित्वा वायुं स्थिरीकृत्य प्राणरन्ध्रे निरोधयेत् केवलकुम्भकमेव कुर्यात् इत्यर्थः । प्राणादीन् ज्ञात्वा योगानन्दं विशेदित्याह—वायुमिति ॥ ८ ॥ कानि षट्चक्राणीत्यत आह—मूलेति ॥ ९–१२ ॥

प्राणाभ्यासात् विराड्रूपापत्तिः

षट् चक्राणि परिज्ञात्वा प्रविशेत्सुखमण्डले ।
प्रविशेद्वायुमाकृष्य [1]तयैवोर्ध्वं नियोजयेत् ॥ १२ ॥
एवं समभ्यसेद्वायुं स ब्रह्माण्डमयो भवेत् ।
वायुं बिन्दुं तथा चक्रं चित्तं चैव समभ्यसेत् ॥ १३ ॥

[1] तथै—अ.

एवं प्राणाभ्यासात् विराड्रूपो भवतीत्यर्थः । **वायुं . . . समभ्यसेत्** चित्तप्राणावेकीकृत्य षट्चक्रेषु बिन्दुध्यानपूर्वकं योगमभ्यसेदित्यर्थः ॥ ॥ १३ ॥

अभ्यासयोगेन विना न स्वात्मप्रकाशः

समाधिमेकेन सममृतं यान्ति योगिनः ।
यथाऽग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनं विना ॥ १४ ॥
विना चाभ्यासयोगेन ज्ञानदीपस्तथा न हि ।
घटमध्यगतो दीपो बाह्ये नैव प्रकाशते ॥ १५ ॥
भिन्ने तस्मिन्घटे चैव दीपज्वाला च भासते ।
स्वकायं घटमित्युक्तं यथा दीपो हि तत्पदम् ॥ १६ ॥

**एकेन** निर्विकल्पयोगेन **समं** सर्वसाम्यं **समाधिं ब्रह्म अमृतं योगिनो यान्ति** । एवमभ्यासयोगं विना स्वात्मा न प्रकाशते इति सदृष्टान्तमाह— **यथेति** ॥ १४–१५ ॥ स्वकायो घटस्थानीय इत्युक्तः ॥ १६ ॥

गुरूपदेशात् ब्रह्मज्ञानम्

गुरुवाक्यसमा भिन्ने ब्रह्मज्ञानं स्फुटीभवेत् ।
कर्णधारं गुरुं प्राप्य कृत्वा सूक्ष्मं तरन्ति च ॥ १७ ॥
अभ्यासवासनाशक्त्या तरन्ति भवसागरम् ।

*गुरुवाक्यसमं स्वाज्ञानावरणे* **भिन्ने** *अथ* **ब्रह्मज्ञानम्** । **गुरुं प्राप्य** तदुपदिष्टार्थं नौकां **कृत्वा** ॥ १७ ॥

वाग्वृत्त्यधिष्ठानं ब्रह्म

परायामंकुरी[1]भूय पश्यन्त्यां द्विदलीकृता ॥ १८ ॥
मध्यमायां मुकुलिता वैखर्यां विकसीकृता ।
पूर्वं यथोदिता या वाग्विलोमेनास्तगा भवेत् ॥ १९ ॥
तस्या वाचः परो देवः कूटस्थो वाक्प्रबोधकः ।
सोऽहमस्मीति निश्चित्य यः सदा वर्तते पुमान् ॥ २० ॥
शब्दैरुच्चावचैर्नीचैर्भाषि[2]तोऽपि न लिप्यते ।

व्यावहारिकप्रपञ्चदृष्टीनां भवसागरतारणं कथमित्याशङ्क्य व्यावहारिकप्रपञ्चनिर्वाहकवाग्वृत्तिसम्भूतिस्थितिप्रळयाधिष्ठानब्रह्मज्ञानतो निर्लिप्तो भूत्वा लीलया भवसागरपारब्रह्मपदं यान्तीत्याह—परायामिति । वाग्वृत्तिः

चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेंगयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥

इति श्रुत्यनुरोधेन मूलाधारस्थपरायां अङ्कुरीभूय । अनाहतस्थपश्यन्त्याम् ॥ १८ ॥ विशुद्धिचक्रस्थमध्यमायां, आस्यस्थवैखर्याम् ॥ १९-२० ॥

विश्वादिप्रपञ्चाधिष्ठानं ब्रह्म

विश्वश्च तैजसश्चैव प्राज्ञश्चेति च ते त्रयः ॥ २१ ॥
विराड्धिरण्यगर्भश्च ईश्वरश्चेति ते त्रयः ।
ब्रह्माण्डं चैव पिण्डाण्डं लोका भूरादयः क्रमात् ॥ २२ ॥

[1] भूत्वं—अ [2] तोष—अ.

स्वस्वोपाधिलयादेव लीयन्ते प्रत्यगात्मनि ।
अण्डं ज्ञानाग्निना तप्तं लीयते कारणैः सह ॥ २३ ॥
परमात्मनि लीनं तत्परं ब्रह्मैव जायते ।

व्यष्टिसमष्टिप्रपञ्चसापेक्षविश्वविराडादिभेदे सति कथं विद्वान् भवसागरपारब्रह्मतया अवशिष्यते इत्याशङ्क्य यदि ते स्वातिरेकेण साधारव्यावहारिकप्रपञ्चोऽस्तीति भ्रान्तिस्तदा स्वज्ञानतः स्वाज्ञानप्रपञ्चो विलीयते, तद्विलयाधिकरणं स्वातिरिक्तासम्भवब्रह्ममात्रज्ञानेन निरधिकरणं सत् निष्प्रतियोगिकस्वमात्रमवशिष्यते इत्याह—विश्वश्चेति ॥ २१–२३ ॥ स्वाज्ञदृष्टिविकल्पितस्वातिरिक्तं स्वज्ञदृष्ट्या विलीनं सत् परमार्थदृष्ट्या ब्रह्मैव भवतीत्यर्थः ॥

निष्प्रतियोगिकं ब्रह्म

ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ॥ २४ ॥
अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ।

परमार्थदृष्ट्या कथं तद्ब्रह्म भवतीत्यत्राह—तत इति । यतः स्वाज्ञादिदृष्ट्या स्वातिरिक्तप्रपञ्चः तदपवादोऽपि भवति ततो वस्तुयाथार्थ्यदर्शनात् निर्गुणनिरवयवव्योमवत् स्तिमितगम्भीरं भूतभौतिकतेजस्तमःपरिच्छेदासम्भवात् न तेजो न तमस्ततम् ॥ २४ ॥ तथा नामरूपासम्भवात् अनाख्यमनभिव्यक्तं स्वाज्ञादिदृष्टिमोहे सत्यसति सत् किञ्चिदवशिष्यते, "ब्रह्ममात्रमसन्न हि" इति श्रुतेः ॥

ब्रह्मसिद्ध्युपायभूतं ध्यानम्

ध्यात्वा मध्यस्थमात्मानं कलशान्तरदीपवत् ॥ २५ ॥
अङ्गुष्ठमात्रमात्मानमधूमज्योतिरूपकम् ।
प्रकाशयन्तमन्तस्थं ध्यायेत्कूटस्थमव्ययम् ॥ २६ ॥

विज्ञानात्मा तथा देहे जाग्रत्स्वप्नसुषुप्तितः ।
मायया मोहितः पश्चाद्बहुजन्मान्तरे पुनः ॥ २७ ॥
सत्कर्मपरिपाकात्तु स्वविकारं चिकीर्षति ।
कोऽहं कथमयं दोषः संसाराख्य उपागतः ॥ २८ ॥
जाग्रत्स्वप्ने व्यवहरन्त्सुषुप्तौ क्व गतिर्मम ।
इति चिन्तापरो भूत्वा स्वभासा च विशेषतः ॥ २९ ॥
अज्ञानात्तु चिदाभासो बहिस्तापेन तापितः ।
दग्धं भवत्येव तदा तूलपिण्डमिवाग्निना ॥ ३० ॥
दहरस्थः प्रत्यगात्मा नष्टे ज्ञाने ततः परम् ।
विततो व्याप्य विज्ञानं दहत्येव क्षणेन तु ॥ ३१ ॥
मनोमयज्ञानमयान् सम्यग्दग्ध्वा क्रमेण तु ।
घटस्थदीपवच्छ्रुध्यदन्तरेव प्रकाशते ॥ ३२ ॥

एवं निष्प्रतियोगिकब्रह्ममात्रसिद्ध्युपायमाह—ध्यात्वेति ॥ २५–२६ ॥ स्वेन रूपेण विज्ञानात्मा परमात्माऽपि स्वातिरिक्तात्मात्मीयाभिमानतः संसरति, अनेककोटिजन्मसुकृतपरिपाकवशात् प्रत्यगभिमुखो भवति, ततः स्वाज्ञ-विकल्पितप्रपञ्चकलनाविरळविदेहमुक्तात्मरूपतया अवशिष्यते इत्याह—विज्ञानात्मेति ॥ २७–३३ ॥

### जीवन्मुक्तिविदेहमुक्ती

ध्यायन्नास्ते मुनिश्चैवमा सुप्तेरा मृतेस्तु यः ।
जीवन्मुक्तः स विज्ञेयः स धन्यः कृतकृत्यवान् ॥ ३३ ॥

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥ ३४ ॥
अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं तदेव शिष्यत्यमलं निरामयम् ॥३५॥

इत्युपनिषत् ॥

स्वदेहे रूढमूलदेहाभिमाने कालसात्कृते विरूपविलयं गते सत्यथ देहादावात्मात्मीयाभिमानासम्भवप्रबोधसमकालमस्पन्द पवनाकाशवद्विदेहमुक्तत्वं विशति विदेहमुक्तः स्वमात्रमवशिष्यते इत्यर्थः ॥ ३४ ॥ शब्दादिप्रपञ्चे सति विदेहमुक्तस्य स्वात्ममात्रता कथमित्यत आह —अशब्दमिति । सर्वापह्नवसिद्ध-विदेहमुक्तस्वरूपं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्यत्र न विवादः । यदि स्वाज्ञदृष्ट्या शब्दादिविकारः स्यात् तदा स्वज्ञदृष्ट्या शब्दादिविलयाधिकरणम-शब्दादिविशेषणविशिष्टं भवति, तदेव परमार्थदृष्ट्या निष्प्रतियोगिकस्वमात्रं अवशिष्यते इत्यर्थः ॥ ३५ ॥ इत्युपनिषच्छब्दः योगकुण्डल्युपनिषत्समाप्त्यर्थः ॥

इति तृतीयोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
योगकुण्डल्युपनिषद्व्याख्यानं लिखितं स्फुटम् ।
कुण्डल्युपनिषद्व्याख्याग्रन्थस्तु द्विशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे षडशीतिसंख्यापूरकं
योगकुण्डल्युपनिषद्विवरणं सम्पूर्णम्

# योगचूडामण्युपनिषत्

आप्यायन्तु॰ इति शान्तिः

योगाङ्गषट्कम्

योगचूडामणिं वक्ष्ये योगिनां हितकाम्यया ।
कैवल्यसिद्धिदं गूढं सेवितं योगवित्तमैः ॥ १ ॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥ २ ॥
एकं सिद्धासनं प्रोक्तं द्वितीयं कमलासनम् ।

मूलाधारादिषट्चक्रसहस्रारोपरिस्थितम् ।
[1]योगज्ञानमुख्यफलं रामचन्द्रपदं भजे ॥

इह खलु सामवेदप्रविभक्तेयं योगचूडामण्युपनिषत् षडंगयोगोपाय-प्रदर्शनपूर्वकं निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । स्वाङ्गलोकमुद्दिश्य श्रुतिरेवमाह—योगेति । योगचूडामणिं योगश्रेष्ठमित्यर्थः । कथमस्य चूडामणित्वं? इत्यत्राह—कैवल्येति । अस्य कैवल्यफलतया योगवित्तमसेवितत्वात् चूडामणित्वं युज्यते इत्यर्थः ॥ १ ॥

[1] योगज्ञानैकफलकं—इति च पाठः. योगज्ञानं मु—क.

यमनियमसाधनसंपन्नानां षडंगयोगः उच्यते—आसनमिति ॥ २ ॥ आदावासनमुद्दिशति—एकमिति । प्रोक्तं—सिद्धपद्मासनलक्षणस्य त्रिशिखिब्राह्मणोपनिषदि प्रकाशितत्वात् ॥

योगसिद्धये आवश्यकं देहतत्त्वज्ञानम्

षट्चक्रं षोडशाधारं त्रिलक्ष्यं व्योमपञ्चकम् ॥ ३ ॥
स्वदेहे यो न जानाति तस्य सिद्धिः कथं भवेत् ।

देहतत्त्वज्ञानं विना देहे सिद्धिः कथं स्यादित्याक्षिपति— षट्चक्रमिति । मूलाधारादिषट्चक्रम् । मूलाधारत्रिकोणमारभ्य षोडशान्तावधि षोडशाधारं विद्यते । तद्राजयोगसारे प्रसिद्धम् । बाह्यमध्यान्तर्भेदेन त्रिलक्ष्यम् । आकाशादिपरमाकाशान्तं व्योमपञ्चकम ॥ ३ ॥ शिष्टं स्पष्टम् ॥

मूलाधारादिचक्राणि

चतुर्दलं स्यादाधारं स्वाधिष्ठानं च षड्दलम् ॥ ४ ॥
नाभौ दशदलं पद्मं हृदयं द्वादशारकम् ।
षोडशारं विशुद्धाख्यं भ्रू[1]मध्ये द्विदलं तथा ॥ ५ ॥
सहस्रदलसंख्यातं ब्रह्मरन्ध्रे महापथि ।

यत् त्वया पृष्टं तत् मूलाधारादिसहस्रारान्तेष्वन्तर्भवतीत्याह— चतुर्दलमिति ॥ ४–५ ॥

योनिस्थानं परमज्योतिर्दर्शनम्

आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् ॥ ६ ॥
योनिस्थानं द्वयोर्मध्ये कामरूपं निगद्यते ।
कामाख्यं तु गुदस्थाने पङ्कजं तु चतुर्दलम् ॥ ७ ॥

[1] मध्यं विदलं—उ.

तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता ।
तस्य मध्ये महालिङ्गं पश्चिमाभिमुखं स्थितम् ॥ ८ ॥
नाभौ तु मणिवद्विम्बं यो जानाति स योगवित् ।
तप्तचामीकराभासं तडिल्लेखेव विस्फुरत् ॥ ९ ॥
त्रिकोणं तत्पुरं वह्नेरधोमेढ्रात्प्रतिष्ठितम् ।
समाधौ परमं ज्योतिरनन्तं विश्वतोमुखम् ॥ १० ॥
तस्मिन्दृष्टे महायोगे यातायातो न विद्यते ।

प्रथमद्वितीयचक्रतया नामोद्दिश्य क्रमेण विवृणोति—आधारमिति ॥ ६ ॥ योनिस्थानं किमित्यत्र—योनिस्थानमिति । द्वयोः मूलाधारस्वाधिष्ठानयोः । योगसिद्धेः तत्पीडनपूर्वकत्वात् तदेव विशदयति—कामाख्यमिति । योगसिद्धिकामाख्यम् ॥ ७ ॥ योनिः कुण्डलिनीशक्तिः । अस्या जगत्प्रसूतिहेतुत्वात् योनित्वमुपपद्यते । अत एव कामाख्या । तस्य सुषुम्नामध्यविलसितकुण्डलिनीभोगस्य मध्ये वायव्यं पश्चिमाभिमुखं महालिङ्गं केवलकुम्भके योगिप्रत्यक्षतया स्थितं भवति ॥ ८ ॥ एवंज्ञानवदभ्यासफलमाह—नाभाविति । मेढ्रादधोविद्यमानवह्निमण्डलस्वरूपमाह—तप्तेति ॥ ९ ॥ यस्य एवं योगकाले पावकी ज्वाला दृश्यते तस्य पुनरिडादिमार्गेण यातायातो न विद्यते इत्याह—समाधाविति ॥ १० ॥

स्वाधिष्ठानादिचक्रलक्षणम्

स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं [1]तदाश्रयम् ॥ ११ ॥
स्वाधिष्ठानाश्रयादस्मान्मेढ्रमेवाभिधीयते ।
तन्तुना मणिवत्प्रोतो योऽत्र कन्दः सुषुम्नया ॥ १२ ॥

[1] तदाश्रयः—क, अ १, अ २.

तन्नाभिमण्डले चक्रं प्रोच्यते मणिपूरकम् ।
द्वादशारे महाचक्रे पुण्यपापविवर्जिते ॥ १३ ॥
तावज्जीवो भ्रमत्येवं यावत्तत्त्वं न विन्दति ।

स्वाधिष्ठानलक्षणमाह—स्वेति ॥ ११ ॥ मेढ्रस्य प्राणनाडित्वात् स्वाधिष्ठानाश्रयत्वं युज्यते । मणिपूरकलक्षणं किमित्यत्र तन्तुनेति ॥ १२ ॥ स्वाज्ञानावधि जीवो ह्रदासनः सन् संसारमण्डले परिभ्रमतीत्याह—द्वादशार इति । पुण्यपापविवर्जिते—तत्र प्रत्यग्द्रष्टेः पुण्यपापसम्बन्धाभावात् ॥ १३ ॥

नाडीमहाचक्रम्

ऊर्ध्वं मेढ्रादधोनाभेः [1]कन्दयोनिः खगाण्डवत् ॥ १४ ॥
तत्र नाड्यः समुत्पन्नाः [2]महत्राणि द्विसप्ततिः ।
तेषु नाडीसहस्रेषु द्विसप्ततिरुदाहृ[3]ता ॥ १५ ॥
प्रधानाः प्राणवाहिन्यो भूयस्तासु दश स्मृताः ।
इडा च पिङ्गला चैव सुषुम्ना च तृतीयगा ॥ १६ ॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुसा कुहूश्चैव शङ्खिनी दशमी स्मृता ॥ १७ ॥
एतन्नाडीमहाचक्रं ज्ञातव्यं योगिभिः सदा ।

नाडीकन्दं तद्गतनाडीभेदं चाह—ऊर्ध्वमिति ॥ १४–१५ ॥ दशनाडीनां स्थानानि निर्दिशति—इडेति ॥ १६–१७ ॥

[1] कन्दं यो—क, अ २. [2] सहस्राणां—क, अ १.
[3] ताः—क, अ १, अ २.

नाडीस्थानानि

इडा वामे स्थिता भागे दक्षिणे पिङ्गला स्थिता ॥ १८ ॥
सुषुम्ना मध्यदेशे तु गान्धारी वामचक्षुषि ।
दक्षिणे हस्तिजिह्वा च पूषा कर्णे [1]तु दक्षिणे ॥ १९ ॥
यशस्विनी वामकर्णे चानने चाप्यलम्बुसा ।
कुहूश्च लिङ्गदेशे तु मूलस्थाने तु शङ्खिनी ॥ २० ॥
एवं द्वारं समाश्रित्य तिष्ठन्तं नाडयः क्रमात् ।

मध्यस्थसुषुम्नायाः इडा वामे स्थिता ॥ १८–२० ॥

नाडीसञ्चारिवायवः तद्व्यापाराश्च

इडापिङ्गलसौषुम्नाः प्राणमार्गे च संस्थिताः ॥ २१ ॥
सततं प्राणवाहिन्यः सोमसूर्याग्निदेवताः ।
प्राणापानसमानाख्या व्यानोदानौ च वायवः ॥ २२ ॥
नागः कूर्मोऽथ कृकरो देवदत्तो धनंजयः ।
हृदि प्राणः स्थितो नित्यमपानो गुदमण्डले ॥ २३ ॥
समानो नाभिदेशे तु उदानः कण्ठमध्यगः ।
व्यानः सर्वशरीरे तु प्रधानाः पञ्च वायवः ॥ २४ ॥
उद्गारे नाग आख्यातः कूर्म उन्मीलने तथा ।
कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे ॥ २५ ॥

[1] अ १, अ २ .

न जहाति मृतं वापि सर्वव्यापी धनंजयः ।
एते नाडीषु सर्वासु भ्रमन्ते जीवजन्तवः ॥ २६ ॥

तत्र अयोगियोगिभेदेन द्वैडेति ॥ २१ ॥ नाडीगतप्राणादिस्वरूपं तद्व्यापारं चाह—प्राणेति ॥ २२–२५ ॥ जीवजन्तवः—जीवरूपिण इत्यर्थः, तेषां जीवाधारत्वात् ॥ २६ ॥

प्राणचलनाचलनाभ्यां जीवचलनाचलने

आक्षिप्तो भुजदण्डेन [1]यथोच्चलति कन्तुकः ।
प्राणापानसमाक्षिप्तस्तथा जीवो न तिष्ठति ॥ २७ ॥
प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च [2]धावति ।
वामदक्षिणमार्गाभ्यां चञ्चलत्वान्न दृश्यते ॥ २८ ॥
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ।
गुणबद्धस्तथा जीवः प्राणापानेन कर्षति ॥ २९ ॥
प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च गच्छति ।
अपानः कर्षति प्राणं प्राणोऽपानेन कर्षति ॥ ३० ॥
ऊर्ध्वाधःसंस्थितावेतौ यो जानाति स योगवित् ।

प्राणचलनाचलनसापेक्षं जीवचलनाचलनमित्याह—आक्षिप्त इति ॥ २७ ॥ तदेव विशदयति—प्राणेति ॥ २८–३० ॥

[1] यथा च— क, अ १, अ २. [2] गच्छति—ङ.

अजपागायत्र्या अनुसन्धानम्

हकारेण बहिर्याति सकारेण विशेत्पुनः ॥ ३१ ॥
हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ।
षट्शतानि दिवा[1]रात्रौ सहस्राण्येकविंशतिः ॥ ३२ ॥
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्वदा ।
अजपा नाम गायत्री योगिनां मोक्षदा सदा ॥ ३३ ॥
अस्याः संकल्पमात्रेण सर्वपापैः प्रमुच्यते ।
अनया सदृशी विद्या अनया सदृशो जपः ॥ ३४ ॥
अनया सदृशं ज्ञानं न भूतं न भविष्यति ।
कुण्डलिन्यां समुद्भूता गायत्री प्राणधारिणी ॥ ३५ ॥
प्राणविद्या महाविद्या यस्तां वेत्ति स वेदवित् ।

प्राणापानोच्छ्वासादिव्यापृतिरेव हंसमनुः अजपागायत्री जीवनिर्वर्त्या भवतीति अजपेयत्तां तज्ज्ञानफलं चाह—हकारेणेति ॥ ३१–३३ ॥ उच्छ्वासनिःश्वासयोः हंसः सोऽहमित्यजपाऽनुसन्धानेन जीवः **सर्वपापैः प्रमुच्यते** । अजपां स्तौति—अनयेति ॥ ३४ ॥ अजपा कुण्डलिनीजन्येति ज्ञानफलमाह—कुण्डलिन्यामिति ॥ ३५ ॥

कुण्डलिन्या मोक्षद्वारभेदनम्

कन्दोर्ध्वे कुण्डलीशक्तिरष्टधा कुण्डलाकृतिः ॥ ३६ ॥
ब्रह्मद्वारमुखं नित्यं मुखेनाच्छाद्य तिष्ठति ।
येन द्वारेण गन्तव्यं ब्रह्म[2]द्वारमनामयम् ॥ ३७ ॥

[1] रात्रं—क, अ २. [2] द्वारं मनो—अ २.

मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ।
प्रबुद्धा वह्नियोगेन मनसा मरुता सह ॥ ३८ ॥
सूचीवद्वात्रमादाय व्रजत्यूर्ध्वं सुषुम्नया ।
उद्घाटयेत्कवाटं तु [1]यथा कुञ्चिकया गृहम् ।
कुण्डलिन्या तथा योगी मोक्षद्वारं प्रभेदयेत् ॥ ३९ ॥
कृत्वा संपुटितौ करौ दृढतरं [2]बद्धोऽथ पद्मासनं
गाढं वक्षसि संनिधाय चुबुकं ध्यानं च तच्चेष्टितम् ।
वारंवारमपानमूर्ध्वमनिलं प्रोच्चा[3]रयेत्पूरितं
मुञ्चन्प्राणमुपैति बोधमतुलं शक्तिप्रभावान्नरः ॥ ४० ॥
अङ्गानां मर्दनं कृत्वा श्रमसंजातवारिणा ।
कट्वम्ललवणत्यागी क्षीरभोजनमाचरेत् ॥ ४१ ॥
ब्रह्मचारी मिताहारी योगी योगपरायणः ।
अब्दादूर्ध्वं भवेत्सिद्धो नात्र कार्या विचारणा ॥ ४२ ॥
सुस्निग्धमधुरा[4]हारश्चतुर्थां[5]शावशेषितः ।
भुञ्जते शिवसंप्रीत्या मिता[6]हारी स उच्यते ॥ ४३ ॥
कन्दोर्ध्वे कुण्डलीशक्तिरष्टधा कुण्डलाकृतिः ।
बन्धनाय च मूढानां योगिनां मोक्षदा सदा ॥ ४४ ॥

[1] यदा—क, अ १.
[2] बद्धा तु—क, अ १, अ २.
[3] रितं—क. रयन्—अ २.
[4] हारं च—अ १.
[5] शविवर्जितः—क, अ २. शावशेषितं—अ १.
[6] हारः—क, अ २.

सर्वप्राण्याधारकुण्डलिनीस्वरूपं तद्व्याप्तिं चाह—कन्देति ॥ ३६ ॥ सुषुम्नाख्यं ब्रह्मद्वारमुखम् ॥ ३७ ॥ अयोगिनां मूलाधारप्रदेशे-प्रसुप्ता । योगिनां योगकाले प्रबुद्धा ॥ ३८ ॥ यतः इयं मोक्षद्वारभेदनपटुः अतः कुञ्चिकया देवालयकवाटमिव योगी तया मोक्षद्वारं विभेदयेदित्याह—उद्घाटयेदिति ॥ ३९ ॥ तद्भेदनोपायं तत्फलं चाह—कृत्वेति । नरो योगी स्वहृदयसमं स्वकरौ सम्पुटितौ कृत्वा पद्मासनं बद्ध्वा गाढं वक्षसि सन्निधाय चुबुकं कण्ठसङ्कोचलक्षणजालन्धरबन्धमारोप्य मूलबन्धेन वारंवारं अपानं ऊर्ध्वं अनिलपूरितं प्रोद्धारयेत् ऊर्ध्वं प्राणेनैक्यं नयेत् । ऐक्यानन्तरं केवल-कुम्भकमास्थाय कुण्डलिनीशक्तिप्रभावात् तत्कुण्डलिनीचेष्टितं प्राणादिव्यापारं मुञ्चन् शरीरत्रयकलनाविरळं ब्रह्मास्मीति मननं ध्यानं च कृत्वा सम्यक् प्रबोधमेत्य तत्समकालं प्राणं परमात्मानं उपैति ॥ ४० ॥ एवं साधनानुष्ठानवान् योगी अचिरात् सिद्धो भवतीत्याह—अङ्गानामिति । यद्यभ्यासकाले स्वेदो जायते तदा अङ्गानां . . . वारिणा दृढकायो भवेदित्यर्थः । योगानुकूलाहार-नियममाह—कट्विति ॥ ४१–४३ ॥ अयोगियोगिनां इयं शक्तिः-बन्धमोक्षहेतुः स्यादित्याह—कन्देति । कन्दाधोभागे यदि स्थिता तदा बन्धनाय । यदि सुषुम्नामार्गेण कन्दोर्ध्वमार्गं गता तदा योगिनां मोक्षदा ॥ ४४ ॥

### बन्धत्रयम्

महामुद्रा नभोमुद्रा [1]ओड्याणं च जलन्धरम् ।
मूलबन्धं च यो वेत्ति स योगी मुक्तिभाजनम् ॥ ४५ ॥
पार्ष्णिघातेन संपीड्य योनिमाकुञ्चयेद्दृढम् ।
अपानमूर्ध्वमाकृष्य मूलबन्धो[2]यमुच्यते ॥ ४६ ॥

[1] ओड्या—क, अ १, अ २. [2] विधीयते—क, अ १, अ २.

अपानप्राणयोरैक्यं क्षयान्मूत्रपुरीषयोः ।
युवा भवति [1]वृद्धोऽपि सततं मूलबन्धनात् ॥ ४७ ॥

ओड्याणं कुरुते यस्मादविश्रान्तं महाखगः ।
ओड्डियाणं तदेव स्यान्मृत्युमातङ्गकेसरी ॥ ४८ ॥

उदरात्पश्चिमं ताणमधोनाभेर्निगद्यते ।
ओड्याणमुदरे बन्धस्तत्र बन्धो विधीयते ॥ ४९ ॥

बध्नाति हि शिरोजातमधोगामि नभोजलम् ।
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः ॥ ५० ॥

जालन्धरे कृते बन्धे कण्ठ[2]दुःखौघनाशने ।
न पीयूषं पतत्यग्नौ न च वायुः प्रधावति ॥ ५१ ॥

वक्ष्यमाणमहामुद्राऽऽदिज्ञानतो मुक्तिभाक् भवतीत्याह—महामुद्रेति ॥ ४५ ॥ मूलबन्धादिलक्षणमाह—पार्ष्णीति ॥ ४६ ॥ तत्फलमेतत्—अपानेति ॥ ४७–५२ ॥

खेचरीमुद्रा

कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ ५२ ॥

न रोगो मरणं तस्य न निद्रा न क्षुधा तृषा ।
न च मूर्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ॥ ५३ ॥

[1] वृद्धो वा—उ, उ १. [2] संकोचलक्षणे—क, अ १, अ २.

पीड्यते न च रोगेण लिप्यते न स कर्मभिः ।
[1]बध्यते न च केनापि यो मुद्रां वेत्ति खेचरीम् ॥ ९४ ॥
चित्तं चरति खे यस्माज्जिह्वा चरति खे यतः ।
तेनेयं खेचरी मुद्रा सर्वसिद्धनमस्कृता ॥ ९५ ॥
बिन्दुमूलशरीराणि सिरा[2]यत्र प्रतिष्ठिताः ।
भावयन्ति शरीराणि आपादतलमस्तकम् ॥ ९६ ॥
खेचर्या मुद्रितं येन विवरं लम्बिकोर्ध्वतः ।
न तस्य क्षीयते बिन्दुः कामिन्यालिङ्गितस्य च ॥ ९७ ॥
यावद्बिन्दुः स्थितो देहे तावन्मृत्युभयं कुतः ।
यावद्बद्धा नभोमुद्रा तावद्बिन्दुर्न गच्छति ॥ ९८ ॥

तत्फलमेतत् न रोग इति ॥ ९३–९५ ॥ खेचरीमुद्रारूढाः योगिनः शरीरं सर्वं पश्यन्तीत्याह—बिन्द्रिति । सिराशब्देन नाड्यः उच्यन्ते । तदुपलक्षितचतुर्दशभुवनानि यत्र प्रतिष्ठितानि तद्बिन्दुः ईश्वरः एव मूलं येषां अनन्तकोटिब्रह्माण्डानां तानि बिन्दुमूलानि तानि च शरीराणि अनन्तकोटि-ब्रह्माण्डानि खेचरीमुद्रारूढयोगिनः स्वाधिष्ठितापादतलमस्तकं स्वशरीरं भावयन्ति महाविराड्भावं नयन्तीत्यर्थः ॥ ९६ ॥ किंच—खेचर्येति ॥ ९७ ॥ नभोमुद्रा खेचरीत्यर्थः ॥ ९८ ॥

### वज्रोळ्यादियोगिलक्षणम्

ज्वलितोऽपि यथा बिन्दुः संप्राप्तश्च हुताशनम् ।
व्रजत्यूर्ध्वं गतः शक्त्या निरुद्धो योनिमुद्रया ॥ ९९ ॥

[1] बाध्यते—क, अ १, अ २. [2] स्तत्र—अ १.

स पुनर्द्विविधो बिन्दुः पाण्डरो लोहितस्तथा ।
पाण्डरं शुक्रमित्याहुर्लोहिताख्यं महारजः ॥ ६० ॥
सिन्दूरव्रातसंकाशं रविस्थानस्थितं रजः ।
शशिस्थानस्थितं शुक्रं तयोरैक्यं सुदुर्लभम् ॥ ६१ ॥
बिन्दुर्ब्रह्मा रजः शक्तिर्बिन्दुरिन्दू रजो रविः ।
उभयोः सङ्गमादेव प्राप्यते परमं पदम् ॥ ६२ ॥
वायुना शक्तिचालेन प्रेरितं च यथा रजः ।
याति बिन्दुः सदैकत्वं भवेद्दिव्यवपुस्तदा ॥ ६३ ॥
शुक्रं चन्द्रेण संयुक्तं रजः [1]सूर्यसमन्वितम् ।
तयोः समरसैकत्वं यो जानाति स योगवित् ॥ ६४ ॥

वज्रोळ्यादियोगिलक्षणमाह—ज्वलितोऽपीति । यथा लोहद्रावकबिन्दुः लोहसान्निध्यात् ज्वलति तथाऽयं बिन्दुः योषित्सान्निध्यात् ज्वलितोऽपि पुरुषेण हुतं रेतः अश्नातीति हुताशनं योषिद्योनिमण्डलं संप्राप्तोऽपि लिंगाकुञ्चनलक्षणया योनिमुद्रया शक्त्या यथाबलं निरुद्धः सन् ऊर्ध्वमेव व्रजति नाधः पततीत्यर्थः । अस्यामरोळियोगसिद्धत्वात् तद्बिन्दुः कदाऽपि न क्षरतीति भावः ॥ ५९–६० ॥ भ्रूमण्डलोर्ध्ववामदक्षिणभागयोः रविशशिस्थाने भवतः । रजःशुक्ररूपयोः सूर्याचन्द्रमसोः ऐक्यं योगिनो विना यस्य कस्यापि दुर्लभमित्यर्थः ॥ ६१ ॥ किञ्च—बिन्दुरिति ॥ ६२ ॥ केन रवीन्द्वोरैक्यं, तेन किं जायते इत्यत आह—वायुनेति । यथा स्वशक्तिचालेन प्रचण्डवायुना प्रेरितं सद्रजो रविनैकत्वमायाति तथा वायुना सह कुण्डलिनीशक्तिचालेन प्रेरितं शशिमण्डलस्थं रजः, बिन्दुरिति तृतीयार्थे प्रथमा, बिन्दुना रविणा सदा एकत्वं

[1] सूर्येण संगतं—क, अ १, अ २.

याति । यदा सूर्याचन्द्रमसोरैक्यं भवति तदा अयं योगी दिव्यवपुः भवेत् ॥ ६३–६४ ॥

### महामुद्रा

शोधनं नाडिजालस्य चालनं चन्द्रसूर्ययोः ।
रसानां शोषणं चैव महामुद्राऽभिधीयते ॥ ६५ ॥
वक्षोन्यस्तहनुः प्रपीड्य सुचिरं योनिं च वामाङ्घ्रिणा
हस्ताभ्यामनुधारयन्प्रसरितं पादं तथा दक्षिणम् ।
आपूर्य श्वसनेन कुक्षियुगलं बद्ध्वा शनै रेचये-
देतद्व्याधिविनाशिनी सुमहती मुद्रा नृणां प्रोच्यते ॥ ६६ ॥
चन्द्रांशेन समभ्यस्य सूर्यांशेनाभ्यसेत्पुनः ।
या तुल्या तु भवेत्संख्या ततो मुद्रां विसर्जयेत् ॥ ६७ ॥
नहि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः ।
अतिमुक्तं विषं घोरं पीयूषमिव जीर्यते ॥ ६८ ॥
क्षयकुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः ।
तस्य रोगाः क्षयं यान्ति महामुद्रां तु योऽभ्यसेत् ॥ ६९ ॥
कथितेयं महामुद्रा महासिद्धिकरी नृणाम् ।
गोपनीया प्रयत्नेन न देया यस्य कस्यचित् ॥ ७० ॥

महामुद्रास्वरूपं तत्फलं चाह—शोधनमिति । यन्नाडीशुद्धिकरं चन्द्र-सूर्ययोरपि चालकं शरीरस्थदुष्टवातपित्तादिरसानां शोषणकरं भवति तदेव महामुद्रेत्यभिधीयते ॥ ६५ ॥ तदभ्यासप्रकारस्तु—आदौ जालन्धरबन्ध-

मारोप्य वामपादतलेन योनिं निपीड्य बहिः प्रसारितदक्षिणचरणं हस्ताभ्यां धारयन् चन्द्रनाडीसमुद्भवश्वसनेन वामदक्षिणकुक्षियुगळमापूर्य निरुच्छ्वासं बद्ध्वा कुम्भकान्ते पिंगळया शनैरेव रेचयेदिति यदेतत् सैषा नृणां सर्वव्याधिविनाशिनी महामुद्रा भवति ॥ ६६ ॥ एवं चन्द्रांशेनेति ॥ ६७–७० ॥

प्रणवजपः

पद्मासनं समारुह्य समकायशिरोधरः ।
नासाग्रदृष्टिरेकान्ते जपेदोंकारमव्ययम् ॥ ७१ ॥

एवं महामुद्रामभ्यस्य ततो यथोक्तविधिना प्रणवार्थानुसन्धानपूर्वकं प्रणवं सदा जपेदित्याह—पद्मेति ॥ ७१ ॥

प्रणवार्थरूपं ब्रह्म

ॐ नित्यं शुद्धं बुद्धं निर्विकल्पं निरञ्जनं निराख्यातमनादिनिधनमेकं तुरीयं यद्भूतं भवद्भविष्यत् परिवर्तमानं सर्वदाऽनवच्छिन्नं परं ब्रह्म । तस्माज्जाता परा शक्तिः स्वयं ज्योतिरात्मिका । आत्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । तेषां पञ्चभूतानां पतयः पञ्च सदाशिवेश्वररुद्रविष्णुब्रह्माणश्चेति । तेषां ब्रह्मविष्णुरुद्राश्चोत्पत्तिस्थितिलयकर्तारः । राजसो ब्रह्मा सात्त्विको विष्णुस्तामसो रुद्र इति । एते त्रयो गुणयुक्ताः । ब्रह्मा देवानां प्रथमः संबभूव । धाता च सृष्टौ विष्णुश्च स्थितौ रुद्रश्च नाशे भोगाय चेन्द्रः प्रथमजा बभूवुः । एतेषां ब्रह्मणो लोका देवतिर्यङ्नरस्थावराश्च जायन्ते । तेषां मनुष्यादीनां

पञ्चभूतसमवायः शरीरम् । ज्ञानकर्मेन्द्रियैर्ज्ञानविषयैः प्राणादि-पञ्चवायुमनोबुद्धिचित्ताहंकारैः स्थूलकल्पितैः सोऽपि स्थूलप्रकृतिरित्युच्यते । ज्ञानकर्मेन्द्रियैर्ज्ञानविषयैः प्राणादिपञ्चवायुमनोबुद्धिभिश्च सूक्ष्मस्थोऽपि लिङ्गमेवेत्युच्यते । गुणत्रययुक्तं कारणम् । सर्वेषा[1]मेवं त्रीणि शरीराणि वर्तन्ते । जाग्रत्स्वप्नसुषुप्तितुरीयाश्चेत्यवस्थाश्चतस्रः । तासामवस्थानामधिपतयश्चत्वारः पुरुषा विश्वतैजसप्राज्ञात्मानश्चेति ॥

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक्तथा प्राज्ञः सर्वमाक्षीत्यतः परः ॥ ७२ ॥
प्रणवः सर्वदा तिष्ठेत्सर्वजीवेषु भोगतः ।
अभिरामस्तु सर्वासु ह्यवस्थासु ह्यधोमुखः ॥ ७३ ॥

ओङ्कारार्थश्चैतन्यं किमित्यत्र ब्रह्मेत्याह—ओमिति । नित्यशुद्धादिपदानां नृसिंहतापिन्यां पदशो व्याख्यातत्वात् । भूतमिति भूतादिकालत्रयेऽपि स्वयं एकरूपेणावस्थितं, उत्पत्तिप्रळयवैगळ्यादनादिनिधनं, अनवच्छिन्नं परिच्छेदरहितं यत् तदेव प्रणवार्थश्चैतन्यं ब्रह्मेत्यर्थः । ब्रह्मणो निष्प्रतियोगिकस्वमात्रत्वे अव्यक्तादिस्थावरान्तसृष्टिः कुतः ? इत्याशङ्क्य तदज्ञानादेतत् सर्वं तस्मात् जातवत् भातीत्याह—तस्मादिति । स्वाज्ञदृष्टया यन्निर्विशेषं ब्रह्म निष्प्रतियोगिकस्वमात्रं तस्मान्निर्विशेषब्रह्मणः सकाशात् चित्सामान्यात्मिका परा शक्तिः स्वागेपापवादाधिकरणसान्निध्यात् स्वयंज्योतिरात्मिका जातेव जाता न वस्तुत इत्यर्थः । एवं स्वाज्ञदृष्टिविकल्पिताव्यक्तमहत्तत्त्वोपाधिकात् आत्मनः । एवं आत्मनः सकाशात् क्रमेण पञ्चभूतानि जातानि, तेषां इत्यादि । सृष्ट्यादिकर्तृत्वं गुणत्रययोगनिमित्तं तत् कथं? राजस इति । सृष्ट्यादिकर्तारो ब्रह्मादयः

[1] मेव—अ १, अ २.

प्रथमजपदं गता इत्याह—ब्रह्मेति । "सदेव सोम्येदमग्र आसीत्", "हिरण्यगर्भः समवर्ततात्रे," इति श्रुतेः । तत्र धातेत्यादि । यदेकमेवाग्रे सच्चैतन्यं समवर्तत तदेव सृष्ट्यादिकार्यभेदानुरोधेन ब्रह्मविष्णुरुद्रेन्द्रतां प्राप्तवत् भातीति तेषां प्रथमजत्वं उक्तमित्यर्थः । एतेषां मध्ये ब्रह्मण इत्यादि । ब्रह्मणः सकाशात् भूरादिचतुर्दशलोकाः तन्निवासिनो देवतिर्यङ्नगाः तद्भोज्यतया स्थावराश्च स्थावराणि च जायन्ते । तेषां शरीरं भौतिकमित्याह—तेषामिति । शरीरं भवति । जाग्रदाद्यवस्थारूढजीवापेक्षया तत्तदवस्थाऽनुरोधेन शरीरत्रयं प्रदर्शयति —ज्ञानेति । विषयैः सह स्थूलकल्पितैः पञ्चीकृतभूतकार्यैः यो विशिष्टः सोऽपि जीवः । जाग्रदवस्थाभिमानिस्थूलशरीरोपाधिको विश्व इत्यर्थः । तैजसभोग्यलिंगशरीरमाह—ज्ञानेति । अपञ्चीकृतभूतकार्यैः ज्ञान . . . विषयैः सह प्राणादि . . . बुद्धिभिश्च युक्तस्तैजसः स्वप्नावस्थायां सूक्ष्मस्थोऽपि सूक्ष्मशरीर-स्थोऽपि तदभेदेन अयं लिङ्गमेवेत्युच्यते । स्वापाभिमानिप्राज्ञनिर्वर्त्यं यत् तत् गुणत्रययुक्तं कारणं कारणशरीरं भवति । विश्वादित्रयस्य स्थूलादिभुक्त्वं तुरीयस्य तद्राहित्यं चाह—विश्व इति ॥ ७२ ॥ तुर्यप्रणवस्य सर्वव्यापकत्वमाह—प्रणव इति । प्रणवः तुरीयोङ्कारस्तुरीयः साक्षी स्थूलप्रविभक्तादिभोगाभिमानतः विश्वादिभावं गतेषु सर्वजीवेषु सर्वदा प्रत्यग्रूपेण तिष्ठेत् । अभितः परितो राजते महीयते इत्यभिरामः । तुरीयस्तु सर्वासु जाग्रदाद्यवस्थासु मिथ्यात्वदृष्ट्या अधोमुखः पराङ्मुखः उदासीनो भवति, विश्वादिवत् जाग्रदादिसम्मुखो न कदाऽपि भवतीत्यर्थः ॥ ७३ ॥

प्रणवावयवानां प्रत्येकमर्थः

अकार उकारो मकारश्चेति त्रयो वर्णास्त्रयो वेदास्त्रयो लोकास्त्रयो गुणास्त्रयोऽक्षराणि एवं प्रणवः प्रकाशते ।

अकारो [1]जाग्रति नेत्रे वर्तते सर्वजन्तुषु ।
उकारः कण्ठतः स्वप्ने मकारो हृदि सुप्तितः ॥ ७४ ॥

[1] जग्रती—क, अ २.

विराड्विश्वः स्थूलश्चाकारः । हिरण्यगर्भस्तैजसः सूक्ष्मश्च उकारः । कारणाव्याकृतप्राज्ञश्च मकारः ।

अकारो राजसो रक्तो ब्रह्मा चेतन उच्यते ।
उकारः सात्त्विकः शुक्लो विष्णुरित्यभिधीयते ॥ ७५ ॥
मकारस्तामसः कृष्णो रुद्रश्चेति तथोच्यते ।
प्रणवात्प्रभवो ब्रह्मा प्रणवात्प्रभवो हरिः ॥ ७६ ॥
प्रणवात्प्रभवो रुद्रः प्रणवो हि परो भवेत् ।
अकारे लीयते ब्रह्मा [1]उकारे लीयते हरिः ॥ ७७ ॥
मकारे लीयते रुद्रः प्रणवो हि प्रकाशते ।

स्वातिरिक्तप्रपञ्चजातं प्रणवावयवसम्भूतमित्याह—अकार इति । त्रयः त्रीणि अक्षराणि । एवं वस्तुतः सदा प्रणवः प्रकाशते कथमकारादीनां सर्वव्यापकत्वमित्यत्र—अकार इति ॥ ७४–७५ ॥ ब्रह्माद्यारोपापवादाधारस्तुरीयोङ्कार एवेत्याह—प्रणवादिति ॥ ७६ ॥ रुद्रः, ततः प्रणवः ॥ ७७ ॥

तुरीयोङ्काराग्रविद्योतब्रह्म

ज्ञानिनामूर्ध्वगो भूयादज्ञा[2]नीनामधोमुखः ॥ ७८ ॥
एवं वै प्रणवस्तिष्ठेद्यस्तं वेद स वेदवित् ।
अनाहतस्वरूपेण ज्ञानिनामूर्ध्वगो भवेत् ॥ ७९ ॥
तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत् ।
प्रणवस्य ध्वनिस्तद्वत्तदग्रं ब्रह्म चोच्यते ॥ ८० ॥

[1] ङुकारे—क, अ १. [2] ने स्यादधो—मु.

ज्योतिर्मयं तदग्रं स्यादवाच्यं बुद्धिसूक्ष्मतः ।
ददृशुर्ये महात्मानो यस्तं वेद स वेदवित् ॥ ८१ ॥

स्वज्ञस्वाज्ञदृष्ट्या ऊर्ध्वाधोमुखतया प्रणव एव प्रकाशत इति यो वेद स वेदवित् भवतीत्याह—ज्ञानिनामिति । ज्ञानिदृष्ट्या अनाहतविलसत्प्रत्यगभिन्नब्रह्मरूपेण तुरीयोङ्कारात्रविद्योतब्रह्ममात्रतया सर्वोर्ध्वं प्रणवो विभाति, अज्ञानामधोमुखाकारादितया विभातीत्यर्थः ॥ ७८–७९ ॥ किंच—तैलेति ॥ ८०–८१ ॥

प्रणवार्थतुरीयहंसः

जाग्रन्नेत्रद्वयोर्मध्ये हंस एव प्रकाशते ।
सकारः खेचरी प्रोक्तस्त्वंपदं चेति निश्चितम् ॥ ८२ ॥
हकारः परमेशः स्यात्तत्पदं चेति निश्चितम् ।
सकारो ध्यायते जन्तुर्हकारो हि भवेद् ध्रुवम् ॥ ८३ ॥
इन्द्रियैर्बध्यते जीव आत्मा चैव न बध्यते ।
ममत्वेन भवेज्जीवो निर्ममत्वेन केवलः ॥ ८४ ॥

प्रणवार्थतुरीयहंसः क्व आसनमासाद्य प्रकाशते इत्यत आह—जाग्रदिति । "नेत्रस्थं जागरितं विद्यात्" इति श्रुतितः नेत्रजागरणयोः आधाराधेयता श्रूयते । एवं आधाराधेयात्मकजाग्रन्नेत्रद्वययोः मध्ये तदारोपापवादाधिकरणतया हंसः प्रत्यगभिन्नपरमात्मैव प्रकाशते । हंसस्य प्रत्यक्त्वं परत्वं तयोः ऐक्यसिद्धत्वं वा कुत इत्यत आह—सकार इति । सर्वप्राणिहृदये विद्यमाने खे अव्याकृताकाशे तत्रत्यपराग्रूपलिंगशरीरप्रातिलोम्येन चरतीति खेचरी सकार इति प्रोक्तः सकारस्य खेचरीबीजत्वात्, "सत्वंपदार्थः" इति प्रभोक्तेः । अतः सकारबीजं त्वंपदार्थप्रत्यक्चैतन्यमिति निश्चितम् ॥ ८२ ॥ हकारार्थः परमेशः परमात्मा स्यात् । अतः हकारबीजार्थभूतं तत्पदलक्ष्यपरमात्मचैतन्यमिति

निश्चितम् । एवं सकारवाच्यो जन्तुः जीवः स्वगतजीवत्वमपास्य सोऽहंशब्दलक्ष्यप्रत्यगभिन्नपरमात्माऽस्मीति यद्यात्मानं ध्यायते जानाति तदा हकारार्थः परमात्मैव भवेदिति यत् तत् ध्रुवं सत्यं इत्यर्थः, "ब्रह्म वेद ब्रह्मैव भवति" इति श्रुतेः ॥ ८३ ॥ देहेन्द्रियादौ अहंममाभिमानभावाभावौ जीवपर भेदाभेदहेतू भवत इत्याह—इन्द्रियैरिति ॥ ८४ ॥

केवलात्मप्रकाशकप्रणवजपः

भूर्भुवः स्वरिमे लोकाः सोमसूर्याग्निदेवताः ।
यस्य मात्रासु तिष्ठन्ति तत्परं ज्योतिरोमिति ॥ ८५ ॥
इच्छा क्रिया तथा ज्ञानं ब्राह्मी रौद्री च वैष्णवी ।
त्रिधा मात्रा[1]स्थितिर्यत्र तत्परं ज्योतिरोमिति ॥ ८६ ॥
वचसा तज्जपेन्नित्यं वपुषा तत्समभ्यसेत् ।
मनसा तज्जपेन्नित्यं तत्परं ज्योतिरोमिति ॥ ८७ ॥
शुचिर्वाऽप्यशुचिर्वाऽपि यो जपेत्प्रणवं सदा ।
न स लिप्यति पापेन पद्मपत्रमिवाम्भसा ॥ ८८ ॥

केवलात्मप्रकाशकप्रणवस्वरूपं निर्दिशति—भूरिति ॥ ८५-८६ ॥ सन्तो यदनुसन्धानतः कृतकृत्या भवन्ति तदेव प्रणवार्थपरंज्योतिरित्याह—वचसेति ॥ ८७ ॥ प्रणवजपस्य शुच्यादिनियमाभावप्रकटनपूर्वकं तत्फलमाह—शुचिरिति ॥ ८८ ॥

प्रणवानुष्ठायिनोऽपि प्राणजय आवश्यकः

चले वाते चलो बिन्दुर्निश्चले निश्चलो भवेत् ।
योगी स्थाणुत्वमाप्नोति ततो वायुं निरुन्धयेत् ॥ ८९ ॥

[1] स्थिताय—अ १, अ २.

यावद्वायुः स्थितो देहे तावज्जीवो न मुञ्चति ।
मरणं तस्य निष्क्रान्तिस्ततो [1]वायुं निरुन्धयेत् ॥ ९० ॥
यावद्बद्धो मरुद् देहे तावज्जीवो न मुञ्चति ।
यावद्दृढिर्भुवोर्मध्ये तावत्कालभयं कुतः ॥ ९१ ॥
[illegible] प्राणायामपरो भवेत् ।
योगिनो [illegible] ततः प्राणान्निरोधयेत् ॥ ९२ ॥

*प्रणवानुष्ठानेन पुरुषार्थसिद्धेः किं प्राणजयेनेत्याशङ्क्य बिन्दुप्राणयोः अन्योन्याश्रयतः जीवनहेतुबिन्दुजयार्थं प्राणजयः कर्तव्य इत्याह—चल इति ॥ ८९-९१ ॥ अत एव ब्रह्मादयोऽपि प्राणायामपरा भवन्तीत्याह—* अल्पेति । यतः प्राणायामपरा भवन्ति ततः तस्मात् ॥ ९२ ॥

नाडीशुद्धितः प्राणायामसिद्धिः

षड्विंशदङ्गुली[2]हंसः प्रयाणं कुरुते बहिः ।
वामदक्षिणमार्गेण प्राणायामो विधीयते ॥ ९३ ॥
शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम् ।
तदैव जायते योगी प्राणसंग्रहणक्षमः ॥ ९४ ॥

प्राणगतिनिरोधनमेव प्राणायाम इत्याह— षड्विंशदिति । इडापिंगळ-मार्गमाश्रित्य बहिः षड्विंशत्यंगुलपर्यन्तं प्राणः प्रसरति, तद्गतिकुण्ठनाय प्राणायामो विधीयते इत्यर्थः ॥ ९३ ॥ नाडीशुद्ध्यनन्तरं केवलकुम्भकशक्तिः भवतीत्याह—शुद्धिमिति ॥ ९४ ॥

[1] ह्यायुर्नि—उ. [2] हंसः—क, अ १, अ २, उ १.

### प्राणायामलक्षणम्

बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् ।
धारयेद्वा यथाशक्त्या भूयः सूर्येण रेचयेत् ॥ ९५ ॥
अमृतोदधिसंकाशं गोक्षीरधवलोपमम् ।
ध्यात्वा चन्द्र[1]मसं बिम्बं प्राणायामे सुखी भवेत् ॥ ९६ ॥
स्फुरत्प्रज्वलसज्ज्वालापूज्यमादित्यमण्डलम् ।
ध्यात्वा हृदि स्थितं योगी प्राणायामे सुखी भवेत् ॥ ९७ ॥

प्राणायामलक्षणं तत्र ध्येयबिम्बद्वयं चाह—बद्धेति ॥ ९५–९७ ॥

### नाडीशोधनम्

प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यथा रेचयेत्
पीत्वा पिङ्गलया समीरणमथो [2]बद्ध्वा त्यजेद्वामया ।
सूर्याचन्द्रमसोरनेन विधिना बिन्दुद्वयं ध्यायतः
शुद्धा नाडिगणा भवन्ति यमिनो मासद्वयादूर्ध्वतः ॥ ९८ ॥
यथेष्ट[3]धारणं वायोरनलस्य प्रदीपनम् ।
नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् ॥ ९९ ॥

नाडीशुद्ध्युपायमाह—प्राणमिति ॥ ९८ ॥ तत्फलं—यथेष्टेति ॥ ९९ ॥

### मात्रानियमपूर्वकः प्राणायामः

प्राणो देहस्थितो यावदपानं तु निरुन्धयेत् ।
एकश्वासमयी मात्रा [4]ऊर्ध्वाधो गगने स्थितिः ॥ १०० ॥

[1] समं—उ १.
[2] पीत्वा जपेद्वा—अ १.
[3] धारणाद्वा—अ १.
[4] ऊर्ध्वयोर्गगने गतिः—अ १.

रेचकः पूरकश्चैव कुम्भकः प्रणवात्मकः ।
प्राणायामो भवेदेवं मात्राद्वादशसंयुतः ॥ १०१ ॥
मात्राद्वादशसंयुक्तौ निशाकरदिवाकरौ ।
दोषाजालमबध्नन्तौ ज्ञातव्यौ योगिभिः सदा ॥ १०२ ॥
पूरकं द्वादशं कुर्यात्कुम्भकं षोडशं भवेत् ।
रेचकं दश चोंकारः प्राणायामः स उच्यते ॥ १०३ ॥
अधमे द्वादशा मात्रा मध्यमे द्विगुणा मता ।
उत्तमे त्रिगुणा प्रोक्ता प्राणायामस्य निर्णयः ॥ १०४ ॥
अधमे स्वेदजननं कम्पो भवति मध्यमे ।
उत्तमे स्थानमाप्नोति ततो वायुं निरुन्धयेत् ॥ १०५ ॥
बद्धपद्मासनो योगी नमस्कृत्य गुरुं शिवम् ।
नासाग्रदृष्टिरेकाकी प्राणायामं समभ्यसेत् ॥ १०६ ॥
द्वाराणां नव संनिरुध्य मरुतं [1]बद्ध्वा दृढां धारणां
नीत्वा कालमपानवह्निसहितं शक्त्या समं चालितम् ।
आत्मध्यानयुतस्त्वनेन विधिना विन्यस्य मूर्ध्नि स्थिरं
यावत्तिष्ठति तावदेव महतां सङ्घो न संस्तूयते ॥ १०७ ॥
प्राणायामो भवेदेवं पातकेन्धनपावकः ।
भवोदधिमहासेतुः प्रोच्यते योगिभिः सदा ॥ १०८ ॥

मूलबन्धावधिं, मात्रालक्षणं, भंगयन्तरेण प्राणायामलक्षणं चाह—प्राण इति । सहजोच्छ्वासनिःश्वासकालो मात्राकाल इत्यर्थः ॥ १००–१०१ ॥

[1] लब्ध्वा—उ, मु.

योगिना द्वादशमात्राऽलङ्कारचन्द्रसूर्यौ ध्येयावित्याह—मात्रेति । अहोरात्रं द्वादशधा विभज्य पञ्चघटिकाकालो मात्राकालः । तत्संयुक्तौ निशाकरदिवाकरौ चन्द्रसूर्यनाडीभ्यां गमनागमनं कुर्वन्तौ । दोषाग्रहणमहश्चाप्युपलक्षणार्थम् । दोषाजालमबध्नन्तौ अहोरात्रमविश्रान्तौ योगिभिः आदौ ज्ञातव्यौ । चन्द्रसूर्यनाडीगतिं ज्ञात्वा यदा या नाडी प्रवहति तदा तया पूरकं निरुद्धया अन्यया रेचकं कुर्यात् । एवं कृते वायोः नाडीद्वयेऽपि प्राणस्य समगतिः स्यात् । ततः प्राणायामो निरायासेन भवेदिति भावः ॥ १०२ ॥ ततः पूरकं द्वादशं द्वादशमात्राकालं कुर्यात् । दश चोङ्कार इति दशमात्राकालः इत्यर्थः ॥ १०३ ॥ किंच—अधमे ॥ १०४–१०५ ॥ पद्मासनस्थो योगी आत्मध्यानयुतः सन् नवद्वारं सन्निरुध्य अपानवह्निसहितं कुण्डलिनीशक्त्या समं चालितं मारुतं बद्ध्वा मूलाधारादिषट्चक्रेषु क्रमात् नीत्वा अनेन विधिना कालं तुर्यात्मानं मूर्ध्नि सहस्रारचक्रे विन्यस्य स्थिरं सम्भाव्य यावन्मूर्ध्नि स्थिरं तिष्ठति तावदेव महतां सङ्गो न संस्तूयते मूर्ध्नि साक्षात्कृततुर्यतत्त्वस्य कृतकृत्यत्वेन नहि संगकांक्षा अस्ति । यावत्सहस्रारे तुर्यात्मानं न पश्यति तावन्महतां संगः स्तूयत इत्यर्थः ॥ १०६–१०७ ॥ प्राणायामं स्तौति—प्राणेति । महासेतुः इति प्रोच्यते ॥ १०८ ॥

योगाङ्गानां प्रत्येकं फलं तत्तारतम्यं च

आसनेन रुजं हन्ति प्राणायामेन पातकम् ।
विकारं मानसं योगी प्रत्याहारेण मुञ्चति ॥ १०९ ॥
धारणाभिर्मनोधैर्यं याति चैतन्यमद्भुतम् ।
समाधौ मोक्षमाप्नोति त्यक्त्वा कर्म शुभाशुभम् ॥ ११० ॥
प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्तितः ।
प्रत्याहारद्विषट्केन जायते धारणा शुभा ॥ १११ ॥

धारणा द्वादश प्रोक्तं ध्यानं योगविशारदैः ।
ध्यानद्वादशकेनैव समाधिरभिधीयते ॥ ११२ ॥
[1]समाधौ परमं ज्योतिरनन्तं विश्वतोमुखम् ।
तस्मिन्दृष्टे क्रियाकर्म यातायातो न विद्यते ॥ ११३ ॥

प्रातिस्विकेन षडंगयोगफलमाह—आसनेनेति ॥ १०९ ॥ ध्यानेन याति ॥ ११० ॥ आसनजयापेक्षया प्राणायामादेः द्वादशगुणाधिक्यं दर्शयति—प्राणेति ॥ १११–११२ ॥ समाधिसिद्ध्यनन्तरं कृतकृत्यता स्यादित्याह—समाधाविति । विश्वतोमुखं ब्रह्म विजयते अयमहमस्मीति ॥ ११३ ॥

षण्मुखीमुद्राऽभ्यासेन नादाभिव्यक्तिः

संबद्धाऽऽसनमेढ्रमङ्घ्रियुगलं कर्णाक्षिनासापुट-
द्वारानङ्गुलिभिर्नियम्य पवनं वक्त्रेण वा पूरितम् ।
बद्ध्वा वक्षसि बह्वपानसहितं मूर्ध्नि स्थितं धारये-
देवं याति विशेषतत्त्वसमतां योगीश्वरस्तन्मनाः ॥ ११४ ॥
गगनं पवने प्राप्ते ध्वनिरुत्पद्यते महान् ।
घण्टाऽऽदीनां प्रवाद्यानां नादसिद्धिरुदीरिता ॥ ११५ ॥

एवं समाधिः केन सिध्यतीत्यत्राह—संबद्धेति । योगी सम्यक् सिद्धासनं बद्ध्वा मध्ये मेढ्रं तदधोर्ध्वं अंघ्रियुगळं च बद्ध्वेत्यर्थः । षण्मुखीमुद्रया वक्त्रेण वायुमापूर्य बन्धत्रयपूर्वकं मूर्ध्नि सहस्रारे तुर्ये तुर्यातीते वा मनो धारयेत् । एवं धारणया योगीश्वरो विशेषतत्त्वसमतां अवशिष्टतत्त्वतुर्यातीतभावं यातीत्यर्थः ॥ ११४ ॥ षण्मुखीमुद्राऽभ्याससिद्धिः नादाभिव्यक्तिरित्याह—गगनमिति । हृदयावच्छिन्नाव्याकृतगगनम् ॥ ११५ ॥

[1] यत्समाधौ परं ज्योतिः—क, अ १, अ २.

प्राणाभ्यासः सर्वरोगनिरासकः

प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत् ।
प्राणायामवियुक्तेभ्यः सर्वरोगसमुद्भवः ॥ ११६ ॥
हिक्का कासस्तथा श्वासः शिरःकर्णाक्षिवेदनाः ।
भवन्ति विविधा रोगाः पवनव्यत्ययक्रमात् ॥ ११७ ॥
यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः ।
तथैव सेवितो वायुरन्यथा हन्ति साधकम् ॥ ११८ ॥
युक्तंयुक्तं त्यजेद्वायुं युक्तंयुक्तं प्रपूरयेत् ।
युक्तंयुक्तं प्रबध्नीयादेवं सिद्धिमवाप्नुयात् ॥ ११९ ॥

विधिवत् प्राणाभ्यासः सर्वरोगनिरासकः विपरीते विपरीतफलदो भवतीत्याह —प्राणायामेनेति ॥ ११६–११७ ॥ यतः एवं अतः यथाशास्त्रं गुरूक्तप्रकारेण प्राणाभ्यासो विशिष्टफलदः इत्याह—यथेति । वायुः सिद्धकरो भवति ॥ ११८ ॥ अत एव युक्तमिति ॥ ११९ ॥

प्राणाभ्यामे इन्द्रियप्रत्याहार आवश्यकः

चरतां चक्षुरादीनां विषयेषु यथाक्रमम् ।
तत्प्रत्याहरणं तेषां प्रत्याहारः स उच्यते ॥ १२० ॥
यथा तृतीयकाले तु रविः प्रत्याहरेत्प्रभाम् ।
तृतीयाङ्गस्थितो योगी विकारं मानसं हरेत् ॥ १२१ ॥

इत्युपनिषत् ॥

इन्द्रियाणामिन्द्रियार्थपरवशतया स्थितत्वात् कथं अभ्याससिद्धिरित्यत्र तत्प्रत्याहरणादभ्यासः सफलो भवेदित्याह—चरतामिति ॥१२०॥ कथं प्रत्याहरणं

कर्तव्यं इत्यत्र सदृष्टान्तं तदाह—यथेति। यथा रविः तृतीयकाले सायाह्ने स्वप्रभां प्रत्याहरेत् तथा बाल्ययौवनकौमारभेदेन स्थूलसूक्ष्मकारणशरीरभेदेन तमोरजः-सत्वभेदेन व्रतिकामिवनिभेदेन वा तत्राप्यसंगतया तृतीयाङ्गःस्थितो योगी सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति बोधेन मानसं तद्विकारं सङ्कल्पादिं च हरेत् विलापयेत् अपह्नवं कुर्यादित्यर्थः। इत्युपनिषच्छब्दः योगचूडामण्युपनिषत्समाप्त्यर्थः॥ १२१॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणं योगचूडामणेः स्फुटम्॥
चूडामणिविवरणमशीत्यधिशतद्वयम्॥

इति श्रीमदीशाद्यशोत्तरशतोपनिषच्छास्त्रविवरणे षट्चत्वारिंशत्संख्यापूरकं योगचूडामण्युपनिषद्विवरणं सम्पूर्णम्

# योगतत्त्वोपनिषत्

सह नाववतु---इति शान्तिः

अष्टाङ्गयोगजिज्ञासा

योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥ १ ॥
विष्णुर्नाम महायोगी महाभूतो महातपाः ।
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥ २ ॥
तमाराध्य जगन्नाथं प्रणिपत्य पितामहः ।
पप्रच्छ योगतत्त्वं मे ब्रूहि चाष्टाङ्गसंयुतम् ॥ ३ ॥

योगैश्वर्यं च कैवल्यं जायते यत्प्रसादतः ।
तद्वैष्णवं योगतत्त्वं रामचन्द्रपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं योगतत्त्वोपनिषत् मन्त्रलयराजयोगविशिष्टारम्भघटपरिचयनिष्पत्तिचैत्यावस्थोपेतयमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधितत्साधनबन्धत्रयमहामुद्राबन्धवेधखेचरीप्रकटनपूर्वकं ब्रह्ममात्रपर्यवसना विराजते । अस्याः उपनिषदः संक्षेपतो विवरणमारभ्यते । सृष्टिस्थितिकर्तृब्रह्मविष्ण्वाख्यायिका तु विद्यास्तुत्यर्था । आदौ तावत्

वक्ष्यमाणयोगतत्त्वोपनिषच्छ्रवणपठनफलं प्रकटयति—योगतत्त्वमिति । प्रत्यक्परयोः योगः तत्त्वं प्रत्यक्परविभागैक्यासहं निष्प्रतियोगिकब्रह्ममात्रं यस्यां उपनिषदि प्रतिपाद्यते सेयं योगतत्त्वोपनिषत् । केवलं तच्छ्रवणपठनतः सर्वपापनिवृत्तिर्भवतीत्यर्थः ॥ १ ॥ एतद्विद्याऽऽचार्यस्वरूपं विशदयति—विष्णुरिति । तत्त्वज्ञानयोगमार्गे योगिभिः यथा दीपः तथा पुरुषोत्तमो विष्णुः दृश्यते साक्षात्क्रियत इत्यर्थः ॥ २ ॥ तं ब्रह्मा पृच्छतीत्याह—तमिति ॥ ३ ॥

### योगतत्त्वस्य दुर्लभत्वम्

तमुवाच हृषीकेशो वक्ष्यामि शृणु तत्त्वतः ।
सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः ॥ ४ ॥
तेषां मुक्तिकरं मार्गं मायाजालनिकृन्तनम् ।
जन्ममृत्युजराव्याधिनाशनं मुक्तितारकम् ॥ ५ ॥
नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदम् ।
पतिताः शास्त्रजालेषु प्रज्ञया तेन मोहिताः ॥ ६ ॥
अनिर्वाच्यपदं वक्तुं न शक्यं तैः सुरैरपि ।
स्वात्मप्रकाशरूपं तर्त्कि शास्त्रेण प्रकाश्यते ॥ ७ ॥

एवं पृष्टो भगवान् प्रश्नोत्तरमाह—तमिति । स्ववक्तव्यरहस्यार्थस्य नानामार्गालङ्कारनानाशास्त्रतत्प्रवर्तकैरपि दुष्प्रापतामाह—सर्व इति । मायाजालेन वेष्टिताः मायातत्कार्यपटैः आवृताः इत्यर्थः ॥ ४–५ ॥ कैवल्यमार्गस्य ज्ञानेतरसाधनेन दुष्प्रापत्वे "नान्यः पन्था अयनाय विद्यते" इति श्रुतेः । शास्त्रजालमोहितैः यन्मयोच्यमानं तद्वक्तुं न शक्यमित्याह—पतिता इति । तेन स्वाज्ञानेन च मोहिताः ॥ ६ ॥ सूर्यादिघटान्ताः येन प्रकाश्यन्ते

येन वेदशास्त्राण्यर्थवन्ति तत् कदाऽपि शास्त्रप्रकाश्यं न भवति, ब्रह्मणः स्वप्रकाशमात्रत्वेन व्याविद्धपदवाक्यार्थत्वात् ॥ ७ ॥

परस्यैव जीवत्वम्

निष्कलं निर्मलं शान्तं सर्वातीतं निरामयम् ।
तदेव जीवरूपेण पुण्यपापफलैर्वृतम् ॥ ८ ॥
परमात्मपदं नित्यं तत्कथं जीवतां गतम् ।
सर्व[1]भावपदातीतं ज्ञानरूपं निरञ्जनम् ॥ ९ ॥
वारिवत्स्फुरितं तस्मिंस्तत्राहंकृतिरुत्थिता ।
पञ्चात्मकमभूत्पिण्डं धातुबद्धं गुणात्मकम् ॥ १० ॥
सुखदुःखैः समायुक्तं जीवभावनया कुरु ।
तेन जीवाभिधा प्रोक्ता विशुद्धे परमात्मनि ॥ ११ ॥

जीवः परस्मात् भिद्यत इत्याशङ्क्य यन्निर्विशेषं तदेव जीवतां गच्छतीव भातीत्याह—निष्कलमिति ॥ ८ ॥ तत् कथं जीवतामर्हति इत्याक्षिपति—परमात्मेति । प्रश्नोत्तरमाह—सर्वेति । वस्तुतो ब्रह्म सर्वभावपदातीतम् । स्वातिरिक्तभावः शशविषाणवत् नास्त्येव । यदि स्वाज्ञदृष्ट्या स्यात्तदा स्वज्ञदृष्ट्या सर्वभावपदातीतं ज्ञानरूपं ज्ञप्तिमात्रत्वात्, निरञ्जनं सर्वत्रासंगमित्यर्थः ॥ ९ ॥ यत् स्वमात्रं अवशिष्टं तत्र स्वाज्ञः स्वातिरिक्तं अध्यस्यतीत्याह—वारिवदिति । यत् सर्वभावपदातीतं तत्र तस्मिन् आदौ मन्दवातेरितवारिवत् स्फुरितं तत्र गुणसाम्यात्मिका मूलप्रकृतिवाच्यां अहङ्कृतिरुत्थिता । ततः पञ्चतन्मात्राणि, ततः पञ्चीकृतपञ्चमहाभूतानि, ततः सप्तधातुबद्धं त्रिगुणात्मकं पञ्चात्मकं पिण्डमभूत् ॥ १० ॥ तत्र सुखदुःखसमायुक्तं यच्चैतन्यं तत्

[1] ताप—अ १.

जीवभावनया कुरु । सर्वभावातीतविशुद्धे परमात्मनि तेन प्राकृतगुणयोगेन निर्विशेषब्रह्मण एव जीवाभिधा प्रोक्ता ॥ ११ ॥

प्राकृतगुणवियुक्तस्य जीवस्य परमात्मत्वम्

कामक्रोधभयं चापि मोहलोभमदो रजः ।
जन्म मृत्युश्च कार्पण्यं शोकस्तन्द्रा क्षुधा तृषा ॥ १२ ॥
तृष्णा लज्जा भयं दुःखं विषादो हर्ष एव च ।
एभिर्दोषैर्विनिर्मुक्तः स जीवः केवलो मतः ॥ १३ ॥

यदा प्राकृतगुणवियुक्तो भवति तदा जीव एव केवलपरमात्मा भवतीत्याह—कामेति । अत्र वचनलिंगाव्यत्ययः छान्दसः ॥ १२–१३ ॥

ज्ञानयोगयोः युगपदभ्यासः

तस्माद्दोषविनाशार्थमुपायं कथयामि ते ।
योगहीनं कथं ज्ञानं मोक्षदं भवति ध्रुवम् ॥ १४ ॥
योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि ।
तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्यसेत् ॥ १५ ॥

यस्मादेवं तस्मात् । केवलनिर्विशेषज्ञानस्य मोक्षदत्वेऽपि सविशेषज्ञानस्य तदभावात् योगाकांक्षा भवेदिति ज्ञानयोगौ युगपदभ्यसेदित्याह—**योगहीनमिति** ॥ १४ ॥ यस्मादेवं तस्मात् ॥ १५ ॥

ज्ञानस्वरूपम्

अज्ञानादेव संसारो ज्ञानादेव विमुच्यते ।
ज्ञानस्वरूपमेवादौ ज्ञानं ज्ञेयैकसाधनम् ॥ १६ ॥

ज्ञातं येन निजं रूपं कैवल्यं परमं पदम् ।
निष्कलं निर्मलं साक्षात्सच्चिदानन्दरूपकम् ॥ १७ ॥
उत्पत्तिस्थितिसंहारस्फूर्तिज्ञानविवर्जितम् ।
एतज्ज्ञानमिति प्रोक्तमथ योगं ब्रवीमि ते ॥ १८ ॥

बन्धमोक्षहेतू स्वाज्ञानस्वज्ञाने इत्याह—अज्ञानादिति । तत्र ज्ञानं कीदृशं इत्याह—ज्ञानेति ॥ १६–१७ ॥ स्वातिरेकेण इदमुत्पन्नं स्थितं उपसंहृतं इति या स्फूर्तिः तज्ज्ञानविवर्जितं तदेव निर्विशेषज्ञानमिति प्रोक्तम् । नहि तत् स्वफलावौ योगादिसाधनमपेक्षते । यत्परब्रह्मगोचरं सविशेषज्ञानं स्वगतविशेषताशान्तये तदेव योगमपेक्षते । यत् सविशेषज्ञानेन समुच्चिचीषितं तत् ब्रवीमीत्याह—अथेति । अथ सविशेषज्ञानोत्पत्त्यनन्तरं तन्निर्विशेषताहेतुयोगं शृण्वित्यर्थः ॥ १८ ॥

मन्त्रयोगादिः चतुर्विधो योगः

योगो हि बहुधा ब्रह्मन् भिद्यते व्यवहारतः ।
मन्त्रयोगो लयश्चैव हठोऽसौ राजयोगकः ॥ १९ ॥

सोऽयं योगः कीदृश इत्याकांक्षायां पारमार्थिकयोग एकोऽपि साधनवैचित्र्यात् बहुधा भिद्यते इत्याह—योगो हीति । तत् कथमित्यत्र मन्त्रेति । इति प्रधानयोगाः चत्वारः ॥ १९ ॥

आरम्भादयो योगावस्थाः

आरम्भश्च घटश्चैव तथा परिचयः स्मृतः ।
निष्पत्तिश्चेत्यवस्था च सर्वत्र परिकीर्तिता ॥ २० ॥

अङ्गयोगास्तु—आरम्भश्चेति ॥ २० ॥

मन्त्रयोगलक्षणम्

एतेषां लक्षणं ब्रह्मन् वक्ष्ये शृणु समासतः ।
मातृकादियुतं मन्त्रं द्वादशाब्दं तु यो जपेत् ॥ २१ ॥
क्रमेण लभते ज्ञानमणिमादिगुणान्वितम् ।
अल्पबुद्धिरिमं योगं सेवते साधकाधमः ॥ २२ ॥

इति सूत्रवाक्यानि, एतेषाम् । तत्रादौ मन्दानुकम्पया मन्त्रयोगमाह मातृकेति ॥ २१–२२ ॥

लययोगलक्षणम्

लययोगश्चित्तलयः कोटिशः परिकीर्तितः ।
गच्छंस्तिष्ठन्स्वपन्भुञ्जन्ध्यायेन्निष्कलमीश्वरम् ॥ २३ ॥
स एव लययोगः स्याद्धठयोगमतः शृणु ।

लययोगप्रकारमाह—लयेति । तत्रायं सारतरो गच्छन्निति ॥ २३ ॥

हठयोगाङ्गानि

यमश्च नियमश्चैव ह्यासनं प्राणसंयमः ॥ २४ ॥
प्रत्याहारो धारणा च ध्यानं भ्रूमध्यमे हरिम् ।
समाधिः समताऽवस्था साष्टाङ्गो योग उच्यते ॥ २५ ॥
महामुद्रा महाबन्धो महावेधश्च खेचरी ।
लंबिकायाणश्च मूलबन्धस्तथैव च ॥ २६ ॥

दीर्घप्रणवसंधानं सिद्धान्तश्रवणं [1]तथा ।
वज्रोली चामरोली च सहजोली त्रिधा मता ॥ २७ ॥

अष्टांगविशिष्टहठयोगमाह—हठेति ॥ २४–२५ ॥ पुनः द्वादशांगयोगमाचष्टे—महामुद्रेति ॥ २६–२७ ॥

यमनियमासनेषु प्रधानाङ्गानि

एतेषां लक्षणं ब्रह्मन् प्रत्येकं शृणु तत्त्वतः ।
लघ्वाहारो यमेष्वेको मुख्यो भवति नेतरः ॥ ॥
अहिंसा नियमेष्वेका मुख्या वै चतुरानन ।
सिद्धं पद्मं तथा सिंहं भद्रं चेति चतुष्टयम् ॥ ॥

आहत्य अयं योगो विंशत्यंगविशिष्टः । एतेषामंगान लक्षणमाह—एतेषामिति । दशयमेषु प्रधानसाधनमाह—लघ्विति ॥ २८ । तथा दशनियमेषु मुख्यसाधनमाह—अहिंसेति । आसनानि अनन्तानि । तेषु अशीत्यासनानि मुख्यानि । तेष्वपि सिद्धाद्यासनचतुष्टयं मुख्यं इत्याह—सिद्धमिति ॥ २९ ॥

योगाभ्यासविघ्नत्यागः

प्रथमाभ्यासकाले तु विघ्नाः स्युश्चतुरानन ।
आलस्यं कत्थनं धूर्तगोष्ठी मन्त्रादिसाधनम् । ३० ॥
धातुस्त्रीलौल्यकादीनि मृगतृष्णामयानि वै ।
ज्ञात्वा सुधीस्त्यजेत्सर्वान् विघ्नान् पुण्यप्रभाव ॥ ३१ ॥

योगाभ्यासकालप्रादुर्भूतविघ्नजालं त्यजेदित्याह—प्रथम ॥ ३०–३१ ॥

[1] परं—क, अ १, अ २.

प्राणायामोचितमठासनयोः स्वरूपम्

प्राणायामं ततः कुर्यात्पद्मासनगतः स्वयम् ।
सुशोभनं मठं कुर्यात्सूक्ष्मद्वारं तु निर्व्रणम् ॥ ३२ ॥
सुष्ठुलिप्तं गोमयेन सुधया वा प्रयत्नतः ।
मत्कुणैर्मशकैर्लूकैर्वर्जितं च प्रयत्नतः ॥ ३३ ॥
दिने दिने च संमृष्टं संमार्जन्या विशेषतः ।
वा तं च सुगन्धेन धूपितं गुग्गुलादिभिः ॥ ३४ ॥
न युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम् ।
त पविश्य मेधावी पद्मासनसमन्वितः ॥ ३५ ॥

ततः कि त्यत आह—प्राणायाममिति । प्राणायामोचितमठलक्षणमाह-सुशोभनमिति ३२–३४ ॥ योगिनो लक्षणमाह—तत्रेति ॥ ३५ ॥

प्राणायामारम्भप्रकारः

क्ष कायः प्राञ्जलिश्च प्रणमेदिष्टदेवताम् ।
त दक्षिणहस्तस्य अङ्गुष्ठेनैव पिङ्गलाम् ॥ ३६ ॥
नि य पूरयेद्वायुमिडया तु शनैः शनैः ।
य क्त्यविरोधेन ततः कुर्याच्च कुम्भकम् ॥ ३७ ॥
पु जेत्पिङ्गलया शनैरेव न वेगतः ।
पु पिङ्गलयाऽऽपूर्य [1]पूरयेदुदरं शनैः ॥ ३८ ॥

[1] भार—ङ

धारयित्वा यथाशक्ति रेचयेदिडया शनैः ।
यया त्यजेत्तयाऽऽपूर्य धारयेदविरोधतः ॥ ३९ ॥

योगारम्भसमये प्रणमेत् । ततः किमित्यत्र प्राणायामानुष्ठानक्रममाह—तत इति ॥ ३६–३९ ॥

मात्रानियमपूर्वकः प्राणायामः

जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
अङ्गुलिस्फोटनं कुर्यात्सा मात्रा परिगीयते ॥ ४० ॥
इडया वायुमा[1]पूर्य शनैः षोडशमात्रया ।
कुम्भयेत्पूरितं पश्चाच्चतुःषष्ट्या तु मात्रया ॥ ४१ ॥
रेचयेत्पिङ्गलानाड्या द्वात्रिंशन्मात्रया पुनः ।
पुनः पिङ्गलयाऽऽपूर्य पूर्ववत्सुसमाहितः ॥ ४२ ॥
प्रातर्माध्यंदिने सायमर्धरात्रे च कुम्भकान् ।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥ ४३

सामान्यप्राणायामलक्षणमुक्त्वा अथ मात्राकालप्र नपूर्वकं विशेष-प्राणायामलक्षणमाह—जान्विति ॥ ४०–४२ ॥ प्रत्यहं प्राणा कालसंख्येयत्ता-माह—प्रातरिति ॥ ४३ ॥

आन्तराळिकफलं नाडीशुद्धिः तच्चिह्नानि च

एवं मासत्रयाभ्यासान्नाडीशुद्धिस्ततो भवेत्
यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह ॥ ४४ ॥

[1] रोध्य—क, अ १.

जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः ।
शरीरलघुता दीप्तिर्जाठराग्निविवर्धनम् ॥ ४९ ॥
कृशत्वं च शरीरस्य तदा जायेत [1]निश्चितम् ।

एवमभ्यासान्तराळिकफलमाह—एवमिति । नाडीशुद्धिचिह्नानि कानीत्यत आह—यदेति ॥ ४४–४८ ॥

योगाभ्यासकाले आहारादिनियमः

यो विघ्नकराहारं वर्जयेद्योगवित्तमः ॥ ४६ ॥
ल णं सर्षपं चाम्लमुष्णं रूक्षं च तीक्ष्णकम् ।
ः कजातं रामठादि वह्निस्त्रीपथिसेवनम् ॥ ४७ ॥
प्र स्नानोपवासादिकायक्लेशांश्च वर्जयेत् ।
अ यासकाले प्रथमं शस्तं क्षीराज्यभोजनम् ॥ ४८ ॥
गे ममुद्गशाल्यन्नं योगवृद्धिकरं विदुः ।

केवलकुम्भकसिद्धिः

त परं यथेष्टं तु शक्तः स्याद्वायुधारणे ॥ ४९ ॥
य धारणाद्वायोः सिध्येत्केवलकुम्भकः ।
के कुम्भके सिद्धे रेचपूरविवर्जिते ॥ ५० ॥
न न्य दुर्लभं किंचित् त्रिषु लोकेषु विद्यते ।

ततः । अत आह—तत इति ॥ ४९ ॥ तेन किं स्यादित्यत आह—यथेष्टेति ॥ ५० ॥

[1] निश्चयं—ब, उ १.

प्रस्वेदादिसिद्धयः

प्रस्वेदो जायते पूर्वं मर्दनं तेन कारयेत् ॥ ९१ ॥
ततोऽपि धारणाद्वायोः क्रमेणैव शनैः शनैः ।
कम्पो भवति देहस्य आसनस्थस्य देहिनः ॥ ९२ ॥
ततोऽधिकताभ्यासात् [1]दर्दरी स्वेन जायते ।
यदा च [2]दर्दरो भाव उत्प्लुत्योत्प्लुत्य गच्छति ॥ ९३ ॥
पद्मासनस्थितो योगी तथा गच्छति भूतले ।
ततोऽधिकताभ्यासाद्भूमित्यागश्च जायते ॥ ९४ ॥
पद्मासनस्थ एवासौ भूमिमुत्सृज्य [3]गच्छति ।
अतिमानुषचेष्टादि तथा सामर्थ्यमुद्भवेत् ॥ ९५ ॥
न दर्शयेच्च सामर्थ्यं दर्शनं वीर्यवत्तरम् ।
स्वल्पं वा बहुधा दुःखं योगी न व्यथते तदा ९६ ॥
अल्पमूत्रपुरीषश्च स्वल्पनिद्रश्च जायते ।
कीलवो दूषिका लाला स्वेददुर्गन्धताऽऽनने ॥ ९७ ॥
एतानि सर्वथा तस्य न जायन्ते ततः परम् ।
ततोऽधिकताभ्यासाद्बलमुत्पद्यते बहु ॥ ९८
येन भूचरसिद्धिः स्याद्भूचराणां जये क्षमः
व्याघ्रो वा शरभो वाऽपि गजो गवय एव व ९९ ॥

[1] दार्दरी—क. दर्दुरी—अ १. [2] दर्द —उ, अ २.
[3] वर्तते—क, अ १, अ २.

सिंहो वा योगिना तेन म्रियन्ते हस्तताडिताः ।
कन्दर्पस्य यथा रूपं तथा [1]स्यादपि योगिनः ॥ ६० ॥
तद्रूपवशगा नार्यः काङ्क्षन्ते तस्य सङ्गमम् ।
यदि सङ्गं करोत्येष तस्य बिन्दुक्षयो भवेत् ॥ ६१ ॥
वर्जयित्वा स्त्रियां संगं कुर्यादभ्यासमादरात् ।
योगिनोऽङ्गे सुगन्धश्च जायते बिन्दुधारणात् ॥ ६२ ॥

पादार्धं पादपूर्णाभ्यासतः प्रस्वेदादयतिमानुषचेष्टाऽन्तसिद्धिरुदेति। तत्सिद्धिजालं सदा गोपयेदित्याह—प्रस्वेद इति । पादप्राणायामतः प्रस्वेदः ॥ ९१–९५ ॥ दुःखं प्राप्यापि ॥ ९६ ॥ एवमभ्यासं कुर्वतो योगिनो मानुषविकारराहित्यपूर्वकं महाबलं सौन्दर्यं स्त्र्यादिपराङ्मुखत्वं स्वांगदिव्यसुगन्धश्च जायत इत्याह —अल्पेति । स्वदेहजकीलं सन्धिबन्धमुद्बध्नन्तीति कीलवो वायुबन्धाः । शरीरं दूषयति कार्श्यभावं करोतीति दूषिका क्षयादिः, नेत्रमलं वा । शिष्टं स्पष्टम् ॥ ९७ ॥ किंच—तत इति ॥ ९८ ॥ तत् कथं? व्याघ्र इति ॥ ९–६२ ॥

योगप्रतिबन्धनाशाय प्रणवजपः आरम्भावस्था

तं रहस्युपाविष्टः प्रणवं प्लुतमात्रया ।
जपेत् पूर्वार्जितानां तु पापानां नाशहेतवे ॥ ६३ ॥
सहस्रं प्रहरो मन्त्रः प्रणवः सर्वदोषहा ।
एवमभ्यासयोगेन सिद्धिरारम्भसंभवा ॥ ६४ ॥

[1] स्या—ब, अ २, उ १.

यदि प्रतिबन्धकवशात् योगो न सिध्यति तदा तच्छान्त्यै प्रणवजपः कार्यः इत्याह—तत इति ॥ ६३ ॥ प्रस्वेदादिसुगन्धश्च जायते इत्यन्तसिद्धेरारब्धत्वादयमारम्भः इत्याह—एवमिति ॥ ६४ ॥

### घटावस्था

ततो भवेद्घटावस्था पवनाभ्याससत्परा ।
प्राणोऽपानो मनो बुद्धिर्जीवात्मपरमात्मनोः ॥ ६५ ॥
अन्योन्यस्याविरोधेन [1]एकतां घटते यदा ।
घटावस्थेति सा प्रोक्ता तच्चिह्नानि ब्रवीम्यहम् ॥ ६६ ॥
पूर्वं यः कथितोऽभ्यासश्चतुर्थांशं परिग्रहेत् ।
दिवा वा यदि वा [2]सायमेककालं समभ्यसेत् ॥ ६७ ॥
एकवारं प्रतिदिनं कुर्यात्केवलकुम्भकम् ।

घटयोगमाह—तत इति ॥ ६५–६७ ॥

### प्रत्याहारलक्षणम्

इन्द्रियाणीन्द्रियार्थेभ्यो यत्प्रत्याहरणं स्फुटम् ६८ ॥
योगी कुम्भकमास्थाय प्रत्याहारः स उच्यते

प्रत्याहारस्वरूपमाह—इन्द्रियाणीति ॥ ६८ ॥

### धारणास्वरूपम्

यद्यत्पश्यति चक्षुर्भ्यां तत्तदात्मेति भावयेत् ९ ॥
यद्यच्छृणोति कर्णाभ्यां तत्तदात्मेति भावयेत्
लभते नासया यद्यत्तत्तदात्मेति भावयेत् ॥

[1] एकता—मु. [2] सायं याममात्रं- क. १, अ २.

जिह्वया यद्रसं ह्यत्ति तत्तदात्मेति भावयेत् ।
त्वचा यद्यत्स्पृशेद्योगी तत्तदात्मेति भावयेत् ॥ ७१ ॥
एवं ज्ञानेन्द्रियाणां तु तत्त[1]दात्मनि धारयेत् ।

धारणालक्षणमाह—यद्यदिति ॥ ६९–७१ ॥ चक्षुरादीन्द्रियेन्द्रियार्थजात स्वाञ्जदशायामब्रह्मतया विकल्पितं स्वञ्जदशायां तत् ब्रह्मेति प्रतीचि धारयेदित्यर्थः ॥

धारणासिद्धयः तद्गोपनविधिश्च

य मात्रं प्रतिदिनं योगी यत्नादतन्द्रितः ॥ ७२ ॥
य वा [2]चित्तसामर्थ्यं जायते योगिनो ध्रुवम् ।
दू तिर्दूरदृष्टिः क्षणाद्दूरागमस्तथा ॥ ७३ ॥
व सिद्धिः कामरूपत्वमदृश्यकरणी तथा ।
म मूत्रप्रलेपेन लोहादेः स्वर्णता भवेत् ॥ ७४ ॥
खे तिस्तस्य जायेत संततान्यासयोगतः ।
स बुद्धिमता भाव्यं योगिना योगसिद्धये ॥ ७५ ॥
ए विघ्ना महासिद्धेर्न रमेत्तेषु बुद्धिमान् ।
न र्यात्स्वसामर्थ्यं यस्य कस्यापि योगिराट् ॥ ७६ ॥
य मूढो यथा मूर्खो यथा बधिर एव वा ।
त र्तेत लोकस्य स्वसामर्थ्यस्य गुप्तये ॥ ७७ ॥

[1] धयेत्—क, अ १, अ २. [2] चित्र—अ १, अ २, क.

शिष्याश्च स्वस्वकार्येषु प्रार्थयन्ति न संशयः ।
तत्तत्कर्मकरव्यग्रः स्वाभ्यासे विस्मृतो भवेत् ॥ ७८ ॥
सर्वव्यापारमुत्सृज्य योगनिष्ठो भवेद्यतिः ।
अविस्मृत्य गुरोर्वाक्यमभ्यसेत्तदहर्निशम् ॥ ७९ ॥
एवं भवेद्घटावस्था संतताभ्यासयोगतः ।
अनभ्यासवतश्चैव वृथागोष्ठ्या न सिध्यति ॥ ८० ॥
तस्मात्सर्वप्रयत्नेन योगमेव सदाऽभ्यसेत् ।

ततः किं जायते इत्यत आह—याममात्रमिति ॥ ७२ ॥ किं तत्? दूरश्रुतिरिति ॥ ७३–७५ ॥ यतः स्वात्तसिद्धिप्रकटनाद्योगान्तरायो भवति तस्मात् सिद्धिजालोपेक्षापूर्वकं स्वसामर्थ्यं गोपयन् योगमेवाभ्यसेत् इत्याह—एत इति ॥ ७६–७७ ॥ तत्तत्कर्मकरव्यग्रः तत्तत्कर्मणि व्यग्रचित्तो भवति । ततः स्वाभ्यासे ॥ ७८–७९ ॥ अभ्यासतः इयं घटावस्था सिध्यति नान्यथेत्याह—एवमिति ॥ ८० ॥

### परिचयावस्था

ततः परिचयावस्था जायतेऽभ्यासयोगतः ॥ ८१ ॥
वायुः परिचितो यत्नादग्निना सह [1]कुण्डलीम् ।
भावयित्वा सुषुम्नायां प्रविशेदनिरोधतः ॥ ८२
वायुना सह चित्तं च प्रविशेच्च महापथम् ।
यस्य चित्तं [2]स्वपवनः सुषुम्नां प्रविशेदिह ॥ ॥

परिचयस्वरूपमाह—तत इति ॥ ८१ ॥ तत् कथं? इत्युच्यते इति ॥ ८२ ॥ महापथं सुषुम्नाद्वारमित्यर्थः । तदा सेयं परिचयावस्थेत्युच्यते ॥ ८३ ॥

[1] कुण्डली—क, अ १, अ २. [2] स्वपवनं [सपवनं ?]—अ १.

पञ्चभूतमण्डलेषु पञ्चब्रह्मधारणानि

भूमिरापोऽनलो वायुराकाशश्चेति [1]पञ्चकः ।
येषु पञ्चसु देवानां धारणा पञ्चधोच्यते ॥ ८४ ॥
पादादिजानुपर्यन्तं पृथिवीस्थानमुच्यते ।
पृथिवी चतुरश्रं च पीतवर्णं लवर्णकम् ॥ ८५ ॥
पार्थिवे वायुमारोप्य लकारेण समन्वितम् ।
ध्यायंश्चतु[2]र्भुजाकारं चतुर्वक्त्रं हिरण्मयम् ॥ ८६ ॥
धारयेत्पञ्च घटिकाः पृथिवीजयमाप्नुयात् ।
पृथिवीयोगतो मृत्युर्न भवेदस्य योगिनः ॥ ८७ ॥
जानोः पायुपर्यन्तमपां स्थानं प्रकीर्तितम् ।
अर्ध[3]चन्द्रं शुक्लं च [4]वंबीजं परिकीर्तितम् ॥ ८८ ॥
[5]वरुणे वायुमारोप्य वकारेण समन्वितम् ।
चतुर्बाहुं किरीटिनम् ॥ ८९ ॥
स्फटिकसंकाशं पीतवाससमच्युतम् ।
धारयेत्पञ्च घटिकाः सर्वपापैः प्रमुच्यते ॥ ९० ॥
जलाद्भयं नास्ति जले मृत्युर्न विद्यते ।
नाभेर्हृदयान्तं च वह्निस्थानं प्रकीर्तितम् ॥ ९१ ॥
त्रिकोणं रक्तं च रेफाक्षरसमुद्भवम् ।
वानिलमारोप्य रेफाक्षरसमुज्ज्वलम् ॥ ९२ ॥

[1] -क, अ २.
[2] यं—अ १. [5] वारुणो—अ १.

त्रियक्षं वरदं रुद्रं तरुणादित्यसंनिभम् ।
भस्मोद्धूलितसर्वाङ्गं सुप्रसन्नमनुस्मरन् ॥ ९३ ॥
धारयेत्पञ्च घटिका वह्निनाऽसौ न [1]दह्यते ।
न दह्यते शरीरं च प्रविष्टस्याग्निकुण्डके ॥ ९४ ॥
आहृदयाद्भ्रुवोर्मध्यं वायुस्थानं प्रकीर्तितम् ।
वायुः षट्कोणकं कृष्णं यकाराक्षरभासुरम् ॥ ९५ ॥
मारुतं मरुतां स्थानं यकाराक्षरभासुरम् ।
धारयेत्तत्र सर्वज्ञमीश्वरं विश्वतोमुखम् ॥ ९६ ॥
धारयेत्पञ्च घटिका वायुवद्व्योमगो भवेत् ।
मरणं न तु वायोस्तु भयं भवति योगिनः ॥ ९ ॥
आभ्रूमध्यात्तु मूर्धान्तमाकाशस्थानमुच्यते ।
व्योम वृत्तं च धूम्रं च हकाराक्षरभासुरम् ॥ ९
आकाशे वायुमारोप्य हकारोपरि शंकरम् ।
बिन्दुरूपं महादेवं व्योमाकारं सदाशिवम् ॥ ९ ॥
शुद्धस्फटिकसंकाशं धृतबालेन्दुमौलिनम् ।
पञ्चवक्त्रयुतं सौम्यं दशबाहुं त्रिलोचनम् ॥ १
सर्वायुधैर्धृताकारं सर्वभूषणभूषितम् ।
उमार्धदेहं वरदं सर्वकारणकारणम् ॥ १०१
आकाशधारणात्तस्य खेचरत्वं भवेद्ध्रुवम् ।
यत्र कुत्र स्थितो वाऽपि सुखमत्यन्तमश्नते ।

[1] दा—क, अ १, अ २.

एवं च धारणाः पञ्च कुर्याद्योगी विचक्षणः ।
ततो दृढशरीरः स्यान्मृत्युस्तस्य न विद्यते ॥ १०३ ॥
ब्रह्मणः प्रलयेनापि न सीदति महामतिः ।

ततः स्वावयवप्रविभक्तपञ्चभूतमण्डले पञ्चब्रह्मधारणमाह—भूमिरिति । देवानां ब्रह्मादिसदाशिवान्तानाम् ॥ ८४ ॥ तत्रादौ पादादीति । पृथिवीशब्देन पार्थिवमण्डलमुच्यते ॥ ८५ ॥ ततः पार्थिवे ॥ ८६–८७ ॥ अम्मण्डले विष्णुध्यानं तत्फलं चाह—आजानोरिति ॥ ८८–९० ॥ वह्निमण्डले रुद्रध्यानं तत्फलं चाह—आपायोरिति ॥ ९१–९४ ॥ वायुमण्डले ईश्वरध्यानं तत्फलं चाह—आहृदयादिति ॥ ९५–९७ ॥ आकाशमण्डले सदाशिवध्यानं तत्फलं चाह—आभ्रूमध्यादिति ॥ ९८–१०३ ॥

सगुणध्यानम्

[illegible]भ्यसेत्तथा ध्यानं घटिकाषष्टिमेव च ॥ १०४ ॥
व[illegible] निरुध्य चाकाशे देवतामिष्टदामिति ।
म[illegible]ध्यानमेतत्स्यादणिमादिगुणप्रदम् ।

सगुणनि[illegible]गमेदेन द्विप्रकारं ध्यानमाह—समभ्यसेदिति ॥ १०४ ॥

निर्गुणध्यानतः समाधिसिद्धिः

नि[illegible]ध्यानयुक्तस्य समाधिश्च ततो भवेत् ॥ १०५ ॥
दि[illegible]शकेनैव समाधिं समवाप्नुयात् ।
[illegible]रुध्य मेधावी जीवन्मुक्तो भवत्ययम् ॥ १०६ ॥
[illegible]ः समताऽवस्था जीवात्मपरमात्मनोः ।

ब्रह्मातिरिक्तं न किञ्चिदस्तीति तत्स्वरूपेणावस्थानं समाधिरित्यर्थः ॥ १०५ ॥ तथाविधं दिनद्वादशकेनैव ॥ १०६ ॥ समाधिशब्दं व्युत्पादयति—समाधिरिति । जीवात्मपरमात्मनोः वाच्यार्थवैषम्यत्यागपूर्वकं त्वंपदयोः लक्ष्यस्वरूपेण समताऽवस्थैव समाधिरित्यर्थः ॥

सिद्धयोगस्य स्वेच्छया देहत्यागात्यागौ

यदि स्वदेहमुत्स्रष्टुमिच्छा चेदुत्सृजेत्स्वयम् ॥ १०७ ॥
परब्रह्मणि लीयेत न तस्योत्क्रान्तिरिष्यते ।
अथ नो चेत्समुत्स्रष्टुं स्वशरीरं प्रियं यदि ॥ १०८ ॥
सर्वलोकेषु विहरन्नणिमादिगुणान्वितः ।
कदाचित्स्वेच्छया देवो भूत्वा स्वर्गे महीयते ॥ १०९ ॥
मनुष्यो वाऽपि यक्षो वा स्वेच्छयाऽपि क्षणाद्भवन् ।
सिंहो व्याघ्रो गजो वाऽश्वः स्वेच्छया बहुतामियात् ॥ ११० ॥
यथेष्टमेव वर्तेत योगी यद्वा महेश्वरः ।
अभ्यासभेदतो भेदः फलं तु सममेव हि ॥ १११ ॥

यः स्वातिरेकेणाभासतोऽपि शरीरत्रयमस्तीति म[illegible]ते सोऽयं योगी तत्त्यक्त्वा परब्रह्मणि लीयते । यद्येवं नहि त्यक्तुमिच्छति [illegible]त्रशक्तिं प्रकटयन् आभूतसंप्लवं अस्मिन् लोके विहरेदित्याह—यदीति [illegible] १०७–११० ॥ अभ्यासतत्फलभेदेन भिद्यते । तत्रान्तराळिकफलनिरपेक्ष[illegible]मुख्यफलं कैवल्यं सममेवेत्यर्थः ॥ १११ ॥

महाबन्धलक्षणम्

पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत् ।
प्रसार्य दक्षिणं पादं हस्ताभ्यां धारयेदृढम् ॥ ११२ ॥
चुबुकं हृदि विन्यस्य पूरयेद्वायुना पुनः ।
कुम्भकेन यथाशक्त्या धारयित्वा तु रेचयेत् ॥ ११३ ॥
वामाङ्गेन समभ्यस्य दक्षाङ्गेन [1]समभ्यसेत् ।
प्रसारितस्तु यः पादस्तमूरूपरि मानयेत् ॥ ११४ ॥
अनेनैव महाबन्ध उभयत्रैवमभ्यसेत्

महामुद्रा[illegible]क्षणं अन्यत्रान्नायते

वक्षो[illegible]स्तहनुर्निपीड्य सुषिरं योनेश्च वामांघ्रिणा
ह[illegible]भ्यामनुधारयन् प्रसरितं पादं तथा दक्षिणम् ।
आपूर्य[illegible]धसनेन कुक्षियुगळं मूर्ध्नि स्थितं धारये-
दे[illegible] पातकनाशनी ननु महामुद्रा नृणां प्रोच्यते ॥

इति । महाब[illegible]लक्षणमाह—पार्ष्णिमिति ॥ ११२–११३ ॥ मानयेत् समर्पयेत् आरोपयेदित्यर्थः ॥ ११४ ॥ अभ्यसेत् वामांगवत् दक्षांगेऽपीत्यर्थः

महावेधलक्षणम्

मह[illegible]धस्थितो योगी कृत्वा पूरकमेकधीः ॥ ११५ ॥
[2]वा[illegible]ं गतिमा[3]वृत्य निभृतं कण्ठमुद्रया ।
[illegible]माक्रम्य वायुः स्फुरति सत्वरम् ॥ ११६ ॥
अथा[illegible]महावेधः सिद्धैरभ्यस्यतेऽनिशम् ।

[1] ततोभ्य—क, [illegible] १, अ २. [2] वायुना—क, अ १, अ २. [3] हृत्य—अ १.

वेधस्वरूपमाह—महाबन्धेति ॥ ११५ ॥ उच्छ्वासनिश्वासरेचक-पूरकवायूनां गतिं आवृत्य आच्छाद्य कण्ठमुद्रया जालन्धरबन्धेन निरुध्य ततः प्राणवायुः इडापिंगळापुटद्वयं सम्यगाक्रम्य अतिक्रम्य सत्वरं सुषुम्नायां स्फुरतीति यत् अयमेव ॥ ११६ ॥

खेचरीस्वरूपम्

अन्तः कपालकुहरे जिह्वां व्यावृत्य धारयेत् ॥ ११७ ॥
भ्रूमध्यदृष्टिरप्येषा मुद्रा भवति खेचरी

खेचरीस्वरूपमाह—अन्तरिति ॥ ११७ ॥

बन्धत्रयस्वरूपं तत्फलं च

कण्ठमाकुञ्च्य हृदये स्थापयेद्दृढया धिया ॥ ११८ ॥
बन्धो जालंधराख्योऽयं मृत्युमातङ्गकेसरी ।
बन्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः ॥ ११९ ॥
उड्याणाख्यो हि बन्धोऽयं योगिभिः मुदा धृतः ।
पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेद्दृढं ॥ १२० ॥
अपानमूर्ध्वमुत्थाप्य योनिबन्धोऽयमुच्यते ।
प्राणापानौ नादबिन्दू मूलबन्धेन चैकता ॥ १२१ ॥
गत्वा योगस्य संसिद्धिं यच्छतो नात्र संशयः ॥

बन्धत्रयस्वरूपं तत्फलं चाह—कण्ठमिति ॥ १२१ ॥

विपरीतकरणीलक्षणं तत्फलं च

करणी विपरीताख्या [1]सर्वाधिव्याधिनाशिनी ॥ १२२ ॥
नित्यमभ्यासयुक्तस्य जाठराग्निविवर्धनी ।
आहा[2]रा बहवस्तस्य [3]संपाद्याः साधकस्य च ॥ १२३ ॥
अल्पाहारा यदि भवेदग्निर्देहं हरेत्क्षणात् ।
अधःशिरश्चोर्ध्वपादः क्षणं स्यात्प्रथमे दिने ॥ १२४ ॥
[4]क्षणात्तु किंचिदधिकमभ्यसे[5]त्तु दिनेदिने ।
वलीं च पलितं चैव षण्मासार्धान्न दृश्यते ॥ १२५ ॥
यामात्रं तु यो नित्यमभ्यसेत्स तु कालजित् ।

करणीं मुद्रानित्फलं चाह—करणीति ॥ १२२–१२३ ॥ स्वस्थितिविपरीतं क्रियतु इति विपरीतकरणी । तदेव प्रपञ्चयति—अध इति ॥ १२४–१२५ ॥

वज्रोळीस्वरूपम्

सीमं सेद्यस्तु स योगी सिद्धिभाजनम् ॥ १२६ ॥
या तस्यैव योगसिद्धिः करे स्थिता ।
ान तं वेत्ति खेचरी च भवेद्ध्रुवम् ॥ १२७ ॥

वज्रोळीति तत्फलं चाह—वज्रोळीमिति । किं नाम वज्रोळी? कांस्यपात्रे गोक्षिप्य वज्रोळीतुल्यलिंगनाळेन प्रसित्वा पुनर्विरेच्य

[1] अ १, अ २. [2] रो बहुल—अ १, अ २. रो बहुश—क.
[3] हे १, अ २. [4] क्षणाच्च—क, अ १, अ २.
[5] च—अ १, १.

पुनर्प्रसनादिकमभ्यस्याथ स्त्रीयोनिमण्डले रेतो विसृज्य तच्छोणितेन साकं प्रसेदिति यत् सैव वज्रोळीत्युच्यते । यस्तामभ्यस्यति स तु सिद्धो भवतीत्याह —लभ्यत इति । सोऽयं योगी अतीतानागतं वेत्ति । तस्यैव खेचरी ॥ १२६–१२७ ॥

अमरोळीस्वरूपम्

अमरीं यः पिबेन्नित्यं नस्यं कुर्वन् दिने दिने ।
वज्रोलीमभ्यसेन्नित्यममरोलीति कथ्यते १२८ ॥

अमरोळीस्वरूपमाह—अमरीमिति । अमरीशब्देन मूत्रमुच्यते । तत्र प्रथमान्यधारे विहाय मध्यधारां हस्ते पात्रे वा गृहीत्वा योऽयं योगी तत्त्वभागं दिनेदिने पिबन् नासापुटयोः नस्यं कुर्वन् नित्यं वज्रोळीमभ्यसेत् इति यत् सैव अमरोळीति कथ्यते । तथा च हठयोगतत्त्वे अभिहितम्—

पित्तोल्बणत्वात् प्रथमां च धारां
विहाय निस्सारतयाऽन्यधारास् ।
निषेव्यते शीतलमध्यधारा
वज्रोळिसिद्धैरमरोळिसिद्धये ॥

इति । एवममरोळीसिद्धस्यामरीपाननस्यं विना [illegible] रिष्टरुदेति सैव सहजोळीत्युच्यते ॥ १२८ ॥

राजयोगनिष्पत्तिः

ततो भवेद्राजयोगो नान्तरा भवति ध्रुवम्
यदा तु राजयोगेन निष्पन्ना योगिभिः [1]या: । १२९ ॥
तदा विवेकवैराग्यं जायते योगिनो ध्रुवम्
विष्णुर्नाम महायोगी महाभूतो महातपाः । [illegible] ॥
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ।

[1] क्रिया—क, अ १, अ २.

राजयोगस्वरूपमाह—तत इति । न हि विशल्यवयवहठाभ्यासमन्तरा राजयोगो भवतीत्यर्थः ॥ १२९ ॥ हठयोगसिद्धोऽयं राजयोगः योगराजत्वात् । तत्रैव हि भगवान् दत्तः ते इत्याह—विष्णुरिति । क्षराक्षरकलनाविरळपुरुषोत्तमतत्त्वस्य सोऽहमस्मीति जयोगेनैव लक्षितत्वात् ॥ १३० ॥

### वैराग्यहेतुनिरूपणम्

यः स्तनः पूर्वपीतस्तं निष्पीड्य मुदमश्नुते ॥ १३१ ॥
य माज्जा । भगात्पूर्वं तस्मिन्नेव भगे रमन् ।
य माता सा पुनर्भार्या या भार्या मातरेव हि ॥ १३२ ॥
स पित । पुनः पुत्रो यः पुत्रः स पुनः पिता ।
एव संसा क्रेण कूपचक्रे घटा इव ॥ १३३ ॥
भ्रा न्तो निजन्मानि श्रुत्वा लोकान् समश्नुते ।

पुरुषोत्त चाति रागादिबाह्यवैराग्यहेतवे इदमाम्नायते—यः स्तन इति । तं तादृशमित्यर्थः ॥ १३१ ॥ तस्मिन्नेव तथाविधे भगे रमन् रममाणो मुदमश्नुते । अस्मिन् जन्मनि या माता सा पुनः भवान्तरे भार्या भवति, या भार्या सा भवान्तरे मातेत्याह—या मातेति । मातरेव मातैवेत्यर्थः ॥ १३२ ॥ एवं पुरुषोत्तमतत्त्वाभिज्ञः किञ्चिदप्यस्तीति पश्यन्तः कूपचक्रे घटा इव—संसारचक्रेणेति तृतीया ॥ सप्तम्यर्था—संसारचक्रे ॥ १३३ ॥ परिभ्रमन्तो नानायोनिषु जन्मानि भजन्ते । यतः एवं अतः "ब्रह्मैव सर्वं" "ब्रह्मातिरिक्तं न किञ्चिदस्ति" ते गुर्वाचार्यमुखतः श्रुत्वा मुमुक्षुरुत्तमलोकान् ब्रह्माद्यावासभूतान् समश्नुते । यावद्ब्रह्मोपाधि तावदुषित्वा तेन साकं कैवल्यं लभन्ते ॥

हृत्पद्मे प्रणवोपासनम्

त्रयो लोकास्त्रयो वेदास्तिस्रः संध्यास्त्रयः स्वराः ॥ १३४ ॥
त्रयोऽग्नयश्च त्रिगुणाः स्थिताः सर्वे [1]त्र
त्रयाणामक्षराणां च योऽधीतेऽप्यर्धमक्षर ॥ १३५ ॥
तेन सर्वमिदं प्रोतं तत्सत्यं तत्परं पदम्
पुष्पमध्ये यथा गन्धः पयोमध्ये यथा घृ म् ॥ १३६ ॥
तिलमध्ये यथा तैलं पाषाणेष्विव काञ्चन
हृदि स्थाने स्थितं पद्मं तस्य वक्त्रमधोमुर म् ॥ १३७ ॥
ऊर्ध्वनालमधोबिन्दु[2]स्तस्य मध्ये स्थितं नः ।
अकारे रेचितं पद्ममुकारेणैव भिद्यते ॥ १ ॥
मकारे लभते नादमर्धमात्रा तु निश्चला ।
शुद्धस्फटिकसंकाशं निष्कलं पापनाशनम् ॥ १३९ ॥
लभते योगयुक्तात्मा पुरुषस्तत्परं पदम्

तदुपायत्वेन परापरब्रह्मगोचराकारादिमात्राचतु यविशिष्टप्रणवोपासनाचष्टे—त्रय इति । प्रणवावयवाकारादित्र्यक्षरे क्रमेण रादयः त्रयो लोकाः, हगादयः त्रयो वेदाः, प्रातःसन्ध्यादिसन्ध्याः तिस्रः, मकारोकारमकारभेदेन त्रयः स्वराः ॥ १३४ ॥ गार्हपत्यादिभेदेन अग्नयः त्र ः, सत्त्वादित्रिगुणाश्च सर्वे स्थिताः प्रतिष्ठिता इत्यर्थः । अकारादित्रयाणामक्षर णां तदारोपाधिकरणवेश्वविराडोत्रादिप्राज्ञबीजानुञ्जकरसान्तानां सविशेषत्वेऽ लोकत्रयादित्रिगुणान्ताश्रयाकारादिमात्रात्रयतदध्यक्षापवादाधिकरणार्धमात्रासंग र्धमक्षरं तुर्यचैतन्यं ब्रह्मास्मीति योऽधीते श्रुत्याचार्यमुखतो जानाति १३५ ॥ तेन

[1] त्रियक्षरे—उ. [2] तस्य- अ १. अ २.

तुर्यभावमापन्नेन योगिना सर्वमिदं प्रपञ्चजातं प्रोतं अहमेवेदं सर्वमिति व्याप्तम् । यद्व्याप्यसापेक्षव्यापकतापह्नवसिद्धं तत् सत्यम् । यत् सत्तामात्रं तदेव परं निरतिशयं स्वावशेषतया [illegible]पद्यत इति पदं ब्रह्ममात्रमवशिष्यत इत्यर्थः । कथं पुनः तुर्यस्य सर्वप्रोतत्व[illegible]त्यत्र दृष्टान्तचतुष्टयमाचष्टे—पुष्पेति ॥ १३६ ॥ यथा हेमनिमिळ[बिड]शि[illegible]यां निर्विशेषतया काञ्चनं तत् सर्वं व्याप्य वर्तते तथा इत्यर्थः । यदेवं [illegible]पकचैतन्यं तदुपलब्धिस्थाननिर्देशपूर्वकं तत्स्वरूपं तज्ज्ञानफलं च वि[illegible]दयति—हृदिस्थान इति । हृदिस्थाने उर्ध्वभागे कदळीपुष्पवदूर्ध्वनाळं [illegible]धोवक्त्रं हृत्पद्मं स्थितं भवति ॥ १३७ ॥ तदधोभागे विन्दुव्याकृ[illegible]शं विद्यते । तस्य मध्ये मनउपलक्षितं लिंगशरीरं वर्तते । तत्र तद्वृत्ति[illegible]स्वभावाभावप्रकाशकतया प्रत्यक्चैतन्यं स्थितं भवति । तदूर्ध्वनयनार्थं विकल्पार्थं तद्गतचैतन्यसाक्षात्कारार्थं चोपायमाह—अकार इति । अकारे वि[illegible]गाडोतृचैतन्ये साक्षात्कृते सति हृत्पद्ममूर्ध्वमुखतया रेचितं उत्थितं भव[illegible] । उकारतदभ्यक्षतैजससूत्रानुज्ञातृचैतन्यसाक्षात्कारेण तत् पद्मं भिद्यते विका[illegible]ति ॥ १३८ ॥ मकारतदभ्यक्षप्राज्ञबीजानुज्ञैकरसचैतन्ये साक्षात्कृते सति ना[illegible]श्वरतत्त्वं तदात्मकप्रणवनादो विजृम्भते । अकारादि-मात्रात्रयप्रपञ्चपर्यवसान[illegible]मात्रा तु द्वितुर्यांविकल्पाधिष्ठिता निश्चला भवति । तत्र यदुपलभ्यते यदनुसन्[illegible]तः पुण्यपापजालं नश्यति तत् शुद्धस्फटिकसङ्काशं पापनाशनं वस्तुतो नि[illegible]तियोगिकनिष्कलं यत् स्वमात्रमवशिष्यते ॥ १३९ ॥ यथोक्तयोगयुक्तात्मा [illegible]षः तत् परं पदं लभते कृतकृत्यो भवतीत्यर्थः ॥

करणव्यापारोपरतिः आत्मावगत्युपायः

कूर्मः स्व[illegible]णिपादादिशिरश्चात्मनि धारयेत् ॥ १४० ॥

एवं द्वारे[illegible]सर्वेषु वायुपूरितरेचितः ।

निषिद्धे[illegible]नवद्वारे ऊर्ध्वं प्राङ्[1]निःश्वासस्तथा ॥ १४१ ॥

[1] श्वसतस्तदा—[illegible] श्वसतस्तथा—अ १. श्वासतस्तथा—अ २.

घटमध्ये यथा दीपो निवातं कुम्भकं विदुः ।
निषिद्धैर्नवभिर्द्वारैर्निर्जने निरुपद्रवे ॥ १४२ ॥
निश्चितं त्वात्ममात्रेणावशिष्टं योगसेवया ॥

इत्युपनिषत् ॥

तदवगत्युपायस्तु सर्वकरणव्यापृत्युपरतिरित्यत्र कूर्म इति । यथा कूर्मः स्वाङ्गान्युपसंहृत्य शिलावत् वर्तते ॥ १४ ॥ एवं योगी नवद्वारेषु सर्वेषु नाडीद्वारेषु च वायुपूरितरेचितः पूरकावस्थायां वायुना पूरितरेचितनाडीमुखिरावच्छिन्ननिर्व्यापारदेहविशिष्टो भवं । रेचकपूरकादिव्यापारं विना सुषुम्नामार्गेण ऊर्ध्वनिःश्वासो भवेदित्याह—नि सिद्ध इति । नवद्वारे निषिद्धे निरुद्धे सत्यथ सुषुम्नायाः प्राक् पूर्वद्वारं मू ाग्रन्थिं भित्त्वा अथोर्ध्व निःश्वासः निर्गतश्वासव्यापारो भवेत्, केवलकुम्भकेन ष्टेत्यर्थः ॥ १४१ ॥ कुम्भकलक्षणमाह—घटमध्य इति । एवं केवलकुम्भ गेन आत्मतत्त्वमवगम्य कृतार्थो भवेदित्युपसंहरति—निषिद्धैरिति । स्व ापूर्तिनिषिद्धैः निरुद्धैः नवद्वारैः विशिष्टदेहो योगी निर्जने निरुपद्रवे ा सिद्धासनमास्थाय ॥ १४२ ॥ निर्विकल्पकयोगसेवया केवल्यनाडीं भि ा तत्र आत्ममात्रेणाव-शिष्टमिति तत्त्वज्ञानेन निश्चितं विकलेवरं केवल्यं भवं ति शेषः । तुशब्दोऽव-धारणार्थः । इत्युपनिषच्छब्दो योगतत्त्वोपनिषत्समाप्त्यं ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं योगतत्त्वस्य सुस्फुटम्
योगतत्त्वविवरणं षष्ट्युत्तरशतद्वयम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकच रिंशत्संख्यापूरकं योगतत्त्वोपनिषद्विवरणं सम्पूर्णम् ।

# योगशिखोपनिषत्

सह नाववतु । इति शान्तिः

## प्रथमोऽध्यायः

मुक्तिमार्गजिज्ञासा

सर्वे जीवा दुःखैर्दुःखैर्मायाजालेन वेष्टिताः ।
तेषां मुक्ति कथं देव कृपया वद शंकर ॥ १ ॥
सर्वसिद्धिव मार्गं मायाजालनिकृन्तनम् ।
जन्ममृत्युज व्याधिनाशनं सुखदं वद ॥ २ ॥

इति ॥

योगज्ञाने यद मुक्तिसाधनत्वेन विश्रुते ।
तत्त्रिपदं ब्रह्म त्वं स्वमात्रमवशिष्यते ॥

इह खलु कृष्ण यजुर्वेदप्रविभक्तेयं योगशिखोपनिषत् ससाधनज्ञानयोग-सर्वस्वप्रकटनव्यग्रा ब्रह्मात्रविश्रान्ता विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । शिष्याचार्यभावं गतचतुराननमहेश्वरप्रश्नप्रतिवचनरूपाख्यायिका तु विद्यास्तुत्यर्थमादौ आख्यायिकामवतारयति—सर्व इति ॥ १ ॥ किं तदित्यत्र—सर्वेति ॥ २ ॥

### मुक्तिमार्गस्य दुर्लभत्वम्

हिरण्यगर्भः पप्रच्छ स होवाच महेश्वरः
नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदं ॥ ३ ॥
सिद्धिमार्गेण लभते नान्यथा पद्मसंभव

लोकोपकारार्थं महेश्वरं प्रति हिरण्यगर्भः प्रच्छ । तत्प्रश्नमंगीकृत्य स होवाच । किं तदुवाचेत्यत्र वक्ष्यमाणार्थं प्रकाः प्रन् स्तौति—नानेति । निर्विशेषज्ञानैकगम्यत्वात् ॥ ३ ॥ "नान्यः पन्थाः अयनाय विद्यते" इति श्रुतिसिद्धसिद्धिमार्गेण । कैवल्यसिद्धिप्रदोऽयं मार्गो विशेषब्रह्ममात्रज्ञानरूपः तेनैव कैवल्यं लभते नान्यथेत्यर्थः ॥

### ब्रह्म केवलशास्त्रागम्यम्

पतिताः शास्त्रजालेषु प्रज्ञया तेन मोहिं ॥ ४ ॥
स्वात्मप्रकाशरूपं तत् किं शास्त्रेण प्रका ति ।
निष्कलं निर्मलं शान्तं सर्वातीतं निराम ॥ ५ ॥
तदेव जीवरूपेण पुण्यपापफलैर्वृतम् ।
परमात्मपदं नित्यं तत्कथं जीवतां गतम् ॥ ६ ॥
तत्त्वातीतं महादेव प्रसादात्कथयेश्वर ।

उन्मार्गगामिन आभासज्ञानिनो विडम्बयति— तेता इति । ब्रह्मचर्य-गुरुकुलवाससाधनचतुष्टयादिकं विस्मृत्य "तन्त्रत्र मयाऽधीतं नाधीतं तुर्यतन्त्रकं" इत्यादिस्वरूपदर्शनसिद्धाञ्जनोक्तरीत्या पां : ॥ ४ ॥ शास्त्रेण ब्रह्म प्रकाश्यते इत्यत्र स्वात्मेति ब्रह्मणो व्यावि दंवाक्यार्थत्वेन स्वयं-प्रकाशरूपत्वात्, "येनार्थवन्ति तं किं तु वि ारं प्रकाशयेत्" ।

स्वात्मप्रकाशरूपं ब्रह्म कीदृशं इत्यत्र—निष्कळमिति । प्राणादिनामान्तषोडश-कलाऽपह्नवसिद्धं ब्रह्म निष्प्रतियोगिकनिष्कळं ब्रह्ममात्रमित्यर्थः ॥ ५ ॥ निष्कळस्य ब्रह्ममात्रत्वे जीवजातं [illegible] द्वैतमित्यत आह —तदेवेति । यत् स्वज्ञदृष्ट्या स्वमात्रं अवशिष्टं स्वाज्ञदृष्ट्या [illegible] च । कथं पुनः ब्रह्म जीवत्वं भजतीत्याक्षिपति—परमात्मेति ॥ ६ ॥ तत् कीदृशं? तत्वातीतम् ॥

ब्रह्मणो जीवभावः

[1]सर्वभावप[illegible]तीतं ज्ञानरूपं निरञ्जनम् ॥ ७ ॥
वायुवत्स्पु[illegible]रतं स्वस्मिन्मत्राहंकृतिरुत्थिता ।
पञ्चात्मक[illegible]भूत् पिण्डं भातुबद्धं गुणात्मकम् ॥ ८ ॥
सुखदुःखै[illegible]मायुक्तं जीवभावनया कुरु ।
तेन जीवा[illegible]त्वा प्रोक्ता विशुद्धे परमात्मनि ॥ ९ ॥

प्रश्नोत्तरं भगव[illegible]ह—सर्वेति ॥ ७ ॥ तदेव स्वाज्ञदृष्ट्या व्योम्नि वायुवन इति । तत्म[illegible]गात् पञ्चात्मकमभूत् पिण्डम् । यन्निष्प्रतियोगिक-स्वमात्रमवशिष्टं तदेव [illegible]वज्ञादिदृष्ट्या किञ्चित् स्फुरितं सत् साक्षिभावं भजति । त्रिपाद्विभूतिरेव नित्यभूति[illegible]॥ चकास्ति । नित्यभूतिरेव पूर्णाहम्भावमेत्य लीलाभूतिः भवति । लीलाभूति[illegible]पे परिच्छिन्नपिण्डाभिमानात् मोहभूतिः । साऽपि पिण्डादिरूपेण जडभू[illegible]पि भवतीत्यर्थः ॥ ८–९. ॥

कामादिदोषविमुक्तजीवस्य शिवत्वम्

कामक्रो[illegible]पं चापि मोहलोभमथो रजः ।
जन्म मृ[illegible]श्च कार्पण्यं शोकस्तन्द्रा क्षुधा तृषा ॥ १० ॥

[1] महेश्वरः इत्यधि[illegible]—अ.

तृष्णा लज्जा भयं दुःखं विषादो हर्ष [1]एव च ।
एभिर्दोषैर्विनिर्मुक्तः स जीवः शिव उच्यते ॥ ११ ॥

त्रिपादेव परिच्छिन्नपिण्डाभिमानात् मोहभूतित भजतीत्युक्तं पुनर्मोहभूतेः
लीलादिभूतित्वं कथमित्यत्र त्रिपादस्मीति प्रबोधतः ण्डाद्यभिमतिमूलकामादि-
वृत्तित्यागसमकालं त्रिपाद्भूतिरेव भवतीत्याह—कामो ॥ १० ॥ कामादिवृत्ति-
परिग्रह एव दोषः, त्रिपाद्भूतेः मोहभूतिप्रापकत्वात् ॥ ः ॥

ज्ञानयोगाभ्यां दोषविनाशः

तस्माद्दोषविनाशार्थमुपायं कथयामि ते
ज्ञानं केचिद्वदन्त्यत्र केवलं तन्न सिद्धये १२ ॥
योगहीनं कथं ज्ञानं मोक्षदं भवतीह भो
योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षक ॥ १३ ॥
तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्य

यस्मादेवं कामादिवृत्तिसंगादनर्थो जातः तस्मा मोहभूतेस्त्रिपाद्भूतित्व-
प्रापकोपायः कः इत्यत्र "पश्यतेहापि सन्मात्रमसदन्य "" "ब्रह्मव्यतिरिक्तं न
किञ्चिदस्ति," "ब्रह्ममात्रमसन्नहि," इत्यादिश्रुतिसिद्धस् तिरिक्तासत्प्रपञ्चापह्नव-
ज्ञानप्रादुर्भूतनिष्प्रतियोगिकब्रह्ममात्रज्ञानसमकालं त्रैपदब्र ात्रावस्थानलक्षणविक-
ळेबरकैवल्यं स्यादित्यत्र न विवादः, स्वाज्ञानप्रभव ीवत्वादेः स्वज्ञानाव-
धिकत्वात् तज्ज्ञानस्य चरमजन्माश्रयत्वात् । तद्विना सवि ाभासज्ञानं केचिदिति
॥ १२–१३ ॥ यथोक्तसाधनविकलब्रह्मचित्ताश्रिताभासः ाशेषज्ञानस्य स्वफल-
साधनानीशत्वात् विविधफलभुसिद्धिप्रापकाभासयोगस्याः मुख्ययोगफलप्रापणा-
नीशत्वाच्च यस्मादेतावाभासज्ञानयोगौ प्रातिस्विकेन स्व लसाधनानीशौ भवतः

[1] मेव—अ, अ १, क, उ १.

तस्मात् ज्ञानयोगौ समुच्चित्य मुमुक्षुः दृढमभ्यसेत् । तेनाभासज्ञानयोगौ स्वगताभासतां विहाय निष्प्रतियोगिकनिर्विशेषब्रह्ममात्रज्ञानपर्यवसन्नौ भवतः । तथा च श्रुतिः "शाम्[illegible]ति ह्यस्त्रमस्त्रेण मलेन क्षाल्यते मलम्" इत्यादि । तत्र योगाभासस्तु आभासज्ञान[illegible]ताभासत्वं निर्मूल्य निर्विशेषज्ञानपर्यवसन्नो भवति ॥

ज्ञानस्वरूपं तत्फलं च

ज्ञानस्वरूप[illegible]वादौ ज्ञेयं ज्ञानैकसाधनम् ॥ १४ ॥
अज्ञानं क[illegible]शं चेति प्रविचार्य मुमुक्षुणा ।
ज्ञातं येन [illegible]निजं रूपं कैवल्यं परमं पदम् ॥ १५ ॥
असौ दोषै[illegible]निर्मुक्तः कामक्रोधभयादिभिः ।
सर्वदोषैर्वृत[illegible]जीवः कथं ज्ञानेन मुच्यते ॥ १६ ॥
स्वात्मरूप[illegible]था [1]ज्ञानं पूर्णं तद्व्यापकं तथा ।
कामक्रोध[illegible]दोषाणां [2]स्वरूपान्नास्ति भिन्नता ॥ १७ ॥
पश्चात्तस्य[illegible]धिः [3]किं नु निषेधोऽपि कथं भवेत् ।
विवेकी स[illegible]न्मुक्तः संसारभ्रमवर्जितः ॥ १८ ॥
परिपूर्णस्व[illegible]यं तत्सत्यं कमलसंभव ।
सकलं नि[illegible]लं चैव पूर्णत्वाच्च तदेव हि ॥ १९ ॥

यत एवमतो [illegible]विशेषज्ञानं स्वफलसाधनसमर्थं स्यादेवेति मनसि निधाय मुमुक्षुभिः ज्ञानाज्ञाने[illegible]ज्ञातव्येत्याह—ज्ञानेति ॥ १४ ॥ तत्र निर्विशेषज्ञान-स्वरूपमाह—ज्ञातमि[illegible]। तदेव यथोक्तज्ञानमित्यर्थः ॥ १५ ॥ य एवं

[1] ज्ञातं—अ, अ [illegible] [2] स्वरूपं ना—क, अ १, उ १.
[3] किं तु—क, अ

ज्ञानी सोऽयं असौ । कृतकृत्यो भवतीत्यर्थः । पुनराभासज्ञानाभिप्रायेणाक्षिपति । किमिति? कामक्रोधादिसर्वदोषैरिति । कामक्रोधादयो दोषाः स्वाज्ञानविजृम्भिताः ॥ १६ ॥ सर्वदोषग्रासस्वज्ञाने वा तदेकाद्वे स्वात्मनि दोषासम्भवं प्रकटयन् परिहरति—स्वात्मेति । यथा स्वात्मन सर्वपरिपूर्ण व्याप्यसत्वे व्यापकमपि भवति तथा तद्गोचरज्ञानस्य तन्मात्रप सन्नत्वान्न तत् भिद्यते । स्वात्मातिरेकेण ज्ञानाभावेऽपि कामादिदोषाः तद्विरु भवेयुरित्यत आह—कामेति । न हि निष्प्रतियोगिकब्रह्ममात्रे कामादिदोषपृ : स्यान्न वेति स्मृतिर्वा कथं सेद्धुं पार्यति ब्रह्ममात्रगतनिष्प्रतियोगिक या: स्वातिरिक्तमस्ति नास्तीति गन्धासहत्वात् ॥ १७ ॥ एवं ज्ञानी तकृत्यो भवतीत्याह—विवेकीति ॥ १८ ॥ तस्यैव ब्रह्मत्वमाह—परिपूर्णेति । सांसारिकभ्रमविरळ- ब्रह्मविदो ब्रह्मत्वात् यत् सत्यमिति ख्यातं तदेव स्व दिदृष्टया सकळादिभावं भजतीत्याह—सकळमिति ॥ १९ ॥

आभासज्ञान्यज्ञानिनोरविशेषः

[1]कलिना स्फूर्तिरूपेण संसारभ्रमतां गतम्
निष्कलं निर्मलं साक्षात्सकलं गगनोपमम् ॥ २० ॥
उत्पत्तिस्थितिसंहारस्फूर्तिज्ञानविवर्जितम्
एतद्रूपं समायातः स कथं मोहसागरे ॥ २१ ॥
निमज्जति महाबाहो त्यक्त्वा विद्यां पुनः ः ।
सुखदुःखादिमोहेषु यथा संसारिणां स्थितिः ॥ २२ ॥
तथा ज्ञानी यदा तिष्ठेद्वासनावासितस्तदा ।
तयोर्नास्ति विशेषोऽत्र समा संसारभावना ॥ २३ ॥
ज्ञानं चेदीदृशं ज्ञातमज्ञानं कीदृशं पुनः

[1] कलना—अ, अ १.

अप्रकाशकल्यन्तःकरणयोगात् संसारित्वं भजतीत्याह—कलिनेति वस्तुतस्तु निष्कळम् ॥ २० ॥ यन्निष्कळमित्यादिविशेषणविशिष्टमेतद्ब्रह्म चित्तशुद्धिसाधनचतुष्टयसम्पत्त्यभावेऽपि येन केनोपायेन समायातो यदि ज्ञानी तदा कृतकृत्यो भवेत्, स कथं स्वात्मज्ञानं विहाय स्वाज्ञवन्मोहसागरे निमज्जतीति प्रश्नोत्तरं ... वानाह—सुखेति ॥ २१–२२ ॥ तथा अयमाभास-ज्ञानी । स्वाज्ञानेनास्यापि ...मा ॥ २३ ॥ आभासज्ञानिनः ज्ञानम् । आभासज्ञाना-ज्ञानयोरविरोधादेकार्थपर्य... सायित्वं युज्यत इत्यर्थः ।

अ...सज्ञानिनो योगेन विना न मोक्षसिद्धिः

ज्ञाननिष्ठो... रक्तोऽपि धर्मज्ञोऽविजितेन्द्रियः ॥ २४ ॥
विना देहे... योगेन न मोक्षं लभते विधे ।
अपक्काः ... पक्काश्च देहिनो द्विविधाः स्मृताः ॥ २५ ॥
अपक्का यो... हीनास्तु पक्का योगेन देहिनः ।
मर्त्यो योग... ना देहो ह्यजडः शोकवर्जितः ॥ २६ ॥
जडस्तु प... वो ज्ञेयो ह्यपक्को दुःखदो भवेत् ।

तस्य योगं विन... किञ्चित्करतामाह—ज्ञानेति । स्वारोपितज्ञाननिष्ठः । शास्त्रतो धर्मज्ञः । स्व... अविजितेन्द्रियः ॥ २४ ॥ अयमाभासज्ञानी योगेन विना स्वात्मज्ञानगताभा... मलं संक्षाळ्य शुद्धं ज्ञानं प्राप्य तत्समकालं न कदापि मोक्षं लभते, योगोद... स्य चित्तमलशोधकत्वात् । नह्यशुद्धचित्तासादितज्ञानं कार्यकारि भवतीत्यर्थः आभासपारमार्थिकभेदेन ज्ञानिनौ द्विविधावित्याह—अपक्क इति ॥ २५ ... केवलाभासज्ञानिनः अपक्काः अशुद्धान्तरत्वात् । योगेन पक्काः पारम... कज्ञानिनः इत्यर्थः । शुद्धाशुद्धज्ञानिनोरधिष्ठितदेहादेः जडाजडतामाह—सर्व ...त । ज्ञानाग्निदग्धकल्मषत्वात् ज्ञानिदेहादेरजडत्वं युज्यते इत्यत्र "यथैव मृण्मयः ...म्मः तद्वद्देहोऽपि चिन्मयः" इति श्रुतेः ॥ २६ ॥

[1] ज: शोकविवर्जि... —क

आभासज्ञानिनां दुःखानिवृत्तिः

ध्यानस्थोऽसौ तथाऽप्येवमिन्द्रियैर्विवशो भवेत् ॥ २७ ॥
तानि गाढं नियम्यापि तथाऽप्यन्यैः प्र
शीतोष्णसुखदुःखाद्यैर्व्याधिभिर्मानसैस्तथ ॥ २८ ॥
अन्यैर्नानाविधैर्जीवैः शस्त्राग्निजलमारुतैः
शरीरं पीड्यते तैस्तैश्चित्तं संक्षुभ्यते ततः ॥ २९ ॥
तथा प्राणविपत्तौ तु क्षोभमायाति मारुतः
ततो दुःखशतैर्व्याप्तं चित्तं क्षुब्धं भवेन्नृण ॥ ३० ॥
देहावसानसमये चित्ते यद्यद्विभावयेत्
तत्तदेव भवेज्जीव इत्येवं जन्मकारणम् ॥ १ ॥
देहान्ते किं भवेज्जन्म तन्न जानन्ति म ाः ।
तस्माज्ज्ञानं च वैराग्यं जीवस्य केवलं ः ॥ ३२ ॥
पिपीलिका यथा[दा ?]लग्ना देहे ध्यानार्ा च्यते ।
असौ किं वृश्चिकैर्दष्टो देहान्ते वा कथं ी ॥ ३३ ॥
तस्मान्मूढा न जानन्ति मिथ्यातर्केण वो ाः ।

यद्याभासज्ञानी शुद्धज्ञानिवत् ध्यानस्थः । वि ो भवेत् ब्रह्मातिरेकेण इन्द्रियादिकं नास्तीत्यसमाहितकरणग्रामत्वात् ॥ २ ॥ यथाबलं तानि ॥ २८–२९ ॥ नराणां निर्विशेषब्रह्मज्ञानीतराणाम् ॥ ३ -३१ ॥ यस्मादाभास-ज्ञानिनः एवं न विदुः तस्मात् आभासज्ञानम् । वैशेषज्ञानिनोऽप्येवं न विदुरिति चेत्, सत्यं ब्रह्मातिरेकेण देहः तदवसान मयो वा अस्ति चेत् जानन्ति, निर्विशेषब्रह्ममात्रावगतेः देहाद्युपलक्षितार्था ापदतत्कार्यजातमस्ति

नास्तीति विभ्रमापह्नवपूर्वकत्वात् । तस्मादाभासज्ञानां अत्र विषयो भवतीति मन्तव्यम् । ज्ञानियोगिशब्देन मुख्यज्ञानियोगिनौ गृहीतौ चेत् मूलश्रुत्यनुरूप भवेदिति चेन्न; मूलश्रुतेरप्याभासज्ञान्यादिविषयतात्पर्यत्वात्, चतुर्थाध्याये शुद्धज्ञानिसमाचारस्य स्पष्टीकृतत्वाच्च । न हि कदाऽपि श्रुतिर्विरुद्धार्थं वदति । तस्मादाभासपारमार्थिकज्ञानौ मिथोविविक्तं श्रुतिरनुवदतीति वक्तुं युक्तमित्यर्थः ॥ ३२ ॥ आभासज्ञानी अस्मिन् प्रकरणे विशेषितव्यः इति स एव विशेष्यते—पिपीलिकेति ॥ ३३ ॥ यस्मादेवं ब्रह्मातिरेकेण स्वदेहध्यानतद्विरोधादिकमस्तीति भ्रान्तिः तस्मात् ॥

अहंभाव एव सर्वानर्थमूलम्

अहंकृतिर्यस्य नष्टा भवति तस्य वै ॥ ३४ ॥
देहस्त्वपि प्रवन्नष्टो व्याधयश्चास्य किं पुनः ।
जलाग्निशस्त्रघातादिबाधा कस्य भविष्यति ॥ ३५ ॥
यदा यदा परेक्षीणा पुष्टा चाहंकृतिर्भवेत् ।
[1]तमनेनास्य नश्यन्ति प्रवर्तन्ते रुगादयः ॥ ३६ ॥
कारणेन विना कार्यं न कदाचन विद्यते ।
अहंकारं विना तद्वद्देहे दुःखं कथं भवेत् ॥ ३७ ॥

स्वाज्ञविकल्पितदेहादौ अहंकृतिः ॥ ३४ ॥ ज्ञानिनो विदेहत्वात् यद्यपि स्वाज्ञदृष्ट्या देहोऽस्तु शस्त्रघातादिः तस्यैवास्तु ज्ञानिनो न काचित् क्षतिरस्तीत्यर्थः ॥ ३५ ॥ यदि पुनरस्य देहादावहम्भावः उदेति तदा स्वाज्ञवत् सर्वानर्थो भवतीत्याह—यदेति । अनेन देहाभिमानदोषेण अस्य ब्रह्मास्मीत्यादिवृत्तयो नश्यन्ति तिरोभवन्ति । किंच तं देहाभिमानिनं प्रति रुगादयः प्रवर्तन्ते ॥ ३६ ॥ अहम्भाव एव सर्वानर्थमूलमित्याह—कारणेनेति ॥ ३७ ॥

[1] तदा तदा-

योगसिद्धस्य ईश्वरत्वं जीवन्मुक्तत्वं च

शरीरेण जिताः सर्वे शरीरं योगिभिर्जितम् ।
तत्कथं कुरुते तेषां सुखदुःखादिकं फलम् ॥ ३८ ॥
इन्द्रियाणि मनो बुद्धिः कामक्रोधादिकं जितम् ।
तेनैव विजितं सर्वं नासौ केनापि बाध्यते ॥ ३९ ॥
महाभूतानि तत्त्वानि संहतानि क्रमेण च
समधातुमयो देहो दग्धो योगाग्निना शनैः ॥ ४० ॥
देवैरपि न लक्ष्येत [1]योगिदेहो महाबलः
भेदबन्धविनिर्मुक्तो नानाशक्तिधरः परः ॥ ४१ ॥
यथाऽऽकाशस्तथा देह आकाशादपि निर्मलः ।
सूक्ष्मात्सूक्ष्मतरो दृश्यः [2]स्थूलात्स्थूलो [3]जडाज्जडः ॥ ४२ ॥
इच्छारूपो हि योगीन्द्रः स्वतन्त्रस्त्वजरामरः ।
क्रीडते त्रिषु लोकेषु लीलया यत्रकुत्रचित् ॥ ४३ ॥
अचिन्त्यशक्तिमान् योगी नानारूपाणि धारयेत् ।
संहरेच्च पुनस्तानि स्वेच्छया विजितेन्द्रियः ॥ ४४ ॥
नासौ मरणमाप्नोति पुनर्योगबलेन तु ।
हठेन मृत एवासौ मृतस्य मरणं कुतः ॥ ४५ ॥
मरणं यत्र सर्वेषां तत्रासौ परिजीवति ।
यत्र जीवन्ति मूढास्तु तत्रासौ मृत एव हि ॥ ४६ ॥

[1] योग—अ, अ १, अ २, क. [2] स्थूलात्स्थू—उ.
[3] जडाज्जडः—अ, अ २, उ.

कर्तव्यं नैव तस्यास्ति कृतेनासौ न लिप्यते ।
जीवन्मुक्तः सदा स्वच्छः सर्वदोषविवर्जितः ॥ ४७ ॥

सर्वे स्वाज्ञाः [illegible] ब्रह्मात्मैक्ययोगिभिः ॥ ३८ ॥ "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति ज्ञानखड्गेन इन्द्रियाणि ॥ ३९ ॥ किंच—महाभूतानि ॥ ४० ॥ सम्यज्ञानिनं ईश्वरभावापत्त्या सत्यसङ्कल्पत्वाद्यदि सम्यज्ञानयोगी अयं देहः सर्वादृश्यो भ[illegible]तु ईश्वरादिसामर्थ्यमीहते तदा देवैरपीति ॥ ४१–४४ ॥ नासौ मरणमाप्नोति [illegible]रणादेः देहनिष्ठत्वेन योगिनो देहातीतत्वात्, "न जायते म्रियते वा [illegible]नश्चित्" इति श्रुतेः । ब्रह्मातिरेकेण देहादिकं नास्तीति बोध एव हठः, हठे[illegible] सम्यज्ञानेन मृत एवासौ देहः ॥ ४५ ॥ "या निशा सर्वभूतानां" इत्यादिस्[illegible]णात् ॥ ४६–४७ ॥

आभासज्ञानिनां विडम्बनम्

विरक्ता इ[illegible]नेनश्चान्ये देहेन विजिताः सदा ।
ते कथं य[illegible]गिभिस्तुल्या मांसपिण्डाः कुदेहिनः ॥ ४८ ॥
देहान्ते इ[illegible]नेभिः पुण्यात्पापाच्च फल[1]माप्यते ।
ईदृशं तु [illegible]त्तत्तद्भुक्त्वा ज्ञानी पुनर्भवेत् ॥ ४९ ॥

योगव्याविद्रचि[illegible]लनिर्विशेषज्ञानिनमीश्वरत्वेन जीवन्मुक्तत्वेन च स्तुत्वा तदपेक्षया आभासज्ञ[illegible]नो विडम्बयति—विरक्ता इति । स्वातिरिक्तविषये विशेषेण [illegible]क्ताः विर[illegible]क्ताः ॥ ४८ ॥ प्रारब्धादिकर्मफलं भुक्त्वा ज्ञानी पुनर्भवेत् । न हि पा[illegible]मार्थिकज्ञानिनः पुण्यपापतत्फलोच्चावचजन्मादिकमस्ति, आभासज्ञानिनि तु [illegible]र्मुपपद्यत इति श्रुतेराशयः । अन्यथा "ब्रह्म वेद ब्रह्मैव भवति," "य एवं [illegible]निर्बीजं वेद निर्बीज एव स भवति," "तमेवं विद्वानमृत

[1] मश्नुते—क, [illegible]ख.

इह भवति नान्यः पन्था अयनाय विद्यते," इत्यादयो वेदनसमकालमेव ब्रह्ममात्रावस्थानलक्षणविदेहकैवल्यानुवादिश्रुतयो बाध्येरन्। तस्माद्अत्र ज्ञानिनः पापपुण्यनिरोधेन पुनर्भवोक्तिराभासज्ञानिनिष्ठेति ॥ ४९ ॥

तेषां सिद्धसङ्गत्या कृतकृत्यत्व.

पश्चात्पुण्येन लभते सिद्धेन सह [1]सङ्गम् ।
ततः सिद्धस्य कृपया योगी भवति नान्यथा ॥ ९० ॥
ततो नश्यति संसारो नान्यथा शिवभाषितम् ।

तादृशाभासज्ञानिनः सुकृतविशेषात् जीवन्मुक्तसंगत्या कृतकृत्यता स्यादित्याह—पश्चादिति ॥ ९० ॥

ज्ञानयोगयोः मिथः कार्यकारणत्व

योगेन रहितं ज्ञानं न मोक्षाय भवेद्विधेः ॥ ९१ ॥
ज्ञानेनैव विना योगो न सिध्यति कदाचन ॥

आभासज्ञानयोगसमुच्चयाभिप्रायेण प्रातिस्विकेन तयोः निन्दोच्यते—योगेनेति ॥ ९१ ॥

योग एव परमो मोक्षमार्गः

जन्मान्तरैश्च बहुभिर्योगो ज्ञानेन लभ्यते ॥ ९२ ॥
ज्ञानं तु जन्मनैकेन योगादेव प्रजायते ।
तस्माद्योगात्परतरो नास्ति मार्गस्तु मोक्षदः ॥ ९३ ॥

[1] संगतिः—अ, अ १, अ २, क.

प्रविचार्य चिरं ज्ञानं मुक्तोऽहमिति मन्यते ।
किमसौ मननादेव मुक्तो भवति तत्क्षणात् ॥ ९४ ॥
पश्चाज्जन्मान्तरशतैर्योगादेव विमुच्यते ।
न तथा भवतः[1] योगाज्जन्ममृत्यू पुनःपुनः ॥ ९५ ॥
प्राणापानसमायोगश्चन्द्रसूर्यैकता भवेत् ।
सप्तधातुमयं देहमग्निना रञ्जयेद्ध्रुवम् ॥ ९६ ॥
व्याधयस्तस्य न नश्यन्ति छेदखातादि का[2]कथा ।
तदसौ परमाकाशरूपो देह्यवतिष्ठति ॥ ९७ ॥
किं पुनर्बहूक्तेन मरणं नास्ति तस्य वै ।
[3]देहिवद्दृश्यते लोके दग्धकर्पूरवत्स्वयम् ॥ ९८ ॥

तयोः मिथः [illegible]र्यकारणतामाह---जन्मेति ॥ ९२ ॥ यस्मादेवं तस्मान् । नास्ति, अ[illegible]ासज्ञानगताभासतां ग्रसित्वा शुद्धज्ञानजनकत्वात् । अत एव योगमार्गस्तु [illegible]ानद्वारा मोक्षदः ॥ ९३ ॥ योगाभावे ज्ञानाभासेनापि प्रविचार्य । कादाचित्[illegible]मननादेव ॥ ९४ ॥ योगादेव विमुच्यते इति योगं स्तौति । यथा [illegible]ाभासज्ञानिनां जन्ममृत्यू भवतः न तथा ॥ ९५ ॥ सप्तधातुमयं देहं—शुक्रादयः सप्तधातवः देहस्य तन्मयत्वात् तम् ॥ ९६–९८ ॥

योगसंस्कृतमनस्येव आत्मज्ञानोत्पत्तिः

चित्तं प्राणेन संबद्धं सर्वजीवेषु संस्थितम् ।
रज्ज्वा यद्वत्सुसंबद्धः पक्षी तद्वदिदं मनः ॥ ९९ ॥

[1] योगाच्च—अ २.
[2] स्तथा—अ.
[3] देहीव द्—क, अ १.

नानाविधैर्विचारैस्तु न [1]बाध्यं जायते मनः ।
तस्मात्तस्य जयोपायः प्राण एव हि नान्यथा ॥ ६० ॥
तर्कैर्जल्पैः शास्त्रजालैर्युक्तिभिर्मन्त्रभेषजैः
न वशो जायते प्राणः सिद्धोपायं विना विधे ॥ ६१ ॥
उपायं तमविज्ञाय योगमार्गे प्रवर्तते ।
खण्डज्ञानेन सहसा जायते क्लेशवत्तरः [2] ॥ ६२ ॥
योऽजित्वा पवनं मोहाद्योगमिच्छति योगिनाम् ।
सोऽपक्वं कुम्भमारुह्य सागरं तर्तुमिच्छति ॥ ६३ ॥
यस्य प्राणो विलीनोऽन्तः साधके जीवितं सति ।
पिण्डो न पतितस्तस्य [3]चित्तं दोषैः प्रबाध्यते ॥ ६४ ॥

संस्थितं स्वात्मानं विषयीकरोतीत्यर्थः । तद्वदिदं मनः, "प्राणबन्धनं हि सोम्य मनः" इति श्रुतेः ॥ ५९ ॥ यस्मादेवं तस्मात् ॥ ६०–६५ ॥

### योगाभ्यास एव प्रथमकृत्यम्

शुद्धे चेतसि तस्यैव स्वात्मज्ञानं प्रकाशते ।
तस्माज्ज्ञानं भवेद्योगाज्जन्मनैकेन पद्मज ॥ ६५ ॥
तस्माद्योगं तमेवादौ साधको नित्यमभ्यसेत् ।
मुमुक्षुभिः प्राणजयः कर्तव्यो मोक्षहेतवे ॥ ६६ ॥

[1] साध्यं—अ, अ १. [2] वक्रः—अ २. वाक्रः—क.
[3] चित्तदो—अ. अ १, अ २.

योगात्परतरं पुण्यं योगात्परतरं शिवम् ।
योगात्परतरं सूक्ष्मं योगात्परतरं न हि ॥ ६७ ॥
योऽपानप्राणयोरैक्यं [1]रजसो[2]रेतसस्तथा ।
सूर्यचन्द्रमसोर्योगो जीवात्मपरमात्मनोः ॥ ६८ ॥
एवं हि द्वन्द्वजालस्य संयोगो योग उच्यते ।
यस्माद्योग एवं गववान् तस्मात् ॥ ६६–६८ ॥

योगशिखोपदेशः

अथ योगशिखां वक्ष्ये सर्वज्ञानेषु चोत्तमाम् ॥ ६९ ॥
यदाऽनुध्यायते मन्त्रं गात्रकम्पोऽथ जायते ।
आसनं पद्मकं बद्ध्वा यच्चान्यदपि रोचते ॥ ७० ॥
नासाग्रे दृष्टिमारोप्य हस्तपादौ च [3]संयतौ ।
मनः सर्वत्र संगृह्य ॐकारं तत्र चिन्तयेत् ॥ ७१ ॥
ध्यायते सततं प्राज्ञो हृत्कृत्वा परमे[4]श्वरम् ।
एकस्तम्भे नवद्वारे त्रिस्थूणे पञ्चदैवते ॥ ७२ ॥
ईदृशे तु शरीरे वा मतिमान्नोपलक्षयेत् ।
आदित्यमण्डलाकारं रश्मिज्वालासमाकुलम् ॥ ७३ ॥
तस्य मध्यगतं वह्निं प्रज्वलेद्दीपवर्तिवत् ।
दीपशिखा तु या मात्रा सा मात्रा परमेश्वरे ॥ ७४ ॥

[1] स्वरजो—अ, अ १, अ २, क, मु.
[2] रेतसो—अ, मु.
[3] संयतौ—उ १.
[4] छिनं—उ. उ १.

इत्थं योगं स्तुत्वा अथ अनन्तरं योगसारभूतां शिखां प्रपञ्चयति—अथेति । योगमस्तकविलसितत्वात् योगशिखा । आभासादिज्ञानापेक्षया इयमुत्तमा, अशुद्धचित्ताश्रयज्ञानगताभासप्रासत्वात् । तां तुभ्यं वक्ष्ये इत्यर्थः ॥ ६९ ॥ किं तत् इत्यत्र तदियत्तां तदभ्यासक्रमं चाह—यदेति । मन्तारं अनुसन्धातारं त्रायते इति मन्त्रः नादः । मन्त्रं मन्त्रो यदा अनुध्यायते अनुसन्धीयते तदा अथ अनन्तरं योगिनो गात्रकम्पं जायते । तदुपशमनार्थं आसनमिति । यद्वान्यदपि गेचते सिद्धासनादि ॥ ७० ॥ एवं आसने स्थित्वा नासाग्रे इति ॥ ७१ ॥ तदानीं देहदृष्टिः न कार्येत्याह—एकेति । वीणादण्डस्य शरीरमण्टपाधारत्वात् । स्थूणशब्देन आगाम्यादिकर्मत्रयमुच्यते । पञ्चदैवतशब्देन ब्रह्मादिसदाशिवान्तपञ्चब्रह्माण उच्यन्ते ॥ ७२ ॥ एतत्संघाते शरीरे स्वात्मात्मीयदृष्टिं न कुर्यादित्यर्थः । ततः किं कर्तव्यमित्यत्र स्वहृदये आदित्येति ॥ ७३ ॥ प्राणायामानुकूलध्यानेन मूलाधारगताग्निज्वालावलीयुतं भावयेदित्यर्थः । तत्र दीपशिखारूपेण परमेश्वरो भावनीयः इत्याह—दीपशिखेति । मूलाधारस्थदीपशिखा तु या मात्रा नीवारशूकादपि तन्वी सा मात्रा तदाकारेण परमेश्वरे भाविते सति ॥ ७४ ॥

योगाभ्यासात् परमपदसाक्षात्कारः

भिन्दन्ति योगिनः सूर्यं योगाभ्यासेन वै पुनः ।
द्वितीयं सुषुम्नाद्वारं परिशुभ्रं समर्पितम् ॥ ७५ ॥
कपालसंपुटं पीत्वा ततः पश्यति तत्पदम् ।

अथ तत्प्रसादतो योगिनः योगाभ्यासबलेन सूर्यमण्डलं भित्त्वा तत्पदं यान्तीत्यत्र "सूर्यद्वारेण ते विरजाः प्रयान्ति" इति श्रुतेः ॥

संन्यस्तं पुरुषं दृष्ट्वा स्थानाच्चलति भास्करः ।
एष मे मण्डलं भित्त्वा परं ब्रह्म प्रयास्यति ॥

इति स्मृत्यनुरोधेन सन्न्यासयोगिनः सूर्यमण्डलं भित्त्वा तत्पदं यान्तीत्युक्तम् । केवलयोगिनस्तु द्वितीयं सुषुम्नाद्वारं कुण्डलिन्या विभिद्य ॥ ७५ ॥ तन्मार्गेण कपालसम्पुटं सहस्रारचक्रं प्रविश्य तत्र रवीन्दुग्निजममृतं पीत्वा ततः तत्पदं तत्रत्यतुरीयं तुरीयातीतं वा सोऽहमिति पश्यति पश्यन्ति । ततः तदात्त-ज्ञानानुरोधेन सविशेषं निर्विशेषं वा ब्रह्म प्रयान्तीत्यर्थः ॥

ध्यानाशक्तस्य पुण्यलोकप्राप्तिः

अथ तद् ध्यायते जन्तुरालस्याच्च प्रमादतः ॥ ७६ ॥
यदि त्रिकालमागच्छेत् [1]स गच्छेत्पुण्यसंपदम् ।
पुण्यमेतत्समासाद्य संक्षिप्य कथितं मया ॥ ७७ ॥

एवं ध्यातुमशक्तानां पुण्यलोकाप्तिमाह—अथेति । यदि यो जन्तुः यथावत् ध्यानकलनायामालस्यात् प्रमादतश्च भेदधिया तत् ब्रह्म ध्यायते ध्यायति ॥ ७६ ॥ एवं अहरहः त्रिकालं ध्यानमागच्छेत् ध्यानं करोति सोऽयं मुनिः स्वभावनाऽनुरोधेन पुण्यसम्पदं ब्रह्मेन्द्राद्यैश्वर्यं गच्छेत् प्राप्नुयात् । एतत्पुण्यानुरोधेन संक्षेपेण मयोक्तमित्यर्थः ॥ ७७ ॥

लब्धयोगस्य स्वात्मबोधः

लब्धयोगोऽथ बुध्येत प्रसन्नं परमेश्वरम् ।
जन्मान्तरसहस्रेषु यदा क्षीणं तु किल्बिषम् ॥ ७८ ॥
तदा पश्यति योगेन संसारोच्छेदनं महत् ।

वक्ष्यमाणरीत्या लब्धयोगः स्वात्मानं बुध्यते इत्याह—लब्धेति । सोऽहमिति बुध्येत । किल्बिषवतां स्वातिरिक्तकलनोच्छेदनेश्वरसाक्षात्कारः कुत इत्यत आह—जन्मान्तरेति । नित्यादिकर्मफलसमर्पणसन्तुष्टेश्वरप्रसादतः यदा ॥ ७८ ॥

[1] संग—अ १.

योगाभ्यासार्थं जितप्राणगुरूपसदनम्

अधुना संप्रवक्ष्यामि योगाभ्यासस्य लक्षणम् ॥ ७९ ॥
मरुज्जयो यस्य सिद्धः सेवयेत्तं गुरुं सदा ।
गुरुवक्त्रप्रसादेन कुर्यात्प्राणजयं बुधः ॥ ८० ॥

तदा पश्यति योगेनेत्युक्तं, सोऽयं योगः कीदृश इत्याकांक्षायां तदियत्तां ससाधनां सफलामाचष्टे—अधुनेति ॥ ७९ ॥ तत् गुरुमुखेनैव ज्ञेयमित्याह—मरुदिति ॥ ८० ॥

सरस्वतीचालनम्

वितस्तिप्रमितं दैर्घ्यं चतुरङ्गुलविस्तृतम् ।
मृदुलं धवलं प्रोक्तं वेष्टनाम्बरलक्षणम् ॥ ८१ ॥

आदौ सरस्वतीनाडीचालनपुरस्सरं कुण्डलिनीस्थितिं तच्चालनोपायं चाह—वितस्तीति । सरस्वतीनाडीमस्तकमुक्तलक्षणलक्षितवस्त्रेणावेष्ट्य ब्राह्मे मुहूर्ते उत्थाय मुहूर्तपर्यन्तं निर्भयाच्चालयेत् ॥ ८१ ॥

कुण्डलीचालनेन ग्रन्थित्रयभेदः

निरुध्य मारुतं गाढं शक्तिचालनयुक्तितः ।
अष्टधा कुण्डलीभूतामृर्ज्वीं कुर्यात्तु कुण्डलीम् ॥ ८२ ॥
पायोराकुञ्चनं कुर्यात्कुण्डलीं चालयेत्तदा ।
मृत्युवक्त्रगतस्यापि तस्य मृत्युभयं कुतः ॥ ८३ ॥
एतदेव परं गुह्यं कथितं तु मया तव ।
वज्रासनगतो नित्यमूर्ध्वाकुञ्चनमभ्यसेत् ॥ ८४ ॥

वायुना ज्वलितो वह्निः कुण्डलीमनिशं दहेत् ।
संतप्ता साऽग्निना [1]जीवा शक्तिस्त्रैलोक्यमोहिनी ॥ ८५ ॥
प्रविशेच्चन्द्र[2]कुण्डे तु सुषुम्नावदनान्तरे ।
वायुना वह्निना सार्धं ब्रह्मग्रन्थिं भिनत्ति सा ॥ ८६ ॥
विष्णुग्रन्थिं ततो भित्त्वा रुद्रग्रन्थौ च तिष्ठति ।
ततस्तु कुम्भकैर्गाढं पूरयित्वा पुनःपुनः ॥ ८७ ॥

सरस्वतीनाडीचालनानन्तरं निरुध्य ॥ ८२ ॥ तदा पायोः । कुण्डलिनीचालनतोऽस्य विमृत्युत्वमाह—मृत्युवक्त्रेति ॥ ८३ ॥ कुण्डलीं चालयेदिति यदुक्तं सोपायं तदाह—वज्रेति ॥ ८४ ॥ आकुञ्चनोत्थवायुना । तेन दाहेन सन्तप्ता ॥ ८५ ॥ ततः सा किं करोतीत्यत्र प्रविशेत् । सुषुम्नायाः चन्द्रवत् शीतलत्वात् कुण्डलीतापशान्तिकरत्वं योग्यनुभवसिद्धमित्यर्थः । दक्प्राणवायुना । मूलाधारप्रवेशमार्गकवाटाभं ब्रह्मग्रन्थिम् ॥ ८६ ॥ अनाहतकवाटं विष्णुग्रन्थिम् । आज्ञाकवाटे रुद्रग्रन्थौ । रुद्रग्रन्थिभेदनोपायमाह—तत इति ॥ ८७ ॥

### कुम्भकचतुष्टयाभ्यासविधिः

अथाभ्यसेत्सूर्यभेदमुज्जायीं चापि शीतलीम् ।
भस्त्रां च सहितो नाम स्याच्चतुष्टयकुम्भकः ॥ ८८ ॥
बन्धत्रयेण संयुक्तः केवलप्राप्तिकारकः ।

कुम्भकभेदमाह—अथेति ॥ ८८-८९ ॥

[1] जीव—अ, मु. [2] तुण्डे—क. खण्डे—अ. तुण्डेन—अ २.

सूर्यभेदनलक्षणम्

अथास्य लक्षणं सम्यग्वक्ष्यामि समासतः ॥ ८९ ॥

एकाकिना समुपगम्य विविक्तदेशं
प्राणादिरूपममृतं परमार्थतत्त्वम् ।
लब्ध्वाशिना धृतिमता परिभावितव्यं
संसाररोगहरमौषधमद्वितीयम् ॥ ९० ॥

सूर्यनाड्या समाकृष्य वायुमभ्यासयोगिना ।
विधिवत्कुम्भकं कृत्वा रेचयेच्छीतरश्मिना ॥ ९१ ॥

उदरे बहुरोगघ्नं क्रिमिदोषं निहन्ति च ।
मुहुर्मुहुरिदं कार्यं सूर्यभेदमुदाहृतम् ॥ ९२ ॥

आदौ समुदायलक्षणमुच्यते—एकाकिनेति ॥ ९० ॥ ततः सूर्यभेदलक्षणं तत्फलं चाह—सूर्येति ॥ ९१–९२ ॥

उज्जायीकुम्भकलक्षणम्

नाडीभ्यां वायुमाकृष्य कुण्डल्याः पार्श्वयोः क्षिपेत् ।
धारयेदुदरे पश्चाद्रेचयेदिडया सुधीः ॥ ९३ ॥

कण्ठे कफादिदोषघ्नं शरीराग्निविवर्धनम् ।
नाडीजलापहं धातुगतदोषविनाशनम् ॥ ९४ ॥

गच्छतस्तिष्ठतः कार्यमुज्जाय्याख्यं तु कुम्भकम् ।

उज्जायीकुम्भकलक्षणमाह—नाडीभ्यामिति ॥ ९३–९४ ।

मुखेन वायुं संगृह्य घ्राणरन्ध्रेण रेचयेत् ॥ ९५ ॥
शीतलीकरणं चेदं हन्ति पित्तं क्षुधां तृषम् ।

शीतलीलक्षणमाह—मुखेनेति ॥ ९५ ॥

भस्त्रिकाकुम्भकलक्षणम्

स्तनयोरथ भस्त्रेव लोहकारस्य वेगतः ॥ ९६ ॥
रेचयेत्पूरयेद्वायुमाश्रमं देहगं धिया ।
यथा श्रमो भवेद्देहे तथा सूर्येण पूरयेत् ॥ ९७ ॥
कण्ठसंकोचनं कृत्वा पुनश्चन्द्रेण रेचयेत् ।
वातपित्तश्लेष्महरं शरीराग्निविवर्धनम् ॥ ९८ ॥
कुण्डलीबोधकं वक्रदोषघ्नं शुभदं सुखम् ।
ब्रह्मनाडीमुखान्तःस्थकफाद्यर्गलनाशनम् ॥ ९९ ॥
सम्यग्बन्धसमुद्भूतं ग्रन्थित्रयविभेदकम् ।
विशेषेणैव कर्तव्यं भस्त्राख्यं कुम्भकं त्विदम् ॥ १०० ॥

भस्त्रिकाकुम्भकलक्षणमाह—स्तनयोरिति । भस्त्रिकाचालकस्तनयोः समं अथ ॥ ९६–९९ ॥ भस्त्रिकाकुम्भकात् रुद्रग्रन्थिरपि भिद्यते इत्यर्थः ॥ १०० ॥

बन्धत्रयविधिः

बन्धत्रयमथेदानीं प्रवक्ष्यामि यथाक्रमम् ।
नित्यं कृतेन तेनासौ वायोर्जयमवाप्नुयात् ॥ १०१ ॥

चतुर्णामपि भेदानां कुम्भके समुपस्थिते ।
बन्धत्रयमिदं कार्यं वक्ष्यमाणं मया हि तत् ॥ १०२ ॥
प्रथमो मूलबन्धस्तु द्वितीयोड्डीयणाभिधः ।
जालन्धरस्तृतीयस्तु लक्षणं कथयाम्यहम् ॥ १०३ ॥

कुम्भकचतुष्टयांगतया बन्धत्रयलक्षणमाह—बन्धेति ॥ १०१–१०४ ॥

मूलबन्धः

गुदं पार्ष्ण्या तु संपीड्य [1]वायुमाकुञ्चयेद्बलात् ।
वारंवारं यथा चोर्ध्वं समायाति समीरणः ॥ १०४ ॥
प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम् ।
गत्वा योगस्य संसिद्धिं यच्छतो नात्र संशयः ॥ १०५ ॥

नादबिन्दुशब्देन बुद्धिमनसी उच्येते ॥ १०५–१०७ ॥

उड्डियाणबन्धः

कुम्भकान्ते रेचकादौ कर्तव्यस्तूड्डियाणकः ।
बन्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः ॥ १०६ ॥
तस्मादुड्डीयणाख्योऽयं योगिभिः समुदाहृतः ।
उड्डियाणं तु सहजं गुरुणा कथितं सदा ॥ १०७ ॥
अभ्यसेत्तदतन्द्रस्तु वृद्धोऽपि तरुणो भवेत् ।
नाभेरूर्ध्वमधश्चापि तानं कुर्यात्प्रयत्नतः ॥ १०८ ॥
षण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः ।

[1] पायु—क, अ २.

ताणं आकुञ्चनम् ॥ १०८–१११ ॥

जालन्धरबन्धः ६.

पूरकान्ते तु कर्तव्यो बन्धो जालन्धराभिधः ॥ १०९ ॥
कण्ठसंकोचरूपोऽसौ वायुमार्गनिरोधकः ।
कण्ठमाकुञ्च्य हृदये स्थापयेद्दृढमिच्छया ॥ ११० ॥
बन्धो जालन्धराख्योऽयममृता[1]प्यायकारकः ।
अधस्तात्कुञ्चनेनाशु कण्ठसंकोचने कृते ॥ १११ ॥
मध्ये पश्चिमताणेन स्यात्प्राणो ब्रह्मनाडिगः ।

कुण्डल्या ग्रन्थित्रयविभेदनेन निर्विकल्पकप्राप्तिः

वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीम् ॥ ११२ ॥
कुर्यादनन्तरं भस्त्रीं कुण्डलीमाशु बोधयेत् ।
भिद्यन्ते ग्रन्थयो वंशे तप्तलोहशलाकया ॥ ११३ ॥
तथैव पृष्ठवंशे स्याद्ग्रन्थिभेदस्तु वायुना ।
पिपीलिकायां लग्नायां कण्डूस्तत्र प्रवर्तते ॥ ११४ ॥
सुषुम्नायां तथाऽभ्यासात्सततं वायुना भवेत् ।
रुद्रग्रन्थिं ततो भित्त्वा ततो याति शिवात्मकम् ॥ ११५ ॥
चन्द्रसूर्यौ समौ कृत्वा तयोर्योगः प्रवर्तते ।
गुणत्रयमतीतं स्याद्ग्रन्थित्रयविभेदनात् ॥ ११६ ॥
शिवशक्तिसमायोगे जायते परमा [2]स्थितिः ।

[1] प्याय—अ १, अ २, क. [2] स्थितः—अ, ब १.

मन्त्रत्रययुक्तो योगी वज्रासनेति ॥ ११२–११६ ॥ ब्रह्मरन्ध्रगततुरीय एव शिवः, शक्तिस्तु कुण्डलिनी, तयोर्योगादेव परमा स्थितिः सहजनिर्विकल्पकावस्था जायते इत्यर्थः ॥

सुषुम्नायाः मोक्षमार्गत्वं कालभोक्तृत्वं च

यथा करी करेणैव पानीयं प्रपिबेत्सदा ॥ ११७ ॥
सुषुम्नावज्रनालेन पवमानं ग्रसेत्तथा ।
वज्रदण्डसमुद्भूता मणयश्चैकविंशतिः ॥ ११८ ॥
सुषुम्नायां स्थिताः सर्वे सूत्रे मणिगणा इव ।
मोक्षमार्गे प्रतिष्ठाना सुषुम्ना विश्वरूपिणी ॥ ११९ ॥
यथैव निश्चितः कालश्चन्द्रसूर्यनिबन्धनात् ।
आपूर्य कुम्भितो वायुर्बहिर्नो याति साधके ॥ १२० ॥
पुनःपुनस्तद्वदेव पश्चिमद्वारलक्षणम् ।
पूरितस्तु स तद्वारैरीषत्कुम्भकतां गतः ॥ १२१ ॥
प्रविशेत्सर्वगात्रेषु [1]वायुः पश्चिममार्गतः ।
रेचितः क्षीणतां याति [2]पूरितः पोषयेत्ततः ॥ १२२ ॥

सुषुम्नया प्राणोदकं पिबेदित्यत्र दृष्टान्तमाह—यथेति ॥ ११७ ॥ वज्रदण्डो नाम सुषुम्नाश्रयो वीणादण्डः तत्र भवा एकविंशतिमणयश्चणकवन्मांसपिण्डाः सुषुम्नामार्गगतध्वान्तप्रासत्वात् दीपवत् प्रकाशरूपेण मूलाधारमारभ्य ब्रह्मरन्ध्रान्तं सुषुम्नावेणुपर्ववत् विद्यन्ते योगिप्रत्यक्षाः भवन्तीत्यर्थः ॥ ११८ ॥ तथाविधसुषुम्नाया मोक्षमार्गत्वं कालभोक्तृत्वं चाह—

[1] वायुं—अ, अ १. [2] पूरितं—अ

मोक्षेति । विश्वरूपिणी विश्वाधारब्रह्माश्रयत्वात् ॥ ११९ ॥ निमिषादिकल्पान्त-कालः यत्र विलीयते सेयं सुषुम्ना कालभोक्त्रीत्यर्थः । साधके योगिनि या सुषुम्ना वर्तते तया आपूर्य कुम्भितो वायुः उच्छ्वासनिश्वासरूपेण निमेषादिकल्पान्तकालकलनानिर्वाहकः प्राणवायुः सहसा बहिः नो याति । अतः कालभोक्तृत्वं सुषुम्नायाः सिद्धमित्यर्थः ॥ १२० ॥ यदि प्रमादतः सुषुम्नाया बहिः निर्गच्छति तदा पुनःपुनः तद्वत् पूर्ववदेव । सुषुम्नया प्राणमापूर्य कुम्भयेदिति यत्तत् पश्चिमद्वारलक्षणं भवति । सोऽयं प्राणः तद्वारैः तद्वारेण पूरितः सन्नादावीषत्कुम्भकतां भजति ॥ १२१ ॥ ततः प्राणवायुः पश्चिममार्गतः सर्वगात्रेषु प्रविशेत् । यदि कालकर्मसंयोगतः सुषुम्नया रेचितो वायुः क्षीणतां याति ततः तदा पूरितः शरीरं पोषयेत् पुष्टिं कुर्यादित्यर्थः ॥ १२२ ॥

### सुषुम्नायोगेन ब्रह्मज्ञानसिद्धिः

यत्रैव जातं सकलेवरं मन-
स्तत्रैव लीनं कुरुते स योगात् ।
स एव मुक्तो निरहंकृतिः सुखी
मूढा न जानन्ति हि पिण्डपातिनः ॥ १२३ ॥
चित्तं विनष्टं यदि भासितं स्या-
त्तत्र प्रतीतो मरुतोऽपि नाशः ।
न चेद्यदि स्यान्न तु तस्य शास्त्रं
नात्मप्रतीतिर्न गुरुर्न मोक्षः ॥ १२४ ॥
जम्बुको रुधिरं यद्वद्बलादाकृष्यति स्वयम् ।
ब्रह्मनाडी तथा धातून्संतताभ्यासयोगतः ॥ १२५ ॥

अनेनाभ्यासयोगेन नित्यमासनबन्धतः ।
चित्तं विलीनतामेति विन्दुर्नो यात्यधस्तथा ॥ १२६ ॥

स्वातिरिक्तमनस्तत्कार्यजातारोपापवादाधिष्ठानात्मज्ञानं यस्यास्ति स एव मुक्त इत्याह—यत्रेति । स्वातिरिक्तभ्रमतो मुक्तः । एवं अधिष्ठानयाथात्म्यज्ञानं ये न जानन्ति ते मूढाः तेषां आवृतित्रयावृतदृष्टित्वात् मूढत्वं सिद्धमित्यर्थः ॥१२३॥ यस्य एवमधिष्ठानज्ञानं नोदेति तद्दृष्ट्या श्रुत्याचार्यतत्प्रभवज्ञानतत्फलमोक्षादिकं नास्तीत्याह—चित्तमिति । तज्जन्म व्यर्थमित्यर्थः ॥ १२४ ॥ यतः अयं अधिष्ठानज्ञानाभावोऽनर्थहेतुः अतः तत्प्रबोधार्थं उत्तरो ग्रन्थ आरभ्यते । ब्रह्मातिरिक्तधातुषु सत्सु ब्रह्मज्ञानं कथं भवतीत्यत्र जम्बूको रुधिरमिव धातून् सुषुम्ना ग्रसति ततो ब्रह्मज्ञानं जायते इत्याह—जम्बुक इति । ब्रह्मनाडी तथा धातून बहिः पदार्थतत्प्रबोधान् ग्रसत्येव । ततो ब्रह्मज्ञानमुदेति तत्समकालं स्वातिरिक्तभ्रममुक्तिश्च भवति । एवं सिद्धावुपायस्तु—सन्ततेति । योगतः उक्तार्थसिद्धिः स्यादित्यर्थः ॥ १२५ ॥ अभ्यासतः किं स्यादित्यत्र अनेनेति ॥ १२६ ॥

योगाभ्यासेन स्वरूपावस्थितिसिद्धिक्रमः

रेचकं पूरकं मुक्त्वा वायुना स्थीयते स्थिरम् ।
नानानादाः प्रवर्तन्ते संत्रवेच्चन्द्रमण्डलम् ॥ १२७ ॥
नश्यन्ति क्षुत्पिपासाद्याः सर्वदोषास्तत[1]स्तदा ।
स्वरूपे सच्चिदानन्दे स्थितिमाप्नोति केवलम् ॥ १२८ ॥
कथितं तु तव प्रीत्या ह्येतदभ्यासलक्षणम् ।

ततः किं स्यादित्यत्र रेचकमिति । यदा वायुः स्थिरो भवति तदा नानानादाः ॥ १२७ ॥ एवं अमृतास्वादनतः, "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति प्रबोधाच्च नश्यन्ति इत्यादि ॥ १२८ ॥

[1] स्सदा—क, अ २.

मन्त्रादियोगचतुष्टयात्मको महायोगः

मन्त्रो लयो हठो राज[1]योगान्ता भूमिकाः क्रमात् ॥ १२९ ॥
एक एव चतुर्धाऽयं महायोगोऽभिधीयते ।

पुनस्ते महायोगं कथयामीत्याह—मन्त्र इति ॥ १२९ ॥

मन्त्रयोगः

हकारेण बहिर्याति सकारेण विशेत्पुनः ॥ १३० ॥
हंसहं सेति मन्त्रोऽयं सर्वैर्जीवैश्च जप्यते ।
गुरुवाक्यात्सुषुम्नायां विपरीतो भवेज्जपः ॥ १३१ ॥
सोऽहं सोऽहमिति [2]यः स्यान्मन्त्रयोगः स उच्यते ।

आदौ मन्त्रयोगलक्षणमाह—हकारेणेति ॥ १३० ॥ मन्त्रोऽयं सदाऽवशादुच्छ्वासनिश्वासरूपेण सर्वैः जप्यते । अयोगिनामेव भवतीत्यर्थः । योगिनां तु गुरुवाक्यात् इति ॥ १३१ ॥

हठयोगः

प्रतीतिमन्त्रयोगाच्च जायते पश्चिमे पथि ॥ १३२ ॥
हकारेण तु सूर्यः स्यात्सकारेणेन्दुरुच्यते ।
सूर्याचन्द्रमसोरैक्यं हठ इत्यभिधीयते ॥ १३३ ॥

सूत्रवाक्यपठितलययोगं पश्चाद्विवक्षन् हठयोगलक्षणमाह—प्रतीतीति ॥ १३२ ॥ चन्द्रसूर्यैक्यं जायते इत्याह—हकारेणेति ॥ १३३ ॥

[1] योगान्तर्भू—अ, अ १, अ २, क. [2] यस्य म—अ, अ १, अ २, क.

हठेन मृद्गते लक्ष्ये सच्चिदानन्दसुन्दरम् ।
क्षेत्रज्ञः परमात्मा च तयोरैक्यं यदा भवेत् ॥ १३४ ॥
तदैक्ये साधिते सद्यश्चित्तं याति विलीनताम् ।
पवनः स्थैर्यमायाति लययोगोदये सति ॥ १३५ ॥
लयात्संप्राप्यते सौख्यं स्वात्मानन्दं परं पदम् ।

लययोगलक्षणमाह—हठेनेति ॥ १३४-१३५ ॥

राजयोगः

योनिमध्ये महाक्षेत्रे जपाबन्धूकसंनिभम् ॥ १३६ ॥
रजो वसति जन्तूनां देवीतत्त्वं समावृतम् ।
रजसो रेतसो योगाद्राजयोग इति स्मृतः ॥ १३७ ॥
अणिमादिपदं प्राप्य राजते राजयोगतः ।

राजयोगलक्षणमाह—योनीति ॥ १३६ ॥ शशि[शिश्न ?]स्थाने रेतो वर्तते तद्धि शिवतत्त्वम् । रजसो रेतसो योगात् शक्तिशिवयोगात् राजयोगः ॥ १३७ ॥

योगसामान्यस्वरूपम्, योगेन मुक्तिप्राप्तिश्च

प्राणापानसमायोगो ज्ञेयं योगचतुष्टयम् ॥ १३८ ॥
संक्षेपात्कथितं ब्रह्मन्नान्यथा शिवभाषितम् ।
क्रमेण प्राप्यते प्राप्यमभ्यासादेव नान्यथा ॥ १३९ ॥

[1] प्रत्य—अ, आ १, क.

एकेनैव शरीरेण योगाभ्यासाच्छनैः शनैः ।
चिरात्संप्राप्यते मुक्तिर्मर्कटक्रम एव सः ॥ १४० ॥

मन्त्रादियोगचतुष्टयस्यापि एकार्थपर्यवसायित्वमाह—प्राणेति । योगचतुष्टयेऽपि प्राणापानयोगः समानः इत्यर्थः ॥ १३८ ॥ एवं सङ्क्षेपात् । स्वोक्तयोगफलमाह—क्रमेणेति । निर्विशेषब्रह्मज्ञानसमकालप्राप्यकैवल्यवद्योगफलस्य न ह्यचिरात् प्राप्तिरिष्यते इत्यर्थः ॥ १३९–१४० ॥

असिद्धयोगस्य मृतस्य उत्तरजन्मनि सिद्धिप्रकारः

योगसिद्धिं विना देहः प्रमादाद्यदि नश्यति ।
पूर्ववासनया युक्तः शरीरं चान्यदाप्नुयात् ॥ १४१ ॥
ततः पुण्यवशात्सिद्धो गुरुणा सह संगतः ।
पश्चिमद्वारमार्गेण जायते त्वरितं फलम् ॥ १४२ ॥
पूर्वजन्मकृताभ्यासात्सत्वरं फलमश्नुते ।

योगाभ्यासिनो योगफलाप्तेः पुरा यदि देहो नश्यति तदा तत्कृतश्रमो निष्फलो भवतीत्यत आह—योगेति । तदाऽयं योगी पूर्ववासनया ॥ १४१–१४२ ॥

अभ्यासयोगादेव मुक्तिः

एतदेव हि विज्ञेयं तत्काकमतमुच्यते ॥ १४३ ॥
नास्ति काकमतादन्यदभ्यासाख्यमतः परम् ।
तेनैव प्राप्यते मुक्तिर्नान्यथा शिवभाषितम् ॥ १४४ ॥

तदेव स्तौति—एतदिति । वस्तुतः अस्याः स्थितिः केत्याक्षेपार्थेन किंशब्देन मायोच्यते । सा यस्य वशे वर्तते सोऽयं काको मायी महेश्वरः । "मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" इति श्रुतिसिद्धकाकस्य महेश्वरस्याभ्यासयोगाख्यमिदमेव मतम् ॥ १४३ ॥ अज्ञानिनामाभासज्ञानिनामपि तच्चित्तमालिन्यसंक्षालनद्वारा निर्विशेषब्रह्मज्ञानहेतुत्वात् कलौ तेनैव प्रायशो मुक्तिः प्राप्यते नान्यथेत्यर्थः ॥ १४४ ॥

योगिनः सर्वैश्वर्यजीवन्मुक्त्यादिसिद्धिलाभः

हठयोगक्रमात्काष्ठा सह जीवलयादिकम् ।
नाकृतं मोक्ष[1]मार्गं स्यात्प्रसिद्धं पश्चिमं विना ॥ १४५ ॥
आदौ रोगाः प्रणश्यन्ति पश्चाज्जाड्यं शरीरजम् ।
ततः समरसो भूत्वा चन्द्रो वर्षत्यना[2]रतम् ॥ १४६ ॥
धातूंश्च संग्रहेद्वह्निः पवनेन समं ततः ।
नानानादाः प्रवर्तन्ते मार्दवं स्यात्कलेवरम् ॥ १४७ ॥
जित्वा वृष्ट्यादिकं जाड्यं खेचरः स भवेन्नरः ।
सर्वज्ञोऽसौ भवेत्कामरूपः पवनवेगवान् ॥ १४८ ॥
क्रीडते त्रिषु लोकेषु जायन्ते सिद्धयोऽखिलाः ।
कर्पूरे लीयमाने किं काठिन्यं तत्र विद्यते ॥ १४९ ॥
अहंकारक्षये तद्वद्देहे कठिनता कुतः ।
सर्वकर्ता च योगीन्द्रः स्वतन्त्रोऽनन्तरूपवान् ॥ १५० ॥
जीवन्मुक्तो महायोगी जायते नात्र संशयः ।

[1] मार्गः—अ, अ १, क. [2] रतः—उ.

हठयोगं स्तौति—हठेति। अकृतमकृत्रिमं "तयोर्ध्वमायन्नमृतत्त्वमेति," "सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी" इत्यादिश्रुतिप्रसिद्धं यत्रार्थजातं तत्तज्ज्ञानेन सह जीवतो योगिनो लयादिकमश्नुते तदिदं हठयोगक्रमादनुष्ठानात् सिद्धं पश्चिमं मोक्षमार्गं महापथं विना योगिनां काऽपि काष्ठा न विद्यते इत्यर्थः ॥ १४५ ॥ इत्थंभूतयोगप्रशंसापूर्वकं नानाविधसिद्धिभूषणं योगिनं जीवन्मुक्तत्वेन ईश्वरत्वेन च स्तौति—आदाविति। आदौ अभ्यासदशायामेव सर्वे रोगाः। शरीरजं आलस्यादि। प्राणाग्निसूर्यचन्द्रशक्तिशिवयोगतश्चन्द्रोऽनारतमनवरतं अमृतधारां वर्षति ॥ १४६ ॥ ततो मूलाधारगतोऽग्निः पवनेन समं स्थित्वा धातूंश्च संग्रहेत् बलवृद्धिं वीर्यस्तम्भनं च कुर्यादित्यर्थः। मार्दवं बालवत् कोमलं भवतीत्यर्थः ॥ १४७ ॥ जित्वा "अभ्रं भूत्वा मेघो भवति" इत्यादिजडतां विहाय तेजसा खेचरः स भवेन्नरः। एवमभ्यासयोगी सोऽयं सूर्यो भवतीत्यर्थः। किंच—सर्वज्ञः ॥ १४८ ॥ स्वेच्छामात्रेण जायन्ते। कथं पुनरस्य कळेबरं काठिन्यं विहाय मार्दवं भजतीत्यत्र सदृष्टान्तमुत्तरमाह—कर्पूर इति। दीपकणिकायोगतः कर्पूरे ॥ १४९ ॥ योगाग्निना अहङ्कारक्षये। मार्दवदेहः आकाशदेहो वा भवेदयमित्यर्थः। किंच—सर्वकर्ता ॥ १५० ॥

कृत्रिमाकृत्रिमसिद्धीनां गोपनविधिः

द्विविधाः सिद्धयो लोके कल्पिताकल्पितास्तथा ॥ १५१ ॥
रसौषधिक्रियाजालमन्त्राभ्यासादिसाधनात्।
सिध्यन्ति सिद्धयो यास्तु कल्पितास्ताः प्रकीर्तिताः ॥ १५२ ॥
अनित्या अल्पवीर्यास्ताः सिद्धयः साधनोद्भवाः।
साधनेन विनाऽप्येवं जायन्ते स्वत एव हि ॥ १५३ ॥
स्वात्मयोगैकनिष्ठेषु स्वातन्त्र्यादीश्वरप्रियाः।
प्रभूताः सिद्धयो यास्ताः कल्पनारहिताः स्मृताः ॥ १५४ ॥

सिद्धा नित्या महावीर्या इच्छारूपाः स्वयोगजाः ।
चिरकालात्प्रजायन्ते वासनारहितेषु च ॥ १९५ ॥
तास्तु गोप्या महायोगात्परमात्मपदेऽव्यये ।
विना कार्यं सदा [1]गुप्तं योगसिद्धस्य लक्षणम् ॥ १९६ ॥

योगजाः सिद्धयः कतिविधाः इत्यत्र कृत्रिमाकृत्रिमभेदेन द्विविधाः इत्याह —द्विविधा इति ॥ १९१–१९२ ॥ अकल्पितास्तु साधनेन ॥१९३–१९४॥ स्वेनैव सिद्धाः ॥ १९५ ॥ तासां गोपनीयतामाह—तास्त्विति । महायोगात् परमात्मपदे स्थितेन योगिना कार्यं विना ताः सिद्धयो गोपनीयाः । सदा सिद्धिजालं गुप्तं गोप्यं भवितव्यमिति यत् तद्योगसिद्धस्य लक्षणं सहजमित्यर्थः ॥ १९६ ॥

योगसिद्धजीवन्मुक्तयोः सूचकम्

यथाऽऽकाशं [काशीं ?] समुद्दिश्य गच्छद्भिः पथिकैः पथि ।
नानातीर्थानि दृश्यन्ते नानामार्गास्तु सिद्धयः ॥ १९७ ॥
स्वयमेव प्रजायन्ते लाभालाभविवर्जिते ।
योगमार्गे तथैवेदं सिद्धिजालं प्रवर्तते ॥ १९८ ॥
परीक्षकैः स्वर्णकारैर्हेम संप्रोच्यते यथा ।
सिद्धिभिर्लक्ष्येत्सिद्धं [2]जीवन्मुक्तं तथैव च ॥ १९९ ॥
अलौकिकगुणस्तस्य कदाचिद्दृश्यते ध्रुवम् ।
सिद्धिभिः परिहीनं तु नरं बद्धं तु लक्ष्येत् ॥ १६० ॥

[1] दीप्तं—अ, अ १.
[2] जीवन्मुक्तिस्त—अ, अ १. जीवन्मुक्तिं त—अ २.

सिद्धयो योगिनामेव स्युः इति सङ्कल्पिता भवेयुरित्यत आह—यथेति। कार्यं समुद्दिश्य। तथा यदृच्छया योगिनो नानामार्गाः सिद्धयो दृश्यन्ते ॥ १९७ ॥ योगिनि स्वयमेव। यथा आकाशमार्गे तीर्थानि दृश्यन्ते योगमार्गे ॥ १९८ ॥ स्वर्णं स्वर्णपरीक्षकवत् सिद्धं सिद्धिभिः परीक्ष्य तन्निकटे सिद्धयो यदि स्युः तदा तं सिद्धं मुक्तं विद्यात्। यदि ताः न स्युः तदा तं बद्धं विद्यादित्याह—परीक्षकैरिति। यद्ययं ज्ञानी तदा तं जीवन्मुक्तम् ॥ १९९ ॥ तस्मिन् यद्यस्ति तदा चिरपरिचयात् अलौकिकेति। तस्य तस्मिन् ॥ १६० ॥

देहे सत्यपि ज्ञानिनो विदेहमुक्तिलाभः

अजरामरपिण्डो यो जीवन्मुक्तः स एव हि।
पशुकुक्कुटकीटाद्या मृतिं संप्राप्नुवन्ति वै ॥ १६१ ॥
तेषां किं पिण्डपातेन मुक्तिर्भवति पद्मज।
न बहिःप्राण आयाति पिण्डस्य पतनं कुतः ॥ १६२ ॥
पिण्डपातेन या मुक्तिः सा मुक्तिर्न तु हन्यते।
देहे ब्रह्मत्वमायाते जलानां सैन्धवं यथा ॥ १६३ ॥
अनन्यतां यदा याति तदा मुक्तः स उच्यते।
विमतानि शरीराणि इन्द्रियाणि तथैव च ॥ १६४ ॥
ब्रह्म देहत्वमापन्नं [1]वारि बुद्बुदतामिव।

यद्ययं योगसहितज्ञानी तदा अजरेति। अजरामरपिण्डत्वं ज्ञानयोगिनः कथं? पिण्डस्याजरामरत्वे अस्य पिण्डपातलक्षणविदेहमुक्तिस्वप्नोऽपि दुर्लभः इत्यत आह—पश्चिति ॥ १६१ ॥ न बहिःप्राण आयाति योगी ॥ १६२ ॥ पिण्डपातेनोत्था मुक्तिः हन्यते नेति काक्वर्थः। किंतु हन्यत एवेत्यर्थः।

[1] यथावासं पुनस्तथा—अ, अ १.

विदेहमुक्तिः कथमित्यत्र देह इति । जलानां कार्यं सैन्धवम् ॥ १६३ ॥ परदृष्टिसमर्पितदेहाभासादावात्मात्मीयाभिमतिवैरळ्यपूर्वकं निष्प्रतियोगिकब्रह्ममात्रज्ञानं यस्य यदा उदेति स तदा विदेहमुक्तो भवतीत्यर्थः । विदेहमुक्तेः स्वातिरेकेण किञ्चिदस्ति नास्तीति विभ्रमापह्नवपूर्वकत्वात् , स्वमात्रातिरेकेण

देहासुभानं शिवजीवभानं
जगद्विभानं परमात्मभानम् ।
नानाविभानं न हि भाति यस्मिन्
स रामचन्द्रोऽस्मि विदेहमुक्तः ॥

इति विदेहमुक्तिमहावाक्यप्रबोधेः, आत्यन्तिकदेहाद्यभिमानासम्भवज्ञान्येव परदृष्ट्या देहे सत्यपि विदेहमुक्तो भवतीत्यर्थः । अन्यथा इदानीं मे देहादिः आत्मात्मीयाभिमानतया सत्यवत् भाति तेन जीवो बद्धः स्यां, इदानीं देहादिः व्यावहारिकप्रातिभासिकदृष्टिभ्यां मिथ्यात्वेन दृश्यते जीवन्मुक्तो वा स्यां, इतो वर्तमानदेहपातानन्तरं विदेहमुक्तो भविष्यामीति स्वातिरिक्तकलनावतां विदेहमुक्तिः भवितव्या स्यात् । न हि तेषां स्वप्नेऽपि सा भवितुमर्हति तेषां स्वातिरिक्तदेहाभासानुवर्तनादित्यत्र

तस्मिन् काले विदेहातिदेहेस्मरणवर्जितः ।
ईषन्मात्रं स्मृतश्चेद्यस्तदा सर्वसमन्वितः ॥

इति ॥

अणुमात्रेऽपि वैधर्म्ये जायमाने विपश्चितः ।
असंगताऽपि नास्त्येव किमुतावरणच्युतिः ॥

इति श्रुतेः, गौडपादाचार्योक्तेश्च । येषां स्वातिरेकेण देहादिकमस्तीति भ्रान्तिः तद्दृष्ट्या देहापायसिद्धेयं विदेहमुक्तिः स्यादेव । येषां पुनः स्वातिरिक्तदेहाद्युपलक्षितस्वाविद्यापदतत्कार्यजातमस्ति नास्तीति विभ्रमोक्तिरप्यपह्नवतां भजति तदपह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रज्ञानसमकालमेव ते परदृष्ट्या देहवन्त इव भाता अपि विदेहमुक्ता एव भवन्तीत्यत्र न विवाद इति सिद्धम् । तथा च स्मृतिः—

स्वकल्पितशरीरादावात्मात्मीयाभिमानतः ।
जीवत्वमेत्य चिन्मात्रं बद्धवत् संसरत्यहो ॥
यदि स्वज्ञानतो देहः प्रातिभासिकतामियात् ।
तदा जीवन्मुक्तवत्तच्चिन्मात्रं प्रतिभाति हि ॥
स्वमात्रव्यतिरेकेण यदा देहादि न स्फुरेत् ।
तदा विदेहकैवल्यं चिन्मात्रं प्राप्तवत् भवेत् ॥
स्वकल्पितशरीरादिः भात्वा भातु सदा स्वयम् ।
चिन्मात्रमेव चिन्मात्रमचिन्मात्रं भवेत् कथम् ॥

इति ॥

प्रकृते तु परदृष्ट्या विमतानि । सन्तु न सन्तु वा ॥ १६४ ॥ सर्वप्रकारेणापि ब्रह्म । यथा वार्यतिरिक्तं बुद्बुदादिकं नास्ति तथा ब्रह्मातिरेकेण देहादिकं नास्तीत्यर्थः ॥

### पिण्डाण्डस्य शिवालयत्ववर्णनम्

दशद्वारपुरं देहं दशनाडीमहापथम् ॥ १६५ ॥
दशभिर्वायुभिर्व्याप्तं दशेन्द्रियपरिच्छदम् ।
षडाधारापवरकं षडन्वयमहावनम् ॥ १६६ ॥
चतुःपीठसमाकीर्णं चतुरान्नायदीपकम् ।
बिन्दुनादमहालिङ्गं शिवशक्तिनिकेतनम् ॥ १६७ ॥
देहं शिवालयं प्रोक्तं सिद्धिदं सर्वदेहिनाम् ।

उत्तमाधिकारिणां ब्रह्मयाथात्म्यं प्रकटयित्वा मध्यमाधिकारिणां पिण्डाण्डैक्यत्वं प्रकटयंति—दशद्वारेति ॥ १६५–१६६ ॥ चतुरान्नायदीपकं चतुर्वेदप्रकाशकमित्यर्थः । बिन्दुनादमहालिङ्गं बिन्दुः मनः, नादो बुद्धिः,

तद्वृत्तिसहस्रभावाभावप्रकाशकमहालिंगं प्रत्यक्चैतन्यं यत्र तत्तथोक्तम् । शिवशक्तिनिकेतनं, जीवकुण्डल्याधारत्वात् देहस्येत्यर्थः ॥ १६७ ॥ देहं शिवालयं प्रोक्तं,

देहो देवालयः प्रोक्तः स जीवः केवलः शिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ॥

इति श्रुत्यन्तरात् ॥

आधारषट्कपीठचतुष्टययोः विवरणम्

गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकोणकम् ॥ १६८ ॥
शिवस्य जीवरूपस्य स्थानं [1]तद्धि प्रचक्षते ।
यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता ॥ १६९ ॥
यस्मादुत्पद्यते वायुर्यस्माद्वह्निः प्रवर्तते ।
यस्मादुत्पद्यते बिन्दुर्यस्मान्नादः प्रवर्तते ॥ १७० ॥
यस्मादुत्पद्यते हंसो यस्मादुत्पद्यते मनः ।
तदेतत्कामरूपाख्यं पीठं कामफलप्रदम् ॥ १७१ ॥
स्वाधिष्ठानाह्वयं चक्रं लिङ्गमूले षडश्रके ।
नाभिदेशे स्थितं चक्रं दशारं मणिपूरकम् ॥ १७२ ॥
द्वादशारं महाचक्रं हृदये चाप्यनाहतम् ।
तदेतत्पूर्णगिर्याख्यं पीठं कमलसंभव ॥ १७३ ॥
कण्ठकूपे विशुद्धयाख्यं यच्चक्रं षोडशाश्रकम् ।
पीठं जालन्धरं नाम तिष्ठत्यत्र सुरेश्वर ॥ १७४ ॥

[1] तच्च—अ.

आज्ञा नाम भ्रुवोर्मध्ये द्विदलं चक्रमुत्तमम् ।
उड्याणाख्यं महापीठमुपरिष्टात्प्रतिष्ठितम् ॥ १७५ ॥
चतुरश्रं धरण्यादौ ब्रह्मा तत्राधिदेवता ।
अर्धचन्द्राकृतिजलं विष्णुस्तस्याधिदेवता ॥ १७६ ॥
त्रिकोणमण्डलं वह्नी रुद्रस्तस्याधिदेवता ।
वायोर्बिम्बं तु षट्कोणमीश्वरोऽस्याधिदेवता ॥ १७७ ॥
आकाशमण्डलं वृत्तं देवताऽस्य सदाशिवः ।
नादरूपं भ्रुवोर्मध्ये मनसो मण्डलं विदुः ॥ १७८ ॥

षडाधारापवरकमित्यंशं विवृणोति—गुदेति ॥ १६८–१७० ॥ चतुष्पीठसमाकीर्णमित्यंशं च विवृणोति—तदेतदिति ॥ १७१–१७७ ॥ मनःप्रकाशकं ज्योतिर्लिंगं प्रत्यगभिन्नं ब्रह्मास्मीति विदुः, "ज्योतिर्लिंगं भ्रुवोर्मध्ये नित्यं ध्यायेत् सदा यतिः" इति श्रुतेः । एवं पिण्डाण्डयाथात्म्यं प्रत्यञ्चमात्मानं यो जानाति सोऽयं मुनिः ब्रह्माण्डयाथात्म्यं ब्रह्म जानाति व्यष्टिसमष्टिप्रपञ्चापवादाधिकरणप्रत्यक्परचितोरेकत्वात् । कृतकृत्यो भवतीत्यर्थः ॥ १७८ ॥

इति प्रथमोऽध्यायः

# द्वितीयोऽध्यायः

## योगज्ञानाधिकारी

पुनर्योगस्य माहात्म्यं श्रोतुमिच्छामि शंकर ।
येन [1]विज्ञानमात्रेण खेचरीसमतां व्रजेत् ॥ १ ॥

[1] विज्ञात—क.

शृणु ब्रह्मन्प्रवक्ष्यामि गोपनीयं प्रयत्नतः ।
द्वादशा[1]ब्दं तु शुश्रूषां यः कुर्यादप्रमादतः ॥ २ ॥
तस्मै वक्ता यथातथ्यं दान्ताय ब्रह्मचारिणे ।
पाण्डित्यादर्थ[2]लोभाद्वा प्रमादा[3]द्यः प्रयच्छति ॥ ३ ॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
मूलमन्त्रं विजानाति यो विद्वान्गुरुदर्शितम् ॥ ४ ॥

एवं ईश्वरमुखात् ज्ञानयोगं श्रुत्वाऽप्यतृप्त इव चतुराननः पुनर्योगज्ञान-माहात्म्यं पृच्छतीत्याह—पुनरिति । खेचरसूर्यवदतितेजस्वी भवेत् ॥ १ ॥ प्रश्नोत्तरं भगवानाह— शृण्विति ॥ २ ॥ मया वक्ष्यमाणविद्यां तस्मै ॥ ३ ॥ अनधिकारिविद्यादानदोषेण तत् सर्वं हीयते इत्यर्थः । यद्यधिकारी गुरुमुखतो यथावत् विजानाति स कृतकृत्यो भवतीत्याह—मूलेति ॥ ४ ॥

प्रणवाख्यमूलमन्त्रमहिमा

[4]शिवशक्तिमयं मन्त्रं मूलाधारात्समुत्थितम् ।
तस्य मन्त्रस्य वै ब्रह्मञ्छ्रोता वक्ता च दुर्लभः ॥ ५ ॥
एतत्पीठमिति प्रोक्तं नादलिङ्गं मदात्मकम् ।
तस्य विज्ञानमात्रेण जीवन्मुक्तो भवेज्जनः ॥ ६ ॥
अणिमादिकमैश्वर्यमचिरादेव जायते ।

तन्मन्त्रं स्तौति—शिवेति । स मन्त्रः प्रणवो नादो वा भवितुमर्हति । तदियत्तां बुद्ध्वा वक्ता श्रोता परमेश्वरोऽहमेव । न हि मद्व्यतिरिक्तः कोऽपि

[1] ब्दस्तु—उ, उ १. [2] लाभा—अ, अ १, क.
[3] द्वा प्र—अ, अ १, अ २, क. [4] मूलश—अ.

तदियत्ताज्ञो वक्ता श्रोता अस्ति ॥ ५ ॥ तन्मन्त्रस्वरूपमाचष्टे--एतदिति । एतन्मन्त्रस्वरूपं पीठमिति प्रोक्तं, मन्त्रार्थब्रह्मणः सर्वाधिकरणत्वात् पीठत्वम् । यद्भजतां स्वातिरिक्तलिंगज्ञानं न ददाति तन्नादलिङ्गम् । तत् किं त्वत्तोऽन्यदित्यत्र अहमेवात्मा स्वरूपं यस्य तत् मदात्मकमेव अभिधानाभिधेययोरेकत्वात् । तज्ज्ञानफलमाह—तस्येति ॥ ६ ॥

मूलमन्त्रत्वनिर्वचनम्

मननात्प्राणनाच्चैव मद्रूपस्यावबोधनात् ॥ ७ ॥
मन्त्रमित्युच्यते ब्रह्मन् मदधिष्ठानतोऽपि वा ।
मूलत्वात्सर्वमन्त्राणां मूला[1]धारात् समुद्भवात् ॥ ८ ॥
मूलस्वरूपलिङ्गत्वान्मूलमन्त्र इति स्मृतः ।

तस्य मूलमन्त्रत्वं कुत इत्यत आह--मननादिति ॥ ७ ॥ मन्त्रमिति विभक्तिव्यत्ययः । "तद्यथा शंकुना सर्वाणि पर्णानि सन्तृण्णानि एवमेवोङ्कारेण सर्वा वाक् सन्तृण्णा" "ओङ्कार एवेदं सर्वं" इति श्रुत्यनुरोधेन मूलत्वात् ॥ ८ ॥

नादलिङ्गत्वनिर्वचनम्

सूक्ष्मत्वात् [2]कारणत्वाच्च लयनाद्गमनादपि ॥ ९ ॥
लक्षणात्परमेशस्य लिङ्गमित्यभिधीयते ।

पुनस्तस्य लिंगत्वं सूत्रत्वं चाह—सूक्ष्मत्वादिति ॥ ९–१० ॥

सूत्रत्वनिर्वचनम्

संनिधानात्समस्तेषु जन्तुष्वपि च संततम् ॥ १० ॥
सूचकत्वाच्च रूपस्य सूत्रमित्यभिधीयते ।

[1] धारस—क, ग २. [2] कार—ङ.

प्रणवस्य बिन्दुपीठत्वम्

महामाया महालक्ष्मीर्महादेवी सरस्वती ॥ ११ ॥
आधारशक्तिरव्यक्ता यया विश्वं प्रवर्तते ।
सूक्ष्माभा बिन्दुरूपेण पीठरूपेण वर्तते ॥ १२ ॥

प्रणवस्यैव मूलमन्त्रत्वेन लिंगत्वेन सूत्रत्वेन च प्रकृतत्वात् प्रकृतित्वं "प्रणवत्वात् प्रकृतित्वं वदन्ति ब्रह्मवादिनः" इति श्रुतेः । सेयं प्रकृतिः कीदृशीत्यत आह—महामायेति ॥ ११ ॥ यया प्रणवप्रकृत्य अभिधानाभिधेयात्मकं विश्वं प्रवर्तते, या च दुर्गालक्ष्मीसरस्वतीत्वेन व्यवहियते सेयमाधारशक्तिरव्यक्तरूपा भवति । केन रूपेण व्यक्ताव्यक्तत्वमित्यत्र बिन्दुः मनस्तद्रूपेण सूक्ष्माभा । कामरूपादिचतुष्पीठरूपेण स्थूलत्वम् ॥ १२ ॥

निर्विशेषप्रणवब्रह्मावगत्युपायः

बिन्दुपीठं विनिर्भिद्य नादलिङ्गमुपस्थितम् ।
प्राणेनोच्चार्यते ब्रह्मन् षण्मुखीकरणेन च ॥ १३ ॥
गुरूपदेशमार्गेण सहसैव प्रकाशते ।

एवं स्थूलसूक्ष्माकारेण या वर्तते तद्वतहेयांशापायसिद्धं ब्रह्म गुरूपदेशतो प्रकाशते इत्याह—बिन्द्विति । हे ब्रह्मन् या प्राणापानव्यापारतः, सोऽहमोमित्युच्चार्यते तद्वतहेयांशं बिन्दुपीठं व्यक्ताव्यक्तात्मकं गुरूपदेशमार्गेण षण्मुखीकरणेन, चशब्दतो निर्विशेषब्रह्मज्ञानासिना च, तिलशो विनिर्भिद्य वर्तमानस्य योगिनः यदुपस्थितं नादलिंगं स्वातिरिक्तबिन्दुपीठोपलक्षितजाग्रज्जाग्रदाद्यविकल्पानुद्वैकरसान्तभेदलिंगावकाशं स्वाज्ञादिदृष्टिमोहे सत्यसति कालत्रयेऽपि यन्न ददाति तुर्यतुरीयं ब्रह्म निष्प्रतियोगिकस्वमात्रतया सहसैव प्रकाशते इत्यर्थः ॥ १३ ॥

स्थूलसूक्ष्मबीजरूपैः त्रिविधं ब्रह्म

स्थूलं सूक्ष्मं परं चेति त्रिविधं ब्रह्मणो वपुः ॥ १४ ॥
पञ्चब्रह्ममयं रूपं स्थूलं वैराजमुच्यते ।
हिरण्य[1]गर्भसूक्ष्मं तु नादं बीजत्रयात्मकम् ॥ १५ ॥

यत्तुर्यतुर्यरूपेण अवशिष्टं तदेव स्वाज्ञादिदृष्टितारतम्यानुरोधेन स्थूलसूक्ष्मपररूपेण त्रिधा विभातीत्याह—स्थूलमिति ॥ १४ ॥ तत्र स्थूलं तु पञ्चेति । अपरं तु हिरण्येति । तुशब्दात् बीजचैतन्यमपि गृह्यते । तत्तु आकारादिबीजत्रयात्मकम् ॥ १५ ॥

शुद्धतत्त्वस्य आत्ममन्त्राभ्यासैकवेद्यत्वम्

परं ब्रह्म परं सत्यं सच्चिदानन्दलक्षणम् ।
अप्रमेयमनिर्देश्यमवाङ्मनसगोचरम् ॥ १६ ॥
शुद्धं सूक्ष्मं निराकारं निर्विकारं निरञ्जनम् ।
अनन्तमपरिच्छेद्यमनूपममनामयम् ॥ १७ ॥
आत्ममन्त्रसदाभ्यासात् परतत्त्वं प्रकाशते ।

सर्वस्मात् परं तु आत्ममन्त्राभ्यासेन प्रकाशते न स्वेनेत्याह—परमिति ॥ १५–१७ ॥ प्रकाशते, न स्वत इत्यर्थः । आत्ममन्त्रशब्देन प्रणवमहावाक्यजातमुच्यते । "सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम्" इति श्रुत्यनुरोधेन श्रवणमननिदिध्यासनानुसन्धानं अभ्यासः ॥

परतत्त्वाभिव्यक्तिचिह्नानि

तदभिव्यक्तिचिह्नानि सिद्धिद्वाराणि मे शृणु ॥ १८ ॥

[1] गर्भं—अ, अ १.

दीपज्वालेन्दुखद्योतविद्युन्नक्षत्रभास्वराः ।
दृश्यन्ते सूक्ष्मरूपेण सदा युक्तस्य योगिनः ॥ १९ ॥
अणिमादिकमैश्वर्यमचिरात्तस्य जायते ।

एवं परतत्त्वसाक्षात्काराभिव्यक्तिचिह्नानि कानीत्यत आह—तदिति ॥ १८–१९ ॥ यदीच्छा जायते तदा अणिमादिकम् ।

नादानुसन्धानमहिमा

नास्ति नादात्परो मन्त्रो न देवः स्वात्मनः परः ॥ २० ॥
नानुसंधेः परा पूजा न हि तृप्तेः परं सुखम् ।
गोपनीयं प्रयत्नेन सर्वदा सिद्धिमिच्छता ॥ २१ ॥

नादात्मानुसन्धानतृप्तितुल्यं नास्तीत्याह—नास्तीति ॥ २० ॥ एवं-विशेषणविशिष्टस्वात्ममन्त्रस्यातिरहस्यार्थत्वेन गोपनीयतामाह—गोपनीयमिति ॥

गुरुभगवद्भक्तेरेव परतत्त्वज्ञानसम्भवः

मद्भक्त एतद्विज्ञाय कृतकृत्यः सुखी भवेत् ।
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ २२ ॥

एतज्ज्ञानफलमाह—मद्भक्त इति ॥ २१ ॥ श्रुत्याचार्यभक्तस्यैव उक्तार्थः प्रकाशते इत्याह—यस्येति ॥ २२ ॥

इति द्वितीयोऽध्यायः

# तृतीयोऽध्यायः

नादब्रह्मणः परापश्यन्त्यादिरूपचतुष्टयम्

यन्न[1]मस्य चिदाख्यातं यत्सिद्धीनां च कारणम् ।
येन विज्ञानमात्रेण जन्मबन्धात्प्रमुच्यते ॥ १ ॥
अक्षरं परमो नादः शब्दब्रह्मेति कथ्यते ।
मूलाधारगता शक्तिः स्वाधारा बिन्दुरूपिणी ॥ २ ॥
तस्यामुत्पद्यते नादः सूक्ष्मबीजादिवांकुरः ।
तां पश्यन्तीं विदुर्विश्वं यया पश्यन्ति योगिनः ॥ ३ ॥
हृदये व्यज्यते घोषो गर्जत्पर्जन्यसंनिभः ।
तत्र स्थिता सुरेशान मध्यमेत्यभिधीयते ॥ ४ ॥
प्राणेन च स्वराख्येन प्रथिता वैखरी पुनः ।

"नास्ति नादात् परो मन्त्रः" इति यदुक्तं तद्वैखरीप्रपञ्चप्रपञ्चनाय तृतीयाध्याय आरभ्यते—यन्नमस्येति । "नमस्त्वैक्यं प्रवदेत्" इति श्रुत्यनुरोधेन यन्नमस्य यदैक्यमनुभूय योगिभिः स्वशिष्येभ्यः चिदतिरिक्तं न किंचिदस्ति इत्याख्यातमित्यत्र

चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च ।
चित्त्वं चिदहमेते च लोकाश्चिदिति भावयेत् ॥

इत्यादि श्रुतेः । यत्सर्वसिद्धिनिदानं पर्यवसानं चिन्मात्रसिद्धिसमकालं सिद्धिजालस्यासिद्धिपदं गतत्वात् यद्विज्ञानमात्रतः स्वातिरिक्तभ्रमात् अज्ञोऽपि

[1] मस्यं—मु. कस्य—अ, अ १.

मुच्यते स्वाज्ञानविजृम्भितस्वातिरिक्तविभ्रमस्य स्वज्ञानतः प्रलयप्रमाणतः स्वयमेव अवशिष्यते इत्यत्र स्मृतिः

स्वाज्ञानोत्थे स्वातिरिक्ते स्वज्ञानात् प्रलयं गते ।
प्रतियोगिविनिर्मुक्तं स्वमात्रमवशिष्यते ॥

इति ॥ १ ॥

यज्ज्ञानात् मुच्यते इत्युक्तं तत् स्वाज्ञादिदृष्टिं आश्रित्य परापररूपेण द्विधा भिद्यते इत्याह—अक्षरमिति । अत्र स्वज्ञदृष्ट्या अनुभूतं तु अक्षरं परमः परमाक्षरमित्यर्थः । स्वाज्ञदृष्ट्यनुभूतं तु नादः नादरूपं शब्दब्रह्म परमाक्षरावगत्युपायभूतं, "शब्दब्रह्मणि निष्णातः परं ब्रह्माऽधिगच्छति" इति श्रुतेः । तदेतदपरं ब्रह्म क्व आविर्भवतीत्यत आह—मूलेति । मूलाधारगता परेति चित्सामान्यात्मिका बिन्द्वाख्याव्यक्तरूपिणी नादाधारा काचन शक्तिरस्ति ॥ २ ॥ तस्यामेव सूक्ष्मबीजांकुरवन्नाद उत्पद्यते इत्यत्र

परायामंकुरीभूय पश्यन्त्यां द्विदळीकृता ।
मध्यमायां मुकुळिता वैखर्यां विकसीकृता ॥

इति श्रुतेः । या परात्वेनाभिमता तामेव पश्यन्तीं मध्यमां वैखरीं च विदुरित्याह—तामिति ॥ ३ ॥ मूलाधारस्थपरायां योऽङ्कुरतां गतः सोऽयं नादः अनाहताख्यपश्यन्त्यां हृदये ॥ ४ ॥ सैव प्राणेन ॥ ५–९ ॥

### वैखरीस्वरूपविवरणम्

शाखापल्लवरूपेण तालवादिस्थानघट्टनात् ॥ ५ ॥
अकारादिक्षकारान्तान्यक्षराणि समीरयेत् ।
अक्षरेभ्यः पदानि स्युः पदेभ्यो वाक्यसंभवः ॥ ६ ॥
सर्वे वाक्यात्मका मन्त्रा वेदशास्त्राणि कृत्स्नशः ।
पुराणानि च काव्यानि भाषाश्च विविधा अपि ॥ ७ ॥

सप्तस्वराश्च गाथाश्च सर्वे नादसमुद्भवाः ।
एषा सरस्वती देवी सर्वभूतगुहाश्रया ॥ ८ ॥
वायुना वह्नियुक्तेन प्रेर्यमाणा शनैः शनैः ।
[1]द्वित्रिवर्णपदैर्वाक्यैरित्येवं वर्तते सदा ॥ ९ ॥

वैखरीसाक्षात्कारात् वाक्सिद्धिः

य इमां वैखरीं शक्तिं योगी स्वात्मनि पश्यति ।
स वाक्सिद्धिमवाप्नोति सरस्वत्याः प्रसादतः ॥ १० ॥
वेदशास्त्रपुराणानां स्वयं कर्ता भविष्यति ।

चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेंगयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥

इति श्रुतिसिद्धवैखरीज्ञानफलमाह—य इति ॥ १० ॥

परमाक्षरस्वरूपम्

यत्र बिन्दुश्च नादश्च सोमसूर्याग्निवायवः ॥ ११ ॥
इन्द्रियाणि च सर्वाणि लयं गच्छन्ति सुव्रत ।
[2]वायो यत्र विलीयन्ते मनो यत्र विलीयते ॥ १२ ॥

[1] तद्विवर्ण—अ, अ १, अ २, क. तद्विवर्त—मु. [2] वायवो यत्र ली—अ, क.

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते ॥ १३ ॥
यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥ १४ ॥
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
एतत्क्षराक्षरातीतमनक्षरमितीर्यते ॥ १५ ॥
क्षरः सर्वाणि भूतानि सूत्रात्माऽक्षर उच्यते ।
अक्षरं परमं ब्रह्म निर्विशेषं निरञ्जनम् ॥ १६ ॥
अलक्षणमलक्ष्यं तदप्रतर्क्यमनूपमम् ।
अपारपारमच्छेद्यमचिन्त्यमतिनिर्मलम् ॥ १७ ॥
आधारं सर्वभूतानामनाधारमनामयम् ।
अप्रमाणमनिर्देश्यमप्रमेयमतीन्द्रियम् ॥ १८ ॥
अस्थूलमनणुह्रस्वमदीर्घमजमव्ययम् ।
अशब्दस्पर्शरूपं तदचक्षुःश्रोत्रनामकम् ॥ १९ ॥
सर्वज्ञं सर्वगं शान्तं सर्वेषां हृदये स्थितम् ।
सुसंवेद्यं गुरुमतात्सुदुर्बोधमचेतसाम् ॥ २० ॥
निष्कलं निर्गुणं शान्तं निर्विकारं निराश्रयम् ।
निर्लेपकं निरापायं कूटस्थमचलं ध्रुवम् ॥ २१ ॥

परमाक्षरं किमित्याकांक्षायां यत्सर्वापवादाधिष्ठानं स्वाधिष्ठेयनिरूपिताधिष्ठानतापायसिद्धं तदेतदित्याह—यत्रेति ॥ ११ ॥ वायो वायवः ॥१२–१४॥ अनक्षरं परमाक्षरम् ॥ १५–१९ ॥ गुरुमतात् गुरूक्तार्थानुष्ठानात् ॥२०–२५॥

शब्दब्रह्मभक्तिभावनाभ्यां परब्रह्माधिगमः

ज्योतिषामपि तज्ज्योतिस्तमःपारे प्रतिष्ठितम् ।
भावाभावविनिर्मुक्तं भावनामात्रगोचरम् ॥ २२ ॥
भक्तिगम्यं परं तत्त्वमन्तर्लीनेन चेतसा ।
भावनामात्रमेवात्र कारणं पद्मसंभव ॥ २३ ॥
यथा देहान्तरप्राप्तिकारणं भावना नृणाम् ।
विषयं ध्यायतः पुंसो विषये रमते मनः ॥ २४ ॥
मामनुस्मरतश्चित्तं मय्येवात्र विलीयते ।
सर्वज्ञत्वं परेशत्वं सर्वसंपूर्णशक्तिता ॥ २५ ॥
अनन्तशक्तिमत्त्वं च ममानुस्मरणाद्भवेत् ।

इति ॥

निष्कामधिया शब्दब्रह्माभिधानमादोपासकानां शब्दब्रह्मप्रसादतः सर्वापवादाधिकरणं "एतत्क्षराक्षरातीतमनक्षर"मित्यादिना य"निर्विशेष"मित्यादि-"परं तत्त्व"मित्यन्तविशेषणविशिष्टं निष्प्रतियोगिकब्रह्ममात्रं स्वयमेवेति प्रसीदति। यत एवं अतः शब्दब्रह्मपरब्रह्मणोरुपायोपेयत्वं सिद्धमित्यर्थः ।

यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कळेबरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥

इति स्मृत्यनुरोधेन यथा देहान्तरप्राप्तिकारणं भावनैव तथा अस्मिन् लोके ये ये सविशेषेण निर्विशेषेण वा भावेन मां भजन्ति ते ते पुरुषाः सविशेषं निर्विशेषं वा ब्रह्म भवन्तीत्यत्र "तं यथा यथोपासते तथैव भवती"ति श्रुतेः। इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥

इति तृतीयोऽध्यायः

# चतुर्थोऽध्यायः

### जीवत्वस्य असत्यत्वम्

चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित् ।
जीवत्वं च तथा ज्ञेयं रज्ज्वां सर्पग्रहो यथा ॥ १ ॥
रज्ज्वज्ञानात्क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी ।
भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ॥ २ ॥

स्वातिरिक्ताविद्यापदतत्कार्यजातं सर्वैरपि नानाविधभेदभिन्नं सत् सत्यत्वेन अनुभूयते । तत् कथं भावनाशतेनाप्यभावपदं भजतीत्याकांक्षायां—परमार्थदृष्टयमातत्वात् स्वातिरिक्तं नास्त्येव । न हि शशशृङ्गवदवस्तुनि भावना प्रसरति । यत् परमार्थं वस्तु निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते तदेव स्वाज्ञदृष्टेः स्वातिरिक्तवदवभासते । यदा पुनः स्वज्ञानेन स्वाज्ञानं नष्टं भवति तदा ब्रह्मातिरिक्तं परमार्थदृष्टेः ब्रह्ममात्रमवशिष्यते इत्येतदर्थप्रपञ्चनार्थं चतुर्थाध्याय आरभ्यते—चैतन्यस्येति । घटशरावाद्यनुगतव्योमवत् चैतन्यस्य । जीवत्वं वास्तवं इत्यत्र सदृष्टान्तमुत्तरमाह—जीवत्वमिति ॥ १ ॥ ब्रह्मातिरेकेण जगतो दृश्यमानत्वात् तत् सत्यमित्यत्र तत्सत्त्वस्य स्वाज्ञानावधिकत्वात् स्वज्ञानोदये तज्जगच्चिदेव भवतीति सदृष्टान्तमाह—रज्ज्वज्ञानादिति ॥ २ ॥

### सर्वप्रपञ्चस्य ब्रह्मत्वम्

उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते ।
तस्मात्सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति न चेतरत् ॥ ३ ॥
व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् ।
इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४ ॥

ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः ।
तस्मादेतानि ब्रह्मैव भवन्तीति विचिन्तय ॥ ५ ॥
ब्रह्मैव सर्वनामानि रूपाणि विविधानि च ।
कर्माण्यपि समग्राणि [1]बिभर्तीति विभावय ॥ ६ ॥
सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम् ।
ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ॥ ७ ॥

कार्यकारणव्याप्यव्यापककलनासत्वात् प्रपञ्चोऽस्तीति मन्यमानमालक्ष्याह —उपादानमिति । यस्मादेवं तस्मात् ॥ ३–४ ॥ नामरूपकर्मवत् भूतजातस्य ब्रह्मकार्यत्वहेतुना तद्ब्रह्मैवेति सदृष्टान्तमाह—ब्रह्मण इति । यस्मात् ब्रह्मणः ॥ ५ ॥ किंच—ब्रह्मैव ॥ ६ ॥ यथा सुवर्णात् ॥ ७ ॥

ब्रह्मातिरिक्तदर्शनात् अनर्थप्राप्तिः

स्वल्पमप्यन्तरं कृत्वा जीवात्मपरमात्मनोः ।
यस्तिष्ठति विमूढात्मा भयं तस्यापि भाषितम् ॥ ८ ॥
यदज्ञानाद्भवेद्द्वैतमितरत्तत्प्रपश्यति ।
आत्मत्वेन तदा सर्वं नेतरत्तत्र चाण्वपि ॥ ९ ॥

ईषदपि ब्रह्मातिरिक्तमस्तीति पश्यतोऽनर्थमाह—स्वल्पमिति । "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति" इति श्रुत्यन्तरेणापि भयं भाषितमित्यर्थः ॥ ८ ॥ स्वाज्ञानविजृम्भितं द्वैतं स्वज्ञानेनाद्वैतं विभातीत्याह—यदिति ॥ ९ ॥

[1] बिभर्त्यतीति भा—अ २, उ १.

व्यावहारिकप्रपञ्चस्य मिथ्यात्वम्

अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् ।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधितः ॥ १० ॥
स्वप्ने जागरितं नास्ति जागरे स्वप्नता नहि ।
द्वयमेव लये नास्ति लयोऽपि ह्यनयोर्न च ॥ ११ ॥
त्रयमेव भवेन्मिथ्या गुणत्रयविनिर्मितम् ।
अस्य द्रष्टा गुणातीतो नित्यो ह्येष चिदात्मकः ॥ १२ ॥
यद्वन्मृदि घटभ्रान्तिः शुक्तौ हि रजतस्थितिः ।
तद्वद्ब्रह्मणि जीवत्वं [1]वीक्षमाणे विनश्यति ॥ १३ ॥
यदा मृदि घटो नाम कनके कुण्डलाभिधा ।
शुक्तौ हि रजतख्यातिर्जीव[2]शब्दार्थता परे ॥ १४ ॥
यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले ।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥ १५ ॥
यथैव शून्यो वेतालो गन्धर्वाणां पुरं यथा ।
यथाऽऽकाशे द्विचन्द्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥ १६ ॥
यथा तरङ्गकल्लोलैर्जलमेव स्फुरत्यलम् ।
घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः ॥ १७ ॥
जगन्नाम्ना चिदाभाति सर्वं ब्रह्मैव केवलम् ।

१—अ. वीक्षमाणो—क.
२ शब्दस्तथा—अ, अ १, अ २, क.

स्वातिरिक्तस्य व्यावहारिकसत्यत्वं मन्यमानं प्रत्याह—अनुभूत इति ॥ १० ॥ जाग्रदाद्यवस्थानां मिथो व्यभिचारित्वं तत्कल्पनाधारस्य नित्यत्वं चाह—स्वप्न इति ॥ ११–१२ ॥ जीवत्वादिकं स्वातिरिक्तयाथात्म्यं नावधिकमिति सदृष्टान्तमाह—यद्वदिति ॥ १३–१७ ॥

स्वातिरिक्तप्रपञ्चस्य अत्यन्तासम्भवः

यथा वन्ध्यासुतो नास्ति यथा नास्ति मरौ जलम् ॥ १८ ॥
यथा नास्ति नभोवृक्षस्तथा नास्ति जगत्स्थितिः ।
गृह्यमाणे घटे यद्वन्मृत्तिका भाति वै बलात् ॥ १९ ॥
[1]वीक्ष्यमाणे प्रपञ्चे तु ब्रह्मैवाभाति भासुरम् ।

किं बहुना स्वातिरिक्तप्रपञ्चस्यात्यन्तासम्भवमाह—यथेति ॥ १८–१९ ॥

अज्ञानकृतः आत्मनि देहाद्यारोपः

सदैवात्मा विशुद्धोऽ[2]स्मि ह्यशुद्धो भाति वै सदा ॥ २० ॥
यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् ।
यथैव मृन्मयः कुम्भस्तद्वद्देहोऽपि चिन्मयः ॥ २१ ॥
आत्मानात्मविवेकोऽयं मुधैव क्रियते बुधैः ।
सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका ॥ २२ ॥
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ।
घटत्वेन यथा पृथ्वी जलत्वेन मरीचिका ॥ २३ ॥

[1] वीक्ष—अ १, अ २, क. [2] स्ति—क, अ २.

गृहत्वेनै हि काष्ठानि खड्गत्वेनैव लोहता ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ २४ ॥

इति ॥

यत एवमतः सदैवेति ॥ २०–२१ ॥ तथा सति आत्मेत्यादि । अनात्मनो दुर्लभत्वात् सर्पत्वेन ॥ २२–२३ ॥ वस्तुतस्तु सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकमेवेति फलितोऽर्थः ॥ २४ ॥ इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥

इति चतुर्थोऽध्यायः

# पञ्चमोऽध्यायः

देहस्य विष्ण्वालयत्वम्

पुनर्योगं प्रवक्ष्यामि गुह्यं ब्रह्मस्वरूपकम् ।
समाहितमना भूत्वा शृणु ब्रह्मन् यथाक्रमम् ॥ १ ॥
दशद्वारपुरं देहं दशनाडीमहापथम् ।
दशभिर्वायुभिर्व्याप्तं दशेन्द्रियपरिच्छदम् ॥ २ ॥
षडाधारापवरक षडन्वयमहावनम् ।
चतुष्पीठसमाकीर्णं चतुराम्नायदीपकम् ॥ ३ ॥
बिन्दुनादमहालिङ्गविष्णुलक्ष्मीनिकेतनम् ।
देहं विष्ण्वालयं प्रोक्तं सिद्धिदं सर्वदेहिनाम् ॥ ४ ॥

उत्तमाधिकारिणामेवं निर्विशेषं ब्रह्म प्रतिपाद्य मध्यमाधिकारिणां पुरोक्तोऽपि योगो भूयोऽपि सप्रकारं वक्तव्य इति पञ्चमाध्याय आरभ्यते— पुनरिति ॥ १–२ ॥ योगाचार्यैः भुसुण्डप्रभृतिभिः मन्त्र-लय-हठ-राज-भावना-

सहजयोगसम्प्रदायभेदेन षडन्वय एव महावनं यस्मिन् तत्तथोक्तं, एकैकस्य अन्वयस्य समुद्रवदपारत्वात् ॥ ३ ॥ पुरा शिवशक्तिनिकेतनं शिवालयमित्युक्तं, पुनः विष्णुलक्ष्मीनिकेतनं विष्ण्वालयमित्युक्तिः शिवविष्ण्वोः भेदभ्रमनिरासनार्थेति मन्तव्या ॥ ४–१९ ॥

आधारषट्कपीठचतुष्टययोः विवरणम्

गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकोणकम् ।
शिवस्य जीवरूपस्य स्थानं तद्धि प्रचक्षते ॥ ९ ॥
यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता ।
यस्मादुत्पद्यते वायुर्यस्माद्वह्निः प्रवर्तते ॥ ६ ॥
यस्मादुत्पद्यते बिन्दुर्यस्मान्नादः प्रवर्तते ।
यस्मादुत्पद्यते हंसो यस्मादुत्पद्यते मनः ॥ ७ ॥
तदेतत्कामरूपाख्यं पीठं कामफलप्रदम् ।
स्वाधिष्ठानाह्वयं चक्रं लिङ्गमूलं षडश्रकम् ॥ ८ ॥
नाभिदेशे स्थितं चक्रं दशारं मणिपूरकम् ।
द्वादशारं महाचक्रं हृदये चाप्यनाहतम् ॥ ९ ॥
तदेतत्पूर्णगिर्याख्यं पीठं कमलसंभव ।
कण्ठकूपे विशुद्धाख्यं यच्चक्रं षोडशाश्रकम् ॥ १० ॥
पीठं जालन्धरं नाम तिष्ठत्यत्र चतुर्मुख ।
आज्ञा नाम भ्रुवोर्मध्ये द्विदलं चक्रमुत्तमम् ॥ ११ ॥

[1] मूले—क, ग २,

उड्डाणाख्यं महापीठमुपरिष्टात्प्रतिष्ठितम् ।
स्थानान्येतानि देहेऽस्मिन्शक्तिरूपं प्रकाशते ॥ १२ ॥
चतुरश्रा धरण्यादौ ब्रह्मा तत्राधिदेवता ।
अर्धचन्द्राकृति जलं विष्णुस्तस्याधिदेवता ॥ १३ ॥
त्रिकोणमण्डलं वह्नी रुद्रस्तस्याधिदेवता ।
[1]वायोर्बिम्बं तु षट्कोणं संकर्षोऽत्राधिदेवता ॥ १४ ॥
आकाशमण्डलं वृत्तं श्रीमन्नारायणोऽत्राधिदेवता ।
नादरूपं भ्रुवोर्मध्ये मनसो मण्डलं विदुः ॥ १५ ॥
शांभवस्थानमेतत्ते वर्णितं पद्मसंभव ।

एतत् प्रथमाध्यायान्ते प्रायशः उक्तं इत्याह—शाम्भवेति ॥

### नाडीचक्रस्वरूपम्

अतः परं प्रवक्ष्यामि नाडीचक्रस्य निर्णयम् ॥ १६ ॥
मूलाधारत्रिकोणस्था सुषुम्ना द्वादशाङ्गुला ।
मूलार्धच्छिन्नवंशाभा ब्रह्मनाडीति सा स्मृता ॥ १७ ॥
इडा च पिङ्गला चैव तस्याः पार्श्वद्वये गते ।
विलम्बिन्यामनुस्यूते नाडिकाऽन्तमुपागते ॥ १८ ॥
इडायां हेमरूपेण वायु[2]र्वामेन गच्छति ।
पिङ्गलायां तु सूर्यात्मा याति दक्षिणपार्श्वतः ॥ १९ ॥
विलम्बिनीति या नाडी व्यक्ता नाभौ प्रतिष्ठिता ।
तत्र नाड्यः समुत्पन्नास्तिर्यगूर्ध्वमधोमुखाः ॥ २० ॥

[1] वायौ बि—क. [2] मेहे—उ १. हेमे—उ.

तन्नाभिचक्रमित्युक्तं कुक्कुटाण्डमिव स्थितम् ।
गान्धारी हस्तिजिह्वा च तस्मान्नेत्रद्वयं गते ॥ २१
पूषा चालम्बुसा चैव श्रोत्रद्वयमुपागते ।
शूरा नाम महानाडी तस्माद्भ्रूमध्यमाश्रिता ॥ २२ ॥
विश्वोदरी तु या नाडी सा मुङ्क्तेऽन्नं चतुर्विधम् ।
सरस्वती तु या नाडी सा जिह्वाऽन्तं प्रसर्पते ॥ २३ ॥
राकाऽऽह्वया तु या नाडी पीत्वा च सलिलं क्षणात् ।
श्रुतमुत्पादयेद् घ्राणे श्लेष्माणं संचिनोति च ॥ २४ ॥
कण्ठकूपोद्भवा नाडी शङ्खिन्याख्या त्वधोमुखी ।
अन्नसारं समादाय मूर्ध्नि संचिनुते सदा ॥ २५ ॥
नाभेरधोगतास्तिस्रो नाडयः स्युरधोमुखाः ।
मलं त्यजेत्कुहूर्नाडी मूत्रं मुञ्चति वारुणी ॥ २६ ॥
चित्राख्या सीविनी नाडी शुक्रमोचनकारिणी ।
नाडीचक्रमिति प्रोक्तं बिन्दुरूपमतः शृणु ॥ २७ ॥

ततो नाडीचक्रस्वरूपमाह—अत इति ॥ १६–२७ ॥

बिन्द्वग्निसोमात्मकं ब्रह्मशरीरत्रयम्

स्थूलं सूक्ष्मं परं चेति त्रिविधं ब्रह्मणो वपुः ।
स्थूलं शुक्रात्मकं [1]बिन्दुः सूक्ष्मं पञ्चाग्निरूपकम् ॥ २८ ॥
सोमात्मकः परः प्रोक्तः सदा साक्षी सदाऽच्युतः ।

[1] बिन्दुस्तु—क, अ १, अ २.

कालाग्न्यादि पञ्चाग्निरूपकम् ॥ २८ ॥

पञ्चाग्निभावना, तत्फलं च

पातालानामधोभागे कालाग्निर्यः प्रतिष्ठितः ॥ २९ ॥
स मूलाग्निः शरीरऽग्निर्यस्मान्नादः प्रजायते ।
जडवाग्निः शरीरस्थो ह्यस्थिमध्ये प्रवर्तते ॥ ३० ॥
काष्ठपाषाणयोर्वह्निर्ह्यस्थिमध्ये प्रवर्तते ।
काष्ठपाषाणजो वह्निः पार्थिवो ग्रहणीगतः ॥ ३१ ॥
अन्तरिक्षगतो वह्निर्वैद्युतः स्वान्तरात्मकः ।
नभःस्थः सूर्यरूपोऽग्निर्नाभिमण्डलमाश्रितः ॥ ३२ ॥
विषं [1]वर्षति सूर्योऽसौ स्रवत्यमृतमुन्मुखः ।
तालुमूले स्थितश्चन्द्रः सुधां वर्षत्यधोमुखः ॥ ३३ ॥
भ्रूमध्यनिलयो बिन्दुः शुद्धस्फटिकसंनिभः ।
महाविष्णो[2]श्च देवस्य तत्सूक्ष्मं रूपमुच्यते ॥ ३४ ॥
एतत्पञ्चाग्निरूपं यो भावयन् बुद्धिमान् धिया ।
तेन भुक्तं च पीतं च हुतमेव न संशयः ॥ ३५ ॥

क्रमात् पञ्चाग्निस्वरूपमाह—पातालानामिति । अतलादिपातालानां पातालान्तलोकानां पातालानाम् ॥ २९ ॥ कालाग्निरेव नादाधाराग्निर्भूत्वा शरीरे वर्तते ॥ ३० ॥ तथा काष्ठेति । ग्रहणीगतः—पार्थिवाग्निरेव योषात्वं प्राप्त इत्यर्थः ॥ ३१–३४ ॥ पञ्चाग्निभावनाफलमाह—एतदिति ॥ ३५ ॥

[1] पिबति—क.
[2] स्य—क, अ २, उ १.

कुण्डलिनीप्रबोधनम्

सुखसंसेवितं स्वप्नं सुजीर्णमितभोजनम् ।
शरीरशुद्धिं कृत्वाऽऽदौ सुखमासनमास्थितः ॥ ३६ ॥
प्राणस्य शोधयेन्मार्गं रेचपूरककुम्भकैः ।
गुदमाकुञ्च्य यत्नेन मूलशक्तिं प्रपूजयेत् ॥ ३७ ॥

एवमाहारतः शरीरशुद्धिम् । स्वस्य येन सुखधारणा स्यात् तत सुखमासनम् ॥ ३६ ॥ मूलशक्तिं प्रपूजयेत् कुण्डलिनीशक्तिं प्रबोधयेदित्यर्थः ॥ ३७–४२ ॥

खेचरीमुद्राभ्यासः तत्फलं च

नाभौ लिङ्गस्य मध्ये तु उड्डयाणाख्यं च बन्धयेत् ।
उड्डीय याति तेनैव शक्तितोऽड्याणपीठकम् ॥ ३८ ॥
कण्ठं संकोचयेत्किंचिद्बन्धो जालन्धरो ह्ययम् ।
बन्धयेत्खेचरीमुद्रां दृढचित्तः समाहितः ॥ ३९ ॥
कपालविवरे जिह्वा प्रविष्टा विपरीतगा ।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ ४० ॥
खेचर्या मुद्रितं येन विवरं लम्बिकोर्ध्वतः ।
न पीयूषं पतत्यग्नौ न च वायुः प्रधावति ॥ ४१ ॥
न क्षुधा न तृषा निद्रा नैवालस्यं प्रजायते ।
न च मृत्युर्भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ॥ ४२ ॥

सहस्रारे नारायणभावनातः कैवल्यसिद्धिः

ततः पूर्वापरे व्योम्नि द्वादशान्तेऽच्युतात्मके ।
उड्डीयाणपीठे निर्द्वन्द्वे निरालम्बे निरञ्जने ॥ ४३ ॥
ततः पङ्कजमध्यस्थं चन्द्रमण्डलमध्यगम् ।
नारायणमनुध्यायेत्स्रवन्तममृतं सदा ॥ ४४ ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ४५ ॥

ततो योगी सहस्रागकाशे स्रवदमृतं नारायणं स्वात्मतया ध्यायन् ग्रन्थिसंशयकर्मासम्भवकैवल्यसिद्धिमेतीत्याह—तत इति । सहस्रारे आज्ञायां वा ॥ ४३–४५ ॥

यथोक्तभावनायुक्तस्य तत्तत्सिद्ध्युपायाः

अथ सिद्धिं प्रवक्ष्यामि सुखोपायं सुरेश्वर ।
जितेन्द्रियाणां शान्तानां जितश्वासचित्तसाम् ॥ ४६ ॥
नादे मनोलयं ब्रह्मन् दूरश्रवणकारणम् ।
बिन्दौ मनोलयं कृत्वा दूरदर्शनमाप्नुयात् ॥ ४७ ॥
कालात्मनि मनो लीनं त्रिकालज्ञानकारणम् ।
परकायमनोयोगः परकायप्रवेशकृत् ॥ ४८ ॥
अमृतं चिन्तयेन्मूर्ध्नि क्षु[1]त्तृषाविषशान्तये ।
पृथिव्यां धारयेच्चित्तं पातालगमनं भवेत् ॥ ४९ ॥

[1] तृष्णा—अ, अ १.

सलिले धारयेच्चित्तं नाम्भसा परिभूयते ।
अग्नौ संधारयेच्चित्तमग्निना दह्यते न सः ॥ ९० ॥
वायौ मनोलयं कुर्यादाकाशगमनं भवेत् ।
आकाशे धारयेच्चित्तमणिमादिकमाप्नुयात् ॥ ९१ ॥
विराड्[1]रूपे मनो युञ्जन् महिमानमवाप्नुयात् ।
चतुर्मुखे मनो युञ्जन् जगत्सृष्टिकरो भवेत् ॥ ९२ ॥
इन्द्ररूपिणमात्मानं भावयन् मर्त्यभोगवान् ।
विष्णुरूपे [2]महायोगी पालयेदखिलं जगत् ॥ ९३ ॥
रुद्ररूपे महायोगी संहरत्येव तेजसा ।
नारायणे मनो युञ्जन् नारायण[3]मयो भवेत् ।
वासुदेवे मनो युञ्जन् सर्वसिद्धिमवाप्नुयात् ॥ ९४ ॥
यथा संकल्पयेद्योगी योगयुक्तो जितेन्द्रियः ।
तथा तत्तदवाप्नोति भाव एवात्र कारणम् ॥ ९५ ॥

एवं भावयतः ते नानाविधसिद्ध्युपायं वदामीत्याह—**अथेति** ॥ ४६ ॥ **बिन्दौ** चक्षुस्तारके ॥ ४७–६१ ॥

गुरुपूजाविधिः

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवः सदाऽच्युतः ।
न गुरोरधिकः कश्चित् त्रिषु लोकेषु विद्यते ॥ ९६ ॥

[1] रूपं—अ, अ १. [2] मनो—उ.
[3] मयं—अ १, अ २, क.

दिव्यज्ञानोपदेष्टारं देशिकं परमेश्वरम् ।
पूजयेत्परया भक्त्या तस्य ज्ञानफलं [1]भवेत् ॥ ९७ ॥
यथा गुरुस्तथैवेशो यथैवेशस्तथा गुरुः ।
पूजनीयो महाभक्त्या न भेदो विद्यतेऽनयोः ॥ ९८ ॥
नाद्वैतवादं कुर्वीत गुरुणा सह कुत्रचित् ।
अद्वैतं भावयेद्भक्त्या गुरोर्देवस्य चात्मनः ॥ ९९ ॥

योगशिखामहिमा

योगशिखां महागुह्यं यो जानाति महामतिः ।
न तस्य किंचिदज्ञातं त्रिषु लोकेषु विद्यते ॥ ६० ॥
न पुण्यपापे [2]नास्वस्थो न दुःखं न पराजयः ।
न चास्ति पुनरावृत्तिरस्मिन् संसारमण्डले ॥ ६१ ॥

सिद्धिषु उपेक्षाविधिः

सिद्धौ चित्तं न कुर्वीत चञ्चलत्वेन चेतसः ।
तथाऽपि ज्ञाततत्त्वोऽसौ मुक्त एव न संशयः ॥ ६२ ॥

इत्युपनिषत् ॥

विज्ञातस्वात्मतत्त्वानां योगिनां सिद्धिगोपनागोपनतो न काचित् क्षतिः लाभो वा अस्तीत्यर्थः । इत्युपनिषच्छब्दः पञ्चमाध्यायसमाप्त्यर्थः ॥ ६२ ॥

इति पञ्चमोऽध्यायः

[1] लभेत्—अ, अ १, अ २, क. [2] नस्व—अ, अ १, अ २, क.

# षष्ठोऽध्यायः

कुण्डलिनीशक्तेः उपासनाविधिः

उपासनाप्रकारं मे ब्रूहि त्वं परमेश्वर ।
येन विज्ञानमात्रेण मुक्तो भवति संसृतेः ॥ १ ॥
उपासनाप्रकारं ते रहस्यं श्रुतिसारकम् ।
हिरण्यगर्भ वक्ष्यामि श्रुत्वा सम्यगुपासय ॥ २ ॥
सुषुम्नायै कुण्डलिन्यै सुधायै चन्द्रमण्डलात् ।
मनोन्मन्यै नमस्तुभ्यं महाशक्त्यै चिदात्मने ॥ ३ ॥

स्वाङ्गलोको येन मुच्यते तदुपायोपासनाप्रकारं ब्रूहीति महेश्वरं प्रति चतुर्मुखः पृच्छतीत्याह—उपासनेति ॥ १ ॥ प्रश्नोत्तरं भगवानाह—उपासनेति ॥ २ ॥ उपासनामन्त्रतत्प्रकारं तत्फलं चाह—सुषुम्नाया इति ॥ ३ ॥

सुषुम्नास्वरूपम्

शतं चैका च हृदयस्य नाड्य-
स्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति
विष्वङ्न्या उत्क्रमणे भवन्ति ॥ ४ ॥
एकोत्तरं नाडिशतं तासां मध्ये परा स्मृता ।
सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी ॥ ५ ॥
इडा तिष्ठति वामेन पिङ्गला दक्षिणेन तु ।
तयोर्मध्ये परं स्थानं [1]यस्तद्वेद स वेदवित् ॥ ६ ॥

[1] यस्तं वे—उ,

प्राणान् संधारयेत्तस्मिन् नासाभ्यन्तरचारिणः ।
भूत्वा तत्रायतप्राणः शनैरेव समभ्यसेत् ॥ ७ ॥
गुदस्य पृष्ठभागेऽस्मिन्वीणा[1]दण्डस्तु देहभृत् ।
दीर्घास्थिदेहपर्यन्तं ब्रह्मनाडीति कथ्यते ॥ ८ ॥
तस्यान्ते सुषिरं सूक्ष्मं ब्रह्मनाडीति सूरिभिः ।
इडापिङ्गलयोर्मध्ये सुषुम्ना सूर्यरूपिणी ॥ ९ ॥

सुषुम्नारूपं तन्मार्गगमनफलं चाह—शतमिति ॥ ४–१९ ॥

सुषुम्नायाः सर्वाधारत्वम्

सर्वं प्रतिष्ठितं तस्मिन् सर्वगं सर्वतोमुखम् ।
तस्य मध्यगताः सूर्यसोमाग्निपरमेश्वराः ॥ १० ॥
भूतलोका दिशः क्षेत्राः समुद्राः पर्वताः शिलाः ।
द्वीपाश्च निम्नगा वेदाः शास्त्रविद्याकलाऽक्षराः ॥ ११ ॥
स्वरमन्त्रपुराणानि गुणाश्चैते च सर्वशः ।
बीजं बीजात्मकस्तेषां क्षेत्रज्ञाः प्राणवायवः ॥ १२ ॥
सुषुम्नाऽन्तर्गतं विश्वं तस्मिन् सर्वं प्रतिष्ठितम् ।
नानानाडीप्रसवगं सर्वभूतान्तरात्मनि ॥ १३ ॥
ऊर्ध्वमूलमधःशाखं वायुमार्गेण सर्वगम् ।
द्विसप्ततिसहस्राणि नाड्यः स्युर्वायुगोचराः ॥ १४ ॥
सर्वमार्गेण सुषिरास्तिर्यञ्चः सुषिरात्मकाः ।
अधश्चोर्ध्वं च कुण्डल्याः सर्वद्वारनिरोधनात् ॥ १५ ॥

[1] दण्डस्य—क, अ, अ १, अ २. दण्डः स—मु.

पराशक्तेः उद्बोधनम्

वायुना सह जीवोर्ध्वज्ञानान्मोक्षमवाप्नुयात् ।
ज्ञात्वा सुषुम्ना तद्भेदं कृत्वा पायुं च मध्यगम् ॥ १६ ॥
कृत्वा तु बैन्दवस्थाने घ्राणरन्ध्रे निरोधयेत् ।
द्विसप्ततिसहस्राणि नाडीद्वाराणि पञ्जरे ॥ १७ ॥
सुषुम्ना शाम्भवी शक्तिः शेषास्त्वन्ये निरर्थकाः ।
हृल्लेखे परमानन्दे तालु[1]मूलव्यवस्थितं ॥ १८ ॥
अत ऊर्ध्वं निरोधे तु मध्यमं मध्यमध्यमम् ।
उच्चारयेत्परां शक्तिं ब्रह्मरन्ध्रनिवासिनीम् ।
यदि भ्रमरसृष्टिः स्यात् संसारभ्रमणं त्यजेत् ॥ १९ ॥

जीवशक्तिः कुण्डलिनीत्यर्थः ॥ १६ ॥ **बैन्दवस्थाने** भ्रूमध्ये । **पञ्जरे** शरीरे ॥ १७ ॥ **हृल्लेखे** हींकारवाच्ये **परमानन्दे** ईश्वरतत्त्वे **तालुमूलव्यवस्थिते** चित्तादिकं निरोधयेत् ॥ १८ ॥ मध्यमं तुरीयं, मध्यमध्यमं तुर्यतुरीयं, तत्र लक्ष्यं कृत्वा **उच्चारयेत्**, षोडशमात्राकालं प्रणवप्रकृतिमुच्चारयेत् । **ब्रह्मरन्ध्रनिवासिनीं**—षोडशसंख्यापूरकमात्रायाः परभूमित्वेन ब्रह्मरन्ध्रासनत्वात् । तत्र यदीति । स्वातिरिक्तं विकल्प्य परिभ्रमतीति **भ्रमरः** कामसङ्कल्पादिमनोवृत्तिपूगः, "कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिः अधृतिः ह्रीः धीः भीः इत्येतत् सर्वं मन एव" इति श्रुतेः । **तत्सृष्टिः** कल्पना स्यात् । तत्र कदाऽपि कल्पनावकाशो नास्ति ब्रह्मरन्ध्रस्य निर्बीजत्वात् । यदि भ्रूमध्यादधःप्रदेशमेत्य विशुद्धिचक्रे कामसङ्कल्पादिसृष्टिः स्यात् तदाऽऽज्ञाचक्रमवष्टभ्य स्वानर्थकारणं **संसारभ्रमणं** स्वातिरिक्तविषयपरिभ्रमणं "स्वातिरिक्तं न किञ्चिदस्ति" इति धैर्येण **त्यजेत्** अपह्नवं कुर्यादित्यर्थः ॥ १९ ॥

[1] मूले—अ, अ १, अ २, क.

गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरान्धकारम् ।
पश्यामि ते सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥२०॥
अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः ।
ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः ।
तन्मनो विलयं याति तद्विष्णोः परमं पदम् ॥ २१ ॥

ततः किमित्यत आह—गमेति । स्वान्तःकरणवृत्तिकदम्बगमनागमनावभासकप्रत्यगभिन्नब्रह्मरूपेण तिष्ठतीति गमागमस्थम् । वस्तुतः स्वातिरिक्तान्तःकरणतत्कार्याभावात् गमनादिशून्यम् । ततः स्वातिरिक्तं तिमिरान्धकारं चिद्रूपाग्निशिखया दीपयति भस्मावशेषं करोतीति चिद्रूपदीपम् । शिष्टं स्पष्टम् ॥ २० ॥ अनाहतोपलक्षितमूलाधारादिवैखर्यन्तप्रादुर्भूतशब्दज्योतिः प्रपञ्चकलनाकलितसवृत्तिकमानसासम्भवप्रबोधसिद्धं विष्णुपदं अवशिष्यते इत्यर्थः ॥२१॥

आधारब्रह्मणि प्राणादिविलयान्मुक्तिः

केचिद्वदन्ति चाधारं सुषुम्ना च सरस्वती ।
आधाराज्जायते विश्वं विश्वं तत्रैव लीयते ॥ २२ ॥
तस्मात्सर्वप्रयत्नेन गुरुपादं समाश्रयेत् ।
आधारशक्तिनिद्रायां विश्वं भवति निद्रया ॥ २३ ॥
तस्यां शक्तिप्रबोधेन त्रैलोक्यं प्रतिबुध्यते ।
आधारं यो विजानाति तमसः परमश्नुते ॥ २४ ॥
तस्य विज्ञानमात्रेण नरः पापैः प्रमुच्यते ॥ २५ ॥

[1] न्धनाशम्—मु. पहारम्—अ.

आधारचक्रमहसा विद्युत्पुञ्जसमप्रभा ।
तदा मुक्तिर्न संदेहो यदि तुष्टः स्वयं गुरुः ॥ २६
आधारचक्रमहसा पुण्यपापे निकृन्तयेत् ।
आधारवातरोधेन लीयते गगनान्तरे ॥ २७ ॥
आधारवातरोधेन शरीरं कम्पते यथा ।
आधारवातरोधेन योगी नृत्यति सर्वदा ॥
आधारवातरोधेन विश्वं तत्रैव दृश्यते ॥ २८ ॥
सृष्टिराधारमाधारमाधारे सर्वदेवताः ।
आधारे सर्वे[1]वेदाश्च तस्मादाधारमाश्रयेत् ॥ २९ ॥
आधारे पश्चिमे भागे त्रिवेणीसङ्गमो भवेत् ।
तत्र स्नात्वा च पीत्वा च नरः पापात् प्रमुच्यते ॥ ३० ॥
आधारे पश्चिमं लिङ्गं कवाटं तत्र विद्यते ।
तस्योद्घाटनमात्रेण मुच्यते भवबन्धनात् ॥ ३१ ॥
आधारपश्चिमे भागे चन्द्रसूर्यौ स्थिरौ यदि ।
तत्र तिष्ठति विश्वेशो ध्यात्वा ब्रह्ममयो भवेत् ॥ ३२ ॥

केचिन्नादाधारप्राणादिविलयात् स्वाधेयाभावतो निराधारब्रह्मस्वरूपावस्थानलक्षणमुक्तिः स्यादिति वदन्ति । तदपि युक्तमेवेत्याह—केचिदिति । सुषुम्नासरस्वतीनाडयौ यत्र प्रतिष्ठिते तन्मूलाधारमित्यर्थः । तस्य ब्रह्मात्मना विश्वाधारोपापवादाधिकरणतामप्याह—आधारादिति ॥ २२ ॥ यस्मादेवं तस्मात् । येन मूलाधारयाथात्म्यं दर्शितं स गुरुः परमात्मा स्वाज्ञानमोचकत्वात् ।

[1] देवा—अ, अ १.

तत्पादं तद्भावं समाश्रयेत् । किंच—आधारेति । आधारशक्तिः कुण्डलिनी तस्याः स्वाधारावस्थितिः निद्रा तस्यां सत्यां विश्वं स्वाज्ञाननिद्राविशिष्टं भवति ॥ २३ ॥ तत्प्रबो[illegible] सुषुम्नाप्रवेशः । तेन त्रैलोक्ययाथात्म्यबोधो जायते । एवं ज्ञानफ[illegible]ह—आधारमिति ॥ २४–२९ ॥ मुक्तेः गुरुप्रसादैकलभ्यत्वात्, "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः ॥ २६ ॥ किंच—आधारेति । विश्वं तत्रैव दृश्यते—स्वातिरिक्तं नेति प्रकाशते इत्यर्थः ॥ २७–२८ ॥ आधारत्वं कथमित्यत्र यतः स्वातिरिक्तसृष्टिः स्वाधारमवष्टभ्य प्रवृत्ता यतः तदभावे न सम्भवति, अतः सर्वाधारमधिष्ठानं ब्रह्मेति सिद्धम् । तत् कथमित्यत्र आधारे सति सर्वदेवताः ॥ २९ ॥ इडा पिंगळा सुषुम्ना चेति त्रिवेणी ॥ ३० ॥ पश्चिमलिङ्गं प्रत्यक्चैतन्यं तत्कवाटमावारकं ग्रन्थित्रयम् ॥ ३१ ॥ आधारपश्चिमे भागे सुषुम्नायाम् ॥ ३२ ॥

चक्रेषु ब्रह्मादिमूर्तिध्यानेन ब्रह्मरन्ध्रप्रवेशः

आधारपश्चिमे भागे मूर्तिस्तिष्ठति संज्ञया ।
षट् चक्राणि च निर्भिद्य ब्रह्म[1]रन्ध्राद्बहिर्गतम् ॥ ३३ ॥
वामदक्षे [2]निरुद्धन्ति प्रविशन्ति सुषुम्नया ।
ब्रह्मरन्ध्रं प्रविश्यन्ति ते यान्ति परमां गतिम् ॥ ३४ ॥

ब्रह्मादीनां मूर्तिः । एवमुपासकाः तत्तच्चक्रालङ्कारमूर्तिध्यानपुरस्सरं षट्चक्राणीति । ब्रह्मरन्ध्रात् सुषुम्नारन्ध्रात् पुरा बहिर्गतं प्राणमादौ योगिनो वामदक्षे इडापिंगळे निरुद्धन्ति निरोधं कुर्वन्ति । ततः तत्प्राणादयः सहसा सुषुम्नया क्रमात् ग्रन्थित्रयालंकृतषट्चक्राणि च निर्भिद्य चन्द्रसूर्याग्नैक्यजममृतमास्वाद्य सहस्रारचक्रोज्वलत्तुरीयं तुरीयातीतं वा प्रविशन्ति । ये एवं ब्रह्मरन्ध्रम् ॥ ३३–३४ ॥

[1] रन्ध्रे ब—अ, अ १. [2] निरुन्धन्ति—क, अ १, अ २.

ब्रह्मरन्ध्रविलीनकरणस्य मुक्तिः

सुषुम्नायां यदा हंसः अध ऊर्ध्वं प्रधावति ।
सुषुम्नायां यदा प्राणं [1]भ्रामयेद्यो निरन्तरम् ॥ ३५ ॥
सुषुम्नायां यदा प्राणः स्थिरो भवति धीमताम् ।
सुषुम्नायां प्रवेशेन चन्द्रसूर्यौ लयं गतौ ॥ ३६ ॥
तदा समरसं भावं यो जानाति स योगवित् ।
सुषुम्नायां यदा यस्य म्रियते मनसो रयः ॥ ३७ ॥
सुषुम्नायां यदा योगी क्षणैकमपि तिष्ठति ।
सुषुम्नायां यदा योगी क्षणार्धमधितिष्ठति ॥ ३८ ॥
सुषुम्नायां यदा योगी सुलग्नो लवणाम्बुवत् ।
सुषुम्नायां यदा योगी लीयते क्षीरनीरवत् ॥ ३९ ॥
भिद्यते [2]च तदा ग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते परमाकाशे ते यान्ति परमां गतिम् ॥ ४० ॥

यत्करणपटलं सुषुम्नाद्वारेण ब्रह्मरन्ध्रे विलीयते ते मुक्ता भवन्तीत्याह- **सुषुम्नायामिति** । **हंसः** प्राणः ॥ ३५–३९ ॥ एवं सुषुम्नाविलयफलमाह- **भिद्यत** इति । जीवेशभेदग्रन्थिः ॥ ४० ॥

सुषुम्नायोगमहिमा

गङ्गायां सागरे स्नात्वा नत्वा च मणिकर्णिकाम् ।
मध्यनाडीविचारस्य कलां नार्हन्ति षोडशीम् ॥ ४१ ॥

[1] क्रा—अ. [2] हृदय—अ २. च तथा—क, अ १, उ.

श्रीशैलदर्शनान्मुक्तिर्वाराणस्यां मृतस्य च ।
केदारोदकपानेन मध्यनाडीप्रदर्शनात् ॥ ४२ ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
सुषुम्नाध्यान[1]योगस्य कलां नार्हन्ति षोडशीम् ॥ ४३ ॥
सुषुम्नायां यदा गोष्ठीं यः कश्चित्कुरुते नरः ।
स मुक्तः सर्वपापेभ्यो निश्रेयसमवाप्नुयात् ॥ ४४ ॥
सुषुम्नैव परं तीर्थं सुषुम्नैव परो जपः ।
सुषुम्नैव परं ध्यानं सुषुम्नैव परा गतिः ॥ ४५ ॥
अनेकयज्ञदानानि व्रतानि नियमानि च ।
सुषुम्नाध्यानयोगस्य कलां नार्हन्ति षोडशीम् ॥ ४६ ॥

सुषुम्नाविचारादिकं स्तौति—गङ्गायामिति ॥ ४१–४६ ॥

चिच्छक्तिजीवयोः स्थानविवेकः

ब्रह्मरन्ध्रे महास्थाने वर्तते सततं शिवा ।
चिच्छक्तिः परमा देवी मध्यमे सुप्रतिष्ठिता ॥ ४७ ॥
मायाशक्तिर्ललाटाग्रभागे व्योमाम्बुजे तथा ।
नादरूपा परा शक्तिर्ललाटस्य तु मध्यमे ॥ ४८ ॥
भागे बिन्दुमयी शक्तिर्ललाटस्यापरांशके ।
बिन्दुमध्ये च जीवात्मा सूक्ष्मरूपेण वर्तते ॥ ४९ ॥
हृदये स्थूलरूपेण मध्यमे न तु मध्यमे ॥ ९० ॥

[1] लेशस्य—अ, अ १, क.

ब्रह्मरन्ध्रादिस्थानेषु चिच्छक्त्यादयो वर्तन्ते। बिन्द्वादिमध्ये जीवोऽर्ध्वं वर्तते। सोऽयं प्राणापानवशतो विश्रान्तिमलब्ध्वा उच्छ्वासादिव्यापारच्छले हंसमनुजपनिष्ठो भवतीत्याह—ब्रह्मरन्ध्र इति। मध्यमे भ्रूमध्ये हृदयाकाशे च तथा वर्तते इत्यनुषज्यते ॥ ४८ ॥ बिन्दुमर्ध. ॥ ४९ ॥ मध्यमे हृदये स्थूलरूपेण जीवो वर्तते, न तु मध्यमे, भ्रूमध्ये सहस्रारे वा न तु जीवः सरति। यदि भ्रूप्रध्यादौ गच्छति तदा क्षरः परमाक्षरो वा भवतीत्यर्थः ॥ ९० ॥

वायुवशस्य जीवस्य हंसमन्त्रजपप्रकारः

प्राणापानवशो जीवो ह्यधश्चोर्ध्वं प्रधावति।
वामदक्षिणमार्गेण चञ्चलत्वान्न दृश्यते ॥ ९१ ॥
आक्षिप्तो भुजदण्डेन यथोच्चलति कन्तुकः।
प्राणापानसमाक्षिप्तस्तथा जीवो न विश्रमेत् ॥ ९२ ॥
अपानः कर्षति प्राणं प्राणोऽपानं च कर्षति।
हकारेण बहिर्याति सकारेण विशेत्पुनः ॥ ९३ ॥
हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा।
तद्विद्धानक्षरं नित्यं यो जानाति स योगवित् ॥ ९४ ॥

सोऽयं प्राणापानेति। केन मार्गेण यावद्दृ[धावन्नदृ]श्यते इत्यत्र वामेति ॥ ९१ ॥ तच्चलनदृष्टान्तमाह—आक्षिप्त इति ॥ ९२ ॥ तत् कथं? हकारेणेति ॥ ९३ ॥ इत्थंभूतोऽपि जीवः स्वगतजीवत्वं निरस्याक्षरोऽस्मीति ज्ञानात् तदेव भवतीत्याह—तदिति ॥ ९४ ॥

कुण्डल्यवस्थाभेदतो बन्धमुक्तिव्यवस्था

ऊर्ध्वं कुण्डली शक्तिर्मुक्ति[1]रूपाऽथ योगिनाम् ।
बन्धनाय च मूढानां यस्तां वेत्ति स योगवित् ॥ ९५ ॥

कुण्डली यदि स्वस्थानादूर्ध्वं गच्छति तदाऽयं मुक्तो भवति, यदि सा स्वस्थानं न मुञ्चति तदाऽयं बद्धो भवतीत्याह—ऊर्ध्वेति ॥ ९५ ॥

प्रणवस्य सर्वाधारत्वम्

भूर्भुवःस्वरिमे लोकाश्चन्द्रसूर्याग्निदेवताः ।
[2]यासु मात्रासु तिष्ठन्ति तत्परं ज्योतिरोमिति ॥ ९६ ॥
त्रयः कालास्त्रयो देवास्त्रयो लोकास्त्रयः स्वराः ।
त्रयो वेदाः स्थिता यत्र तत्परं ज्योतिरोमिति ॥ ९७ ॥

भूरादिलोकाधारः प्रणवः इत्याह—भूरिति ॥ ९६–९७ ॥

चित्तचलनाचलनाभ्यां बन्धमुक्ती

चित्ते चलति संसारो निश्चलं मोक्ष उच्यते ।
तस्माच्चित्तं स्थिरीकुर्यात्प्रज्ञया परया विधे ॥ ९८ ॥
चित्तं कारणमर्थानां तस्मिन् सति जगत्त्रयम् ।
तस्मिन् क्षीणे जगत् क्षीणं तच्चिकित्स्यं प्रयत्नतः ॥ ९९ ॥

यतः चित्तचलनाचलने बन्धमोक्षहेतू अतः स्वातिरेकेण चित्तं नास्तीत्यनुसन्धेयमित्याह—चित्त इति । यस्मादेवं तस्मात् ॥ ९८–९९ ॥

[1] रूपाय—क, उ. रूपा हि—मु. [2] तासु—अ १.

चित्तस्य स्वात्मानतिरिक्तत्वानुसन्धानेन ब्रह्मसाक्षात्कारः

मनोऽहं गगनाकारं मनोऽहं सर्वतोमुखम् ।
मनोऽहं सर्वमात्मा च न मनः केवलः परः ॥ ६० ॥
मनः कर्माणि जायन्ते मनो लिप्यति पातकैः ।
मनश्चेदुन्मनीभूयान्न पुण्यं न च पातकम् ॥ ६१ ॥
मनसा मन आलोक्य वृत्तिशून्यं यदा भवेत् ।
ततः परं परब्रह्म दृश्यते च सुदुर्लभम् ॥ ६२ ॥
मनसा मन आलोक्य मुक्तो भवति योगवित् ।
मनसा मन आलोक्य, उन्मन्यन्तं सदा स्मरेत् ॥ ६३ ॥
मनसा मन आलोक्य योगनिष्ठः सदा भवेत् ।
मनसा मन आलोक्य[1]दृशाप्रत्ययदृश्यते ॥ ६४ ॥
यदा प्रत्यया दृश्यन्ते तदा योगीश्वरो भवेत् ॥ ६५ ॥
बिन्दुनादकलाज्योतिरबिन्दुर्ध्रुवतारकम् ।
शान्तं च तदतीतं च परंब्रह्म तदुच्यते ॥ ६६ ॥

मनस्तु ब्रह्मावरणं तन्मनसः सत्वांशतः स्वावरणे नष्टे निरावरणं ब्रह्म प्रकाशत इत्याह—मनइति । शुद्धसत्वेश्वरभावमापन्नमनस्तु **मनोऽहं गगनाकारं**, सङ्कल्पादिवृत्त्यभावात् । तथा चेत् सत्ववृत्तिमन्मनो ब्रह्मेत्यत आह— **न मनः केवलः पर** इति ॥ ६० ॥ रजस्तमोवृत्तिकं मनस्तु **मनः कर्माणि जायन्ते** । यस्य **मनश्चेदुन्मनीभूयात्** ॥ ६१ ॥ सात्विकभावापन्नेन **मनसा** तमआदिभावापन्नं **मन आलोक्य** मिथ्येति दृष्ट्वा एवं दर्शनतो **वृत्तिशून्यम्**

[1] दशप्रत्ययो—क, अ २. दृश्यन्ते प्रत्यया दश—अ.

॥ ६२–६३ ॥ आलोक्य स्थितस्य योगिनः दशप्रत्ययदृश्यते—"दशमोऽसि" इति बोधितस्य "दशमोऽस्मि" इति प्रत्ययवत् "तत् त्वमसि" इति बोधि[illegible] "ब्रह्मास्मि" इति प्रत्ययो दृश्यते। ब्रह्मास्मीति ज्ञानमुदेतीति भाव[illegible] ६४–६९ ॥ प्रत्ययगोचरं ब्रह्म कीदृशमित्यत्र बिन्दुनादेति। स्वाज्ञादिदृष्टया विराडादिरूपेण बिन्दुनादकलाज्योतिः। ओत्रादेर्विराडादि-विलक्षणत्वात् अबिन्दुः ओता, ध्रुवतारकं अनुज्ञातृचैतन्यं, स्वकार्यापेक्षया स्वयं ध्रुवं सत् स्वोपासकभवसागरसन्तारणात्। विराडाद्यनुज्ञात्रन्तकलनाशान्तं अनुज्ञैकरसचैतन्यं, तदतीतं त्वविकल्पचैतन्यम्। यत् बिन्द्वादि तदतीतान्तं विभाति वस्तुतः तत् सर्वं परं ब्रह्मेत्युच्यते। स्वातिरिक्तबिन्द्वादिगतहेयांशापह्नवसिद्धनिष्प्रतियोगिकस्वमात्रतया बृंहणात् ब्रह्मत्वं निरंकुशमित्यर्थः ॥ ६६ ॥

प्राणचित्तयोरविनाभावः

हसत्युल्लसति प्रीत्या क्रीडते मोदते तदा।
तनोति जीवनं बुद्ध्या बिभेति सर्वतो भयात् ॥ ६७ ॥
रोधते बुध्यते शोके मुह्यते नवसंपदा।
कम्पते शत्रुकार्येषु कामेन रमते हसन् ॥ ६८ ॥
स्मृत्या कामरतं चित्तं विजानीयात्कलेबरे।
यत्र देशे वसेद्वायुश्चित्तं तद्ध[1]सते ध्रुवम् ॥ ६९ ॥
मनश्चन्द्रो रविर्वायुर्दृष्टिरग्निरुदाहृतः।
बिन्दुनादकला ब्रह्मन् विष्णुब्रह्मेशदेवताः ॥ ७० ॥

ब्रह्मातिरेकेण यच्चिन्तनीयं तच्चित्तमित्याह—हसतीति ॥ ६७–६८ ॥ एवं हसनादिकामरमणान्तस्मृत्या। प्राणचित्तयोरविनाभावतामाह—यत्रेति

[1] सति—अ, मु.

॥ ६९ ॥ मनःप्राणदृष्टीनां चन्द्रार्काग्नितां बिन्दुनादकलानां ब्रह्मविष्ण्वीशतां चाह—मन इति ॥ ७० ॥

नादानुसन्धानं मनोलयहेतुः

सदा नादानुसन्धानात् संक्षीणा वासना भवेत् ।
निरञ्जने [1]विलीयेते मरुन्मनसि पद्मज ॥ ७१ ॥
यो वै नादः स वै बिन्दुस्तद्वै चित्तं प्रकीर्तितम् ।
नादो बिन्दुश्च चित्तं च त्रिभिरैक्यं प्रसाधयेत् ॥ ७२ ॥
मन एव हि बिन्दुश्च उत्पत्तिस्थितिकारणम् ।
मनसोत्पद्यते बिन्दुर्यथा क्षीरं घृतात्मकम् ॥ ७३ ॥

वासनावन्मनोलयहेतुः किमित्यत्र सदेति । वासनाक्षयसमकालं निरञ्जने ॥ ७१ ॥ नादबिन्दुचित्तानामेकत्वं भावनीयमित्याह—य इति ॥ ७२ ॥ कथं पुनः मनोबिन्द्वोरेकत्वमित्यत आह—मन इति ॥ ७३ ॥

मनोयुक्तप्राणाभ्यासविधिः

षट् चक्राणि परिज्ञात्वा प्रविशेत्सुखमण्डलम् ।
प्रविशेद्वायुमाकृष्य तथैवोर्ध्वं नियोजयेत् ॥ ७४ ॥
वायुं बिन्दुं तथा चक्रं चित्तं चैव समभ्यसेत् ।
[2]समाधिनैकेन सममृतं यान्ति योगिनः ॥ ७५ ॥

सर्वानर्थहेतुमनोविलयार्थं षट्चक्रपरिज्ञानपूर्वकं मनोयुक्तपवनाभ्यासः कर्तव्य इत्याह—षडिति । सुषुम्नाऽन्तर्विलसितं सुखमण्डलम् ॥ ७४ ॥ योगिनः समाधिसमकालं कृतकृत्या भवन्तीत्याह—समाधिनेति ॥ ७५ ॥

[1] विलीयेत—मु. लयं याति—अ. [2] समाधिभे—अ, अ १, अ २, क.

गुरूपदेशपूर्वकं अभ्यासं विना न ज्ञानोदयः

यथाऽग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनं विना ।
विना चाभ्यासयोगेन ज्ञानदीपस्तथा न हि ॥ ७६ ॥
घटमध्ये यथा दीपो बाह्ये नैव प्रकाशते ।
भिन्ने तस्मिन् घटे चैव दीपज्वालाऽवभासते ॥ ७७ ॥
स्वकायं घटमित्युक्तं यथा जीवो हि तत्पदम् ।
गुरुवाक्य[1]समं भिन्ने ब्रह्मज्ञानं प्रकाशते ॥ ७८ ॥
कर्णधारं गुरुं प्राप्य तद्वाक्यं प्लववद्दृढम् ।
अभ्यासवासनाशक्त्या तरन्ति भवसागरम् ॥ ७९ ॥

इत्युपनिषत् ॥

अभ्यासं विना ज्ञानं नोदेतीत्यत्र सदृष्टान्तमुत्तरमाह—यथेति ॥ ७६ ॥ किंच—घटमध्ये ॥ ७७ ॥ घटमित्युक्तम्, अत्र प्रथमार्थे द्वितीया । जीवो हि तत्पदं जीवगतहेयांशापाये जीवस्य तत्पदत्वात् । तद्वतस्त्वाज्ञाने गुरुवाक्यसमं भिन्ने ॥ ७८ ॥ नौकाचालकस्थानीय आचार्यः, प्लवस्थानीयोऽयं तदुपदिष्टार्थः । सन्तस्तमाश्रित्य भवसागरं तरन्तीत्याह—कर्णेति । शिष्याः श्रुत्याचार्यप्रसादज-ज्ञानसमकालं निष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणकैवल्यं यान्तीत्यर्थः ॥ ७९ ॥ इतिशब्दः षष्ठाध्यायपरिसमाप्त्यर्थः । उपनिषच्छब्दस्तु शास्त्रपरिसमाप्त्यर्थः ॥

इति षष्ठोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
योगशिखोपनिषदो व्याख्यानं लिखितं स्फुटम् ।
शिखोपनिषदो व्याख्याग्रन्थः सप्तशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रिषष्टिसंख्यापूरकं
योगशिखोपनिषद्विवरणं सम्पूर्णम्

[1] समाप्ति—क, अ १. अ २. समाभासे—अ.

# वराहोपनिषत्

सह नाववतु—इति शान्तिः

## प्रथमोऽध्यायः

तत्त्वसंख्याविकल्पाः

अथ ऋभुर्वै महामुनिर्देवमानेन द्वादशसंवत्सरं तपश्चचार। तदवसाने वराहरूपी भगवान् प्रादुरभूत्। स होवाचोत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति। सोदतिष्ठत्। तस्मै नमस्कृत्योवाच भगवन् कामिभिर्यद्यत्कामितं तत्तत् त्वत्सकाशात्स्वप्नेऽपि न याचे। समस्तवेदशास्त्रेतिहासपुराणानि समस्तविद्याजालानि ब्रह्मादयः सुराः सर्वे त्वद्रूपज्ञानान्मुक्तिमाहुः। अतस्त्वद्रूपंप्रतिपादिकां ब्रह्मविद्यां ब्रूहीति होवाच। तथेति स होवाच वराहरूपी भगवान्।

चतुर्विंशतितत्त्वानि केचिदिच्छन्ति वादिनः।
केचित् षट्त्रिंशत्तत्त्वानि केचित् षण्णवतीनि च ॥ १ ॥
तेषां [1]क्रमं प्रवक्ष्यामि सावधानमनाः शृणु।

[1] क्रमात्—क, अ १.

श्रीमद्वराहोपनिषद्वेद्याखण्डमुखाकृति ।
त्रिपान्नारायणख्यातरामचन्द्रपदं भजे ॥

खलु कृष्णयजुर्वेदप्रविभक्तेयं वराहोपनिषत् षण्णवतितत्त्वप्रकाशन-ज्ञानयोगप्रकटनव्यग्रा निष्प्रतियोगिकब्रह्मप्रणवार्थतुर्यतुर्यपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । तपोब्रह्मचर्यदेवताप्रसादादि-साधनसम्पत्तिनिष्पन्नेयमिति ब्रह्मविद्या महीक्रियते । ऋभुवराहयोः निदाघऋभ्वोश्च प्रश्नप्रतिवचनरूपेयं आख्यायिका ब्रह्मविद्यास्तुत्यर्था । आदावाख्यायिकामवतार-यति—अथेति । तपश्चचार एवमत्युग्रं तपः कृतवान् । प्रादुरभूत् स्वपुरतः आविर्भूतवान् । एवमाविर्भूय तत्कृततपःफलदित्सया स होवाच । इत्थं भगवद्वाक्यमाकर्ण्य सोदतिष्ठत् । उवाच, किमिति ? भगवन्निति । पुनरन्यत् किं वाञ्छन् तपश्चरसि इत्युक्ते समस्तेति । सर्वे त्वद्रूपाज्ञानप्रभवं बन्धं त्वद्रूपज्ञानात् मुक्तिं च आहुः । ऋभुकृतप्रश्नमंगीकृत्य तथेति । आदौ स्वातिरिक्ततत्त्वेयत्तापरि-ज्ञानाभावे न हि स्वमात्रतत्त्वे शिष्यबुद्धिः प्रसरेदिति स्वातिरिक्ततत्त्वेयत्तामाचष्टे—चतुरिति ॥ १ ॥

### चतुर्विंशतितत्त्वानि

ज्ञानेन्द्रियाणि पञ्चैव श्रोत्रत्वग्लोचनादयः ॥ २ ॥
कर्मेन्द्रियाणि पञ्चैव वाक्पाण्यङ्घ्र्यादयः क्रमात् ।
प्राणादयस्तु पञ्चैव पञ्च शब्दादयस्तथा ॥ ३ ॥
मनोबुद्धिरहंकारश्चित्तं चेति चतुष्टयम् ।
चतुर्विंशतितत्त्वानि तानि ब्रह्मविदो विदुः ॥ ४ ॥

किं तदित्यत्र—ज्ञानेति ॥ २–४ ॥

षट्त्रिंशत्तत्त्वानि

एतैस्तत्त्वैः समं पञ्चीकृतभूतानि पञ्च च ।
पृथिव्यापस्तथा तेजो वायुराकाश एव च ॥ ५ ॥
देहत्रयं स्थूलसूक्ष्मकारणानि विदुर्बुधाः ।
अवस्थात्रितयं चैव जाग्रत्स्वप्नसुषुप्तयः ॥ ६ ॥
आहृत्य तत्त्वजातानां षट्त्रिंशन्मुनयो विदुः ।

षट्त्रिंशत्तत्त्वानि कानीत्यत्र—एतैरिति ॥ ५–६ ॥

षण्णवतितत्त्वानि

पूर्वोक्तैस्तत्त्वजातैस्तु समं तत्त्वानि योजयेत् ॥ ७ ॥
षड्भावविकृतिश्चास्ति जायते वर्धतेऽपि च ।
परिणामं क्षयं नाशं षड्भावविकृतिं विदुः ॥ ८ ॥
अशना च पिपासा च शोकमोहौ जरा मृतिः ।
एते षड्ऊर्मयः प्रोक्ताः षट्कोशानथ [1]वच्मि ते ॥ ९ ।
त्वक रक्तं मांसमेदोमज्जास्थीनि निबोधत ।
कामक्रोधौ लोभमोहौ मदो मात्सर्यमेव च ॥ १० ॥
एतेऽरिषट्का विश्वश्च तैजसः प्राज्ञ एव च ।
जीवत्रयं सत्त्वरजस्तमांसि च गुणत्रयम् ॥ ११ ॥
प्रारब्धागाम्यर्जितानि कर्मत्रयमितीरितम् ।
वचनादानगमनविसर्गानन्दपञ्चकम् ॥ १२ ॥

[1] चोच्यते—क, अ १, अ २.

संकल्पोऽध्यवसायश्च अभिमानोऽवधारणा ।
मुदिता करुणा मैत्री उपेक्षा च चतुष्टयम् ॥ १३ ॥
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमृत्युकाः ।
तथा चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ [1]ईश्वरः ॥ १४ ॥
आहत्य तत्त्वजातानां षण्णवत्यस्तु कीर्तिताः ।

षण्णवतितत्त्वानि कानीत्यत्र—पूर्वोक्तैरिति ॥ ७–१४ ॥

तत्त्वातीतभगवद्भक्तेरेव मुक्तिः

पूर्वोक्ततत्त्वजातानां वैलक्षण्यमनामयम् ॥ १५ ॥
वराहरूपिणं मां ये भजन्ति मयि [2]तत्त्वतः ।
विमुक्ताज्ञानतत्कार्या जीवन्मुक्ता भवन्ति ते ॥ १६ ॥

उक्ततत्त्वेषु त्वं कीदृशः त्वज्ज्ञानफलं किं इत्यत आह—पूर्वोक्तेति ॥ १५–१६ ॥

तत्त्वज्ञानफलम्

ये षण्णवतितत्त्वज्ञा यत्र कुत्राश्रमे रताः ।
जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः ॥ १७ ॥
इति ॥

विशिष्टतत्त्वज्ञानफलमाह—य इति । सांख्यपरिगृहीतषण्णवतितत्त्वानि शैवपरिगृहीतषट्त्रिंशत्तत्त्वे अन्तर्भवन्ति । तानि च वेदान्त्येकदेशिपरिगृहीत-

[1] ईश्वराः—क, अ १, अ २. [2] भक्तितः—क, अ, अ १, अ २.

चतुर्विंशतितत्त्वेषु अन्तर्भवन्ति । पुनस्तान्यपि स्वातिरिक्तमायैकतत्त्वे अन्तर्भवन्ति, सर्वस्य मायाकार्यत्वात् । स्वातिरिक्तमायातत्त्वस्य निष्प्रतियोगिकाभावरूपतया निष्प्रतियोगिकब्रह्मतत्त्वमात्रमवशिष्यत इति सर्ववेदान्तसिद्धान्तार्थः ॥ १५७ ॥ इतिशब्दः अध्यायसमाप्त्यर्थः ॥

इति प्रथमाऽध्यायः

# द्वितीयोऽध्यायः

साधनचतुष्टयसम्पत्तिः

ऋभुर्नाम महायोगी क्रोडरूपं रमापतिम् ।
वरिष्ठां ब्रह्मविद्यां त्वमधीहि भगवन्मम ॥ १ ॥
एवं स पृष्टो भगवान् प्राह भक्तार्तिभञ्जनः ।
स्ववर्णाश्रमधर्मेण तपसा गुरुतोषणात् ॥ २ ॥
साधनं प्रभवेत्पुंसां [1]वैराग्यादिचतुष्टयम् ।
नित्यानित्यविवेकश्च इहामुत्र विरागता ॥ ३ ॥
शमादिषट्कसंपत्तिर्मुमुक्षा तां समभ्यसेत् ।

एवं सामान्यतः ब्रह्मतत्त्वमवगम्य विस्पष्टं ससाधनं ब्रह्मतत्त्वं ज्ञातुमिच्छन् मुनिः भगवन्तं पृच्छतीत्याह—ऋभुरिति ॥ १ ॥ किं प्राहेत्यत्र आदौ साधनानुष्ठानं कर्तव्यमित्याह—स्ववर्णेति ॥ २ ॥ किं तदभ्यसनीयचतुष्टयसाधनमित्यत्राह—नित्येति । ब्रह्मैव नित्यं ब्रह्मातिरिक्तं अनित्यं इति नित्यानित्य-

[1] विवेकादि—अ;

विवेकः इह स्रक्चन्दनवनितादिषु अमुत्र स्वर्गादिभोगेषु च वान्ताशनमूत्र-पुरीषादिवत् इच्छाराहित्यं इहामुत्रविरागता ॥ ३ ॥ शमः दमः उपरतिः तितिक्षा श्रद्धा समाधानं चेति शमादिषट्कसम्पत्तिः । अन्तःकरणनिग्रहः शमः बाह्यकरणनिग्रहो दमः, उपरतिः सर्वकर्मसंन्यासः, शीतोष्णादिद्वन्द्वसहनं तितिक्षा, श्रुत्याचार्यवाक्यविश्वासः श्रद्धा, चित्तैकाग्रता समाधानम् । स्वातिरिक्तभ्रमतो मोक्तुमिच्छा मुमुक्षा । इत्थं साधनचतुष्टयाभ्यासतो जितेन्द्रियो भवतीत्यर्थः ॥

ब्रह्मात्मज्ञान्येव कृतकृत्यः

एवं जितेन्द्रियो भूत्वा सर्वत्र ममतामतिम् ॥ ४ ॥
विहाय साक्षिचैतन्ये मयि कुर्यादहंमतिम् ।
दुर्लभं प्राप्य मानुष्यं तत्रापि नरविग्रहम् ॥ ५ ॥
ब्राह्मण्यं च महाविष्णोर्वेदान्तश्रवणादिना ।
अतिवर्णाश्रमं रूपं सच्चिदानन्दलक्षणम् ॥ ६ ॥
यो न जानाति सोऽविद्वान् कदा मुक्तो भविष्यति ।

ब्रह्मातिरिक्तत्यागपूर्वकं ब्रह्ममात्रमतिं कुर्यादित्याह—एवमिति ॥ ४ ॥ एवं ज्ञानसाधनब्राह्मणादिदेहमाश्रित्य यः स्वात्मतत्त्वं न जानाति स कदा मुक्तो भवति? न कदेत्याह—दुर्लभमिति ॥ ५ ॥ वेदान्तश्रवणादिनिष्पन्नं महाविष्णोः व्यक्तलिंगं पारिव्राज्यं अव्यक्तलिंगं अतिवर्णाश्रममित्यर्थः ॥ ६ ॥

आत्मनः सुखरूपत्वम्

अहमेव सुखं नान्यदन्यच्चैनैव तत्सुखम् ॥ ७ ॥

अमदर्थं न हि प्रेयो मदर्थं [तु] [तत्] स्वतःप्रियम् ।
परप्रेमास्पदतया मा न भूवमहं सदा ॥ ८ ॥
भूयासमिति यो द्रष्टा सोऽहं विष्णुर्मुनीश्वर ।

स्वात्मन एव सर्वप्रेमास्पदत्वमाह—अहमिति । अहं प्रत्यगेव परानवद्य परमसुखं ब्रह्म भवामि नान्यत्, ब्रह्मातिरिक्तान्यस्य मृग्यत्वात् । वस्तुतो यद्यन्यत् तदा तद्ब्रह्म निष्प्रतियोगिकसुखं नैव भवति, "यो वै भूमा तत् सुखं" इति भूमब्रह्मणो निष्प्रतियोगिकसुखस्वरूपमात्रतावादिश्रुतेः ॥ ७ ॥ अत एव यत् मदर्थं तदेव सुखं, अमदर्थं तु न हि सुखं भवितुमर्हति । मदर्थमपि न हि प्रियं भवतीति चेन्न; तत् स्वत एव प्रियं भवतीत्यर्थः । स्वात्मानं सुखरूपतया यो जानाति सोऽहं विष्णुरित्याह—परेति । अहं निर्विशेषसुखरूपतया मा भूवमिति न किं तु भूयासमेवेत्यर्थः ॥ ८ ॥

आत्मनः स्वयंप्रकाशत्वम्

न प्रकाशोऽहमित्युक्तिर्यत्प्रकाशैकबन्धना ॥ ९ ॥
स्वप्रकाशं तमात्मानमप्रकाशः कथं स्पृशेत् ।
स्वयं भातं निराधारं ये जानन्ति सुनिश्चितम् ॥ १० ॥
ते हि विज्ञानसंपन्ना इति मे निश्चिता मतिः ।

सत्तामात्रत्वात् यत् सन्मात्रं तदेव स्वयंप्रकाशं ब्रह्मेत्याह—नेति । न प्रकाशोऽहमिति यत्प्रकाशतः पश्यति तत्स्वरूपं प्रकाशमात्रम् ॥ ९ ॥ तस्याप्रकाशाग्रासत्वात् अप्रकाशस्पर्शो न युज्यत इत्यर्थः । एवं स्वयं-प्रकाशमात्मानं ये मन्यन्ते ते कृतकृत्या इति मन्येऽहमित्याह—स्वयमिति ॥ १० ॥

आत्मनः मायातत्कार्यविलक्षणत्वम्

स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः ॥ ११ ॥

न सन्ति नास्ति माया च तेभ्यश्चाहं विलक्षणः ।
अज्ञानान्धतमोरूपं कर्मधर्मादिलक्षणम् ॥ १२ ॥
स्वयंप्रकाशमात्मानं नैव मां [1]स्प्रष्टुमर्हति

परमार्थदृष्ट्या स्वातिरिक्तं न किञ्चिदस्ति । यदि स्वाज्ञदृष्ट्या स्यात् तदा स्वज्ञदृष्ट्या तद्विलक्षणोऽस्मीत्याह—स्वेति ॥ ११ ॥ स्वातिरिक्तविलक्षणमपि त्वां स्वातिरिक्तं स्पृशेदित्यत आह—अज्ञानेति ॥ १२ ॥

ब्रह्मात्मज्ञानिनः ब्रह्मभावः

सर्वसाक्षिणमात्मानं वर्णाश्रमवि[2]लक्षणम् ॥ १३ ॥
ब्रह्मरूपतया पश्यन् ब्रह्मैव भवति स्वयम् ।
भासमानमिदं सर्वं भानरूपं परं पदम् ॥ १४ ॥
पश्यन् वेदान्तमानेन सद्य एव विमुच्यते ।
देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम् ॥ १५ ॥
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते ।

प्रत्यक्प्रकाशमात्मानं ब्रह्मेति यो जानाति स प्रत्यगभिन्नं ब्रह्मैव भवतीत्याह—सर्वेति ॥ १३ ॥ भानातिरेकेण भास्यं नेति ज्ञानी भास्यभावतो विमुच्यत इत्याह—भासमानमिति ॥ १४ ॥ एवं सम्यज्ज्ञानी स्वयमेव मुच्यत इत्याह—देहेति ॥ १५ ॥

आत्मज्ञानिनः कर्मबन्धाभावः

सत्यज्ञानानन्दपूर्णलक्षणं तमसः परम् ॥ १६ ॥

[1] द्रष्टु—अ, अ १. [2] वर्जितम्—क, अ, अ १, अ २.

ब्रह्मानन्दं सदा पश्यन् कथं बध्येत कर्मणा ।
त्रिधामसाक्षिणं सत्यज्ञानानन्दादिलक्षणम् ॥ १७ ॥
त्वमहंशब्दलक्ष्यार्थमसक्तं सर्वदोषतः ।

स्वात्मदर्शिनः कर्मबन्धासम्भवमाह—सत्येति ॥ १६ ॥ स्वात्मनः कर्मबन्धाभावे हेतुः असक्तत्वमित्याह—त्रिधामेति ॥ १७ ॥

अज्ञानिज्ञानिनोः दर्शनस्थितिवैलक्षण्यम्

सर्वगं सच्चिदानन्दं ज्ञानचक्षुर्निरी[1]क्षते ॥ १८ ॥
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ।
प्रज्ञानमेव तद्ब्रह्म सत्य[2]प्रज्ञानलक्षणम् ॥ १९ ॥
एवं ब्रह्मपरिज्ञानादेव मर्त्योऽमृतो भवेत् ।
तद्ब्रह्मानन्दमद्वन्द्वं निर्गुणं सत्यचिद्घनम् ॥ २० ॥
विदित्वा स्वात्मनो रूपं न बिभेति कुतश्चन ।
चिन्मात्रं सर्वगं नित्यं संपूर्णं सुखमव्ययम् ॥ २१ ॥
साक्षाद्ब्रह्मैव नान्योऽस्तीत्येवं ब्रह्मविदां स्थितिः ।
अज्ञस्य दुःखौघमयं ज्ञस्यानन्दमयं जगत् ॥ २२ ॥
अन्धं भुवनमन्धस्य प्रकाशं तु सुचक्षुषाम् ।

ज्ञानचक्षुः स्वात्मानं सर्वासक्तं पश्यति, स्वाज्ञानचक्षुस्तु दिवान्धवत् भास्वन्तमात्मानं न पश्यतीत्याह—सर्वगमिति ॥ १८ ॥ यादृग्ब्रह्मज्ञानी तादृग्ब्रह्मैव भवतीत्याह—प्रज्ञानमिति ॥ १९ ॥ ब्रह्मज्ञानी कुतश्चित् न बिभेतीत्याह—तदिति ॥ २० ॥ निर्भयब्रह्मविदां स्थितिः केत्यत आह—चिन्मात्रमिति ॥ २१ ॥ स्वज्ञगृहीतं स्वाज्ञो विपरीतं पश्यतीत्याह—अज्ञस्येति ॥ २२ ॥

[1] क्ष्यते—क, अ १, अ २. [2] ज्ञानादि—क, अ २.

आत्मनि वस्तुतो बन्धमुक्त्यभावः

अनन्ते सच्चिदानन्दे मयि वाराहरूपिणि ॥ २३ ॥
स्थितेऽद्वितीयभावः स्यात् को बन्धः कश्च मुच्यते ।
स्वस्वरूपं तु चिन्मात्रं सर्वदा सर्वदेहिनाम् ॥ २४ ॥
नैव देहादिसंघातो घटवद्दृशिगोचरः ।
स्वात्मनोऽन्यतया भातं चराचरमिदं जगत् ॥ २५ ॥
स्वात्ममात्रतया बुद्ध्वा तदस्मीति विभावय ।
स्वस्वरूपं स्वयं मुङ्क्ष्व नास्ति भोज्यं पृथक् स्वतः ॥ २६ ॥
अस्ति चेदस्तितारूपं ब्रह्मैवास्तित्वलक्षणम् ।
ब्रह्मविज्ञानसंपन्नः प्रतीतमखिलं जगत् ॥ २७ ॥
पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथक् ।
मत्स्वरूपपरिज्ञानात् कर्मभिर्न स बध्यते ॥ २८ ॥
यः शरीरेन्द्रियादिभ्यो विहीनं सर्वसाक्षिणम् ।
परमार्थैकविज्ञानं सुखात्मानं स्वयंप्रभम् ॥ २९ ॥
स्वस्वरूपतया सर्वं वेद स्वानुभवेन यः ।
स धीरः स तु विज्ञेयः सोऽहं तत्त्वं ऋभो भव ॥ ३० ॥
अतः प्रपञ्चानुभवः सदा न हि
स्वरूपबोधानुभवः सदा खलु ।
इति प्रपश्यन् परिपूर्णवेदनो
न बन्धमुक्तो न च बद्ध एव तु ॥ ३१ ॥

वस्तुतो मम निष्प्रतियोगिकाद्वितीयत्वेन न कोऽपि बद्धो मुक्तो वा भवितुमर्हतीत्याह—अनन्त इति ॥ २३ ॥ अद्वितीयभावेन को [illegible]न्थः। "चिन्मात्रमेव चिन्मात्रं" इति श्रुत्यनुरोधेन स्वस्वरूपमेव [illegible]न अन्यदित्याह—स्वस्वरूपमिति ॥ २४ ॥ स्वातिरिक्तदेहादिकं स्व[illegible] चिन्तयेत्याह—स्वात्मन इति ॥ २५ ॥ स्वातिरिक्तं नास्त्येव। यदा तु ते भ्रान्तिस्तदा तदप्यस्तित्वं ब्रह्मेत्याह—स्वेति ॥ २६ ॥ स्वज्ञानी स्वातिरिक्तं स्वातिरिक्तत्वेन न पश्यति, किंतु स्वमात्रतया पश्यतीत्याह—ब्रह्मेति ॥ २७ ॥ कर्मबन्धे सति कथं एवं पश्यतीत्यत आह—मदिति ॥ २८ ॥ शरीरादौ सति कथं एवं न बध्यते इत्याशंक्य तद्विलक्षणत्वेन आत्मानं यः पश्यति सोऽहमेव स्यामित्याह—य इति ॥ २९–३० ॥ एवं मद्भावापन्नस्य स्वात्मानुभूतिं विनाऽनात्मप्रपञ्चानुभूतिः नास्ति। एवं स्वात्मानुभूतियोगिनो बन्धमोक्षविभ्रमो नास्तीत्याह—अन इति ॥ ३१ ॥

### बन्धनिवृत्तये ब्रह्मात्मानुसन्धानम्

स्वस्वरूपानुसंधानान्नृत्यन्तं सर्वमाक्षिणम्।
मुहूर्तं चिन्तयेन्मां यः सर्वबन्धैः प्रमुच्यते ॥ ३२ ॥

सर्वभूतान्तरस्थाय नित्यमुक्तचिदात्मने।
प्रत्यक्चैतन्यरूपाय मह्यमेव नमो नमः ॥ ३३ ॥

त्वं वाऽहमस्मि भगवोऽहं वै त्वमसि देवते।
तुभ्यं मह्यमनन्ताय मह्यं तुभ्यं चिदात्मने ॥ ३४ ॥

नमो मह्यं परेशाय नमस्तुभ्यं शिवाय च।
किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ॥ ३५ ॥

मन्मया पूरितं विश्वं महाकल्पाम्बुना यथा ।
अन्तःसङ्गं बहिःसङ्गमात्मसङ्गं च यस्त्यजेत् ।
सर्वसङ्गनिवृत्तात्मा स मामेति न संशयः ॥ ३६ ॥
अहिरिव जनयोगं सर्वदा वर्जयेद्यः
कुणपमिव सुनारीं त्यक्तकामो विरागी ।
विषमिव विषयादीन् मन्यमानो दुरन्तान्
जगति परमहंसो वासुदेवोऽहमेव ॥ ३७ ॥
इदं सत्यमिदं सत्यं सत्यमेतदिहोच्यते ।
अहं सत्यं परं ब्रह्म मत्तः किंचिन्न विद्यते ॥ ३८ ॥

बन्धनिवृत्तिहेतुः किमित्याशंक्य मच्चिन्तनमित्याह—स्वेति ॥ ३२ ॥ प्रत्यगभिन्नब्रह्मानुसन्धानप्रकारमाह—सर्वेति ॥ ३३–३४ ॥ स्वस्याविक्रियतां परिपूर्णतामप्याह—किं करोमीति ॥ ३५ ॥ तव विभुत्वेन सर्वेऽपि त्वामेव प्रतिपद्यन्ते इत्यत्र—मां नित्यं प्राप्ता अपि स्वातिरिक्तसंगिनो मां नाप्नुवन्ति । तत्र यः कश्चित् स्वान्तर्बाह्यसंगविरळो भवति स एव मां एतीत्याह—अन्तरिति ॥ ३६ ॥ स्वातिरिक्तसंगत्यागोपायं तज्ज्ञानफलं चाह—अहिरिति ॥ ३७ ॥ अहमेव वासुदेवः सत्यं, मदतिरिक्तं असत्यं न विद्यते, मदतिरिक्तस्य मृग्यत्वादित्याह—इदमिति ॥ ३८ ॥

ब्रह्मप्राप्तिसाधनभूतस्योपवासस्य निर्वचनम्

उप समीपे यो वासो जीवात्मपरमात्मनोः ।
उपवासः स विज्ञेयो न तु कायस्य शोषणम् ॥ ३९ ॥
कायशोषणमात्रेण का तत्र ह्यविवेकिनाम् ।
वल्मीकताडनादेव मृतः किं नु महोरगः ॥ ४० ॥

सत्यब्रह्मात्युपायः क इत्यत आह—उपेति ॥ ३९–४० ॥

जीवन्मुक्तिसाधनं अपरोक्षज्ञानम्

अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् ।
अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते ॥ ४१ ॥
यस्मिन् काले स्वमात्मानं योगी जानाति केवलम् ।
तस्मात् कालात् समारभ्य जीवन्मुक्तो भवेदसौ ॥ ४२ ॥
अहं ब्रह्मेति नियतं मोक्षहेतुर्महात्मनाम् ।

परोक्षापरोक्षज्ञानस्वरूपमाह—अस्तीति ॥ ४१ ॥ अपरोक्षज्ञानसमकालं जीवन्मुक्तो भवतीत्याह—यस्मिन्निति ॥ ४२ ॥ सदा अहं ब्रह्मेति ज्ञानं मोक्षहेतुरित्याह—अहमिति ॥

बाह्यान्तश्चिन्तात्यागविधिः

द्वे पदे बन्धमोक्षाय निर्ममेति ममेति च ॥ ४३ ॥
ममेति बध्यते जन्तुर्निर्ममेति विमुच्यते ।
बाह्यचिन्ता न कर्तव्या तथैवान्तरचिन्तिका ।
सर्वचिन्तां समुत्सृज्य स्वस्थो भव सदा ऋभो ॥ ४४ ॥

देहादावहंकारममकारभावाभावौ बन्धमोक्षहेतू भवतः इत्याह—द्वे इति ॥ ४३ ॥ अहंभावाद्यनुदयहेतुः बाह्यान्तश्चिन्तात्याग एवेत्याह—बाह्येति ॥४४॥

भगवच्चिन्तनमेव सर्वचिन्तात्यागोपायः

संकल्पमात्रकलनेन जगत्समग्रं
संकल्पमात्रकलने हि जगद्विलासः ।

सकल्पमात्रमिदमुत्सृज निर्विकल्प-
माश्रित्य मामकपदं हृदि भावयस्व ॥ ४५ ॥
मच्चिन्तनं मत्कथनमन्योन्यं मत्प्रभाषणम्
मदेकपरमो भूत्वा कालं नय महामते ॥ ४६ ॥
चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च ।
चित्त्वं चिदहमेते च लोकाश्चिदिति भावय ॥ ४७ ॥
रागं नीरागतां नीत्वा निर्लेपो भव सर्वदा ।

चिन्तामूलसङ्कल्पमुन्मूल्य निर्विकल्पं मां आश्रयेत्याह—सङ्कल्पेति ॥ ४५ ॥ सङ्कल्पत्यागोपायमाह—मदिति ॥ ४६ ॥ त्वच्चिन्तनं कीदृशं इत्यत्र सर्वं चिन्मात्रमिति चिन्तनमित्याह—चिदिति ॥ ४७ ॥ स्वातिरिक्तविषये रागम् ॥

सर्वकल्पनातीतं ब्रह्मैव चिन्तनीयम्

अज्ञानजन्यकर्त्रादिकारकोत्पन्नकर्मणा ॥ ४८ ॥
श्रुत्युत्पन्नात्मविज्ञानप्रदीपो बाध्यते कथम् ।
अनात्मतां परित्यज्य निर्विकारो जगत्स्थितौ ॥ ४९ ॥
एकनिष्ठतयाऽन्तस्स्थसंविन्मात्रपरो भव ।
घटाकाशमठाकाशौ महाकाशे प्रतिष्ठितौ ॥ ५० ॥
एवं मयि चिदाकाशे जीवेशौ परिकल्पितौ ।
या च प्रागात्मनो मे मा तथाऽन्ते च तिरस्कृता ॥ ५१ ॥

ब्रह्मवादिभिरुद्गीता सा मायेति विवेकतः ।
मायातत्कार्यविलये नेश्वरत्वं न जीवता ॥ ९२ ॥
ततः शुद्धश्चिदेवाहं व्योमवन्निरुपाधिकः ।
जीवेश्वरादिरूपेण चेतनाचेतनात्मकम् ॥ ९३ ॥
ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ।
जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥ ९४ ॥
[1]त्रिणाच्चिकादियोगान्ता ईश्वरभ्रान्तिमाश्रिताः ।
लोकायतादिसांख्यान्ता जीवविभ्रान्तिमाश्रिताः ॥ ९५ ॥
तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः ।
कार्या किं तु ब्रह्मतत्त्वं निश्चलेन विचार्यताम् ॥ ९६ ॥
अद्वितीयब्रह्मतत्त्वं न जानन्ति [2]यथा यथा ।
भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः कुह वा सुखम् ॥ ९७ ॥

कर्मलेपस्यानिवार्यत्वात् निर्लेपत्वं कुतो मे स्यादित्यत आह—**अज्ञानेति** ॥ ४८ ॥ अनात्मनि सति स्वात्ममात्रज्ञानं कथं उदेतीत्यत आह—**अनात्मतामिति** ॥ ४९ ॥ जीवेशभेदे सति संविन्मात्रपरता कुतो मे स्यादित्यत आह—**घटेति** ॥ ५० ॥ जीवेशादिकल्पनामूलमायायाः सत्त्वात् निर्मायभावः कथं मे स्यात् इत्यत्र मायामूलविचारतो निर्मायं ब्रह्म प्रसीदतीत्याह—**या चेति** ॥ ५१–५२ ॥ उक्तलक्षणलक्षितजीवेशादिनानाकल्पनां हित्वा निर्विकल्पाद्वैतब्रह्मैव सदा चिन्त्यमित्याह—**जीवेति**। "जीवेश्वरादिरूपेण" इत्यादि "निश्चलेन विचार्यतां" इत्यन्तं महोपनिषदि व्याख्यातम् ॥ ९३–९६ ॥ एवं अखण्डैकरसब्रह्माज्ञानिनो भ्रान्ता एवेत्याह—**अद्वितीयेति** ॥ ९७ ॥

[1] त्रिणा च—क, अ. त्रिणार्च—अ १. [2] यदा तदा—अ, अ १.

प्रत्यगभिन्नब्रह्म सर्वावस्थाऽतीतम्

उत्तमाधमभावश्चेत्तेषां स्यादस्ति तेन किम् ।
स्वप्नस्थराज्यभिक्षाभ्यां प्रबुद्धः [1]स्पृश्यते खलु ॥ ५८ ॥
अज्ञाने बुद्धिविलये निद्रा सा भण्यते बुधैः ।
विलीनाज्ञानतत्कार्ये मयि निद्रा कथं भवेत् ॥ ५९ ॥
बुद्धेः पूर्णविकासोऽयं जागरः परिकीर्त्यते ।
विकारादिविहीनत्वाज्जागरो मे न विद्यते ॥ ६० ॥
सूक्ष्मनाडिषु संचारो बुद्धेः स्वप्नः प्रजायते ।
संचारधर्मरहिते मयि [2]स्वप्नो न विद्यते ॥ ६१ ॥

शिवजीवाद्युत्तमाधममेदे सति कथं अद्वितीयब्रह्मज्ञानं उदेतीत्यत्र सदृष्टान्तं तन्निराकरोति —उत्तमेति ॥ ५८ ॥ अवस्थात्रयावृतस्य तुर्यानन्दानुभवः कुत इत्यत आह—अज्ञान इति । निद्रा सुषुप्तिः ॥ ५९-६१ ॥

निर्विशेषब्रह्मज्ञानेन ब्रह्मभावः

सुषुप्तिकाले सकले विलीने तमसाऽऽवृते ।
स्वरूपं महदानन्दं भुङ्क्ते [3]दृश्यविवर्जितः ॥ ६२ ॥
अविशेषेण सर्वं तु यः पश्यति चिदन्वयात् ।
स एव साक्षाद्विज्ञानी स शिवः स हरिर्विधिः ॥ ६३ ॥

एवं स्वातिरिक्तप्रपञ्चसुषुप्तिकाले ॥ ६२ ॥ चितः सर्वावस्थानुस्यूतज्ञानी चिदेव भवतीत्याह—अविशेषेणेति ॥ ६३ ॥

[1] स्पृशते—अ, अ १. [2] स्वापो—अ, अ १. [3] विश्व—अ, अ १.

जगद्विलापनपुरस्सरं ब्रह्मैकत्वचिन्तनम्

दीर्घस्वप्नमिदं यत्तद्दीर्घं वा चित्तविभ्रमम् ।
दीर्घं वाऽपि मनोराज्यं संसारं दुःखसागरम्
सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम् ॥ ६४ ॥
आरोपितस्य जगतः प्रविलापनेन
चित्तं मदात्मकतया परिकल्पितं नः ।
शत्रून्निहत्य गुरुषट्कगणान्निपातात्
गन्धद्विपो भवति केवलमद्वितीयः ॥ ६५ ॥

अवस्थात्रयसंसृतेः चित्तविकल्पतामाह—दीर्घेति । दुःखसागरं विद्धीत्यर्थः । यत एवं अतः तच्छान्तये सुप्तेरुत्थाय ॥ ६४ ॥ केनोपायेन ब्रह्मैकमिति चिन्त्यमित्यत आह—आरोपितस्येति । स्वाज्ञदृष्ट्या आरोपितस्य प्रविलापनेन विलापनाधिष्ठानमवशिष्यते । तत्राखण्डाकारवृत्तिमत् चित्तं मत्स्वरूपमेव भवतीत्यर्थः । शत्रून् सच्चिदानन्दावरणान् कामाद्यरिषड्वर्गान् वा गुरुषट्कगणात् गणेन शमादिषड्गुणासिना निहत्य निर्मूल्य इत्थं शत्रुनिपातात् निपातेन आत्मा गन्धद्विपो मत्तगज इव केवलं अद्वितीयः स्वात्मा अवशिष्यत इत्यर्थः ॥ ६५ ॥

प्रत्यगभिन्नब्रह्मविषयको विद्वदनुभवः

अद्यास्तमेतु वपुराशशितारमास्तां
कस्तावताऽपि मम चिद्वपुषो विशेषः ।
कुम्भे विनश्यति चिरं समवस्थिते वा
कुम्भाम्बरस्य न हि कोऽपि विशेषलेशः ॥ ६६ ॥

अहिनिर्ल्वयिनी सर्पनिर्मोको जीववर्जितः ।
वल्मीके पतितस्तिष्ठेत्तं सर्पो नाभिमन्यते ॥ ६७ ॥
एवं स्थूलं च सूक्ष्मं च शरीरं नाभिमन्यते ।
प्रत्यञ्ज्ञानशिखिध्वस्ते मिथ्याज्ञाने सहेतुके ।
नेति नेतीति [1]रूपत्वादशरीरो भवत्ययम् ॥ ६८ ॥
शास्त्रेण नश्येत् परमार्थदृष्टिः
कार्यक्षमं नश्यति चापरोक्ष्यात् ।
प्रारब्धनाशात् प्रतिभाननाश
एवं त्रिधा नश्यति चात्ममाया ॥ ६९ ॥
ब्रह्मत्वे योजिते स्वस्मिन् जीवभावो न गच्छति ।
अद्वैते बोधिते तत्त्वे वासना विनिवर्तते ॥ ७० ॥
आरब्धान्ते देहहानिर्मायेत्थं क्षीयतेऽखिला ।
अस्तीत्युक्ते जगत्सर्वं सद्रसं ब्रह्म तद्भवेत् ॥ ७१ ॥
भातीत्युक्ते जगत्सर्वं भानं ब्रह्मैव केवलम् ।
मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत् ।
जग[2]त्त्वयमिदं सर्वं चिन्मात्रं स्वविचारतः ॥ ७२ ॥
अज्ञानमेव न कुतो जगतः प्रसङ्गो
जीवेशदेशिकविकल्पकथाऽतिदूरे ।
एकान्तकेवलचिदेकरसस्व[3]भावे
हं परिपूर्णमस्मि ॥ ७३ ॥

[1] दूर—क. [2] द्रूप—क, अ २. [3] भावो—अ २.

बोधचन्द्रमसि पूर्णविग्रहे
मोहराहुमुषितात्मतेजसि ।
स्नानदानयजनादिकाः क्रिया
मोचनावधि वृथैव तिष्ठते ॥ ७४ ॥

मद्भावापन्नविद्वदनुभव एवं भवतीत्याह—अद्येति । तत्र दृष्टान्तस्तु कुम्भे विनश्यति ॥ ६६ ॥ विदुषोऽपि शरीरदर्शनात् अशरीरत्वं कुत इत्याशंक्य "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति श्रुत्यनुरोधेन स्वाज्ञविकल्पितशरीरत्रये स्वात्मात्मीयाभिमतिवैकल्यमेव अशरीरत्वमिति सदृष्टान्तमाह—अहिनिर्ल्वयिनीति ॥ ६७ ॥ विद्वान् एवम् ॥ ६८ ॥ शरीरत्रयहेतुमायायां सत्यां कथं अशरीरत्वं इत्याशंक्य शास्त्रजन्यज्ञानविज्ञानसम्यक्तत्त्वज्ञानतो ब्रह्मातिरेकेण माया नास्तीति माया निर्मायं पदं भजति, तत्समकालं मायाकार्यागाम्यादिकर्मत्रयमपि सवासनं क्षीयते, ततो विद्वान् अशरीरब्रह्ममात्रतया अवशिष्यत इत्याह—शास्त्रेणेति । ब्रह्मैव सत्यं ब्रह्मातिरिक्तं न किञ्चिदस्ति इति शास्त्रजन्यज्ञानात् मायायाः परमार्थदृष्टिः नश्यति । तेन तद्बीजांशप्रभवभ्रान्तिजतादात्म्यास्पदागामिकर्मणोऽश्लेषो भवति । तदा स्वातिरिक्तं व्यावहारिकं प्रतिभाति । पूर्वाभ्यस्तशास्त्रजन्यज्ञानमनुभवारूढं चेत् विज्ञानपदं भजति तेन यत् कार्यक्षमं व्यावहारिकं तत् नश्यति । तेन स्वातिरिक्तं प्रातिभासिकं भाति । तेन सहजतादात्म्यास्पदसञ्चितकर्मापि नश्यति । विज्ञानिनः प्रारब्धकर्म भोगेन क्षीयते, न हि तदानीं नश्यति, आरब्धत्वात् । विज्ञानं दृढानुभवकलितं चेत् सम्यज्ज्ञानपदं भजति । तेन प्रातिभासिकतया भातं स्वातिरिक्तं शून्यभावं भजति । तेन कर्मजतादात्म्यास्पदमायास्थूलांशारब्धं कर्मापि नश्यति । प्रारब्धनाशसमकालं मायायाः शून्यतया प्रतिभासोऽपि नश्यति । एवं माया त्रेधा विनश्यतीत्यर्थः । यदा स्वातिरिक्तसामान्यमस्ति नास्तीति विभ्रमापह्नवो भवति एवं स्वातिरिक्तापह्नववृत्तिः तत्त्वज्ञानपदं भजति । तेन ब्रह्म निष्प्रतियोगिकस्वमात्रमिति विद्वान् अवशिष्यत इति भावः ॥ ६९ ॥ उक्तार्थमेव पुनः

ब्रह्मत्व इति । केवलशास्त्रजन्यज्ञानेन ब्रह्मत्वे योजिते ॥ ७० ॥ हाभिमानवृत्तिः माया । अस्ति भाति प्रियमिति यद्यत् व्यवहृतं नन्दं ब्रह्मेत्याह—अस्तीति ॥ ७१ ॥ यद्यत् प्रियं तदेव ब्रह्म ध्यमित्यत्र—

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥

इति श्रुतेः । नामरूपसद्वितीयं ब्रह्मेत्यत आह—मरुभूमाविति ॥ ७२ ॥ कथं पुनः चिन्मात्रं निष्प्रतियोगिकं, जीवेशादिविकल्पजुष्टजगतः सत्त्वादित्यत आह—अज्ञानमिति । जगतः स्वाज्ञानकार्यत्वात् स्वज्ञानेन स्वाज्ञाननाशे तत्कार्यं जगत् कुतः सत्पदमर्हतीत्यत्र—"कारणाभावतः कार्यं कथं सिद्धिपदं भजेत्" इति परमाक्षरोक्तेः ॥ ७३ ॥ स्वातिरिक्तकलनामुक्ते ब्रह्मणि मूढाः स्वातिरिक्तं कल्पयित्वा तच्छान्तये मुधा व्याप्रियन्त इत्याह—बोधेति ॥ ७४ ॥

समाधिसाधनं नादानुसन्धानम्

सलिले सैन्धवं यद्वत् साम्यं [1]भजति योगतः ।
तथाऽऽत्ममनसोरैक्यं समाधिरिति कथ्यते ॥ ७५ ॥
दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनम् ।
दुर्लभा सहजावस्था सद्गुरोः करुणां विना ॥ ७६ ॥
उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्मणः ।
योगिनः सहजावस्था स्वयमेव प्रकाशते ॥ ७७ ॥
रसस्य मनसश्चैव चञ्चलत्वं स्वभावतः ।
रसो बद्धो मनो बद्धं किं न सिध्यति भूतले ॥ ७८ ॥

[1] भवति—क, अ २.

मूर्च्छितो हरति व्याधिं मृतो जीवयति स्वयम्
[1]बद्धः खेचरतां धत्ते ब्रह्मत्वं रसचेतसि ॥ ७९ ॥
इन्द्रियाणां मनो नाथो मनोनाथस्तु मारुतः ।
मरुतस्य लयो नाथस्तन्नाथं लयमाश्रय ॥ ८० ॥
निश्चेष्टो निर्विकारश्च लयो जीवति योगिनाम् ।
उच्छिन्नसर्वसंकल्पो निःशेषाशेषचेष्टितः ।
स्वावगम्यो लयः कोऽपि मनसां वागगोचरः ॥ ८१ ॥
[2]पुङ्खानुपुङ्खविषयेक्षणतत्परोऽपि
ब्रह्मावलोकनधियं न जहाति योगी ।
सङ्गीततालल्यवाद्यवशं गताऽपि
मौलिस्थकुम्भपरिरक्षणधीर्नटीव ॥ ८२ ॥
सर्वचिन्तां परित्यज्य सावधानेन चेतसा ।
नाद एवानुसंधेयो योगसाम्राज्यमिच्छता ॥ ८३ ॥

इति ॥

स्वातिरिक्तासम्भवप्रबोधसिद्धं ब्रह्मास्मीति ब्रह्ममनसोरेकत्वं समाधिरिति सदृष्टान्तमाह—सलिल इति ॥ ७९ ॥ एवं तत्त्वदर्शनं गुरुकटाक्षतो भवतीत्याह —दुर्लभः इति ॥ ७६ ॥ कस्येयं सहजावस्था जायत इत्यत आह— उत्पन्नेति । ज्ञानसहकृतयोगाभ्यासपाटवेन उत्पन्नकुण्डलिनीशक्तिबोधस्य, "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इत्यजडक्रियाज्ञानेच्छाशक्तिबोधस्य, सम्यज्ज्ञानिनो वा शक्तिबोधस्य ॥ ७७ ॥ ब्रह्मातिरेकेण मनसः सत्त्वं ये मन्यन्ते तद्दृष्टिमाश्रित्य

[1] बन्धः—अ, अ २, [2] पुंषा—अ २, उ.

लनादिः बन्धमुक्तिहेतुरिति सदृष्टान्तमाह—रसस्येति ॥ ७८–७९ ॥
द्रियमनःप्राणादिकं विलाप्य तल्लयाधिकरणं ब्रह्मास्मीत्याश्रयेत्याह—
मिति ॥ ८० ॥ कीदृशोऽयं लय इत्यत्र निश्चेष्ट इति । किञ्च—
। लयशब्देन लयाधिकरणं ब्रह्मोच्यते इत्यर्थः ॥ ८१ ॥ विदुषो
सत्सु तल्लयाधिकरणब्रह्मदृष्टिः कुत इत्यत्र सदृष्टान्तमुत्तरमाह—
पुद्धेति ॥ ८२ ॥ स्वातिरिक्तभ्रमासम्भवप्रबोधसिद्धंपरमात्मा स्वावशेषधिया अनुसन्धेय इति अध्यायार्थमुपसंहरति—सर्वेति । योगसाम्राज्यं कैवल्यमिच्छता स्वातिरिक्तावकाशं न ददातीति नदः स एव नादः परमात्मैव निष्प्रतियोगिक-स्वमात्रमित्यनुसन्धेयः ॥ ८३ ॥ इतिशब्दोऽध्यायपरिसमाप्त्यर्थः ॥

इति द्वितीयोऽध्यायः

# तृतीयोऽध्यायः

अद्वितीयपरमात्मानुभवः

न हि नानास्वरूपं स्यादेकं वस्तु कदाचन ।
तस्मादखण्ड एवास्मि यन्मदन्यन्न किंचन ॥ १ ॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् ।
नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयम् ।
सत्यं ज्ञानमनन्तं यत् परं [1]ब्रह्म भवामि तत् ॥ २
आनन्दरूपोऽहमखण्डबोधः
परात्परोऽहं घनचित्प्रकाशः ।

[1] ब्रह्माहमेव—क, अ १, अ २.

मेघा यथा व्योम न च स्पृशन्ति
संसारदुःखानि न मां स्पृशन्ति ॥ ३ ॥
सर्वं सुखं विद्धि सुदुःखनाशात्
सर्वं च सद्रूपम[1]सत्यनाशात् ।
चिद्रूपमेव प्रतिभानयुक्तं
तस्मादखण्डं मम रूपमेतत् ॥ ४ ॥
न हि जनिर्मरणं गमनागमौ
न च मलं विमलं न च वेदनम् ।
चिन्मयं हि सकलं विराजते
स्फुटतरं परमस्य तु योगिनः ॥ ५ ॥

कथं त्वं निष्प्रतियोगिकपरमात्माऽसि स्वप्रतियोगिनानात्वस्य विद्यमानत्वादित्याशङ्कमानमालक्ष्य भगवान् स्वस्य निष्प्रतियोगिकाद्वितीयत्वस्थापनाय स्वानुभवं प्रकटयति—न हीति । यस्मादेवं तस्मात् ॥ १ ॥ स्वान्यत् दृश्यते श्रूयते चेदित्यत्राह—दृश्यत इति । कीदृशं ब्रह्म त्वं भवसीत्यत्राह—नित्येति ॥ २ ॥ जीववद्देहधारणसामान्यात् त्वमपि संसारदुःखी भवसीत्यत आह—आनन्देति ॥ ३ ॥ सच्चिदानन्दाखण्डं मां विद्धीत्याह—सर्वमिति ॥ ४ ॥ निर्विशेषज्ञानयोगिनो मद्रूपमेवं विभातीत्याह—न हि जनिरिति । योगी स्वात्मनो मम जनिमृतिगमनागमनादिविक्रिया नास्तीति मत्वा सर्वत्र मामेव निष्प्रतियोगिकचिन्मात्रं पश्यतीत्यर्थः ॥ ५ ॥

चिन्मात्रभावापत्तिसाधनमौनविधिः

सत्यचिद्घनमखण्डमद्वयं सर्वदृश्यरहितं निरामयम् ।
यत्पदं विमलमद्वयं शिवं तत्सदाऽहमिति मौनमाश्रय ॥ ६ ॥

[1] सत्य—क, अ २.

जन्ममृत्युसुखदुःखवर्जितं जातिनीतिकुलगोत्रदूरगम् ।
चिद्विवर्तजगतोऽस्य कारणं तत्सदाऽहमिति मौनमाश्रय ॥ ७ ॥
पूर्णमद्वयमखण्डचेतनं विश्वभेदकलनादिवर्जितम् ।
अद्वितीयपर[1]संविदंशकं तत्सदाऽहमिति मौनमाश्रय ॥ ८ ॥

तवेश्वरत्वेन निष्प्रतियोगिकचिन्मात्रत्वं युज्यते । ममानीशत्वेन तद्भावापत्त्युपायमादिशेति पृच्छमानमालक्ष्य भगवान् स्वभावापत्त्युपायमादिशति —सत्येति ॥ ६–८ ॥

भगवतः सच्चिदानन्दत्वम्

केनाप्यबाधितत्वेन त्रिकालेऽप्येकरूपतः ।
विद्यमानत्वमस्त्येतत् सद्रूपत्वं सदा मम ॥ ९ ॥
निरुपाधिकनित्यं यत् सुप्तौ सर्वसुखात्परम् ।
सुखरूपत्वमस्त्येतदानन्दत्वं सदा मम ॥ १० ॥

एवं मुनेः स्वभावापत्त्युपायमुपदिश्य तद्दार्ढ्याय स्वात्मनः सच्चिदानन्दत्वं साधयति—केनेति ॥ ९–१० ॥

भगवद्भक्तिरेव मोक्षसाधनम्

दिनकरकिरणैर्हि शार्वरं तमो
निबिडतरं झटिति प्रणाशमेति ।
घनतरभवकारणं तमो य-
द्धरिदिनकृत्प्रभया न चान्तरेण ॥ ११ ॥

[1] सच्चि—क, अ २.

मम चरणस्मरणेन पूजया च
स्वकृतमसः परिमुच्यते हि जन्तुः ।
न हि मरणप्रभवप्रणाशहेतु-
र्मम चरणस्मरणादृतेऽस्ति किंचित् ॥ १२
आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् ॥ १३ ॥

मद्भावापत्तिहेतुमद्भक्तिं विना कोऽपि न मुच्यत इति सदृष्टान्तमुपपादयति —दिनकरेति । दिनकृत्प्रभया विनाशमेति ॥ ११–१२ ॥ कश्चिद्राजसेव्यपि दरिद्रयतो मुच्यते तथा मामुपास्य को वा स्वातिरिक्तभ्रमतः न मुच्यत इत्याह— मेणेति ॥ १३ ॥

ईश्वरस्य सर्वसमत्वम्

आदित्यसंनिधौ लोकश्चेष्टते स्वयमेव तु ।
तथा मत्संनिधावेव समस्तं चेष्टते जगत् ॥ १४ ॥
शुक्तिकायां यथा तारं कल्पितं मायया तथा ।
महदादि जगन्मायामयं मय्येव [1]केवलम् ॥ १५ ॥
चण्डालदेहे पू[illegible]दिस्थावरे ब्रह्मविग्रहे ।
अन्येषु तारत[illegible]न स्थितेषु न तथा ह्यहम् ॥ १६ ॥
विनष्टदिग्भ्रमर[illegible]पि यथापूर्वं विभाति दिक् ।
तथा विज्ञानविध्वस्तं जगन्मे भाति तन्न हि ॥ १७ ॥

[1] कल्पितम्

न देहो नेन्द्रियप्राणो न मनोबुद्ध्यहंकृतिः ।
न चित्तं नैव माया च न च व्योमादिकं जगत् ॥-१८ ॥
न कर्ता नैव भोक्ता च न च भोजयिता तथा ।
केवलं चित्सदानन्दब्रह्मैवाहं जनार्दनः ॥ १९ ॥

स्वाज्ञादिलोकप्रवृत्तिनिवृत्तिनिमित्तमप्यहमेवेत्याह—आदित्येति ॥ १४ ॥ मदतिरिक्तं मय्येव विकल्पितम् । विषमेष्वपि समोऽहमेवेत्याह—शुक्तिकायामिति ॥ १५–१६ ॥ मदज्ञानविकल्पितं मज्ज्ञानतो न भातीत्याह—विनष्टेति । विनष्टदिग्भ्रमस्यापि भ्रमापाये ॥ १७ ॥ तवापि जगदन्तःपातिदेहेन्द्रियादि-सत्त्वात् कथं जगत् न भातीत्युच्यते इत्यत्राह—न देह इति ॥ १८–१९ ॥

चित्तमेव संसारकारणम्

जलस्य चञ्चलादेव चञ्चलत्वं यथा रवेः ।
तथाऽहंकारसंबन्धादेव संसार आत्मनः ॥ २० ॥
चित्तमूलं हि संसारस्तत्प्रयत्नेन शोधयेत् ।
हन्त चित्तमहत्तायां कैषा विश्वासता तव ॥ २१ ॥
क्व धनानि महीपानां ब्राह्मणः क्व गतान्ति वा ।
[1]प्राक्तनानि प्रयातानि गताः सर्गपरम्पराः ॥ २२ ॥
कोट्यो ब्रह्मणां याता भूपा नष्टाः रागवत् ।
[2]स चाध्यात्माभिमानोऽपि विदुषो ासुरत्वतः ॥ २३ ॥
षोऽप्यासुरश्चेत्स्यान्निष्फलं तत्त्व र्शनम् ।

[1] स्वारोपिताशेषपदार्थभासकत्वमात्मनः साधनमन्तरेण यत् ।
वदन्ति वेदान्तविदो हि तां स्वयंप्रकाशमानस्व तु चित्स्वरूपताम् ॥
इत्यधिकः —अ १. [2] न च —अ १, तथा—अ.

तव ईश्वरस्य देहादिवैरळ्यमस्तु वस्तुतो निर्विशेषब्रह्मरूपत्व बन्धमोक्षहेतू कावित्यत्र अतस्मिंस्तद्भावातद्भावावित्याह—जलस्य एवं संसारमूलं किं ईशत्र चित्तमित्याह—चित्तेति संसारमूलचि तद्विकल्पितं सर्वं स इति मन्यमानं प्रत्याह—हन्तेति । भ्रान्त्युज्जीवकत्वात् तदपाये यथापूर्वमदर्शनात् चित्ततत्कार्यकलना ॥ २१–२२ ॥ विदुषोऽप्येवं सत्यवत् भातं चेत् तस्य वैदुष्यं नास्ती स चेति । यः अनात्मनि आत्मधीप्रभवः अविद्वद्गोचरः स चाध्यात्माभिमानः देहाभिमानः स्वान्यत्र ममताऽपि विदुषोऽप्यनर्थकर एव । कुतः? देहादावात्मात्मीयाभिमानस्य आसुरत्वतः आसुरकृत्यत्वात् ॥ २३ ॥ अविदुष इव विदुषोऽपि आसुरश्चेत् तदार्जिततत्त्वदर्शनं निष्फलमेव स्यात् । तथा च श्रुतिः—

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नचास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥

इति ॥

### अनात्मनि रागाद्यनुभवो विद्वल्लक्षणम्

उत्पाद्यमाना रागाद्या विवेकज्ञानवह्निना ॥ २४ ॥
यदा तदैव दह्यन्ते कुतस्तेषां प्ररोहणम् ।
यथा सुनिपुणः सम्यक् परदोषेक्षणे रतः ॥ २५ ॥
तथा चेन्निपुणः स्वेषु को न मुच्येत बन्धनात् ।
अनात्मविदमोऽपि सिद्धिजालानि वाञ्छति ॥ २६ ॥
द्रव्यमन्त्राक्रियाकालयुक्त्याऽऽप्नोति मुनीश्वर ।
नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्ममात्रदृक् ॥ २७ ॥
आत्मनाऽऽत्मनि संतृप्तो नाविद्यामनुधावति ।
ये केचन जडादावास्तानविद्यामयान् विदुः ॥ २८ ॥

# शाण्डिल्योपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

## प्रथमोऽध्यायः

योगाष्टाङ्गनिर्देशः

शाण्डिल्यो ह वा अथर्वाणं पप्रच्छात्मलाभोपायभूतमष्टाङ्गयोगमनुब्रूहीति ॥ १ ॥ स होवाचाथर्वा—यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि ॥ २ ॥ तत्र दश यमाः । तथा नियमाः । आसनान्यष्टौ । [1]त्रिः प्राणायामः । पञ्च प्रत्या[2]हाराः । तथा धारणाः । द्विप्रकारं ध्यानम् । समाधिस्त्वेकरूपः ॥ ३ ॥

शाण्डिल्योपनिषत्प्रोक्तयमाद्यष्टांगयोगिनः ।
यद्बोधाद्यान्ति कैवल्यं स रामो मे परा गतिः ॥

इह खलु अथर्वणवेदप्रविभक्तेयं शाण्डिल्योपनिषत् यमाद्यष्टांगयोगतद्गौणमुख्यसिद्धिप्रकाशनव्यग्रा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः

[1] त्रयः प्राणायामाः—अ. [2] हारः—अ १, अ २, उ १, क.

स्वल्पग्रन्थतो विवरणमारभ्यते । शाण्डिल्याथर्वप्रश्नप्रा[illegible]पयमाख्यायिका विवक्षितार्था । आख्यायिकामवतारयति—शाण्डि[illegible] इति । किमिति ? १ ॥ एवं शाण्डिल्येन पृष्टः स होवाच । किं तत् ? योगोऽष्टांग उच्यते [illegible] मेति ॥ २–१४ ॥

दशविधयमनिरूपणम्

तत्राहिंसासत्यास्तेयब्रह्मचर्यदयाऽऽर्जवक्षमाधृतिमिताहारशौचानि चेति यमा दश ॥ ४ ॥ तत्राहिंसा नाम मनोवाक्कायकर्मभिः सर्वभूतेषु सर्वदाऽक्लेशजननम् ॥ ५ ॥ सत्यं नाम मनोवाक्कायकर्मभिर्भूतहितयथार्थाभिभाषणम् ॥ ६ ॥ अस्तेयं नाम मनोवाक्कायकर्मभिः परद्रव्येषु निःस्पृहा ॥ ७ ॥ ब्रह्मचर्यं नाम सर्वावस्थासु मनोवाक्कायकर्मभिः सर्वत्र मैथुनत्यागः ॥ ८ ॥ दया नाम सर्वभूतेषु सर्वत्रानुग्रहः ॥ ९ ॥ आर्जवं नाम मनोवाक्कायकर्मणां विहिताविहितेषु जनेषु प्रवृत्तौ निवृत्तौ वा एकरूपत्वम् ॥ १० ॥ क्षमा नाम प्रियाप्रियेषु सर्वेषु [1]ताडनपूजनेषु सहनम् ॥ ११ ॥ धृतिर्नामार्थहानौ स्वेष्टबन्धुवियोगे तत्प्राप्तौ सर्वत्र चेतःस्थापनम् ॥ १२ ॥ मिता[2]हारो नाम चतुर्थांशावशेषकसुस्निग्धमधुराहारः ॥ १३ ॥ शौचं नाम द्विविधं बाह्यमान्तरं चेति । तत्र मृज्जलाभ्यां बाह्यम् । मनःशुद्धिरान्तरम् । तदध्यात्मविद्यया लभ्यम् ॥ १४ ॥

इति प्रथमः खण्डः

[1] तारतम्यपू—अ. [2] हारं—अ, अ १, अ २, क.

दशविधयमनिरूपणम्

तपःसन्तोषास्तिक्यदानेश्वरपूजनसिद्धान्तश्रवणह्रीमति-
तानि दश नियमाः ॥ १ ॥ तत्र तपो नाम विध्युक्तकृच्छ्रा-
यणादिभिः शरीरशोषणम् ॥ २ ॥ [1]संतोषो नाम यदृच्छालाभतुष्टिः
॥ ३ ॥ आस्तिक्यं नाम वेदोक्तधर्माधर्मेषु विश्वासः ॥ ४ ॥ दानं
नाम न्यायार्जितधनधान्यादेः श्रद्धयाऽर्थिभ्यः प्रदानम् ॥ ५ ॥
ईश्वरपूजनं नाम प्रसन्नस्वभावेन यथाशक्ति विष्णुरुद्रादिपूजनम्
॥ ६ ॥ सिद्धान्तश्रवणं नाम वेदान्तार्थविचारः ॥ ७ ॥ ह्रीर्नाम
वेदलौकिकमार्गकुत्सितकर्मणि लज्जा ॥ ८ ॥ मतिर्नाम वेदविहित-
कर्ममार्गेषु श्रद्धा ॥ ९ ॥ जपो नाम विधिवद्गुरूपदिष्टवेदाविरुद्ध-
मन्त्राभ्यासः । तद्विविधं वाचिकं मानसं चेति । मानसं तु मनसा
ध्यानयुक्तम् । वाचिकं द्विविधमुच्चैरुपांशुभेदेन । उच्चैरुच्चारणं
यथोक्तफलम् । [2]उपांशु सहस्रगुणम् । मानसं कोटिगुणम् ॥ १० ॥
[3]व्रतं नाम वेदोक्तविधिनिषेधानुष्ठाननैयत्यम् ॥ ११ ॥

दशधा भिन्नयमस्वरूपमुक्त्वा तथा नियमस्वरूपमाह—तप इति ॥१–९॥ मन्त्रार्थानुसन्धानं मानसमित्यर्थः ॥ १०–११ ॥

इति द्वितीयः खण्डः

[1] संतोषं—अ, अ १, अ २, क.
[2] उपांशुः—अ, अ १.
[3] एतद्वाक्यं मुद्रितकोश एव दृश्यते.

### अष्टविधासननिरूपणम्

स्वस्तिकगोमुखपद्मवीरसिंहभद्रमुक्तमयूराख्यान्यासनान्यष्टौ ।
; नाम—

जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे ।
ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते ॥ १ ॥
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ।
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखं यथा ॥ २ ॥
अङ्गुष्ठेन निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण च ।
ऊर्वोरुपरि शाण्डिल्य कृत्वा पादतले उभे ।
पद्मासनं भवेदेतत् सर्वेषामपि पूजितम् ॥ ३ ॥
एकं पादमथैकस्मिन् विन्यस्योरुणि संस्थितः ।
इतरस्मिंस्तथा चोरुं वीरासनमुदीरितम् ॥ ४ ॥
दक्षिणं सव्यगुल्फेन दक्षिणेन तथेतरम् ।
हस्तौ च जान्वोः संस्थाप्य स्वाङ्गुलीश्च प्रसार्य च ॥ ५ ॥
व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ।
सिंहासनं भवेदेतत् पूजितं योगिभिः सदा ॥ ६ ॥
योनिं वामेन संपीड्य मेढ्रादुपरि दक्षिणम् ।
भ्रूमध्ये च मनोलक्ष्यं सिद्धासनमिदं भवेत् ॥ ७ ॥
गुल्फौ तु वृषणस्याधः सींवन्याः पार्श्वयोः क्षिपेत् ।
पादपार्श्वे तु पाणिभ्यां दृढं बद्ध्वा सुनिश्चलम् ।
भद्रासनं भवेदेतत् सर्वव्याधिविषापहम् ॥ ८ ॥

संपीडितसीविनीं सूक्ष्मां गुल्फेनैव तु सव्यतः ।
सव्यं दक्षिणगुल्फेन मुक्तासनमिदं भवेत् ॥ ९ ॥
अवष्टभ्य धरां सम्यक् तलाभ्यां तु करद्वयोः ।
हस्तयोः कूर्परौ चापि स्थापयेन्नाभिपार्श्वयोः ॥ १० ॥
समुन्नतशिरःपादो दण्डवद्व्योम्नि संस्थितः ।
मयूरासनमेतत्तु सर्वपापप्रणाशनम् ॥ ११ ॥
शरीरान्तर्गताः सर्वरोगा विनश्यन्ति । विषाणि जीर्यन्ते ॥१२॥ येन केनासनेन सुखधारणं भवत्यशक्तस्तत्समाचरेत् ॥१३॥

स्वस्तिकाद्यष्टासनप्रकारमाह—स्वस्तिकेति ॥ १ ॥ गोमुखासनमाह—सव्य इति ॥ २ ॥ पद्मासनमाचष्टे—अङ्गुष्ठेनेति ॥ ३ ॥ वीरासनलक्षणमाह—एकमिति ॥ ४ ॥ सिंहासनप्रकारमाह—दक्षिणमिति ॥ ५–६ ॥ सिद्धासनस्वरूपमाह—योनिमिति ॥ ७ ॥ भद्रासनमाह—गुल्फाविति ॥ ८ ॥ मुक्तासनप्रकारमाह—सम्पीडयेति ॥ ९ ॥ मयूरासनमाह—अवष्टभ्येति ॥ १०–१३ ॥

आसनजयफलम्

येनासनं विजितं जगत्त्रयं तेन विजितं भवति ॥ १४ ॥
यमनियमासनाभ्यासयुक्तः पुरुषः प्राणायामं चरेत् । तेन नाडयः शुद्धा भवन्ति ॥ १५ ॥

आसनजयफलमाह—येनेति ॥ १४ ॥ ततः किमित्यत आह—यमेति ॥ १५ ॥

इति तृतीयः खण्डः

### नाडीसंख्यादिजिज्ञासा

अथ हैनमथर्वाणं शाण्डिल्यः पप्रच्छ कैनोपायेन नाड्यः शुद्धा स्युः । नाड्यः कतिसंख्याकाः तासामुत्पत्तिः कीदृशी । तासु कति वायवस्तिष्ठन्ति । तेषां कानि स्थानानि । तत्कर्माणि कानि । देहे यानियानि विज्ञातव्यानि तत्सर्वं मे ब्रूहीति ॥ १ ॥

शाण्डिल्यः प्रश्नबीजमवष्टभ्याथर्वाणं पृच्छतीत्याह—अथेति ॥ १ ॥

### शरीरप्राणप्रमाणम्

स होवाचाथर्वा । अथेदं शरीरं षण्णवत्यङ्गुलात्मकं भवति । शरीरात्प्राणो द्वादशाङ्गुलाधिको भवति ॥ २ ॥

शाण्डिल्येन एवं पृष्टः सः स्वस्वांगुलिमानेन षण्णवतीति ॥ २ ॥

### कुम्भकविधिः

शरीरस्थं प्राणमग्निना सह योगाभ्यासेन समं न्यूनं वा यः करोति स योगिपुङ्गवो भवति ॥ ३ ॥

समन्यूनशब्दाभ्यां कुम्भकदीर्घकुम्भकावुच्येते इत्यर्थः ॥ ३ ॥

### मनुष्यादीनां अग्निस्थानम्

देहमध्ये शिखिस्थानं त्रिकोणं तप्तजाम्बूनदप्रभं मनुष्याणाम् । चतुष्पदां चतुरश्रम् । विहगानां वृत्ताकारम् । तन्मध्ये शुभा तन्वी पावकी शिखा तिष्ठति ॥ ४ ॥

मनुष्यादीनां स्थानमाह—देहेति ॥ ४ ॥

### मनुष्यादिदेहमध्यलक्षणम्

गुदाद्द्व्यङ्गुलादूर्ध्वं मेढ्राद्द्व्यङ्गुलादधो देहमध्यं मनुष्याणां भवति । चतुष्पदां हृन्मध्यम् । विहगानां तुन्दमध्यम् । देहमध्यं नवाङ्गुलं चतुरङ्गुलमुत्सेधायतमण्डाकृति ॥ ५ ॥

मनुष्यादिदेहमध्यलक्षणमाह—गुदादिति ॥ ५–७ ॥

### नाभिचक्रे जीवभ्रमणम्

तन्मध्ये नाभिः । तत्र द्वादशारयुतं चक्रम् । तच्चक्रमध्ये पुण्यपापप्रचोदितो जीवो भ्रमति ॥ ६ ॥ तन्तुपञ्जरमध्यस्थलूतिका यथा भ्रमति तथा चासौ तत्र प्राणश्चरति । देहेऽस्मिञ्जीवः प्राणारूढो भवेत् ॥ ७ ॥

### कुण्डलिनीस्वरूपचेष्टाः

नाभेस्तिर्यगधोर्ध्वं कुण्डलिनीस्थानम् । अष्टप्रकृतिरूपाऽष्टधा कुण्डलीकृता कुण्डलिनी शक्तिर्भवति । यथावद्वायुसंचारं जलान्नादीनि परितः [1]स्कन्धपार्श्वेषु निरुध्यैनं मुखेनैष समावेष्टच्य ब्रह्मरन्ध्रं योगकालेऽपानेनाग्निना च स्फुरति हृदयाकाशं महोज्ज्वला ज्ञानरूपा भवति ॥ ८ ॥

तत्स्वरूपं तच्चेष्टां चाह—अष्टेति । ब्रह्मरन्ध्रं पुच्छेन च ॥ ८ ॥

[1] स्कन्द[कन्द?]पा—अ २, उ १.

चतुर्दशनाड्यः

मध्यस्थकुण्डलिनीमाश्रित्य मुख्या नाड्यश्चतुर्दश भवन्ति । इडा पिङ्गला सुषुम्ना सरस्वती [1]वारुणा पूषा हस्तिजिह्वा यशस्विनी विश्वोदरा कुहूः शङ्खिनी पयस्विनी अलम्बुसा गान्धारीति नाड्यश्चतुर्दश भवन्ति ॥ ९ ॥

देहमध्यस्थेति । कास्ता इत्यत्र इडेति ॥ ९ ॥

सुषुम्नानाडी

तत्र सुषुम्ना विश्वधारिणी मोक्षमार्गेति चाचक्षते । गुदस्य पृष्ठभागे वीणादण्डाश्रिता [2]मूर्धपर्यन्तं ब्रह्मरन्ध्रेति विज्ञेया व्यक्ता सूक्ष्मा वैष्णवी भवति ॥ १० ॥

सुषुम्नास्वरूपमाह --गुदस्येति ॥ १० ॥

सुषुम्नापरितः इतरनाडीस्थानानि

सुषुम्नायाः सव्यभागे इडा तिष्ठति । दक्षिणभागे पिङ्गला । इडायां चन्द्रश्चरति । पिङ्गलायां रविः । तमोरूपश्चन्द्रः । रजोरूपो रविः । विषभागो रविः अमृतभागश्चन्द्रमाः । तावेव सर्वकालं धत्ते । सुषुम्ना कालभोक्त्री भवति । सुषुम्ना-पृष्ठपार्श्वयोः सरस्वतीकुहू भवतः । यशस्विनीकुहू[3]मध्ये वारुणी प्रतिष्ठिता भवति । पूषासरस्वतीमध्ये पयस्विनी भवति । गान्धारी-

[1] वारुणी—मु. वरुणा—उ, अ २. [2] मूर्धिक, अ २, उ १.
[3] र्म—क, अ १, अ २.

सरस्वतीमध्ये [illegible]स्विनी भवति । कन्दमध्येऽलम्बुसा भवति । सुषुम्नापूर्वभागे मेढ्रान्तं कुहूर्भवति । कुण्डलिन्या अधश्चोर्ध्वं वारुणी सर्वगामिनी भवति । यशस्विनी सौम्या च पादांगुष्ठान्तमिष्यते । पिङ्गला चोर्ध्वगा याम्यनासान्तं भवति । पिङ्गलायाः पृष्ठतो याम्यनेत्रान्तं पूषा भवति । याम्यकर्णान्तं यशस्विनी भवति । जिह्वाया ऊर्ध्वान्तं सरस्वती भवति । आसव्यकर्णान्तमूर्ध्वगा शङ्खिनी भवति । इडापृष्ठभागात्सव्यनेत्रान्तगा गान्धारी भवति । पायुमूलादधोर्ध्वगाऽलम्बुसा भवति । एतासु चतुर्दशनाडीष्वन्या नाड्यः संभवन्ति । तास्वन्यास्तास्वन्या भवन्तीति विज्ञेयाः । यथाऽश्वत्थादिपत्रं सिराभिर्व्याप्तमेवं शरीरं नाडीभिर्व्याप्तम् ॥ ११ ॥

सुषुम्नायाः पण्डितः इडादिनाड्यस्तिष्ठन्तीत्याह—सुषुम्नाया इति ॥ ११ ॥

प्राणादिदशवायुस्थानचेष्टाः

प्राणापानसमानोदानव्याना नागकूर्मकृकरदेवदत्तधनञ्जया एते दश वायवः सर्वासु नाडीषु चरन्ति ॥ १२ ॥ आस्यनासिका-[1]कण्ठनाभिपादाङ्गुष्ठद्वयकुण्डल्यधश्चोर्ध्वभागेषु प्राणः संचरति । श्रोत्राक्षिकटिगुल्फघ्राणगलस्फिग्देशेषु व्यानः संचरति । गुदमेढ्रोरुजानूदरवृषणकटिजङ्घानाभिगुदाग्न्यगारेष्वपानः संचरति । सर्वसंधिस्थ उदानः । पादहस्तयोरपि सर्वगात्रेषु सर्वव्यापी समानः । भुक्तान्नरसादिकं गात्रेऽग्निना सह व्यापयन् द्विसप्ततिसहस्रेषु नाडीमार्गेषु

[1] हृन्नाभि—अ १.

चरन् समानवायुरग्निना सह साङ्गोपाङ्गकलेवरं व्याप्य॰॰ नागादिवायवः पञ्च त्वगस्थ्यादिसंभवाः तुन्दस्थं जलमन्नं च रसादिषु समीरितं— तुन्दमध्यगतः प्राणस्तानि पृथक्कुर्यात् । अग्नेरुपरि जलं स्थाप्य जलोपर्यन्नादीनि संस्थाप्य स्वयमपानं संप्राप्य तेनैव सह मारुतः प्रयाति देहमध्यगतं [1]ज्वलनम् । वायुना पतितो वह्निरपानेन शनैर्देहमध्ये ज्वलति । ज्वलनो ज्वालाभिः प्राणेन कोष्ठमध्यगतं जलमत्युष्णमकरोत् । जलोपरि समर्पितं व्यञ्जनसंयुक्तमन्नं वह्निसंयुक्तवारिणा पक्वमकरोत् । तेन स्वेदमूत्रजलरक्तवीर्यरूपरसपुरीषादिकं प्राणः पृथक्कुर्यात् । समानवायुना सह सर्वासु नाडीषु रसं व्यापयन् श्वासरूपेण देहे वायुश्चरति । नवभिर्व्योमरन्ध्रैः शरीरस्य वायवः कुर्वन्ति विण्मूत्रादिविसर्जनम् । निश्वासोच्छ्वासकासश्च प्राणकर्मोच्यते । विण्मूत्रादिविसर्जनमपानवायुकर्म । हानोपादानचेष्टादि व्यानकर्म । देहस्योन्नयनादिकमुदानकर्म । शरीरपोषणादिकं समानकर्म । उद्गारादि नागकर्म । निमीलनादि कूर्मकर्म । क्षुत्करणं कृकरकर्म । तन्द्री देवदत्तकर्म । श्लेष्मादि धनञ्जयकर्म ॥ १३ ॥

नाडीभेदमुक्त्वा वायुभेदमाह—प्राणेति ॥ १२ ॥ प्राणादिचेष्टामाचष्टे —आस्येति ॥ १३–१४ ॥

नाडीशोधनविधिः

एवं नाडीस्थानं वायुस्थानं तत्कर्म च सम्यज्ज्ञात्वा नाडीसंशोधनं कुर्यात् ॥ १४ ॥

इति चतुर्थः खण्डः

[1] जलं—क, अ २.

योगाधिकारियोगमठयोः लक्षणम्

यमनियमयुतः पुरुषः सर्वसङ्गविवर्जितः कृतधियः सत्य-धर्मरतो जितक्रोधो गुरुशुश्रूषानिरतः पितृमातृविधेयः स्वाश्रमोक्त-सदाचार[1]विद्वच्छिक्षितः फलमूलोदकान्वितं तपोवनं प्राप्य रम्यदेशे ब्रह्मघोषसमन्विते स्वधर्मनिरतब्रह्मवित्समावृते फलमूलपुष्पवारिभिः सुसंपूर्णे देवायतने नदीतीरे ग्रामे नगरे वाऽपि सुशोभनमठं नात्युच्चनीचायतमल्पद्वारं गोमयादिलिप्तं सर्वरक्षासमन्वितं कृत्वा तत्र वेदान्तश्रवणं कुर्वन् योगं समारभेत् ॥ १ ॥

सप्रकारं सोपायं सामान्यविशेषप्राणायामलक्षणमाह—यमेति । योगाधिकारिलक्षणमुक्त्वा योगमठलक्षणमाह—फलेति । तत्र योगमठे ॥ १ ॥

प्राणायामारम्भप्रकारः

आदौ विनायकं संपूज्य स्वेष्टदेवतां नत्वा पूर्वोक्तासने स्थित्वा प्राङ्मुख उदङ्मुखो वाऽपि मृद्वासनेषु जितासनगतो विद्वान् समग्रीवशिरोनासाग्रदृग्भ्रूमध्ये शशभृद्बिम्बं पश्यन् नेत्राभ्याम-मृतं द्वादशमात्रया इडया वायुमापूर्योदरे स्थितं ज्वालावलीयुतं रेफबिन्दुयुक्तमग्निमण्डलयुतं ध्यायेद्रेचयेत् पिङ्गलया । पुनः पिङ्गल-याऽऽपूर्य कुम्भित्वा रेचयेदिडया ॥ २ ॥

योगारम्भप्रकारमाह—आदाविति । अमृतं स्रवन्तं चन्द्रमण्डलं पश्यन् ॥ २ ॥

[1] विच्छि—क, अ २.

### नाडीशोधकप्राणायामाभ्यासकालावधिः

त्रिचतुस्त्रिचतुः षण्मासपर्यन्तं त्रिसंध्यं सान्तराले च षट्कृत्व आचरेन्नाडीशुद्धिर्भवति ॥ ३ ॥

कियन्तं कालं कर्तव्यमित्यत्र अवधिमाह—त्रिचतुरिति । त्रिचतुस्त्रिचत्वारिंशद्दिनपर्यन्तं वा, त्रिचतुस्त्रिमासं चतुर्मासं सप्तमासं वा, त्रिचतुर्मासपर्यन्तं संवत्सरपर्यन्तं वा, एवं षट्कालं प्राणायामं कुर्वतो नाडीशुद्धिः भवति ॥ ३ ॥

### नाडीशुद्धिचिह्नानि

ततः शरीरलघुदीप्तिवह्निवृद्धिनादाभिव्यक्तिर्भवति ॥ ४ ॥

ततः किमित्यत आह—तत इति । योगिनः शरीरस्य लघुत्वं दीप्तिमत्त्वं सौन्दर्यादिः जायते इत्यर्थः ॥

इति पञ्चमः खण्डः

### प्रणवात्मकप्राणायामः

प्राणापानसमायोगः प्राणायामो भवति । रेचकपूरक[2]कुम्भकभेदेन स त्रिविधः ॥ १ ॥ ते वर्णात्मकाः । तस्मात् प्रणव एव प्राणायामः ॥ २ ॥

प्रणवात्मकप्राणायामस्वरूपमाह—प्राणेति ॥ १ ॥ रेचकादयः ते । यस्मात् रेचकादयः अकारोकारमकारात्मकाः तस्मात् ॥ २ ॥

[1] रालेषुच—क, अ २. [2] कुम्भकैः स—अ, अ २.

प्रणवकर्णध्यानप्रकारः

पद्माद्यासनस्थः पुमान्नासाग्रशशभृद्बिम्बन्योत्स्नाजालवितानि-[1]ताकारमूर्ती रक्ताङ्गी हंसवाहिनी दण्डहस्ता बाला गायत्री भवति । उकारमूर्तिः श्वेताङ्गी तार्क्ष्यवाहिनी युवती चक्रहस्ता सावित्री भवति । मकारमूर्तिः कृष्णाङ्गी वृषभवाहिनी वृद्धा त्रिशूलधारिणी सरस्वती भवति ॥ ३ ॥ अकारादित्रयाणां सर्वकारणमेकाक्षरं परंज्योतिः प्रणवं भवति ॥ ४ ॥

यथोक्तसाधनसम्पन्नो योगी अकारादिवर्णत्रयवाच्यगायत्र्यादिमूर्तित्रयध्यानपूर्वकं यथाविधि प्राणायामं कुर्यादित्याह—पद्मेति ॥ ३ ॥ अकारादिमात्रात्रयसमष्टिः प्रणवो भवतीत्याह—अकारादीति । प्रणवं प्रणवस्वरूपम् ॥ ४ ॥

प्राणाभ्यासप्रकारः

इडया बाह्याद्वायुमापूर्य षोडशमात्राभिरकारं चिन्तयन् पूरितं वायुं चतुःषष्टिमात्राभिः कुम्भयित्वोंकारं ध्यायन् पूरितं पिङ्गलया द्वात्रिंशन्मात्रया मकार[2]मूर्तिध्यानेनैवं क्रमेण पुनः पुनः कुर्यात् ॥५॥

प्राणाभ्यासप्रकारमाह—इडयेति ॥ ५ ॥

इति षष्ठः खण्डः

[1] तमका—अ, अ १, क. च मका—अ २. [2] मूर्ति—अ, अ १.

अथासनदृढो योगी वशी मितहिताशनः सुषुम्नानाडीस्थ-मलशोधार्थं योगी बद्धपद्मासनो वायुं चन्द्रेणापूर्य यथाशक्ति कुम्भयित्वा सूर्येण रेचयित्वा पुनः सूर्येणापूर्य कुम्भयित्वा चन्द्रेण विरेच्य यया त्यजेत्तया संपूर्य धारयेत्। तदेते श्लोका भवन्ति—

प्राणं प्रागिडया पिबेन्नियमितं भूयोऽन्यया रेचयेत्
पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्वामया।
सूर्याचन्द्रम[1]सोरनेन विधिनाऽभ्यासं सदा तन्वतां
शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः ॥ १ ॥

योगी सुषुम्नाऽन्तर्गतमलशोधनार्थं पुरोक्तरीत्या प्राणायामं कुर्यादित्याह-अथेति। उक्तार्थं वक्ष्यमाणाः श्लोकाः मन्त्रा भवन्तीत्याह—तदिति ॥ १ ॥

अहरहः कर्तव्यप्राणायामसङ्ख्या

प्रातर्मध्यन्दिने सायमर्धरात्रे तु कुम्भकान्।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥ २ ॥

अहरहः कति प्राणायामाः कर्तव्याः इत्यत आह—प्रातरिति ॥ २ ॥

अभ्यासोचितसिद्धिभेदः

कनीयसि भवेत् स्वेदः कम्पो भवति मध्यमे।
उत्तिष्ठत्युत्तमे प्राणरोधे पद्मासनं [2]भवेत् ॥ ३ ॥

[1] सोऽग्ने—ङ, ङ १. [2] महत्—अ, अ १.

जलेन श्रमजातेन गात्रमर्दनमाचरेत् ।
दृढता लघुता चापि तस्य गात्रस्य जायते ॥ ४ ॥

अभ्यासोचितसिद्धिभेदमाचष्टे—कनीयसीति ॥ ३ ॥ तेन किं स्यादित्यत्र जलेनेति ॥ ४ ॥

अभ्यासकाले आहारनियमः

अभ्यासकाले प्रथमं शस्तं क्षीराज्यभोजनम् ।
ततोऽभ्यासे स्थिरीभूते न [1]तावन्नियमग्रहः ॥ ५ ॥

आहारनियममाह—अभ्यासेति ॥ ५ ॥

अभ्यासे सावधानताविधिः

यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैःशनैः ।
तथैव सेवितो वायुरन्यथा हन्ति साधकम् ॥ ६ ॥
युक्तंयुक्तं त्यजेद्वायुं युक्तंयुक्तं च पूरयेत् ।
युक्तं युक्तेन बध्नीयादेवं सिद्धिमवाप्नुयात् ॥ ७ ॥

यावत् सुषुम्नाप्रवेशः तावत् सावधानतया अभ्यासः कार्यः इत्यत आह—यथेति ॥ ६ ॥ तत्रोपायस्तु युक्तमिति । एवं अभ्यासं कुर्वतो नाडीशुद्धिः भवति ॥ ७ ॥

नाडीशुद्धितो मनोन्मन्यवस्थाप्राप्तिः

यथेष्ट[2]धारणं वायोरनलस्य प्रदीपनम् ।
नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् ॥ ८ ॥

[1] तद्व—अ, अ १. [2] धारणाद्वा—क, अ २.

विधिवत् प्राणसंयामैर्नाडीचक्रे विशोधिते ।
सुषुम्नावदनं भित्त्वा सुखाद्विशति मारुतः ॥ ९ ॥
मारुते मध्यसंचारे मनःस्थैर्यं प्रजायते ।
यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी ॥ १० ॥

ततो वायुः सुषुम्नां प्रविश्य योगिनं मनोन्मन्यवस्थाऽऽरूढं कुर्यादित्याह—यथेष्टेति ॥ ८–९ ॥ तेन किं स्यादित्यत्र—मारुत इति ॥ १० ॥

### बन्धत्रयस्य कर्तव्यता

पूरकान्ते तु कर्तव्यो बन्धो जालन्धराभिधः ।
कुम्भकान्ते रेचकादौ कर्तव्यस्तूड्डियाणकः ॥ ११ ॥
अधस्तात्कुञ्चनेनाशु कण्ठसंकोचने कृते ।
मध्ये पश्चिमतानेन स्यात् प्राणो ब्रह्मनाडिगः ॥ १२ ॥

बन्धत्रयपूर्वकाभ्यास एव फलवानित्याह—पूरकान्त इति ॥ ११–१२ ॥

### प्राणापानयोगफलम्

अपानमूर्ध्वमुत्थाप्य प्राणं कण्ठादधो नयन् ।
योगी जराविनिर्मुक्तः षोडशो वयसा भवेत् ॥ १३ ॥

प्राणापानयोगफलमाह—अपानमिति ॥ १३ ॥

### कपालशोधनोपायः

सुखासनस्थो दक्षनाड्या बहिस्थं पवनं समाकृष्याकेशमानखाग्रं कुम्भयित्वा सव्यनाड्या रेचयेत् । तेन कपालशोधनं वातनाडीगतसर्वरोगविनाशनं भवति ॥ १३–१ ॥

कपालशोधनोपायमाह—सुखेति । योगी सुखासनस्थः । कपालशोधनं भवति । तेन किं भवतीत्यत्र—वातेति ॥ १३–१ ॥

उज्जायीप्राणायामः

हृदयादिकण्ठपर्यन्तं सस्वनं नासाभ्यां शनैः पवनमाकृष्य यथाशक्ति कुम्भयित्वा इडया विरेच्य गच्छंस्तिष्ठन्कुर्यात् । तेन श्लेष्महरं जाठराग्निवर्धनं भवति ॥ १३–२ ॥

श्लेष्महरोज्जायीलक्षणमाह—हृदयादीति । तिष्ठन् उज्जायीनामकं प्राणायामं कुर्यात् ॥ १३–२ ॥

सीत्कारप्राणायामः

वक्त्रेण सीत्कारपूर्वकं वायुं गृहीत्वा यथाशक्ति कुम्भयित्वा नासाभ्यां रेचयेत् । तेन क्षुत्तृष्णाऽऽलस्यनिद्रा न जायन्ते ॥१३–३॥

सीत्कारप्राणायाममाह—वक्त्रेणेति ॥ १३–३ ॥

शीतलप्राणायामः

जिह्वया वायुं गृहीत्वा यथाशक्ति कुम्भयित्वा नासाभ्यां रेचयेत् । तेन गुल्मप्लीहज्वरपित्तक्षुधादि नश्यति ॥ १३–४ ॥

शीतळी तु जिह्वया ॥ १३–४ ॥

उपायापथकुम्भकद्वयम्

[1]कुम्भकः स द्विविधः सहितः केवलश्चेति । रेचकपूरकयुक्तः सहितः । तद्विवर्जितः केवलः । केवलसिद्धिपर्यन्तं सहितमभ्यसेत् ।

[1] अथकुम्भकः—क, अ २.

केवलकुम्भके सिद्धे त्रिषु लोकेषु न तस्य दुर्लभं भवति । केवल-कुम्भकात् कुण्डलिनीबोधो जायते ॥ १३–५ ॥

उपायोपेयकुम्भकद्वयमाह—कुम्भक इति । ततः किं जायत इत्यत्र-केवलेति ॥ १३–५ ॥

कुम्भकाभ्यासफलम्

ततः कृशवपुः प्रसन्नवदनो निर्मललोचनोऽभिव्यक्तनादो निर्मुक्तरोगजालो जितबिन्दुः पटुग्निर्भवति ॥ १३–६ ॥

ततः किं स्यादित्यत्र ततः इति ॥ १३–६ ॥

वैष्णवीमुद्राप्राप्तिः

अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता ।
एषा सा वैष्णवी मुद्रा सर्वतन्त्रेषु गोपिता ॥ १४ ॥

तेन किमित्याकांक्षायां अनेन योगी वैष्णवीमुद्राऽऽरूढो भवतीत्याह—अन्तर्लक्ष्यमिति । मूलाधारानाहताज्ञासहस्रारेषु यथाक्रमं विराट् सूत्रं बीजं तुरीयं वा अन्तर्लक्ष्यं तदेकतानं मनः बहिर्दृष्टिस्तु अन्तर्दृष्टिर्भूत्वा यदा निमेषोन्मेषवर्जिता भवति तदा दृष्टिरियं वैष्णवीमुद्रा भवतीत्यर्थः ॥ १४ ॥

खेचरीप्राप्त्या ब्रह्मदर्शनम्

अन्तर्लक्ष्यविलीनचित्तपवनो योगी सदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः पश्यन्नपश्यन्नपि ।
मुद्रेयं खलु खेचरी भवति सा लक्ष्यैकताना शिवा
शून्याशून्यविवर्जितं स्फुरति सा तत्त्वं पदं [1]वैष्णवी ॥

[1] वैष्णवं—अ.

अर्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षण-
चन्द्रार्कावपि लीनतामुपनयन्निष्यन्दभावोत्तरम् ।
ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परं
तत्त्वं तत्परमस्ति वस्तुविषयं शाण्डिल्य विद्धीह तत् ॥

यदा योगी वैष्णवीमुद्राऽऽरूढो भवति तदा इयं वैष्णवीमुद्रा खेचरीपदवीमेत्य तत्त्वंपदलक्ष्यैक्यप्रत्यगभिन्नब्रह्मगोचरा भवतीत्याह—अन्तरिति । अन्तर्दृष्टिभावमापन्ननिश्चलबहिर्दृष्टिरेव मुद्रेयम् । शून्यं सुषुप्तिः अशून्यं स्वप्नादिकं तदुभयवर्जितं यथा भवति तथा लक्ष्यैकताना वैष्णवी स्फुरतीत्यर्थः ॥ १५ ॥ खेचरीमुद्राऽऽरूढयोगिनः स्थितिं तद्ध्येयस्वरूपं चाह—अर्धेति । अर्धोन्मीलितलोचनः इत्यादिविशेषणविशिष्टो योगी चन्द्रार्कौ इडापिंगळागोचरवायू मनोदृष्ट्यग्निभिः सह सुषुम्नायां लीनतां लयभावं उपनयन यदा तिष्ठति तदा स्वान्तर्बाह्यविस्मारकब्रह्मानन्दनदी प्रवहति । ततो निष्यन्दभावोत्तरं नितरां स्रवदानन्दभावानुभवानन्तरं तदनुभूत्यसंगतया यद्वस्तु प्रत्यग्ज्योतीरूपं अशेषबाह्यान्तःकलनाविरळं परमात्माभेदेन देदीप्यमानं "परो दिवो ज्योतिर्दीप्यते" इति श्रुतिसिद्धं परं तत्त्वमस्ति हे शाण्डिल्य तद्विषयं तद्भावापन्नं वस्तु ब्रह्माहमिति विद्धि ॥ १६ ॥

खेचर्या उन्मनीभावापत्तिः

तारं ज्योतिषि संयोज्य किंचिदुन्नमय भ्रुवौ ।
पूर्वाभ्यासस्य मार्गोऽयमुन्मनीकारकः क्षणात् ॥ १७ ॥
तस्मात् खेचरीमुद्रामभ्यसेत् । ततोन्मनी भवति । ततो योगनिद्रा भवति । लब्धयोगनिद्रस्य योगिनः कालो नास्ति ॥ १७—१ ॥

कथं एवं ज्ञातुं शक्यते इत्यत्रोपायमाह—तारमिति । भ्रूमध्यविलसज्ज्योतिषि समभावमापन्नकृष्णतारयुगळं दृढं संयोज्य अवलोक्य किंचित्

भ्रुवौ ऊर्ध्वमुन्नमय्य उर्ध्वोत्क्षेपणं कृत्वा अथ सहस्रारविलसिततुरीयं तत्कलनाविरळतुरीयातीतं वा स्वावशेषधिया पश्येदिति शेषः। "तारं ज्योतिषि संयोज्य" इति यो दर्शितः "अन्तर्लक्ष्यं" इत्यादिपूर्वाभ्यासस्य अयमेव मार्गः क्षणादुन्मनीकारकः निर्विकल्पकब्रह्मभावापत्तिहेतुरित्यर्थः ॥ १७ ॥ यस्मादेवं तस्मात्। ततोन्मनीभवति निर्व्यापारं मनो भवतीत्यर्थः। ततः किमित्यत आह—तत इति। योगनिद्रा निर्विकल्पभावापत्तिः। ततो व्युत्थान-शङ्कां वारयति—लब्धेति। एवं लब्धयोगनिद्रस्य योगिनः निर्विकल्पकतो व्युत्थापककालो नास्ति ॥ १७–१ ॥

कालापरिच्छिन्नब्रह्मप्राप्तिसाधनम्

शक्तिमध्ये मनः कृत्वा शक्तिं च मनमध्यगाम्।
मनसा मन आलोक्य शाण्डिल्य त्वं सुखी भव ॥ १८ ॥
स्वमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु।
सर्वं च खमयं कृत्वा न किंचिदपि चिन्तय ॥ १९ ॥

कालापरिच्छिन्ननिर्विकल्पकब्रह्मभावापत्त्युपायमाह—शक्तीति। कुण्ड-लिनीशक्तिमध्ये मनः कृत्वा मनोलयं कृत्वा ततः कुण्डलिनीशक्तिं, चशब्दात् दृष्टिं, मनमध्यगां मनःप्रवृत्तिनिमित्तप्रत्यक्चैतन्यपर्यवसन्नां कृत्वा प्रत्यग्भावापन्नेन मनसा मनः मनोवृत्तिसहस्रभावाभावप्रकाशकप्रत्यगभिन्नं ब्रह्म अहमस्मीत्यालोक्य हे शाण्डिल्य त्वं तन्मात्रावस्थानलक्षणकैवल्यसुखी भवेत्यर्थः ॥ १८ ॥ प्रकारान्तरमाह—स्वमध्य इति। चित्स्वमध्ये आत्मानमन्तःकरणं कुरु आत्मान्तःकरणमध्ये च खं कुरु। एवं व्यतिहारेण सर्वं चित्स्वमयं कृत्वा चिदाकाशातिरिक्तं न किञ्चिदस्ति इति चिन्तय ॥ १९ ॥

मनोविलापनेन कैवल्यप्राप्तिः

बाह्यचिन्ता न कर्तव्या तथैवान्तरचिन्तिका ।
सर्वचिन्तां परित्यज्य चिन्मात्रपरमो भव ॥ २० ॥
कर्पूरमनले यद्वत् सैन्धवं सलिले यथा ।
तथा च लीयमानं च मनस्तत्त्वे विलीयते ॥ २१ ॥
ज्ञेयं [1]सर्वप्रतीतं च तज्ज्ञानं मन उच्यते ।
ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः ॥ २२ ॥
ज्ञेयवस्तुपरि[2]त्यागे विलयं याति मानसम् ।
मानसे विलयं याते कैवल्यमवशिष्यते ॥ २३ ॥

बाह्यान्तर्वृत्त्यावृतस्य कथं चिदाकाशदृष्टिः उदेतीत्यत आह—**बाह्येति** ॥ २० ॥ निष्प्रतियोगिकचिन्मात्रावगतेः अन्तर्बाह्यविभागकलनापहृवपूर्वकत्वात् ज्ञेयसामान्यासम्भवप्रबोधसमकालं योगी कैवल्यरूपेण अवशिष्यते इत्याह—**कर्पूरमिति** । दग्धकर्पूरवत् जलगतसैन्धवपिण्डवच्च जाग्रदाद्यवस्थात्रयलीयमानं **मनः** स्वरूपध्यानसंस्कृतं सत्प्रपञ्चविमुखं भूत्वा **स्वतत्त्वे ब्रह्मणि लीयते** ॥ २१ ॥ प्रपञ्चतद्गोचरज्ञेयज्ञानसत्त्वात् कथं मनः स्वतत्त्वे विलीयत इत्यत आह—**ज्ञेयमिति** । सर्वत्र स्वातिरेकेण प्रतीयत इति **सर्वप्रतीतम्** । अविद्यापदशब्दात् जाग्रदादितत्कार्यप्रपञ्च उच्यते । तत् सर्वं **ज्ञेयशब्दार्थः तद्गोचरं मनः ज्ञानमुच्यते** । "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति यज्ज्ञानसमकालं **ज्ञानं ज्ञेयं समं** युगपन्नष्टं भवति अयमेव अद्वितीयब्रह्मप्रापकः **पन्थाः** नातोऽन्यः कश्चिदस्तीत्यर्थः ॥ २२ ॥ युगपत् कथं लीयते इत्यत आह—**ज्ञेयेति** ॥ २३ ॥

[1] सर्व—अ, अ २, क. [2] त्यागाद्वि—क, अ १, अ २.

योगज्ञानाभ्यां मनोलयः

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं मुनीश्वर ।
योग[1]स्तु वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥ २४ ॥
तस्मिन्निरोधिते नूनमुपशान्तं मनो भवेत् ।
मनःस्पन्दोपशान्त्यायां संसारः प्रविलीयते ॥ २५ ॥
सूर्या[2]लोकपरिस्पन्दशान्तौ व्यवहृतिर्यथा ।

कथं पुनः मानसं विलीयते इत्याशङ्क्य प्रत्यगभिन्नब्रह्मगोचरयोगज्ञानाभ्यां मानसं विलीयत इति सदृष्टान्तमाह—द्वाविति । योगस्तु स्वातिरिक्तास्तित्वगोचरतच्चित्तवृत्तिरोधः, ज्ञानं ब्रह्मातिरिक्तं न किञ्चिदस्तीति सम्यगवेक्षणम् ॥ २४ ॥ यः स्वातिरिक्तमस्तीति भ्रम उदेति तस्मिन् । संसारे सति कथं मनः शाम्यतीत्यत्र—मन इति । मनःस्पन्दोपशान्त्यायामित्यस्य मनःस्पन्दोपशान्तावित्यर्थः । "मनःस्पन्दोपशान्त्याऽयं" इत्येकं पाठान्तरमपि वर्तते । संसारः प्रविलीयते, संसारस्य मनःकल्पितत्वात् कल्पकाभावे कल्प्याभावो युज्यते इत्यर्थः ॥ २५ ॥ अत्र दृष्टान्तः—सूर्येति ॥

मनोलयात् प्राणस्पन्दनिरोधः

शास्त्रसज्जनसंपर्कवैराग्याभ्यासयोगतः ॥ २६ ॥
अनास्थायां कृतास्थायां पूर्वं संसारवृत्तिषु ।
यथाऽभिवाञ्छितध्यानाच्चिरमेकतयोदितात् ॥ २७ ॥
एकतत्त्वदृढाभ्यासात् प्राणस्पन्दो निरुध्यते ।

स्वाज्ञानविकल्पितमनःस्पन्दस्य प्राणस्पन्दनपूर्वकत्वात् । यत एवमतः तच्छान्तावुपाय उच्यते—शास्त्रेति ॥ २६ ॥ अनास्थायां निवृत्तिमार्गे

[1] स्तद्वृत्ति—क, अ १, अ २. [2] लोके—क, अ २.

कृतास्थायां सत्यां ब्रह्म सत्यं जगत् मिथ्येति ज्ञानमुदेति । ततः यथेति ॥ २७ ॥

प्राणस्पन्दनिरोधात् मनःस्पन्दनिरोधः

पूरकाद्यनिलायामाद्दृढाभ्यासादखेदजात् ॥ २८ ॥
एकान्तध्यानयोगाच्च मनःस्पन्दो निरुध्यते ।

मनःस्पन्दशान्तिः कथमित्यत्र—पूरकेति ॥ २८ ॥ प्राणस्पन्दशान्ति-समकालं मन इति ॥

प्राणस्पन्दनिरोधविविधोपायाः

ओङ्कारोच्चारणप्रान्तशब्दतत्त्वानुभावनात् ।
सुषुप्ते [1]संविदो जाते प्राणस्पन्दो निरुध्यते ॥ २९ ॥
तालुमूलगतां यत्नाज्जिह्वयाऽऽक्रम्य घण्टिकाम् ।
ऊर्ध्वरन्ध्रं गते प्राणे प्राणस्पन्दो निरुध्यते ॥ ३० ॥
प्राणे गलितसंवित्तौ तालूर्ध्वद्वादशान्तगे ।
अभ्यासादूर्ध्वरन्ध्रेण प्राणस्पन्दो निरुध्यते ॥ ३१ ॥
द्वादशाङ्गुलपर्यन्ते नासाग्रे विमलाम्बरे ।
संविद्दृशि प्रशाम्यन्त्यां प्राणस्पन्दो निरुध्यते ॥ ३२ ॥
भ्रूमध्ये तारकालोकशान्तावन्तमुपागते ।
चेतनैकतनं बद्धे प्राणस्पन्दो निरुध्यते ॥ ३३ ॥
ओमित्येव यदुद्भूतं [2]ज्ञानं ज्ञेयात्मकं शिवम् ।
असंस्पृष्ट[3]विकारांशं प्राणस्पन्दो निरुध्यते ॥ ३४ ॥

[1] स्सं—अ, अ १. [2] ज्ञानञ्च—अ २. [3] विकल्पां—अ, अ १, अ २, क.

चिरकालं हृदेकान्तव्योमसंवेदना[1]न्मुने ।
अवासनमनोध्यानात् प्राणस्पन्दो निरुध्यते ॥ ३५ ॥
एभिः क्रमैस्तथान्यैश्च नानासंकल्पकल्पितैः ।
नानादेशिकवक्त्रस्थैः प्राणस्पन्दो निरुध्यते ॥ ३६ ॥

प्लुतप्रणवानुसन्धानेनापि प्राणस्पन्दो निरुध्यत इत्याह—ओङ्कारेति । ओंकार. . . भावनात् कांस्यघण्टानिनादवत् प्रणवनादानुसन्धानात् । बाह्यान्तर्भवसंविदो विषयज्ञानततेः सुषुप्ते जाते सति अथ प्राणेति ॥ २९ ॥ लम्बिकयाऽपि प्राणस्पन्दशान्तिः स्यादित्याह—तालेति । तदुपायतः ऊर्ध्वरन्ध्रं गते ॥ ३० ॥ राजयोगाभ्यासपाटवतः प्राण इति । षण्मुखीमुद्रया गलितसंवित्तौ विगलितबाह्यान्तःसंवित्कलनायां सत्यां अभ्यासात् तालूर्ध्व-रन्ध्रेण प्राणे तालूर्ध्वविलसितद्वादशान्तं सहस्रारचक्रं गते सति अथ प्राणेति ॥ ३१ ॥ बहिःकुम्भकेनापि प्राणजयः स्यादित्याह—द्वादशेति । संविद्दृशि प्रशाम्यन्त्यां स्वातिरिक्तविषयवृत्तौ नष्टायाम् ॥ ३२ ॥ तारकानुसन्धा-नतोऽपि भ्रूमध्ये । तारकालोकनशान्तौ सत्याम् । तारकालोकनं कर्तव्यमिति सङ्कल्पे अन्तमुपागते अथ मनसि चेतनैकताने, चेतने प्रतीचि एकताने बद्धे एकतानतया बद्धे मनोन्मनीभावं गते सति, अथ प्राणेति ॥ ३३ ॥ ब्रह्मज्ञानेनापि प्राणस्पन्दशान्तिः स्यादित्याह—ओमिति । तदेव चाहं सकलं विमुक्त ओमिति ओङ्कारार्थविचारणसञ्जातासंस्पृष्टविकारांशज्ञानसमकालं प्राणेति ॥ ३४ ॥ ध्यानात् वासनाक्षयाच्च प्राणस्पन्दशान्तिः स्यादित्याह—चिरेति । हृदा एकान्तव्योमसंवेदनात् "चिद्व्योमातिरिक्तं न किञ्चिदस्ति" इति ज्ञानात् वासना क्षीयते । ततो ध्येयैकगोचरं मनो भवति । प्राणस्पन्दशान्तिः भवेदित्यर्थः ॥ ३५ ॥ उक्तैरनुक्तैर्वा उपायैः चिरानुष्ठितैः प्राणस्पन्दशान्तिः स्यादित्याह—एभिरिति ॥ ३६ ॥

[1] न्मुखे—क.

### कुम्भकेन सुषुम्नाभेदनद्वारा परमपदगमनम्

आकुञ्चनेन कुण्डलिन्याः कवाटमुद्घाट्य मोक्षद्वारं विभेदयेत् ॥ ३६–१ ॥ येन मार्गेण गन्तव्यं तद्द्वारं मुखेनाच्छाद्य [1]प्रसुप्ता कुण्डलिनी कुटिलाकारा सर्पवद्वेष्टिता भवति ॥ ३६–२ ॥ सा शक्तिर्येन चालिता स्यात् स तु मुक्तो भवति । सा कुण्डलिनी कण्ठोर्ध्वभागे सुप्ता चेद्योगिनां मुक्तये भवति । बन्धनायाधो मूढानाम् ॥ ३६–३ ॥ इडादिमार्गद्वयं विहाय सुषुम्नामार्गेण गच्छेत्तद्विष्णोः परमं पदम् ॥ ३६–४ ॥

प्राणस्पन्दनिरोधलक्षणकेवलकुम्भकतो योगी कुण्डलिन्या सुषुम्नावदनं भेदयेदित्याह—आकुञ्चनेनेति । सुषुम्नाकवाटम् । मोक्षद्वारं ब्रह्मरन्ध्रं विभेदयेत् ॥ ३६–१ ॥ मोक्षद्वारभेदककुण्डलिनीस्वरूपं तच्चालनफलं चाह—येनेति ॥ ३६–२, ३ ॥ यत एवं अतः इडादीति । सुषुम्नायाः विष्णुपदात्तिद्वारत्वात् ॥ ३६–४ ॥

### मनोयुक्तप्राणस्य सुषुम्नाप्रवेशनविधिः

मरुदभ्यसनं सर्वं मनोयुक्तं समभ्यसेत् ।
इतरत्र न कर्तव्या मनोवृत्तिर्मनीषिणा ॥ ३७ ॥
दिवा न पूजयेद्विष्णुं रात्रौ नैव प्रपूजयेत् ।
सततं पूजयेद्विष्णुं दिवारात्रं न पूजयेत् ॥ ३८ ॥

मनोयोगाभ्यासः फलवानित्यर्थः ॥ ३७ ॥ मनोयुक्तप्राणं इडादिमार्गद्वयमप्रापयित्वा महापथव्यापृतं कुर्यादित्याह—दिवेति । मनोयोगतो विष्णुं प्राणं

[1] सुप्तासुप्त—अ, अ १.

दिवा सूर्यनाड्यां न पूजयेत् न व्यापारयेत् । तथा चन्द्रनाड्यां रात्रौ नैव प्रपूजयेत् । ततः अव्याकृताकाशं तेन पूरितं सततं सुषुम्नाऽऽख्यं महापथं प्रति विष्णुं पूजयेत् । कदाऽपि दिवारात्रं न पूजयेदित्यर्थः ॥ ३८ ॥

खेचरीमुद्राप्राप्तिः

सुषिरो ज्ञानजनकः पञ्चस्रोतःसमन्वितः ।
तिष्ठते खेचरी मुद्रा त्वं हि शाण्डिल्य तां भज ॥ ३९ ॥
सव्यदक्षिण[1]नाडीस्थो मध्ये चरति मारुतः ।
तिष्ठते खेचरी मुद्रा तस्मिन् स्थाने न संशयः ॥ ४० ॥
इडापिङ्गलयोर्मध्ये शून्यं चैवानिलं ग्रसेत् ।
तिष्ठन्ती खेचरी मुद्रा तत्र सत्यं प्रतिष्ठितम् ॥ ४१ ॥
सोमसूर्यद्वयोर्मध्ये निरालम्बतले पुनः ।
संस्थिता व्योमचक्रे सा मुद्रा नाम च खेचरी ॥ ४२ ॥

सुषुम्नाप्रवेशतः किं स्यादित्याशङ्क्य तत्र खेचरीमुद्रा वर्तते तत्साक्षात्कारात् कृतकृत्यो भवसीत्याह—सुषिर इति । यत्र सुषुम्नामध्ये सुषिरः विराडादि-तुरीयातीतान्तपञ्चस्रोतस्समन्वितः सन् मूलाधारानाहताज्ञासहस्रारेषु योगिनः क्रमेण विराडादिज्ञानजनको भवति तत्रैव खेचरीमुद्रा निर्विकल्पकरूपिणी वर्तते । मत्प्रसादतः तां त्वं भजेत्यर्थः ॥ ३९ ॥ उक्तार्थमेव पुनः पुनः शब्दान्तरेण विशदयति—सव्येति ॥ ४० ॥ शून्यशब्देन अव्याकृतमाकाश-मुच्यते, आकाशस्य वायुग्रासत्वात् ॥ ४१ ॥ व्योमचक्रस्य निरालम्बत्वात् ॥ ४२ ॥

[1] नासि—अ.

बाह्यखेचरीसिद्ध्युपायः

छेदनचालनदोहैः [1]कलां परां जिह्वां कृत्वा दृष्टिं भ्रूमध्ये स्थाप्य कपालकुहरे जिह्वा विपरीतगा यदा भवति तदा खेचरी मुद्रा जायते । जिह्वा चित्तं च खे [2]चरति । तेनोर्ध्वजिह्वः पुमानमृतो भवति ॥ ४२–१ ॥

बाह्यखेचरीसिद्ध्युपायमाह—छेदनेति । प्रतिभानुवासरं षण्मासावधि स्नुहिपत्रनिभशस्त्रेण रोममात्रं जिह्वासिराच्छेदनेन प्रतिब्राह्ले मुहूर्ते जिह्वाचालनतः प्रातः सैन्धवपथ्याचूर्णतो दोहैः कलां परां सूक्ष्मां जिह्वां कृत्वा दृष्टियुग्मं भ्रूमध्ये स्थाप्य घण्टिकारन्ध्रेण कपालकुहरे जिह्वा विपरीतगा यदा भवति तदा खेचरीमुद्रा उदेति । सहस्रागजिह्वाप्रवेशतो योगी कृतकृत्यो भवतीत्यर्थः ॥ ४२–१ ॥

अभ्यासकाले प्राणजयोपायः

वामपादमूलेन योनिं संपीड्य दक्षिणपादं प्रसार्य तं कराभ्यां धृत्वा नासाभ्यां वायुमापूर्य कण्ठबन्धं समारोप्योर्ध्वतो वायुं धारयेत् । तेन सर्वक्लेशहानिः । ततः पीयूषमिव विषं जीर्यते । क्षयगुल्मगुदावर्तजीर्णत्वगादिदोषा नश्यन्ति । एष प्राणजयोपायः सर्वमृत्यूपघातकः ॥ ४२–२ ॥

अभ्यासकाले प्राणजयोपायमाह—वामेति । महामुद्राऽभ्यासेन तेन ॥ ४२–२ ॥

[1] फलां—मु. [2] चरी—अ २.

स्वात्मापरोक्षसिद्ध्युपायः

वामपादपार्ष्णिं योनिस्थाने नियोज्य दक्षिणचरणं वामोरूपरि संस्थाप्य वायुमापूर्य हृदये चुबुकं निधाय योनिमाकुञ्च्य मनोमध्ये यथाशक्ति धारयित्वा स्वात्मानं भावयेत्। तेनापरोक्षसिद्धिः ॥ ४२–३ ॥

स्वात्मापरोक्षसिद्ध्युपायमाह—वामेति । स्वात्मानं ब्रह्माहमस्मीति भावयेत्। सिद्धिः भवति ॥ ४२–३ ॥

सर्वरोगविनिर्मोकसाधनं धारणाविशेषः

बाह्यात् प्राणं समाकृष्य पूरयित्वोदरे स्थितम्।
नाभिमध्ये च नासाग्रे पादाङ्गुष्ठे च यत्नतः ॥ ४३ ॥
धारयेन्मनसा प्राणं सन्ध्याकालेषु वा सदा।
सर्वरोगविनिर्मुक्तो भवेद्योगी गतक्लमः ॥ ४४ ॥

धारणाविशेषमाह—बाह्यादिति ॥ ४३–४४ ॥

नासाग्रादिषु संयमेन विविधसिद्धयः

नासाग्रे वायुविजयं भवति। नाभिमध्ये सर्वरोगविनाशः। पादाङ्गुष्ठधारणाच्छरीरलघुता भवति ॥ ४४–१ ॥

रसनाद्वायुमाकृष्य यः पिबेत् सततं नरः।
श्रमदाहौ तु न स्यातां नश्यन्ति व्याधयस्तथा ॥ ४५ ॥
सन्ध्ययोर्ब्राह्मणः [1]काले वायुमाकृष्य यः पिबेत्।
त्रिमासात्तस्य कल्याणी जायते वाक् सरस्वती ॥ ४६ ॥

[1] काले—क.

एवं षण्मासाभ्यासात् सर्वरोगनिवृत्तिः ॥
जिह्वया वायुमानीय जिह्वामूले निरोधयेत् ।
यः पिबेदमृतं विद्वान् सकलं भद्रमश्नुते ॥ ४७ ॥
आत्मन्यात्मानमिडया धारयित्वा भ्रुवोऽन्तरे ।
विभेद्य त्रिदशाहारं व्याधिस्थोऽपि विमुच्यते ॥ ४८ ॥
[1]नाडीभ्यां वायुमारोप्य नाभौ तुन्दस्य पार्श्वयोः ।
घटिकैकां वहेद्यस्तु व्याधिभिः स विमुच्यते ॥ ४९ ॥
मासमेकं त्रिसन्ध्यं तु जिह्वयाऽऽरोप्य मारुतम् ।
विभेद्य त्रिदशाहारं धारयेत्तुन्दमध्यमे ॥ ५० ॥
ज्वराः सर्वे विनश्यन्ति विषाणि विविधानि च ।
मुहूर्तमपि यो नित्यं नासाग्रे मनसा सह ॥ ५१ ॥
सर्वं तरति पाप्मानं तस्य जन्मशतार्जितम् ।

[2]तारसंयमात् सकलविषयज्ञानं भवति । नासाग्रे चित्तसंयमादिन्द्रलोकज्ञानम् । तदधश्चित्तसंयमादग्निलोकज्ञानम् । चक्षुषि चित्तसंयमात् सर्वलोकज्ञानम् । श्रोत्रे चित्तस्य संयमाद्यमलोकज्ञानम् । तत्पार्श्वे संयमान्निर्ऋतिलोकज्ञानम् । पृष्ठभागे संयमाद्वरुणलोकज्ञानम् । वामकर्णे संयमाद्वायुलोकज्ञानम् । कण्ठे संयमात् सोमलोकज्ञानम् । वामचक्षुषि संयमाच्छिवलोकज्ञानम् । मूर्ध्नि संयमाद्ब्रह्मलोकज्ञानम् । पादाधोभागे संयमादतललोकज्ञानम् । पादे संयमाद्वितललोकज्ञानम् । पादसन्धौ संयमान्नितललोकज्ञानम् । जङ्घे संयमात्सुतललोकज्ञानम् । जानौ संयमान्महातललोकज्ञानम् । ऊरौ चित्तसंयमाद्रसातललो-

[1] नासीभ्यां—अ. [2] तारचित्तसं—उ.

कज्ञानम् । कटौ चित्तसंयमात्तलातलल्लोकज्ञानम् । नाभौ चित्तसंयमाद्भूलोकज्ञानम् । कुक्षौ संयमाद्भुवर्लोकज्ञानम् । हृदि चित्तसंयमात् स्वर्लोकज्ञानम् । हृदयोर्ध्वभागे चित्तसंयमान्महर्लोकज्ञानम् । कण्ठे चित्तसंयमाज्जनोलोकज्ञानम् । भ्रूमध्ये चित्तसंयमात्तपोलोकज्ञानम् । मूर्धि चित्तसंयमात् सत्यलोकज्ञानम् । धर्माधर्मसंयमादतीतानागतज्ञानम् । तत्तज्जन्तुध्वनौ चित्तसंयमात् सर्वजन्तुरुतज्ञानम् । संचितकर्मणि चित्तसंयमात् पूर्वजातिज्ञानम् । परचित्ते चित्तसंयमात् परचित्तज्ञानम् । कायरूपे चित्तसंयमादन्यादृश्यरूपम् । बले चित्तसंयमाद्धनुमदादिबलम् । सूर्ये चित्तसंयमाद्भुवनज्ञानम् । चन्द्रे चित्तसंयमात्तारव्यूहज्ञानम् । ध्रुवे तद्गतिदर्शनम् । [1]स्वार्थसंयमात् पुरुषज्ञानम् । नाभिचक्रे कायव्यूहज्ञानम् । कण्ठकूपे क्षुत्पिपासानिवृत्तिः । कूर्मनाड्यां स्थैर्यम् । तारे सिद्धदर्शनम् । कायाकाशसंयमादाकाशगमनम् । तत्तत्स्थाने संयमात्तत्तत्सिद्धयो भवन्ति ॥९२॥

नासाग्रादिकायाकाशान्तसंयमाद्विचित्रसिद्धयो भवन्तीत्याह—**नासाग्र** इति । **नासाग्रे** वायुधारणात् ॥ ४४–१ ॥ **रसनात्** रसनया ॥ ४९–४७ ॥ चन्द्रमण्डलं **विभेद्य** । **त्रिदशाहारं** अमृतं पीत्वा ॥ ४८–९० ॥ **मनसा सह** यो लक्ष्यं पश्यति ॥ ९१ ॥ **तारसंयमात्** तारकचित्तसंयमात् भवतीति सर्वत्रानुवर्तते । **जंघे** जंघायाम् । इत्थंभूतसिद्धिः पुरुषार्थसाधनमिति चेन्न, सिद्धेः पुरुषार्थपरिपन्थित्वात् । न हि स्वातिरेकेण स्वपरशरीरचतुर्दशलोकतद्विषयकज्ञानं वाऽस्ति । तस्मात् मुमुक्षुभिः सिद्धिमार्गो नादर्तव्यः इत्यर्थः ॥

इति सप्तमः खण्डः

---

[1] स्वार्थे—क, अ २.

पञ्चविधप्रत्याहारः

अथ प्रत्याहारः । स पञ्चविधः । विषयेषु विचरतामिन्द्रियाणां बलादाहरणं प्रत्याहारः । यद्यत्पश्यति [1]तत्सर्वमात्मेति प्रत्याहारः । नित्यविहितकर्मफलत्यागः प्रत्याहारः । सर्वविषयपराङ्मुखत्वं प्रत्याहारः । अष्टादशसु मर्मस्थानेषु क्रमाद्धारणं प्रत्याहारः ॥ १ ॥ पादाङ्गुष्ठगुल्फजङ्घाजानूरुपायुमेढ्रनाभिहृदयकण्ठकूपतालुनासाक्षिभ्रूमध्यललाटमूर्ध्नि स्थानानि । तेषु क्रमादारोहावरोहक्रमेण प्रत्याहरेत् ॥ २ ॥

यमनियमासनप्राणायामप्रासंगिकपरमार्थोपदेशतत्प्रतिपन्थिनानाविधसिद्धीः प्रतिपाद्य अथ योगांगप्रकृतप्रत्याहारमाचष्टे— अथेति । स्वस्वविषयतो बलात् । क्रमाद्धारणं, धारणं हारणं संक्रमणं प्रत्याहारः ॥ १ ॥ मर्मस्थानानि कानीत्यत्र पादेति ॥ २ ॥

इत्यष्टमः खण्डः

पञ्चविधाः धारणाः

अथ धारणाः । [2]स पञ्चविधः । आत्मनि मनोधारणं दहराकाशे बाह्याकाशधारणं पृथिव्यप्तेजोवाय्वाकाशेषु पञ्चमूर्तिधारणं चेति ॥

स पञ्चविधः ताः पञ्चविधाः । पञ्चब्रह्म-पञ्चमूर्तिधारणम् ॥

इति नवमः खण्डः

[1] तत्तत्स—अ. [2] सा त्रिविधा—मु.

### द्विविधं ध्यानम्

अथ ध्यानम् । तद्द्विविधं सगुणं निर्गुणं चेति । सगुणं मूर्तिध्यानम् । निर्गुणमात्मयाथात्म्यम् ॥

अनात्मापह्नवसिद्धात्ममात्रावशेषो हि आत्मयाथात्म्यम् ॥

इति दशमः खण्डः

### समाधिस्वरूपम्

अथ समाधिः । जीवात्मपरमात्मैक्यावस्था त्रिपुटीरहिता परमानन्दस्वरूपा शुद्धचैतन्यात्मिका भवति ॥

तूलाविद्योपाधिको जीवः मूलाविद्योपाधिकः परमात्मा तयोरौपाधिक-विशेषांशापायात् प्रत्यक्परैक्यं यस्यामाभाति सेयं जीवात्मपरमात्मैक्यावस्था निर्विकल्पकरूपिणीत्यर्थः । त्रिपुट्यां सत्यां निर्विकल्पता कुत इत्यत आह—त्रिपुटीति । निर्निकल्पकप्रकृतेः त्रिपुट्यादिविकृतिग्रासत्वात् त्रिपुट्यभावे दुःखरूपा स्यादित्यत आह—परमानन्देति । त्रिपुटीदुःखग्रासनिर्विकल्प-कस्थितेः परमानन्दस्वरूपत्वात् ऐक्यावस्थाया जडत्वं स्यादित्याशङ्क्य अस्य असंप्रज्ञातसमाधिरूपतया शुद्धचैतन्यतामाह—शुद्धेति । अत्र जीवात्मपरमात्मै-क्यावस्थाशब्देन असंप्रज्ञातसमाधिरुच्यते इत्यर्थः ॥

इत्येकादशः खण्डः

इति प्रथमोऽध्यायः

# द्वितीयोऽध्यायः

## निर्विशेषब्रह्मस्वरूपम्

**अथ ह शाण्डिल्यो ह वै ब्रह्मऋषिश्चतुर्षु वेदेषु ब्रह्मविद्यामलभमानः किं नामेत्यथर्वाणं भगवन्तमुपसन्नः पप्रच्छ अधीहि भगवन् ब्रह्मविद्यां येन श्रेयोऽवाप्स्यामीति ॥ १ ॥ स होवाचाथर्वा शाण्डिल्य सत्यं विज्ञानमनन्तं ब्रह्म ॥ २ ॥**

अष्टांगयोगच्छलेन स्वात्मतत्त्वं श्रुत्वाऽपि यथावदनधिगततया निष्प्रतियोगिकनिर्विशेषब्रह्ममात्रज्ञानबुभुत्सया शाण्डिल्यः पुनः अथर्वाणं पृच्छतीत्याह—अथेति। वेदेषु अर्थतोऽवधारितेष्वपि निष्प्रतियोगिकब्रह्ममात्रविद्याम्। किंनाम ब्रह्म। प्रपच्छ—किमिति? अधीहि। येन त्वदुपदेशेन ॥ १ ॥ शाण्डिल्येनैवं पृष्टः स होवाच। किं नाम ब्रह्मेति प्रश्नोत्तरं—शाण्डिल्येति। सत्यं विज्ञानमनन्तं ब्रह्म इति तैत्तिरीयके सम्यक् व्याख्यातमेतत् ॥ २ ॥

## ब्रह्मणः अनिर्देश्यत्वम्

**यस्मिन्निदमोतं च प्रोतं च यस्मिन्निदं संच विचैति सर्वं यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवति तदपाणिपादमचक्षुःश्रोत्रमजिह्वमशरीरमग्राह्यमनिर्देश्यम् ॥ ३ ॥**

यत् सर्वाधिकरणं तदनिर्देश्यमित्याह—यस्मिन्निति। इदं अविद्यापदतत्कार्यजातं यत्र ओतप्रोतभावमेत्य संच विचैति सङ्कोचविकासतां भजति, यन्मात्रज्ञानतः इदं स्वातिरिक्तं नेति विज्ञातं भवति, तदेतत्पाणिपादादिमद्व्यष्टिसमष्ट्यात्मकशरीरापह्नवसिद्धं तत्त्वेन निर्देष्टुमशक्यत्वात् अनिर्देश्यम् ॥ ३ ॥

### ब्रह्मणः अवाङ्मानसगोचरत्वम्

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । यत्केवलं ज्ञानगम्यम् । प्रज्ञा च यस्मात्प्रसृता पुराणी । यदेकमद्वितीयम् । आकाशवत् सर्वगतं सुसूक्ष्मं निरञ्जनं निष्क्रियं सन्मात्रं चिदानन्दैकरसं शिवं प्रशान्तममृतं तत् परं च ब्रह्म । तत्त्वमसि तज्ज्ञानेन हि विजानीहि ॥ ४ ॥

तस्यावाङ्मानसगोचरत्वं ज्ञानैकगम्यत्वं प्रज्ञाजनकत्वं अद्वितीयत्वं वस्तुतः सच्चिदानन्दमात्रत्वं चाह—यत इति । केवलं ज्ञानगम्यं ज्ञानेतरसाधनैरगम्यमित्यर्थः, "नान्यः पन्थाः विद्यतेऽयनाय" इति श्रुतेः । "निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते" इति श्रुतिसिद्धा प्रज्ञा पुराणी, आकैवल्यभावस्थायित्वात् । सा यस्मात् प्रसृता विजृम्भिता । यच्चैतन्यमात्रं द्वैतादिविकृतिप्रसक्तौ अद्वितीयमित्यादिविशेषणवत् तदभावे "सन्मात्रं असदन्यत्" इति श्रुतेः यत्सर्वासदपह्नवसिद्धनिष्प्रतियोगिकसन्मात्रमवशिष्यते तत् । तदेव सर्वं तदतिरिक्तं नास्तीति बुध्यस्वेत्यर्थः ॥ ४ ॥

### सर्वस्य परमात्मत्वम्

य एको देव आत्मशक्तिप्रधानः सर्वज्ञः सर्वेश्वरः सर्वभूतान्तरात्मा सर्वभूताधिवासः सर्वभूतनिगूढो भूतयोनिर्योगैकगम्यः । यश्च विश्वं सृजति विश्वं बिभर्ति विश्वं भुङ्क्ते स आत्मा । आत्मनि तं तं लोकं विजानीहि ॥ ५ ॥

कथं पुनस्तद्विया सर्वं ज्ञातुं शक्यते तद्ब्रह्मातिरेकेण विश्वकृदीश्वरसत्त्वादित्याशङ्क्य यः स्वाज्ञदृष्ट्या स्वातिरिक्तेश्वरवत् भातः स एव स्वज्ञदृष्ट्या परमात्मतया

अवशिष्यते इत्याह—य इति । यस्यानात्मापह्नवसिद्धात्ममात्रशक्तिः प्रकृतिः प्रधाना मुख्या भवति साक्षित्वेश्वरत्वादिशक्तिस्तु उपसर्जनभूता च भवति सोऽयं आत्मशक्तिप्रधानः । उपसर्जनशक्तिमवष्टभ्य सर्वज्ञ इत्यादि । ईश्वरसाक्षात्कारस्य योगैकसाध्यत्वात् ईश्वरसद्भावलिंगमाह—यस्येति । "यस्य लिंगं प्रपञ्चं वा स म आत्मा न संशयः" इति श्रुतिसिद्धतटस्थलक्षणेनेश्वरास्तित्वमवगम्य तस्मिन् स्वाङ्गसमर्पितविशेषापाये यो य ईश्वरः साक्षी जीवो जगदिति च व्यपदिष्टः तं तं लोकं निष्प्रतियोगिकब्रह्ममात्रमिति विजानीहि ॥ ५ ॥

गुरूपदेशतः सर्वात्मत्वज्ञानप्राप्तिः

मा शोचीरात्मविज्ञानी शोकस्यान्तं गमिष्यसि ॥ ६ ॥

कथं एवं ज्ञातुं शक्यमिति मा शुचः मदुपदेशमहिम्ना स्वातिरिक्तास्तिताप्रभवशोकान्तब्रह्म भवसीत्याह—मा शोचीरिति ॥ ६ ॥

इति द्वितीयोऽध्यायः

# तृतीयोऽध्यायः

ब्रह्मणो वस्तुतः निष्प्रतियोगिकस्वमात्रत्वम्

अथ हैनं शाण्डिल्योऽथर्वाणं पप्रच्छ यदेकमक्षरं निष्क्रियं शिवं सन्मात्रं परं ब्रह्म । तस्मात् कथमिदं विश्वं जायते कथं स्थीयते कथमस्मिल्लीयते । तन्मे संशयं छेत्तुमर्हसीति ॥ १ ॥
स होवाचाथर्वा सत्यं शाण्डिल्य परब्रह्म निष्क्रियमक्षरमिति ॥ २ ॥

ब्रह्मणो निष्प्रतियोगिकसन्मात्रत्वमुक्तं, ततो विश्वं जायते इति च। निष्प्रतियोगिकसन्मात्रत्वे विश्वहेतुत्वं न सम्भवति, विश्वहेतुत्वे निष्प्रतियोगिकत्वं च न सम्भवतीति ब्रह्मातिरिक्तेयत्तावुभुत्सया शाण्डिल्योऽथर्वाणं पृच्छतीत्याह—अथेति ॥ १ ॥ ब्रह्म तु सन्मात्रप्रकृतिकं तन्निष्प्रतियोगिकस्वप्रकृतिं विना जगज्जन्मस्थितिभंग[1]विकृतितां नैति । वस्तुयाथात्म्याज्ञानतो नितरां संशयाविष्ट-शाण्डिल्यप्रश्नोत्तरं स होवाच । हे शाण्डिल्य यन्मयोक्तं सन्मात्रं परं ब्रह्म निष्प्रतियोगिकं स्वातिरेकेण अस्तीति विश्वसनीयविश्वोत्पादस्थितिभंगका-र्यकारणविक्रियाऽपह्नवसिद्धं परमाक्षरमिति तदेव सत्यम् । तस्य निष्प्रतियोगिकत्वे न हि संशयोऽस्ति स्वाज्ञादिदृष्टिमोहे सत्यसति स्वस्यैकरूपतया स्थितत्वात् ॥२॥

### ब्रह्मणो रूपत्रयम्

अथाप्यस्यारूपस्य ब्रह्मणस्त्रीणि रूपाणि भवन्ति निष्कलं सकलं सकलनिष्कलं चेति ॥ ३ ॥

तथा चेद्विश्वकारणता कुत इत्याशङ्क्य पारमार्थिकस्वज्ञस्वाज्ञदृष्टिवैचित्र्यात् निष्प्रतियोगिकनिष्कळमपि ब्रह्म सप्रतियोगिकनिष्कळवत् सकळवत् सकळ-निष्कळवच्च भातीत्याह—अथेति ॥ ३ ॥

### निष्कलं ब्रह्म

यत्सत्यं विज्ञानमानन्दं निष्क्रियं निरञ्जनं सर्वगतं सुसूक्ष्मं सर्वतोमुखमनिर्देश्यममृतमस्ति तदिदं निष्कलं रूपम् ॥ ४ ॥

परमार्थदृष्ट्या यत् निष्प्रतियोगिकनिष्कळमित्युक्तं तत् तिष्ठतु, तदवगतेः सप्रतियोगिककलनाऽपह्नवपूर्वकत्वात ,

चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ।
सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्न हि ॥

[1] विकृतितामेति—उ.

इत्यादि श्रुतेः । तत्र आदौ स्वज्ञदृष्टिमवष्टभ्य सप्रतियोगिकनिष्कळस्वरूपं विशदयति—यदिति । सत्यज्ञानानन्दाद्युक्तविशेषणानामनृतजडदुःखादिप्रतिषेधकत्वेन सप्रतियोगिकत्वं युज्यते, निष्प्रतियोगिकपक्षे तु तद्दृष्ट्या अपह्नोतव्यविषयसामान्यमस्ति नास्तीति विभ्रमस्याप्यपह्नवं गतत्वात् ॥ ४ ॥

सकलं ब्रह्म

अथास्य या [1]सहजाऽस्ति विद्या मूलप्रकृतिर्माया लोहितशुक्लकृष्णा तया सहजवान् देवः कृष्णपिङ्गलो महेश्वर ईष्टे । तदिदमस्य [2]सकलं रूपम् ॥ ५ ॥

सप्रतियोगिकसकळरूपं स्पष्टयति—अथेति । य एष निष्प्रतियोगिकनिष्कळतया अवशिष्टः स एव स्वाज्ञदृष्ट्या सप्रतियोगिकनिष्कळ इति ख्यातः । स एवाथ स्वाज्ञ[3]दृष्ट्या विकल्पानन्तरं सर्वेश्वरो भवति । अस्येश्वरत्वहेतुः केत्यत आह—येति । स्वाज्ञदृष्टिसहजा या मूलप्रकृतित्वेन प्रकृता त्रिगुणात्मिका मायाऽस्ति तया सहजवान् देवः त्रिगुणयोगतः कृष्णपिङ्गलो महेश्वरः सर्वेश्वरत्वमवलम्ब्य स्वाज्ञदृष्टिप्रसक्तस्वाविद्यापदतत्कार्यजातं ईष्टे । तदिदमस्य सकळं रूपं, ईश्वरस्य निरावृतक्रियाज्ञानेच्छाशक्तिमत्त्वेन स्वदृष्टयेशितव्यस्वाविद्यापदतत्कार्यवैरळ्यात् स्वस्यैव निष्प्रतियोगिकनिष्कळत्वात् अस्य सकळत्वं स्वाज्ञदृष्टिनिष्ठमेवेत्यर्थः ॥ ५ ॥

सकलनिष्कलं ब्रह्म

अथैष ज्ञानमयेन तपसा चीयमानोऽकामयत बहु स्यां प्रजायेयेति । अथैतस्मात् तप्यमानात् सत्यकामात् त्रीण्यक्षराण्यजायन्त ।

[1] सहजाऽस्त्यविद्या—मु.
[2] सकलनिष्कल—अ २. सकलनिष्कलं—क. सकलं निष्कलं—अ, अ १.
[3] दृष्टिविकल्पान्तरं—उ.

तिस्रो व्याहृतयस्त्रिपदा गायत्री त्रयो वेदास्त्रयो देवास्त्रयो वर्णास्त्रयोऽग्नयश्च जायन्ते । योऽसौ देवो भगवान् सर्वैश्वर्यसंपन्नः सर्वव्यापी सर्वभूतानां हृदये संनिविष्टो मायावी मायया कृतिः स ब्रह्मा स विष्णुः स रुद्रः स इन्द्रः स सर्वे देवाः सर्वाणि भूतानि स एव पुरस्तात् स एव पश्चात् स एवोत्तरतः स एव दक्षिणतः स एवाधस्तात् स एवोपरिष्टात् स एव सर्वम् । अथास्य देवस्यात्मशक्तिक्रीडस्य भक्तानुकम्पिनो दत्तात्रेयरूपा सुरूपा तनूरवासा इन्दीवरदलप्रख्या चतुर्बाहुरघोरापापकाशिनी । तदिदमस्य सक[1]लनिष्कलं रूपम् ॥ ६ ॥

अर्धस्वज्ञदृष्टिमवष्टभ्य सकळस्वरूपप्रपञ्चनपूर्वकं सकळनिष्कळस्वरूपमाचष्टे अथेति । आद्यन्तयोः सकळं मध्ये निष्कळं यत्र दृश्यते तत् सकळनिष्कळस्वरूपम् । तत्रादौ ईश्वर एकोऽपि तपसा चीयमानो वर्धमानः सन् बहु स्यां प्रजायेय इति बहुभु[भ]वनसङ्कल्पं कृतवान् । एवं सत्यसङ्कल्पात्तस्मादीश्वरात् अकारोकारमकारभेदेन त्रीण्यक्षराण्यजायन्त— इति सर्वत्र वचनानुरोधेन ऊह्यम् । भूरादिभेदेन तिस्रो व्याहृतयः, पदत्रयात्मिका गायत्री, ऋगादिभेदेन त्रयो वेदाः, ब्रह्मादिभेदेन त्रयो देवाः, ब्राह्मणादिभेदेन त्रयो वर्णाः, गार्हपत्यादिभेदेन त्रयोऽग्नयश्च जायन्ते । सोऽयमीश्वरो निरवधिकविभूतिसम्पन्नः स्वेन अन्तर्यामिरूपेण सर्वव्यापी सर्वभूतहृदासनः । तस्याकृतिमत्वं मायया, न स्वतः, स्वतो निराकृतित्वात् । ब्रह्मादिरूपेणापि स एव वर्तते । दिग्विदिगधश्चोर्ध्वं चापि स एव । दत्तात्रेयरूपेणापि स एव वर्तते । सुरूपा तनूः अवासाः इति विशेषणतोऽस्या अवधूतत्वमवगम्यते, "जडभरतदत्तात्रेयरैवतक-ऋभुनिदाघ" इति श्रुतेः । एवं अर्धस्वज्ञदृष्ट्यनुरोधेन सकळनिष्कळस्वरूपं प्रतिपादितमित्यर्थः ॥

इति प्रथमः खण्डः

---

[1] सकलमकलं—अ २. सकलंक—अ, अ १, क.

### सन्मात्रस्य परब्रह्मत्वनिर्वचनम्

अथ हैनमथर्वाणं शाण्डिल्यः पप्रच्छ भगवन् सन्मात्रं चिदानन्दैकरसं कस्मादुच्यते परं ब्रह्मेति ॥ १ ॥ स होवाचाथर्वा यस्माच्च बृहति बृंहयति च सर्वं तस्मादुच्यते परं ब्रह्मेति ॥ २ ॥

ब्रह्मणः सन्मात्रत्वं परब्रह्मत्वं आत्मत्वं महेश्वरत्वं च कथमिति शाण्डिल्योऽथर्वाणं पृच्छति, भगवानथर्वाऽपि तत्प्रश्नपूरणं कृतवानित्याह—अथेति । निष्प्रतियोगिकसच्चिदानन्दमात्रं कस्मात् ॥ १–८ ॥

### सन्मात्रस्य आत्मत्वनिर्वचनम्

अथ कस्मादुच्यते आत्मेति ॥ ३ ॥ यस्मात् सर्वमाप्नोति सर्वमादत्ते सर्वमत्ति च तस्मादुच्यते आत्मेति ॥ ४ ॥

### सन्मात्रस्य महेश्वरत्वनिर्वचनम्

अथ कस्मादुच्यते महेश्वर इति ॥ ५ ॥ यस्मान्महत ईशः शब्दध्वन्या चात्मशक्त्या [1]तस्मादुच्यते महेश्वर इति ॥ ६ ॥

### सन्मात्रस्य दत्तात्रेयत्वनिर्वचनम्

[2]अथ कस्मादुच्यते दत्तात्रेय इति ॥ ७ ॥ यस्मात् सुदुश्चरं तपस्तप्यमानायात्रये पुत्रकामायातितरां तुष्टेन भगवता ज्योतिर्मये-

[1] सर्वमीष्टे तस्मा—क.

[2] ७, ८, ११, १२, १३,—एवमङ्कितवाक्यानि मुद्रित(क)कोशयोरेव दृश्यन्ते.

नात्मैव दत्तो यस्माच्चानसूयायामत्रेस्तनयोऽभवत्तस्मादुच्यते दत्तात्रेय इति ॥ ८ ॥

निरुक्तिवेदनफलम्

अथ योऽस्य निरुक्तानि वेद स सर्वं वेद ॥ ९ ॥ अथ यो ह वै विद्यैनं [1]परमुपास्ते सोऽहमिति स ब्रह्मविद्भवति ॥ १० ॥ अत्रैते श्लोका भवन्ति—

दत्तात्रेयं शिवं शान्तमिन्द्रनीलनिभं प्रभुम् ।
आत्ममायारतं देवमवधूतं दिगम्बरम् ॥ ११ ॥
भस्मोद्धूलितसर्वाङ्गं जटाजूटधरं विभुम् ।
चतुर्बाहुमुदाराङ्गं प्रफुल्लकमलेक्षणम् ॥ १२ ॥
ज्ञानयोगनिधिं विश्वगुरुं योगिजनप्रियम् ।
भक्तानुकम्पिनं सर्वसाक्षिणं सिद्धसेवितम् ॥ १३ ॥
एवं यः सततं ध्यायेद्देवदेवं सनातनम् ।
स मुक्तः सर्वपापेभ्यो निःश्रेयसमवाप्नुयात् ॥ १४ ॥
इत्यों सत्यमित्युपनिषत् ॥ १५ ॥

उक्तनिरुक्तत्रयवेदनफलमाह—अथेति । ब्रह्मणः सर्वव्यापकत्वेन ब्रह्मवेदनतः सर्ववित्त्वं स्यादित्यर्थः ॥ ९ ॥ य एतद्ब्रह्म विदित्वोपास्ते स तदेव भवतीत्याह—अथेति । विद्य विदित्वेत्यर्थः ॥ १०–१३ ॥ य एवमुक्तप्रकारेण सदा देवदेवं परमात्मानं अयमहमस्मीति विदित्वा ध्यायेत्

[1] दत्तमु—क.

स निःश्रेयसं तत्पदमाप्नुयात् ॥ १४ ॥ यत् सत्यमोङ्कारात्प्रविद्योतमानं तदेव भवतीत्यर्थः ॥ इत्युपनिषच्छब्दः शाण्डिल्योपनिषत्समाप्त्यर्थः ॥ १५ ॥

इति द्वितीयः खण्डः समाप्तः, तृतीयोऽध्यायश्च ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
शाण्डिल्योपनिषद्व्याख्या लिखिता ब्रह्मगोचरा ।
शाण्डिल्योपनिषद्व्याख्याग्रन्थस्तु त्रिशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टपञ्चाशत्संख्यापूरकं
शाण्डिल्योपनिषद्विवरणं सम्पूर्णम्

# हंसोपनिषत्

पूर्णमदः—इति शान्तिः

ब्रह्मविद्यासाधनहंसविद्याया अतिगुह्यत्वम्

गौतम उवाच—

भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
ब्रह्मविद्याप्रबोधो हि [1]येनोपायेन जायते ॥ १ ॥

सनत्कुमार उवाच—

विचार्य सर्व[2]धर्मेषु मतं ज्ञात्वा पिनाकिनः ।
पार्वत्या कथितं तत्त्वं शृणु गौतम तन्मम ॥ २ ॥
अनाख्येयमिदं गुह्यं [3]योगिने कोशसंनिभम् ।
हंसस्याकृतिविस्तारं मुक्तिमुक्तिफलप्रदम् ॥ ३ ॥

हंसाख्योपनिषत्प्रोक्तनादालिर्यत्र विश्रमेत् ।
तदाधारं निराधारं ब्रह्ममात्रमहं महः ॥

इह खलु हंसोपनिषदः शुक्लयजुर्वेदप्रविभक्तत्वेन ईशावास्यबृहदारण्यकादौ य उपोद्घातः स एव अत्रापि द्रष्टव्यः । सनत्कुमारगौतमप्रश्नप्रतिवचनरूपेय-

[1] केनो—उ, मु. [2] वेदे—उ, मु. [3] योगिनां—उ, मु.

माख्यायिका विद्यास्तुत्यर्था। तत्रादौ गौतमः सनत्कुमारं ब्रह्मज्ञानं तदुपायं च पृच्छतीत्याह—**भगवन्निति**। हे **भगवन्** षड्गुणैश्वर्यसम्पन्न, **सर्वधर्मज्ञ, सर्वशास्त्रविशारद**, इति सम्बोधनत्रयेण त्वं सर्वज्ञोऽसि सर्वज्ञेश्वरभावारूढत्वात् **येनोपायेन मे** झटिति अनायासेन **ब्रह्मविद्याप्रबोधो हि** निर्विशेषब्रह्ममात्रज्ञानं **जायते** तदुपायं कृपया उपदिश ॥ १ ॥ इति गौतमेन पृष्टः सनत्कुमारो मुनिः श्रोतृबुद्धिप्ररोचनाय वक्ष्यमाणविद्यां स्तुवन्निदमुवाचेत्याह—**सनत्कुमार उवाचेति**। हे **गौतम** सर्वेशितुः **पिनाकिनो** यन्मतं स्वातिरिक्तसर्वकलनाविरळं ब्रह्म स्वमात्रमिति तदेव तन्मुखतो **ज्ञात्वा** तदनुरोधेन स्वातिरिक्तासदपह्नवसिद्धं ब्रह्म सन्मात्रमिति धारणार्हो धर्मो येषु वेदान्तेषु धार्यते तेषु **सर्वधर्मेषु** ईशाद्यष्टोत्तरशतवेदान्तेषु सम्यक् **विचार्य** निश्चित्य लोकमात्रा ब्रह्मविद्यारूपया **पार्वत्या** यत् ब्रह्मतत्त्वं मे केवलकृपया कथितं यत् पिनाकिनोऽभिमतं तन्मतं सावधानमना भूत्वा शृणु, श्रुत्वा सम्यगवधारयेत्यर्थः ॥ २ ॥ तत् कीदृशमित्यत आह—**अनाख्येयमिति**। यत् मया वक्ष्यमाणं ब्रह्मविज्ञानं तदिदं गुह्यं अयोगिषु गोपनीयमित्याह—**अनाख्येयमिति**। कदाऽपि न वक्तव्यमित्यर्थः। अनधिकारिषु ख्यापने महाननर्थो भवेदित्यत्र—

अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत्।
महानरकसाम्राज्ये स तेन विनियोजयेत् ॥ इति,
न बुद्धिभेदं जनयेदज्ञानां ज्ञानसंगिनाम् ॥

इति च श्रुतिस्मृती मानम्। तर्हि इदं कस्मै आख्येयमित्यत आह—**योगिन** इति। स्वाश्रमाचारपुरस्सरं ब्रह्मविद्योपयोगसाधनयुक् योगी तस्मै **योगिने** देशिकेन इदं वक्तव्यमित्यर्थः। तत् कीदृशं किंफलदमित्यत्राह—**हंसस्येति**। स्वमात्रप्रबोधेन स्वातिरिक्तकलनां हन्ति अपह्नवं करोतीति **हंसः** परमात्मा **तस्याकृतिविस्तारो** विश्वविराडोत्रादिः तं तदेव ब्रह्म ज्ञानरत्नकोशसंनिभं स्वातिरिक्तभुक्तेः स्वाज्ञताया **मुक्तिः** अपह्नवः ततो यत् फलं स्वमात्रावस्थान-लक्षणकैवल्यमवशिष्यते तत्फलप्रदं, मया उच्यमानं ज्ञानयोगं शृण्विति पूर्वेण अन्वयः ॥ ३ ॥

### हंसविद्याऽधिकारिस्वरूपम्

**अथ हंसपरमहंसनिर्णयं व्याख्यास्यामो ब्रह्मचारिणे [1]दान्ताय गुरुभक्ताय हंसहंसेति सदा ध्यायन् ॥ ४ ॥**

हंसस्य आकृतिविस्तारः तदधिकारी वा कीदृशः किं तद्विद्याफलं किं तत्साधनमित्याकांक्षायां योग्याधिकारिणमुपलभ्य मुनिः एतत् सर्वमाचष्टे—अथेति। अथ यथोक्ताधिकारसम्पत्त्यनन्तरं क्रमेण जाग्रदाद्यवस्थात्रयं हत्वा तुर्यपदं गच्छतीति हंसः व्यष्टितुर्यः प्रत्यगात्मा, स एव परमः सर्वोत्कृष्टः समष्ट्यवस्थात्रयं हत्वा तत्तुर्यपदं गच्छतीति परमहंसः तयोः हंसपरमहंसयोः प्रत्यक्परयोः निर्णयं याथात्म्यं प्रत्यक्परविभागैक्यासहब्रह्ममात्रज्ञानं विस्पष्टमाख्यास्यामः वक्ष्यामः। कस्मा अधिकारिणे वक्ष्यसीत्यत्र हंसः सोऽहमित्यर्थे हंसहंसेत्यावृत्तिः। यः सदैवं हंसः सोऽहमित्यनुसन्धानपूर्वकं तत्स्वरूपं ध्यायन् ब्रह्मणि चरति ब्रह्मनिष्ठामारोढुमिच्छति स ब्रह्मचारी तस्मै ब्रह्मचारिणे दान्ताय वशीकृतकरणग्रामाय परमार्थोपदेष्टृगुरुभक्ताय गुरूपदिष्टार्थश्रद्धाळवे तुभ्यं व्याख्यास्याम इति पूर्वेणान्वयः ॥ ४ ॥

### हंसस्वरूपं तज्ज्ञानफलं च

**सर्वेषु देहेषु व्याप्य वर्तते यथा ह्यग्निः काष्ठेषु तिलेषु तैलमिव। तं विदित्वा न मृत्युमेति ॥ ५ ॥**

स हंसः किंपरिच्छिन्नः कुत्रासनमर्हतीत्यत्र सदृष्टान्तमाह—सर्वेष्विति। यथा ह्यग्निः काष्ठेषु स्वावारकेषु स्वदाह्येषु च व्याप्य वर्तते तिलेषु तैलमिव च तथा स्वाज्ञदृष्टिप्रसक्तसर्वेषु ब्रह्मादिस्तम्बान्तदेहेषु सत्सु तदारोपापवादाधिकरणजीवेशप्रत्यक्परररूपेण व्याप्य वर्तते, स्वज्ञानेन स्वाज्ञानहानौ सत्यां

[1] शान्ताय दा—उ, मु.

व्याप्यत्वसापेक्षव्यापकत्ववैरळ्यात् निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते । तज्ज्ञान-फलमाह—तमिति । तमेवं विदित्वा वेदनसमकालं मृत्युं स्वातिरिक्तास्तितामोहं नैति विद्वान् । स्वातिरिक्तापह्नवसिद्धब्रह्ममात्रतया अवशिष्यते इत्यर्थः ॥ ९ ॥

हंसज्ञानोपायो योगः

गुदमवष्टभ्याधाराद्वायुमुत्थाप्य स्वाधिष्ठानं त्रिः प्रदक्षि-णीकृत्य मणिपूरकं गत्वा अनाहतमतिक्रम्य शिश्नाभे पार्श्वे भवतः । [1]विशुद्धौ प्राणान्निरुध्याज्ञामनुयायन् ब्रह्मरन्ध्रं ध्यायन् त्रिमात्रोऽह-मित्येवं सर्वदा पश्यत्यनाकारश्च भवति ॥ ६ ॥ एषोऽसौ परमहंसो भानुकोटिप्रतीकाशो येनेदं सर्वं व्याप्तम् ॥ ७ ॥

एवं सम्यज्ज्ञानावाप्तौ उपायः कः इत्याकांक्षायां तदुपायत्वेन योगमुपदि-शति—गुदमवष्टभ्येति । तं विदित्वा न मृत्युमेतीत्युक्तितो वेदनादेव मृत्यु-ग्रासब्रह्मप्राप्तिरिवगम्यते । केषां चिन्मलिनचित्तानां मुमुक्षायां सत्यामपि केवलवेदान्तश्रवणतो मृत्युग्रासब्रह्मज्ञानं नोदेति । तत्रान्तरायो मलिनचित्तता । योगाख्यशुद्धवारिणा यदि सा शोधिता तदा पूर्वश्रुतज्ञानमेव स्वगताभासतां विहाय सम्यज्ज्ञानपदवीं भजति । ततः सम्यज्ज्ञानसमकालं मृत्युग्रास-ब्रह्मप्राप्तिरिष्यते । तस्मात् ब्रह्मप्राप्तिहेतुज्ञानसाधनत्वेन अष्टांगयोगोऽभ्यसनीयः । कोऽयमष्टांगयोगः? यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः इत्यष्टां-गानि गुरुसंनिधौ यथावदभ्यस्य अथ समाध्यर्थं जनसम्बाधरहितगुहां प्रविश्य योगी सिद्धासनारूढः सन् वामगुल्फेन गुदमवष्टभ्य नासिकाभ्यां वक्त्रेण वा वायुमापूर्य कुम्भयित्वा सम्यगाकुञ्चनेन मूलाधाराद्वायुमुत्थाप्य प्राणापान-योरैक्यं कृत्वा अथ मूलाधारत्रिकोणगतवह्निप्राणापानान् मिळित्वा कुण्डलिनीं बोधयित्वा तया मूलाधारस्थसुषुम्नाकवाटब्रह्मग्रन्थिं विभिद्य चतुर्दळयुक्तं

[1] विशुद्धे—अ, अ १, अ २, क.

मूलाधारचक्रं प्रविश्य विराजं तत्तुर्यं वा ध्यात्वा अथ स्वाधिष्ठानं षड्दलशोभितं त्रिः प्रदक्षिणीकृत्य अथ दशारशोभितं मणिपूरकं गत्वा अनाहतचक्रं द्वादशदलं तन्मूलस्थविष्णुग्रन्थिं विभिद्य अनाहतचक्रमध्ये सूत्रं तत्तुर्यं वा ध्यात्वा तत्र निर्विकल्पसमाधिमेत्य, अथ अनाहतमतिक्रम्य, अथ विशुद्धिचक्रं षोडशदलं, तदधोभागे शिश्नाभे पार्श्वे भवतः विशुद्धचक्रावोभागे लम्बमानशिश्नतुल्यमांसखण्डे भवतः, "य एषः स्तन इवावलम्बते । सेन्द्रयोनिः" इति श्रुत्यन्तरात् । तत्पार्श्वस्थमार्गद्वयं विहाय तन्मांसखण्ड-मध्यमार्गेण विशुद्धिचक्रं प्रविश्य तत्र विशुद्धौ विशुद्धिचक्रे प्राणान्निरुध्य अथ भ्रूमध्ये द्विदलाढ्यं आज्ञाचक्रं तन्मूलस्थरुद्रग्रन्थिं विभिद्य आज्ञाचक्रं प्रविश्य तन्मध्ये बीजं तत्तुर्यं वा अनुयायन् ध्यायन् निर्विकल्पकसमाधिमेत्य, अथ चन्द्रसूर्याग्नैक्यसञ्जातामृतमास्वाद्य अजरामरपिण्डो योगी सहस्रारशोभि ब्रह्मरन्ध्रं प्रविश्य, तत्रत्यत्रिमात्रारोपाधिकरणतुर्यत्रिमात्रोऽहं, यद्वा त्रिपञ्चमात्रा यत्रापह्नवं भजति तत्तुर्यतुर्यं वाऽहमस्मीति यदि सर्वदा पश्यति तदा योगी त्रिमात्राधिकरणकिञ्चित्साकारवत् तुर्यो वा, अनाकारवत् तुर्यतुर्यो वा भवति । तुर्यतुर्यस्य निष्प्रतियोगिकत्वख्यापकः चशब्दः ॥ ६ ॥ यः तुर्यतुरीयत्वेन उक्तः एषोऽसौ परमहंसः परमात्मा स्वांशजतुर्याभेदेन भानुकोटिप्रतीकाशः-युगपदुदितानन्तकोटिभानुसदृशप्रकाशः येन तुर्यप्रकाशेन इदं सर्वं जगत् व्याप्तं कबळितम् ॥ ७ ॥

### हृत्पद्मे हंसभावनया तुर्यात्मदर्शनम्

तस्याष्टधा वृत्तिर्भवति । पूर्वदले पुण्ये मतिः । आग्नेये निद्रालस्यादयो भवन्ति । याम्ये क्रौर्ये मतिः । नैर्ऋते पापे मनीषा । वारुण्यां क्रीडा । वायव्यां गमनादौ बुद्धिः । सौम्ये रतिप्रीतिः । ईशान्ये द्रव्यादानम् । मध्ये वैराग्यम् । केसरे जाग्रदवस्था । कर्णिकायां स्वप्नम् । लिङ्गे सुषुप्तिः । पद्मत्यागे तुरीयम् ।

यदा[1]हंसे नादो विलीनो भवति तत् तुरीयातीतम् ॥ ८ ॥ अथो नाद आधाराद्ब्रह्मरन्ध्रपर्यन्तं शुद्धस्फटिकसंकाशः स वै ब्रह्म परमात्मेत्युच्यते ॥ ९ ॥

तस्यैव पुनर्व्यष्टिप्रपञ्चारोपाधिकरणजीवभावमापन्नस्य अष्टधा अष्टप्रकारा वृत्तिर्भवति । कथमित्यत्र—तदधिष्ठेयं हृत्पद्मं द्वादशदळयुक्तं इत्युक्तम् । तत्र दळचतुष्टयं हंसास्पृश्यं, शिष्टाष्टदळं व्यवहारयोग्यं भवतीति कृत्वा तत्प्रकार उच्यते । तत्र हंसः प्राणोपाधिकजीवः यदा पूर्वदळे प्रविशति तदा पुण्ये कर्मणि मतिः भवति । यदा आग्नेयदळे प्रविशति तदा निद्रालस्यादयो भवन्ति । यदा याम्यदळे प्रविशति तदा क्रौर्ये कर्मणि मतिर्जायते । यदा नैर्ऋते दळे प्रविशति तदा पापे कर्मणि कर्तुं मनीषा उदेति । यदा वारुण्यां दिशि विद्यमानदळे प्रविशति तदा क्रीडाविनोदमतिर्भवति । वायव्यां दिशि विद्यमानदळे यदा प्रविशति तदा चलनगमनादौ बुद्धिः उदेति । यदा सौम्ये दळे प्रविशति तदा विद्वदविदुषोः आत्मानात्मरतिप्रीतिः उदेति । यदा ईशान्ये दळे प्रविशति तदा इहामुत्रोपयोगिद्रव्यादानमतिः जायते । यदा दळानां मध्ये प्रविशति तदा स्वातिरिक्तविषये वैराग्यमुदेति । यदा तत्केसरे सञ्चरति तदा जाग्रदवस्था भवति । तदानीमहंकृतिः पूर्णविकासतामेति । यदा तत्कर्णिकायां सञ्चरति तदा स्वप्नं पश्यति । तदानीमहंकृतेः अर्धविकासो भवति । तदन्तः सुषिरं लिङ्गं तत्र यदा प्रविशति तदा सुषुप्तिः भवति । यथोक्तलक्षणपञ्चत्यागे तुरीयं तत्साक्षात्कारो भवति । तदानीं हंसः प्रत्यगभिन्नपरमात्मतया अवशिष्यते । यदा हंसे प्रत्यगभिन्नपरमात्मनि नादोऽर्धमात्रात्मको विलीनो भवति तदा स्वाधिष्ठेयगुणसाम्यादिप्रपञ्चवैरळ्यात् तन्निरूपिताधिष्ठानताविरळं निरधिष्ठानं तुरीयातीतं निष्प्रतियोगिकब्रह्ममात्रं अवशिष्यते ॥ ८ ॥ एवं भावनाविशिष्टयोगिनः स्वदेहे तुर्यात्मा प्रकाशत इत्याह—अथो इति । अथो निर्विकल्पकसमाधिसिद्ध्यनन्तरं योगिनो हृदये नादो

[1] हंसो नादे—अ, अ १, उ.

गुणसाम्यासंगचिद्धातुः तुर्यः आधारगत मूलाधारमारभ्य ब्रह्मरन्ध्रपर्यन्तं तुर्यस्वरूपं शुद्धस्फटिकसङ्काशं निर्दुष्टस्फटिकाचलवत् शुक्लतेजोमयं ब्रह्म स वै नादावभासकपरमात्मेत्युच्यते ॥ ९ ॥

अजपाहंसमन्त्रजपप्रकारः

अथ हंस ऋषिः । अव्यक्तगायत्री छन्दः । परमहंसो देवता । हं बीजम् । सः शक्तिः । सोऽहं कीलकम् ॥ १० ॥ षट्संख्यया अहोरात्रयोरेकविंशतिसहस्राणि षट्छतान्यधिकानि भवन्ति । सूर्याय सोमाय निरञ्जनाय निराभासायातनुसूक्ष्म प्रचोदयादिति ॥ ११ ॥ अग्नीषोमाभ्यां वौषट् हृदयाद्यङ्गन्यास-करन्यासौ भवतः ॥ १२ ॥ एवं कृत्वा हृदये हंसमात्मानं ध्यायेत् ॥ १३ ॥

इत्थंविधतुर्यसाक्षात्कारात्ममन्त्रस्य ऋषिछन्दोदेवतांऽगन्यासध्यानसहित-जपप्रकार उच्यते । अथ शयनादुत्थानानन्तरमहोरात्रगणनीयश्वाससंख्यया मुमुक्षुभिः अजपाऽनुसन्धानं कर्तव्यम् । तत उच्छ्वासनिश्वास एव आत्ममन्त्र उच्यते । निश्वास एव सकारस्त्वंपदार्थः । उच्छ्वास एव सबिन्दुकवियद्बीजं हमिति तत्पदार्थः । पुनःपुनः तयोर्योग एव असिपदार्थः ॥

सकारः खेचरी प्रोक्तस्त्वंपदं चेति निश्चितम् ।
हकारः परमेशः स्यात्तत्पदं चेति निश्चितम् ।
सकारो ध्यायते जन्तुः हकारो हि भवेत् ध्रुवम् ॥

इति श्रुतेः । अथ अजपाऽऽत्ममन्त्रस्य हंसः प्रत्यगात्मैव ऋषिः । अव्यक्त-गायत्री छन्दः । परमहंसः परमात्मा देवता । हं बीजम् । सः

शक्तिः । सोऽहं कीलकम् । हंसात्मसाक्षात्कारार्थे विनियोगः । हंसाग्नित्यादि-षडंगन्यासः । ध्यानम्—

गमागमस्थं गमनादिशून्यं चिद्रूपमेकं परमाद्वितीयम् ।
ध्यायन्ति ये सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥

इति ॥

लमित्यादि पञ्चपूजा । सोऽहमिति मन्त्रः । निश्वासोच्छ्वासावर्तनमेव हि जपः ॥ १० ॥ षट्संख्याकाः षडाधारदेवता गणेशादयः जपसंख्याकर्तारो भवन्ति । अहोरात्रविभक्तश्वाससंख्या निगद्यते । अहोरात्रयोरेकविंशतिसहस्राणि षट्छतान्यधिकानि भवन्ति । दिने दिने षट्छताधिकैकविंशतिसहस्रसंख्यया निश्वासोच्छ्वासाः सोऽहं सोऽहमिति जपन्ति । अजपां विशिष्टां चतुर्धा विभज्य तत्राद्यो भागः विराडात्मने सूर्याय समर्पयेत् । द्वितीयो भागः सूत्रभावमापन्नाय सोमाय प्रचोदयात् समर्पयेत् । तथा तृतीयो भागः अतनुसूक्ष्माभिधविराट्सूत्रारोपाधिकरणतया स्वाधिष्ठेयनिरञ्जनाय सर्वेश्वराय प्रचोदयात् विनियोजयेत् । अवशिष्टतुर्यभागस्तु स्वातिरिक्तस्थूलसूक्ष्मबीजाभासतदध्यक्षविराडादिगतहेयांशापवादाधिकरणतया निराभासाय प्रत्यगभिन्नपरमात्मने अतनुसूक्ष्मादिप्रपञ्चं प्रचोदयात् विलापयेत् ॥ ११ ॥ अग्नीषोमाभ्यां वौषट् हृदयाद्यङ्गन्यासकरन्यासौ भवतः इति । हंसौं इति दीर्घभाक् षट्पर्यायेषु, हंसौं इति पञ्चमपर्यायस्थाने तदेव, नोचेदग्नीषोमाभ्यां वौषडिति वा कुर्यादित्यर्थः ॥ १२ ॥ एवमंगन्यासादिकं कृत्वैव हृदये हंसमात्मानं प्रत्यगभिन्नं ब्रह्मास्मीति ध्यायेत् ॥ १३ ॥

सगुणहंसध्यानेन परमात्मदर्शनम्

अग्नीषोमौ पक्षावोंकारः शिर उकारो बिन्दुस्त्रिणेत्रं मुखं रुद्रो रुद्राणी चरणौ द्विविधं कण्ठतः कुर्यादित्युन्मनाः

अजपोपसंहार[1]इत्यभिधीयते ॥ १४ ॥ एवं हंसवशान्मनो विचार्यते ॥ १५ ॥

एवं निर्गुणध्यानाशक्तस्य सगुणध्यानप्रकार उच्यते—अग्नीषोमाविति। वैराजभावमापन्नहंसस्य अग्नीषोमौ सूर्याचन्द्रमसौ पक्षौ बाहू भवतः। अस्य शिरस्तु ओङ्कारः। अस्य त्रिणेत्रं सबिन्दुकाकारोकारमकाराः। अस्य मुखं रुद्रः। अस्य चरणौ पादौ रुद्राणी गंगा च भवति। एवं सगुणनिर्गुणभेदात् द्विविधं हंसध्यानं कण्ठतः कण्ठरवेण मुमुक्षुः निश्शङ्कं कुर्यात्। इत्येवं प्रकारद्वयध्यानेन उद्गतं तिरस्कृतं मनः तत्कार्यं यस्य सोऽयमुन्मनाः मुनिः। अजपा हंसविद्या तस्या उपसंहारः विलापनं यत्र प्रत्यगभिन्नपरमात्मनि सोऽयं अजपोपसंहारः परमात्मेत्यभिधीयते ॥ १४ ॥ एवं सोऽहमिति हंसध्यानवशात् हंसातिरेकेण मनस्तत्कार्यं नेति नेति इति विचार्यते निर्धार्यते ॥ १५ ॥

### अजपाजपेन दशनादानुभवः

[2]अस्यैव जपकोट्या नादमनुभवति। स च दशविधो जायते। चिणिति प्रथमः। चिणिचिणीति द्वितीयः। घण्टानादस्तृतीयः। शङ्खनादश्चतुर्थः। पञ्चमस्तन्त्रीनादः। षष्ठस्तालनादः। सप्तमो वेणुनादः। अष्टमो भेरीनादः। नवमो मृदङ्गनादः। दशमो मेघनादः ॥ १६ ॥

यदि मुमुक्षुः सगुणनिर्गुणध्यानाशक्तो भवति तदा तूष्णीमहोरात्रनिर्वर्त्यनिश्वासोच्छ्वासरूपेण केवलाजपात्मकहंसमन्त्रजपं कुर्वतः स्वानुभवजन्यनादेयत्तां तदनुसन्धानावान्तरफलं परमफलं चाह—अस्यैवेति। एवं यथोक्तस्य अस्यैव

[1] इत्याचक्षते—क, अ २. [2] तस्यै—क. सएव—मु.

हंसमनोर्जपकोट्या कोटिसंख्याजपप्रभावेनाऽयं मुमुक्षुः अनाहतचक्रे नादब्रह्म अनुभवति स्वानुभूतिप्रमाणतो जानाति । योऽयमनुभूतो नादः स च दक्षिणकर्णे दशविध उपजायते अभिव्यज्यते । क्रमशः तत्प्रकारमाह— चिणितीति । प्राथमिको नादः चिणितिध्वन्यात्मको भवति । द्वितीयो नादः चिणिचिणीति ध्वन्यात्मकः । तृतीयो नादः घण्टानादसमो भवति । चतुर्थस्तु शङ्खनादवदभिव्यक्तो भवति । पञ्चमस्तु वीणातन्त्रीनादवदभिव्यज्यते । षष्ठः ताळनादनिभो भवति । सप्तमनादस्तु मुखरवेणुनादसमानो भवति । भेरीनादतुल्योऽयमष्टमः । मृदङ्गनादनिभोऽयं नवमः । दशमस्तु मेघनादसंनिभः ॥ १६ ॥

केवलदशमनादाभ्यासविधिः

नवमं परित्यज्य दशममेवाभ्यसेत् ॥ १७ ॥

एवं दशविधनादेषु प्रथमादिनवमान्तं परित्यज्य मुमुक्षुः दशममेव अभ्यसेत् ॥ १७ ॥

तत्तन्नादानुभवफलम्

प्रथमे चिञ्चिणीगात्रं द्वितीये गात्रभञ्जनम् ।
तृतीये भेदनं याति चतुर्थे कम्पते शिरः ॥ १८ ॥
पञ्चमे [1]स्रवती तालू षष्ठेऽमृतनिषेवणम् ।
सप्तमे गूढविज्ञानं परा[2]वाचा तथाऽष्टमे ॥ १९ ॥
अदृश्यं नवमे देहं दिव्यं चक्षुस्तथाऽमलम् ।
दशमं च परं ब्रह्म भवेद्ब्रह्मात्मसंनिधौ ॥ २० ॥

[1] स्रवते—अ, क. [2] वार्चा—अ.

चिणिति प्राथमिको नादो य उक्तः तस्मिन् प्रथमे नादे यथावदनुभूते तदा स्वस्य चिच्चिणीगात्रं प्रतिभाति । तथा द्वितीये तद्गात्रभञ्जनं भवति । तृतीये तु हृदयं भेदनं याति हृत्पद्मं विकासमेति । चतुर्थे तु स्वशिरः कम्पते—षण्मुखीमुद्राऽऽरूढस्य कुम्भकावस्थायां वायावाज्ञाचक्रं प्रविष्टे शिरः कम्पयतीत्यर्थः ॥ १८ ॥ पञ्चमे तन्त्रिनादेऽभिव्यक्ते स्वतालू स्रवती । षष्ठाख्यतालनादाभिव्यक्तौ चन्द्रसूर्यमण्डलद्वयैक्यसञ्जातामृतनिषेवणममृतास्वादनं भवति । सप्तमवेणुनादाभिव्यक्तौ स्वातिरिक्तजनानां यत् गूढं ब्रह्म तद्विषयक-विज्ञानं जायते । अष्टममेरीनादाभिव्यक्तौ सर्ववेदशास्त्ररूपिण्या परावाचा अयं योगी विजृम्भते, सकलविषयकशास्त्रविज्ञानी सर्वज्ञो भवति ॥ १९ ॥ नावमिकमृदंगनादाभिव्यक्तौ देहं पश्यतामदृश्यं भवति अन्तर्धानादिशक्तिमान् भवति । निर्मलदिव्यचक्षुः त्रिकालज्ञः ईश्वरो भवति । प्रथमादिनवमान्तनाद-तद्भवनानाविधसिद्ध्युपेक्षापूर्वकं दशममेघनादाभिव्यक्तौ ब्रह्मात्मसंनिधौ प्रत्यग-भिन्ने ब्रह्मणि स्वाज्ञादिदृष्टिप्रसक्ततद्गतभेदैक्यकलनापह्नवसिद्धब्रह्म भवेत्, तन्मात्रतया अवशिष्यत इत्यर्थः ॥ २० ॥

### मनोलयात् ब्रह्मात्मत्वप्रकाशः

**तस्मान्मनो विलीने मनसि गते संकल्पविकल्पे दग्धे पुण्यपापे [1]सदाशिवः शक्त्यात्मा सर्वत्रावस्थितः स्वयंज्योतिः शुद्धो बुद्धो नित्यो निरञ्जनः शान्ततमः प्रकाशयतीति वेदानुवचनं भवतीत्युपनिषत् ॥ २१ ॥**

कथं पुनरेवं ब्रह्ममात्रमवशिष्यते स्वातिरिक्तमनस्तत्कार्यसङ्कल्प-पुण्यपापादिसत्त्वादित्यत आह—तस्मादिति । यस्मात् स्वाज्ञानविकल्पितोऽयं मनआदिविकारपूगः तस्मात् स्वज्ञानेन मनो मनसि विलीने निर्मूलभावं

[1] सदाशिवोंश—उ.

गते तत्कार्यसङ्कल्पविकल्पे तत्कार्यपुण्यपापादावपि दग्धे सम्यज्ज्ञानाग्निना भस्मीकृतेऽथ स्वातिरिक्तमनस्तत्कार्यारोपापवादाधिकरणतया (ब्रह्मप्रणवार्थतुर्य-तुर्यतया) सदाशिवः परमेश्वरः तत्तत्पदार्थगतसर्वशक्त्यात्मा सर्वत्र व्यक्ताव्यक्तप्रपञ्चे सच्चिदानन्दात्मना अवस्थितः । जडप्रपञ्चानुयोगतो जडत्वं स्यादित्यत आह—स्वयंज्योतिरिति । स्वाज्ञदृष्टिप्रसक्तजडप्रपञ्चस्य स्वज्ञदृष्ट्या मिथ्यात्वेन तदनुयोगस्यापि तथात्वात् स्वयंज्योतिरात्मा ह्यजडात्मकः । अत एवायं शुद्धः अशुद्धमायावैरळ्यात् । मायाऽपाये तदनुगतस्यापि तथात्वं स्यादित्यत आह—नित्य इति । सत्तामात्रत्वात् । मात्रशब्दस्येतरव्यवच्छेदकत्वेन तत्राज्ञनता स्यादित्यत आह—निरञ्जन इति । सत्तामात्रस्य निष्प्रतियोगिकत्वेने-तररञ्जनता कथं सेद्धुं पारयति? स्वातिरिक्तास्तिताहेतुस्वाज्ञानहेतुतमस्सत्वे निष्प्रतियोगिकसत्तामात्रता कुत इत्यत आह—शान्ततमः प्रकाशयतीति । यदवगतिसमकालं स्वाज्ञानतत्कार्यं तमोऽपह्नवपदं भजति सोऽयं शान्ततमः अत एवायं निष्प्रतियोगिकतया प्रकाशयति । अस्मिन्नर्थे "पश्यतेहापि सन्मात्रमसदन्यत्," "ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति," "अतोऽन्यदार्त," "ब्रह्ममात्रमसन्न हि"

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥

इत्यादिवेदानुवचनं भवति । इत्युपनिषच्छब्दौ उपनिषत्परिसमाप्त्यर्थौ ॥ २१ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं हंसोपनिषदः स्फुटम् ।
हंसोपनिषदो व्याख्या सप्तत्यधिशतं स्मृता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चदशसंख्यापूरकं
हंसोपनिषद्विवरणं सम्पूर्णम्

# विशेषपदसूची

[यत्र पुटसंख्यानन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या]


| पदम् | पुटसंख्या |
|---|---|
| अकल्पितः . . . | ४२० |
| अक्षरम् . | १९, ३२, १५६ |
| अखण्डब्रह्मतेजोमण्डलम् . | २८४ |
| अग्निबीजम् . . . | १७१ |
| अग्निमण्डलम् . . | २८४ |
| अंगानि (योगांगानि) | ५१, ११९ |
| अजपा | २००, २६४, ३४३, ५६७ |
| अणिमादिसिद्धिः . . | २८० |
| अणुवम् . . . | ४५ |
| अद्वयं ब्रह्म . . . | २ |
| अद्वैतम् . . . | २४४ |
| अद्वैतग्रन्थिः . . | २३१ |
| अधोलिंगम् . . | २६५ |
| अनाख्यम् . . . | ३१५ |
| अनात्मा . . | ८८ to ९२ |
| अनाहतम् | ३१६, ३३०–२, ४२५, ४४२ |
| अनुसन्धानराहित्यम् . | ५५ |
| अनेकजीवसद्भावः . . | ९७ |
| अन्तःकरणविषयः . . | ११९ |
| अन्तःप्रणवनादाख्यो हंसः . | २४० |
| अन्तर्दृष्टिः . | २, ३, ६–३ |
| अन्तर्यागः . . . | २३४ |
| अन्तर्लक्ष्यम् | ३, ८–२, २८१–५, २८२ |
| अपक्वः . - . | ३९६ |
| अपरोक्षसिद्धिः . . | ५४५ |
| अपानः | २४, १३७–२, १६४, १६५–२, २००, ३४१, ३४२, ५२६, ५२७ |
| अपां स्थानम् . . | ३७८ |
| अभिरामः . . . | ३५१ |
| अभ्यासः . | ३२२–२, ४१५ |
| अमनस्कम् | ५–४, २७९, २८७–२, २९४, २९५, २९९ |

| पदम् | पुटसंख्या |
|---|---|
| अमरोळी | ३६९, ३८५ |
| अमात्रम् | २२ |
| अमादृष्टिः | २८४ |
| अमावास्या | १६७, ३२९ |
| अमूर्तनादः | २११ |
| अमूर्तितारकम् | ६, २७९–२ |
| अमूर्तिमदमनस्कम् | ७ |
| अमृतत्वम् | ४ |
| अमृतवर्षिणी | २६४ |
| अमृतस्थानम् | १९५ |
| अयने दक्षिणे | १२५ |
| अयने द्वे | २६० |
| अरिषट्कम् | ४६६ |
| अर्थस्वरूपम् | १७८ |
| अलम्बुसा | १३५, १६२, १६३, १६६, ३४०, ३४१, ४४४, ५०५, ५२६–२ |
| अवधूतः | २०० |
| अवस्थात्रयम् | ९६, २२६ |
| अविद्याशबलं ब्रह्म | ११७ |
| अव्यक्तम् | ११७ |
| अशुद्धम् | २६ |
| अष्टदलपद्मम् | २०७ |
| अष्टांगयोगः | २७३, ५१८ |
| अष्टांगानि | ५१८ |
| असंसक्तिः | ४९२, ४९४, ४९५ |
| अस्तेयम् | १२९, १९३, १९४–२, ५०४, ५१९ |
| अस्वरम् | २८ |
| अहङ्कारः | ११७, ३६५, ३९२ |
| अहिंसा | १२९, १९३–२, ५०४, ५१९ |
| आकाशम् | २९७–२ |
| आकाशस्थानम् | ३७९ |
| आग्नेयी | २१६ |
| आचार्यः | ९ |
| आत्मतीर्थम् | १६८ |
| आत्ममाया | ४८१ |
| आत्मवान् | १४१ |
| आत्मा | ३०, ८६, ८७, १८८, ५५१, ५५६–२ |
| आधारम् | १९७, ३३८–२, ४५३, ४५४–२ |
| आधारचक्रमहः | ४५४–२ |
| आधारवातरोधः | ४५४ |
| | ३१८ |
| आधिभौतिकम् | ३१८ |
| आन्तरम् | ५१९ |
| आयामः | ३१ |
| आरम्भः | ३६७, ५१५–२ |

| पदम् | पुटसंख्या |
|---|---|
| आराधनम् | १२९ |
| आर्जवम् | १२९, १५३, १५४, ५०४, ५१९ |
| आलस्यम् | ५५, ३१५ |
| आसनम् | ३७, ५२, १२८, १५३, १९६, ३०७, ३३७, ३५९, ३६८, ५०३, ५१७ |
| आसननियमः | २७५ |
| आस्तिक्यम् | १२९, १५६ १५७, ५०४, ५२० |
| आहवनीयः | २५० |
| आज्ञाचक्रम् | ३३०–२ |
| आज्ञा | ४२६, ४४२ |
| इडा | ४०, १३५, १६२, १६३, १६४, १६६, १९९, ३४०, ३४१, ३५७, ४४३, ४५०, ५०६, ५२५ |
| इडादिदर्शनाङ्यः | १९९ |
| इडापिंगळसौषुम्नाः | ३४१ |
| इन्द्रवज्रम् | ४० |
| इहामुत्रविरागता | ४६८ |
| ईश्वरः | ३३३ |
| ईश्वरपूजनम् | १५६, १५७, ५०४, ५२० |
| उच्चैः | १५८, ५२० |
| उच्छ्वासः | ३७ |
| उज्जायी | ३१०, ३११, ४०८, ४०९ |
| उड्डियणः | २०३–२, ३१३–३, ३४५, ३८३, ४११–३, ४२६, ४४३, ४४६–२, ४४७, ५०२, ५३३ |
| उत्तरं त्वमनस्कम् | २८० |
| उत्तराभिमुखः | १२५ |
| उत्तरायणम् | १६६ |
| उत्तानकूर्मकम् | १३० |
| उत्थानम् | १४०, १७८ |
| उदानः | २४, १३७–२, १६४, १६५–२, ३४१, ५२६, ५२७ |
| उन्मनीकारकम् | २२२, ५३६ |
| उन्मनीभावः | २८७, ५३६ |
| उन्मन्यवस्था | २२५ |
| उपवासः | ४७५ |
| उपांशुः | १५८, ५२० |
| उपासना | ४५० |
| ऊर्ध्वाकुञ्चनम् | ४०७ |
| एकजीवादिनिर्णयः | ९७ |
| ऐन्द्री | २१७ |

| पदम् | पुटसंख्या |
|---|---|
| ओङ्कारः | १८९, २१६, २६४, ३९०, ४०४ |
| ओङ्कारार्थः | १२ |
| ओतं प्रोतम् | ७१, १२१ |
| कण्ठमुद्रा | ३८२, ५१२ |
| कन्दयोनिः | ३४० |
| कपालशाधनम् | ५३३ |
| कमलालयम् | १६७ |
| कमलासनम् | ३३७ |
| कम्पनम् | १४०, १७८ |
| कर्मत्रयम् | ४६६ |
| कर्मयोगः | १२७–२ |
| कर्मेन्द्रियविषयाः | ११९ |
| कल्पनारहितः | ४२० |
| कल्पितः | ४२०–२ |
| काकमतम् | ४१८ |
| कामपीठम् | ४२९, ४४२ |
| कामरूपम् | १९७, ३३८ |
| कामः | ३३८ |
| कारणम् | ३९१ |
| कालवञ्चनम् | ५०७ |
| काशशब्दः | ५२ |
| कुक्कुटासनम् | १३०, ५०४ |
| कुण्डलिनी ३, १३४, १६३, १७७, २०१, २६४, २७७, ३०८, ३०९–२, ३२०, ३४३, ४०७–२, ४२९, ४४२, ४९०, ४९९, ५०५, ५१०, ५२४–२, ५४२, ५३५ |
| कुंभकः १६, ५३, १७४, १९१, १९३, ३१४, ३५८–२, ३७०, ३८९, ५०५, ५११, ५३४ |
| कुंभीकरणम् | १४१ |
| कुरुक्षेत्रम् | १६७ |
| कुहूः १६२, १६३–२, १६६, ३४०, ३४१, ४४४, ५०५, ५२६ |
| कूटः | ३२४ |
| कूर्मः १३७, १६४, १६९, ३४१–२, ५०४, ५२७ |
| कृकरः १३७, १६४, १६९, ३४१–२, ५२७ |
| केदारम् | १६७ |
| केवलकुम्भकः ३१०, ३७२, ३७५ |
| केवलसिद्धिः | ३१० |
| कोशः | १२४ |
| कौशिकी | १३५ |
| क्षमा १२९, १५३, १५५, ५०४, ५१९ |

| पदम् | पुटसंख्या |
|---|---|
| क्षुरिका | ३६ |
| क्षेत्रज्ञः | ४१७, ४९१ |
| खेचरीमुद्रा | २०४–३, २८५, ३२१, ३२२–२, ३२३–२, ३२४, ३२५, ३४६, ३४७, ३५४, ३६८, ३८३, ३८४, ४४६–३, ५३५, ५३६, ५४३–४, ५४४ |
| गान्धारी | १३५, १६२, १६३, १६४, १६६, ३४०, ३४१, ४४४, ५०६, ५२६ |
| गायत्री | ३४३, ५३० |
| गार्हपत्यम् | २५० |
| गुणत्रयम् | ४६६ |
| गुणरहिताकाशम् | ५, २७९ |
| गुरुः | ९–३ |
| गूढसुप्तिः | ४९६ |
| गोमुखम् | १२९, १५९–२, ५०४, ५२१ |
| गोलकः | २५३ |
| गोलाखम् | २६४ |
| घटः | ३६७, ५१५ |
| घटाख्या भूमिका | ५१५ |
| घटावस्था | ३७५–२, ३७७ |
| घोषिणी | २१७ |
| चक्रासनम् | ३३१, ५०४–२ |
| चतुष्कला | २५३ |
| चतुष्पथो बन्धः | ५०९ |
| चतुष्पीठम् | ५१२ |
| चतुर्विंशतितत्त्वानि | ९७, ४६४, ४६५ |
| चलदृष्टिः | ४ |
| चिच्छक्तिः | ४५७ |
| चिदम्बरम् | १६७ |
| चिद्रसः | ५६ |
| चूलितलम् | ३२६ |
| चोदकः | २५९ |
| छाया | ५०८ |
| छिन्नपाशः | ४४ |
| जनोलोकः | २१४ |
| जपः | १२९, १५६, १५८, ५०४, ५२० |
| जागरः | ४७९ |
| जाग्रत्तुरीयः | २२७ |
| जाग्रत्स्वप्नसुषुप्तयः | ४६६ |
| जाग्रद्विश्वादयः | ४९२ |
| जाग्रद्वृत्तिः | १४७, ५६३ |
| जालन्धरः | २०३, ३१३, ३१४, ३४५, ३४६, ३६८, ३८३, ४११, ४१२, ४२५, ४४२, ४४६, ५३३ |

| पदम् | पृष्ठसंख्या |
|---|---|
| जीवः | ३१, ४४, १३३, २९२, ३६६ |
| जीवत्रयम् | ४६६ |
| जीवन्मुक्तः | ७४ to ७८, २८२, २९०, २९३, ३३५, ३८०, ४००, ४२१, ४२२, ४६७, ४९१, ४९६, ४९७–९, ५१६ |
| जैवतन्मात्रविषयाः | ११९ |
| ज्ञानम् | ५३९ |
| ज्ञानदीपः | २६४ |
| ज्ञाननेत्रम् | ३४ |
| ज्ञानमुद्रा | २६२ |
| ज्ञानयोगः | १२७, १२८ |
| ज्ञानशौचम् | १५५ |
| ज्ञानसागरपारगः | २४१ |
| ज्ञानस्वरूपम् | १७८ |
| ज्ञानेन्द्रियविषयाः | ११९ |
| ज्योतिर्मण्डलम् | ३०३ |
| ज्योतिर्लिंगम् | २६५ |
| ज्वलन्ती | ५०६ |
| तत्त्वप्रकाशः | २८३ |
| तत्त्वाकाशः | ९, २७९ |
| तत्त्वानि | १५० |
| तनुमानसी | ४९२, ४९४–२ |
| तपः | १२९, १९६–३, ५०४, ५२० |
| तपोलोकः | २१४ |
| तर्कः | १७ |
| ताणम् | १३१, २०३, ३०९, ३१४, ४११ |
| तारकम् | २, ९–२, २७६–२, २७९, २९५ |
| तुर्यम् | १४७, १४८, १७१, ५०६, ५६३ |
| तुर्यगा | ४९२, ४९४, ४९५ |
| तुर्यपदम् | २२१ |
| तुरीयविश्वादयः | ४९२ |
| तुर्यातीतम् | १४८, ५६४ |
| तेजः | ५५ |
| तेजोबिन्दु | ४५ |
| तैजसः | ३३३, ३९१, ४६६ |
| तैतिलम् | ४०, ४१ |
| त्यागः | ५१ |
| त्रिकूटम् | २६४ |
| त्रिधामा हंसः | ४७ |
| त्रिलक्ष्यम् | ३३८ |
| त्रिविधम् | २६४ |
| त्रिविध आचार्यः | २५९ |
| त्रिशक्तिमायास्वरूपः | २२७ |
| त्रिशङ्कम् | २६४ |

| पदम् | पुटसंख्या |
|---|---|
| दक्षिणाग्निः . . . | २९० |
| दक्षिणायनम् . . | १६७ |
| दत्तः . . . . | १३७ |
| दत्तात्रेयः . . | ९९६, ९९७ |
| दया १२९,१९३,१९४,९०४,९१९ | |
| दर्दरी . . . | ३७३ |
| दशविधनादः . . | ९६७ |
| दहरं पुण्डरीकम् . . | ३९ |
| दहरादिकम् . . . | ६ |
| दानम् १२९, १९६, १९७, ९०४, ९२० | |
| दिव्यमन्त्रम् . . | १८ |
| दीर्घः . . . | ९१४ |
| देवदत्तः १६४,१६९,३४१–२,९२७ | |
| देहः . .४२४, ४४१–२ | |
| द्रष्टृदर्शनदृश्यानि . . | ९३ |
| धनञ्जयः १३७, १६४, १६९, ३४१, ३४२, ९२७ | |
| धनुरासनम् . . . | १३० |
| धारणा १७, ३६, ९३ १२८, १४९, १९३, १८१, १८२, १९६, २७९, ३३७, ३९८, ३९९, ३६८, ३७८, ३८०, ९०३, ९१८, ९४८ | |
| धृतिः १२९, १९३, १९९, २१७, ९०४, ९१९ | |
| ध्यानम् ४९, ९३, १२८, १९३, १९८, १८२, १९६, २७९, ३३७, ३६०, ३६८, ९०३, ९१८, ९४९ | |
| ध्यानयोगः . . ४१, १८६ | |
| ध्रुवम् . . . ४९ | |
| ध्रुवतारकम् . . . ४६० | |
| ध्रुवाग्निः . . . २४९ | |
| नभोमुद्रा . २०९, ३४९, ३४७ | |
| नागः १३७, १६४, १६९, ३४१–२, ९२७ | |
| नागादिवायवः . . २६३ | |
| नाडीकन्दम् . . ९०९ | |
| नाडीचक्रम् . ४४४, ९०९ | |
| नाडीशुद्धिः १३२, १७२, ३७१–२, ९२७, ९२९ | |
| नाड्यः . . . ९२९ | |
| नादः २६४, ४२९, ४३०, ४३२, ४३४, ४४२, ४४९, ४८४, ९११ | |
| नादबिन्दुकला . . २४० | |
| नादरूपिणी . . ९०६ | |

| पदम् | पुटसंख्या |
|---|---|
| नादलिंगम् | ४२७, ४२९ |
| नादसिद्धिः | ३६० |
| नादानुसन्धानम् | २३० |
| नादाभिव्यक्तिः | ३९७, ५२९, ५३२ |
| नाभिचक्रम् | ४४४, ५०६ |
| नामधेया | २१७ |
| नारी | २१७ |
| निखरम् | २६४ |
| नित्यानित्यविवेकः | ४६८ |
| निद्रा | ३१५, ४७९ |
| नियमः | ५१, १२८, १५३, २७४, ३६८, ५०३, ५०४, ५१८, ५२० |
| निरञ्जनम् | ३२९ |
| निर्गुणध्यानयुक्तः | ३८० |
| निर्वाणपदम् | १५० |
| निर्विषयम् | २७ |
| निश्वासः | २३ |
| निष्कलः | २९७, ५९३–२ |
| निष्पत्तिः | ३६७, ५१५ |
| नीलज्योतिः | २७७ |
| नीलज्योतिस्स्थलम् | ३ |
| पञ्चतन्मात्राणि | ११७ |
| पञ्चदोषाः | २७६ |
| पञ्चमहाभूतानि | ११७ |
| पञ्चाग्निरूपम् | ४४५ |
| पञ्चावस्थाः | २९० |
| पञ्चीकरणम् | १२० |
| पतंगिनी | २१७ |
| पदार्थभावना | ४९२, ४९४, ४९५ |
| पद्मासनम् | १३०, १५९–२, १९६, २०१, ३०८, ३०९, ३१०, ३२०, ३३८, ३४४, ३५८, ३६०, ४०४, ५०४, ५२१, ५३१ |
| पयस्विनी | १६२, १६४, १६६, ५२५ |
| परतत्त्वम् | ४३० |
| परम् | ४४४–२ |
| परंब्रह्म | ३२, ५५६–२, ५६८ |
| परमहंसः | ४७५ ५६२ |
| परमहंसज्ञानमुद्रा | २६३ |
| परमाकाशः | ५, २९७–२ |
| परमात्मा | ४१७, ५६४ |
| परमार्थता | २९ |
| परमेश्वरी | ३४४ |
| परमं पदम् | २७, ४७ |
| परमात्मा | ५६४ |
| पररन्ध्रा | ५०६ |

| पदम् | पुटसंख्या |
|---|---|
| परा . . . | ३३३ |
| पराकाशः . . | २७९, २९७ |
| पराविद्या . . . | २४९ |
| पराशक्तिः . . . | ४९७ |
| परिचयः . . | ३६७, ५१९ |
| परिपक्वः . . | २९१, ३९६ |
| परिपूर्णचन्द्रमण्डलम् . | २८९ |
| पश्चिमताणम् . . | ४१२ |
| पश्यन्ती . . | ३३३, ४३२ |
| पाण्डरः . . | २०९, ३४८ |
| पार्थिवः . . . | ४४९ |
| पिंगळा ४०, १३९, १६२, १६३, १६६, १९९, ३४०, ३४१, ३९७, ४४३, ४९०, ५०९, ५२९, ५२६ | |
| पिण्डाण्डम्. . . | ३३३ |
| पूरकः ९३, १४१, १७४, १९१, १९३, २९४, ३९८–२, ५०५–२, ५११–२, ५१२ | |
| पूर्णगिर्याख्यं पीठम्. | ४२९, ४४२ |
| पूर्णत्वम् . . . | ९९ |
| पूर्णिमा . . . | २८४ |
| पूर्णिमाभ्यासः . . | २८४ |
| पूर्वतारकयोगः . | ७, २८० |
| पूषा १६२, १६३, १६४, १६६, ३४०, ३४१, ४४४, ५०६, ५२६ | |
| पृथिवीस्थानम् . . | ३७८ |
| पौर्णमासी . . . | ३२९ |
| प्रकृत्यष्टकरूपम् . . | ३१७ |
| प्रचयभूमिका . . | ५१९ |
| प्रणवः ३७, १९०, २८६, ३९१, ३९२, ३७४, ५२९, ५३० | |
| प्रतिपत् . . | २८४, ३२९ |
| प्रत्यक्त्वम् . . . | ९९ |
| प्रत्यगात्मा . . . | २४३ |
| प्रत्यक्षयजनम् . | २६०–२ |
| प्रत्याहारः १४, ९३, १२८, १४४, १९३, १७९–४, १८०, १८१, १९६, २७९, ३३७, ३९९, ३६१, ३६८, ३७५, ५०३, ५१८, ५४८–६ | |
| प्रथमं विघ्नम् . . | ३१९ |
| प्रमत्तता . . . | ३१९ |
| प्रयागः . . . | १६७ |
| प्रशान्तलक्षणम् . . | १७ |
| प्रस्वेदजननम् . | १४०, १७८ |

| पदम् | पुटसंख्या |
|---|---|
| प्राणः | २३, २४, १३७, १६४–२, २००, ३४१, ३४२, ५२६, ५२७ |
| प्राणजयः | ४०७, ५४४ |
| प्राणधारणम् | १४ |
| प्राणरोधः | ३१०, ३३७ |
| प्राणविद्या | ३४३ |
| प्राणसंयमः | १२८, ३६८ |
| प्राणस्पन्दः | ५३९, ५४०–६, ५४१–२ |
| प्राणादिवायवः | १३६, १९९, २६३ |
| प्राणादिविषयाः | ११९ |
| प्राणापानसमानाः | ३४१ |
| प्राणायामः | १५–२, ५३, १३२, १३८, १३९, १५३, १७२, २७५, ३५६, ३५८–३, ३५९, ५०३, ५१८, ५२९ |
| प्राज्ञः | ३३३, ३५१, ४६६ |
| प्लुतः | ५१४ |
| फूत्कारशब्दः | ३, २७७ |
| बद्धपद्मासनम् | १३ |
| बद्धमुद्रा | २६३ |
| बन्धत्रयम् | ३१२, ४१०, ४११, ५०९ |
| बन्धमोक्षौ | २६ |
| बहिर्लक्ष्यलक्षणम् | ४, २७८ |
| बाह्यशौचम् | ५१९ |
| बाह्यप्राणः | २३ |
| बिन्दु | २११, ३३०–३, ४२५, ४३४, ४४२, ४४४, ४४५, ५११ |
| बिन्दुनादकलाः | ४६१ |
| बिन्दुपीठम् | ४२९ |
| बिन्दुमयी शक्तिः | ४५७ |
| बिलम् | २० |
| बैन्दवस्थानम् | ४५२ |
| बोधकः | २५९ २८–२, ४९, ४३८, ४३९, ४४०, ५५०, ५५२ |
| ब्रह्मग्रन्थिः | २६४, ३१६, ३२०, ५१३ |
| ब्रह्मचर्यम् | १२९, १५३, १५४–३, ५१९ |
| ब्रह्मतारान्तरनादरूपः | २२६ |
| ब्रह्मद्वारम् | ३४३ |
| ब्रह्मनाडी | ३, १३५, १६२, ४१४, ४४३, ४५१ |
| ब्रह्मप्रणवनादकः | २२४ |
| ब्रह्मयज्ञमयमोक्षक्रमः | २३२ |
| ब्रह्मरन्ध्रम् | ३, १३४, १६३, १७६, १७७ |

| पदम् | पुटसंख्या |
|---|---|
| ब्रह्मरूपिणी. . . | ४० |
| ब्रह्मवित् . १३२, २८९–२, | ४९३ |
| ब्रह्मविद्वरः . . . | ४९३ |
| ब्रह्मविद्वरिष्ठः . . | ४९३ |
| ब्रह्मविद्वरीयान् . . | ४९३ |
| ब्रह्मसंपत्तिः . . . | २३४ |
| ब्रह्मसूत्रम् . . . | २३२ |
| ब्रह्मस्थानम्. . . | २०१ |
| ब्रह्माण्डम् . . . | ३३३ |
| ब्राह्मी . . . | २१७ |
| भद्रासनम् १८, १३०, १५९, १६०, १९६, | ३६९, ५०४, ५२१ |
| भस्त्री ३१०, ३१२, | ४०८, ४१० |
| भुवर्लोकः . . . | २१४ |
| भूतधारणम्. . . | ५०२ |
| भूतात्मा . . . | ३० |
| भूरादयः . . . | ३३३ |
| भूर्भुवःसुवः.. . . | ३५५ |
| भूर्लोकः . . . | २१४ |
| भोगलालसम् . . | ५५ |
| भ्रमरसृष्टिः . . . | ४५२ |
| भ्रान्तिः . . . | ३१५ |
| भ्रूद्वयम् . . . | २ |
| मणयः . . . | ४१३ |
| मणिपूरकम् १९८, | ३३०–२, ३४०, ४२५, ४४२ |
| मण्डलम् . . . | २० |
| मतिः १२९, | १५६, १५८, ५०४, ५२० |
| मथनम् . . | ३२७–३ |
| मध्यमा . . | ३३३, ४३२ |
| मध्यलक्ष्यलक्षणम् . . | ४ |
| मध्याह्नार्कमण्डलम् . . | २८५ |
| मननम् . . . | १५८ |
| मनस्स्पन्दः.. . . | ५४० |
| मनोन्मनी २२४, | २९८, ४५०, ५३३ |
| मनोयागः . . . | २३३ |
| मन्त्रः . . | ४१६, ४२८ |
| मन्त्रयोगः . . | ३६७, ४१६ |
| मयूरासनम् १३१, | १५९, १६१, ५०४, ५२१ |
| मरुज्जयः . . . | ४०७ |
| मर्कटक्रमः . . . | ४१८ |
| महत् . . . | ११७ |
| महती . . . | २१७ |
| महर्जगत् . . . | २१४ |
| महाकाशः . | ५, २७९, २९७–२ |
| महाबन्धः . . | ३६८, ३८२ |
| महामुद्रा २०६–२, | ३४५, ३४९–२, ३६८ |

| पदम् | पुटसंख्या |
|---|---|
| महामेरुः . . . | ९१२ |
| महायोगः . . . | ४१६ |
| महायोगी . . . | ४१९ |
| महाविद्या . . . | ३४३ |
| महावेधः . . | ३६८, ३८२ |
| महेश्वरः . . | ९९६–२ |
| मात्रा . . . | ३७१ |
| मानसः . . | १९८, ५२० |
| मायाशक्तिः . . . | ४९७ |
| मायूरनादः . . . | २११ |
| मासंसक्रमः . . . | १६७ |
| मिताहारः १२९, १९३, १९५, ३०७, ३०८, ३४४, ५०४, ५१९ | |
| मुक्तः . . . | ४२२ |
| मुक्तासनम् १३०, १५९., १६०–२, ५०४, ५२२ | |
| मुद्राबन्धविशेषः . . | ५१३ |
| मुमुक्षा . . | ४६८ |
| मुमुक्षुः . . . | ४९३ |
| मूर्तितारकम् . ६, २७९–२ | |
| मूलबन्धः ५२, २०३, ३१३–२, ३१५, ३४५, ३६८, ४११, ५०९ | |
| मूलमन्त्रः . . . | ४२८ |
| मूलशक्तिः . . . | ४४६ |
| मूलाग्निः . . . | ४४५ |
| मूलाधारम् ३, ३३०–२, ४२५, ४४२, ५१० | |
| मेघध्वनिः . . . | १७७ |
| मेलनम् . . | ३२२–६ |
| मोक्षदः . . . | २५९ |
| मोक्षद्वारम् . . . | २० |
| मौनम् . ५१, ५२, २४४ | |
| यमः ५१, १२८, १९३, २७४, ३६८, ५०३, ५०४, ५१८, ५१९ | |
| यशस्विनी १६२, १६३–२, १६४, १६६, ३४०, ३४१, ५०५, ५०६, ५२६ | |
| यज्ञसूत्रम् . . . | २३३ |
| योगः . . ५२८, ५३९ | |
| योगनिद्रा . . . | ५३६ |
| योगमुद्रा . . . | १२८ |
| योगवरः . . . | ५०८ |
| योगशिखा . . ४०४, ४४९ | |
| योगसिद्धः . . १४०, ३८४ | |
| योगाभ्यासविधिः . . | ५०१ |
| योगासनम् . . १२९, १४७ | |
| योगिपुंगवः . . . | ५२३ |

| पदम् | पुटसंख्या |
|---|---|
| योगिवर्ज्यानि . . | २१ |
| योगी . . | ४–२, १९९ |
| योनिः . . | १९७, ३३९ |
| योनिबन्धः . . . | ३८३ |
| योनिमुद्रा . . | २०९, ३४७ |
| योनिस्थानम् . | १९७, ३३८ |
| रत्नप्रभामण्डलम् . . | २८९ |
| रथमण्डलम् . . . | १८ |
| राका . . . | ४४४ |
| राजदन्तोर्ध्वकुण्डली . . | ३२८ |
| राजयोगः ३६७, ३८९, ४१६, ४१७ | |
| रुद्रग्रन्थिः २६४, ३१६, ३२१, ५१३–२ | |
| रेचकः १६, ९३, १४१, १७४, १९१, १९३, २९४, ३९८, ५०९, ५११–२ | |
| रेचपूरककुंभकाः . २६०, ४४६ | |
| लक्ष्यत्रयम् . . . | ३ |
| लक्ष्यत्रयावलोकनम् . . | २७७ |
| लज्जा . . . | ९२० |
| लम्बिका . . | २०४, ४४६ |
| लयः ३६७, ३६८, ४१६, ४८४ | |
| लयमन्त्रहठाः . . | ९०३ |
| लिंगम् . . | ३९१, ४२८ |
| लिंगिनः . . . | ३३ |
| लोहितः . . | २०९, ३४८ |
| वज्रम् . . . | २६४ |
| वज्रदर्पणम् . . . | २८९ |
| वज्रासनम् . . . | ३०८–२ |
| वज्रोळी . . | ३६९, ३८४ |
| वरुणा १६२, १६३, १६६, ९०९ | |
| वर्णाः . . . | २४ |
| वह्निशिखामण्डलम् . . | २८९ |
| वह्निस्थानम् . . . | ३७८ |
| वाचिकः . . | १९८, ९२० |
| वामदेवः . . | ४९८, ४९९–३ |
| वायवी . . . | २१६ |
| वायुद्वारम् . . . . | २० |
| वायुवेगिनी . . . | २१७ |
| वायुस्थानम् . . . | ३७९ |
| वाराणसी . . . | १६७ |
| वारुणी २१६, ४४४, ९२९, ९२६ | |
| वासना . . . | ३०७ |
| विघ्नदशकम् . . . | ३१९ |
| विचारणा . ४९२, ४९४–२ | |
| विजनः . . . | ९२ |
| विदेहमुक्तः . . ७८ to ८३ | |
| विद्युन्मात्रा . . . | २१७ |
| विपरीतकरणी . . | ३८४ |

| पदम् | पृष्ठसंख्या |
|---|---|
| विरजा | ४० |
| विरतिः | ३१९ |
| विराट् | ३३३ |
| विलम्बिनी | ४४३ |
| विशुद्धचक्रम् | ४२९, ४४२ |
| विशुद्धिः | ३३०–२, ३३८ |
| विश्वः | ३३३, ३९१, ४६६ |
| विश्वतैजसप्राज्ञात्मानः | ३९१ |
| विश्वोदारा | १६२, १६३, १६४, १६६, ४४४, ९०६ |
| विषयः | ३१९ |
| विषुवम् | १६७–२, २६० |
| विष्णुग्रन्थिः | २६४, ३१६, ३२०, ९१३–२ |
| वीरासनम् | १२९–२, १६०, ९०४, ९२१ |
| वृत्तिज्ञानम् | ९६, ९६३ |
| वेदवित् | ४० |
| वेदान्तश्रवणम् | १२९ |
| वेधः | ९१३–२ |
| वेधकत्रययोगः | ९१२ |
| वैखरी | ३३३, ४३२, ४३४ |
| वैद्युतः | ४४९ |
| वैराजम् | ४३० |
| वैष्णवी | २१७, ९३९ |
| व्यानः | २४, १३७–२, १६४, १६९–२, ३४१, ९२६, ९२७ |
| व्यानोदानौ | ३४१ |
| व्योम | ४ |
| व्योमपञ्चकम् | ९, २९७, २९८, ३३८ |
| व्योमरन्ध्रगतो नादः | २११ |
| व्रतम् | १२९, १९६, ९०४, ९२० |
| शक्तिचालः | ३०७, ३०८, ३१० |
| शक्तिस्थानम् | ९११ |
| शङ्खध्वनिः | १७७ |
| शङ्खिनी | १६२, १६३, १६४, १६६, २६४, ३४०, ३४१, ४४४, ९०६, ९२६ |
| शब्दः | १८ |
| शब्दब्रह्म | ३२ |
| शमादिषट्कसंपत्तिः | ४६८ |
| शमादिषड्गुणाः | १ |
| शशविषाणम् | ९६ |
| शशिमण्डलम् | २६४ |
| शाङ्करी | २१७ |
| शाम्भवस्थानम् | ९११ |
| शांभवीमुद्रा | ७, २८०, २८९, २९४ |
| शिखिस्थानम् | १३२, १६१, ९२३ |
| शीतली | ३१०, ३११, ४०८, ४१० |

| पदम् | पुटसंख्या |
|---|---|
| शुक्रः | ४९८, ४९९–२ |
| शुक्ला नाडी | ३८ |
| शुद्धः | २६ |
| शुभेच्छा | ४९२, ४९४–२ |
| शून्यता | ९९ |
| शूरा | ४४४ |
| शौचम् | १२९, १९३, १९९–२, ९०४, ९१९ |
| श्रीपर्वतम् | १६७ |
| षट्चक्रमण्डलम् | २६४, ३३८, ४९९, ४६२ |
| षट्त्रिंशत्तत्त्वानि | ४६४, ४६६ |
| षडंगयोगः | १४ |
| षड्ऊर्मयः | ४६६ |
| षड्भावविकृतिः | ४६६ |
| षण्णवतितत्त्वानि | ४६४, ४६७ |
| षण्मुखीकरणम् | २८६, ४२९ |
| षोडशी | २६४ |
| षोडशाधारम् | ३३८ |
| सकलः | २९७, ९९३, ९९४ |
| सकलनिष्कलम् | ९९३, ९९९ |
| सगुणध्यानम् | ३८० |
| सङ्कल्पः | ९८ to १०० |
| सच्चिदानन्दं ब्रह्म | १००, २८४ |
| सत्ता | २४७ |
| सत्यम् | १२९, १९३–२, १९४, ९०४, ९१९ |
| सत्यलोकः | २१४ |
| सत्वापत्तिः | ४९२, ४९४–२ |
| सद्भक्तता | ९६ |
| सन्तोषः | १२९, १९६, १९७–२, ९०४, ९२० |
| संपुटयोगः | ९०९ |
| समता | ९२ |
| समाधिः | १८, ९३, १९०, १९३, १८३, १८४, १९६, २६३, २७९, ३३७, ३६० ३६८, ३८०–३, ४८३, ९०३, ९१८, ९४९ |
| समानः | २४, १३७–२, १६४, १६९–२, ३४१, ९२६, ९२७ |
| समीरणः | ३०७ |
| सरस्वती | १६२, १६३, १६४, १६६, ३०९, ४३४, ४४४, ४९३, ९०६, ९२६, ९३० |
| सर्वसाक्षी | ३९१ |
| सहजोळी | ३६९ |
| साक्षात्कारः | ४७६ |
| साधनचतुष्टयम् | ९७ |
| सावित्री | ९३० |
| सिद्धान्तश्रवणम् | ९१, १३१, १९६, १९७, ३३७, ३६९, ९०४, ९२० |
| सिंहासनम् | १३०, १९९, १६०, १९६, ३६९, ९०४, ९२१ |
| सीविनी | ४४४ |
| सुखासनम् | १३१, १९९, १६१, ४४६ |
| सुधाचन्द्रमण्डलम् | २८४ |

| पदम् | पुटसंख्या |
|---|---|
| सुमहतीमुद्रा | ३४९ |
| सुवर्लोकः | २१४ |
| सुषिरम् | २० |
| सुषुप्तविश्वादयः | ४९२ |
| सुषुप्तिः | ५६३ |
| सुषुम्ना ३,३८,४०,४१,१३५, १६२–३, १६६, १९९, २११,२७७,३०९,३४०, ३४१,४१३,४४३,४५०–२, ४५१, ४५२, ४५३, ४५६, ५०५, ५०६–२, ५२५ | |
| सुषुम्नाद्वारम् | ४०५ |
| सुषुम्नाध्यानयोगः | ४५७ |
| सूक्ष्मम् १३, ४४४–२, ४४५ | |
| सूक्ष्मांगानि | २७५ |
| सूत्रम् | ४२८ |
| सूर्यः | ३१० |
| सूर्यग्रहणम् | १६७, २६० |
| सूर्यभेदः | ३११, ४०९ |
| सूर्यमण्डलम् | २८४ |
| सूर्याकाशः ५, २७९, २९७–२ | |
| सूर्याग्निः | ४४५ |
| सोमग्रहणम् | १६७ |
| सोमरूपकला | ४७ |
| सौम्या | ५२६ |
| स्थूलम् | ४४४–२ |
| स्थूलप्रकृतिः | ३५१ |
| स्थूलसूक्ष्मकारणानि | ४६६ |
| स्वप्नः | ४७९, ५६३ |
| स्वप्नवर्तनम् | १४७ |
| स्वप्नविश्वादयः | ४९२ |
| स्वरः | २८ |
| स्वस्तिकम् १८,१२९, १३८, १५९–२, १७६, ५०४, ५२१ | |
| स्वाधिष्ठानम् १९७,१९८,३२०, ३३०–२,३३८–२,३३९,४२५,४४२ | |
| स्वेदः | ५५ |
| हठः ३६७, ४१६–२ | |
| हस्तिजिह्वा १३५,१६२,१६३, १६४,१६६,३४०,३४१,४४४,५०६ | |
| हंसः २३०–३,२३१,२३४, २३६,२४०,२५३,२६२, २६५,३५४,४२५,४४२, ४५३,४५८,५११ | |
| हंसज्योतिः | २६२ |
| हंसमन्त्रम् | २६१, २६३ |
| हंसविद्या | २५४, २५५ |
| हंससूत्राणि | २३५ |
| हंसार्कप्रणवध्यानम् | २४१ |
| हिरण्यगर्भः | ३३३ |
| हृत्पद्मम् | १९२ |
| हृदयम् | १३६, ३३८ |
| हृद्वारम् | २० |
| हृद्बीजम् | १९४ |
| ह्रस्वः | ५१४ |
| ह्रीः १२९, १५६, १५८, ५०४, ५२० | |


Printed by J. R. Aria at the Vasanta Press, Adyar, Madras.

# Publications of the Adyar Library

## (Theosophical Society, Adyar, Madras, S. India)

1. A Preliminary List of the Samskrit and Prakrit MSS. in the Adyar Library.

The list comprises 11,842 MSS. distributed among 5,270 titles (Dēvanāgari character). Demi 8vo., pp. 279.

Boards — Re. 1-8.
Cloth — Rs. 2.

2. A Descriptive Catalogue of the Samskrit MSS. in the Adyar Library, by F. O. Schrader, Ph. D. Vol. I— UPANISHADS.

The collection described in this volume comprises 1,322 MSS. distributed among 365 works. (Dēvanāgari and English.) Royal 8vo., pp. xi, 315.

Cloth — Rs. 7-8.

3. The Minor Upanishads, critically edited for the Adyar Library by F. O. Schrader, Ph. D. Vol. I— *Samnyāsa Upanishads.*

Texts in Dēvanāgari. Preface, critical notes, etc., in English. Royal 8vo., pp. liv, 501.

Cloth — Rs. 15.

4. Ahirbudhnya-Samhitā of the Pāncharātra Āgama, edited for the Adyar Library by Pandit M. D. Rāmānujāchārya, of the Adyar Library, under the supervision of F. Otto Schrader, Ph. D. 2 vols.

(Samskrit Text only, in Dēvanāgari.) Royal 8vo., pp. 59, 674.

Cloth — Rs. 15.

5. Introduction to the Pāncharātra and the Ahirbudhnya-Samhitā, by F. O. Schrader, Ph. D.

Part I. The literature of the Pāncharātras.
Part II. The philosophy of the Pāncharātras.
Part III. The Ahirbudhnya-Samhitā.

(English) Royal 8vo., pp. 178.

Cloth — Rs. 3.

6. The *Yoga Upanishads* with the Commentary of Śrī Upanishad-Brahma-Yogin, edited by Pandit A. Mahadeva Sastri, B.A., Director, Adyar Library.

(Samskrit, in Dēvanāgari). Demi 8vo., pp. 44, 586.

This Commentary extends to all the one-hundred-and-eight Upanishads.

Cloth — Rs. 6.

7. The *Sāmānya-Vedānta Upanishads* with the Commentary of Sri Upanishad-Brahma-Yogin, edited by Pandit A. Mahadeva Sastri, B. A., Director, Adyar Library. (*In the Press*)